Sr No. 596. (67)

Bibliotheca Indica.
Aitareya Brahmana
of the Rg-Veda
Vol I

Call No. II-E-51.
Acc No 5877.

Tissue and Gather by
A. P. Sutter
28-3-74

BI-134
V-1

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

Published by

THE ASIATIC SOCIETY OF BENGAL.

New series Nos. 847, 849, 850, 852, and 861.

THE AITAREYA BRÁHMAṆA

OF THE ṚG-VEDA,

WITH THE

Commentary of Sáyaṇa Áchárya.

EDITED BY

PAṆḌIT SATYAVRATA SÁMAS'RAMÍ,

Associate Member of the Asiatic Society of Bengal; Editor,
Author, Commentator, Annotator, Compiler, Translator,
& Publisher of different Vedic Works &c. &c.

VOL. I.

Calcutta:
Printed by M. N. Sarkár, SATYA PRESS.
1895.

॥ ऐतरेयब्राह्मणम् ॥

(ऋग्वेदस्य)

भगवत्सायणाचार्यकृत-'वेदार्थप्रकाश'-नामभाष्ययुतम् ।

वङ्गदेशीयासियातिकसमितेरनुमत्या व्ययेन च,

सामश्रमिश्रीसत्यव्रतशर्म्मणा
यथामति संशोध्य सण्टीक्य च सम्पादितम् ।

॥ प्रथमभागः ॥
(प्रथमद्वितीयपञ्चिकात्मकः)

कलिकाता-राजधान्याम्,

१८५२-संवत्सरसमायां सत्ययन्त्रेण यत्नतो मुद्रितम् ॥

ஒ I 134

Sl.no .. 019325
5877

॥ सम्पादकोक्तिः ॥

अथैतदैतरेयं नाम बह्वृचब्राह्मणं दाक्षिणात्येषु महाराष्ट्रीयादिब्राह्मणाना मध्ययनाध्यापनाविच्छेदात् यदि च नाद्यापि लुप्तकल्पतां गतम्, तथापि 'स्वाध्यायोऽध्येतव्यः' इत्येवमादिश्रुत्यादेः पाठमात्रविधिपर्य्यवसायित्वमिति मन्यमानानां तेषां प्रायो विलुप्तार्थाध्ययनप्रवृत्तेः एतदर्थाभिगमाय कृतस्यातिप्राचीनस्यापि माधवीयवेदार्थप्रकाशनामभाष्यस्य दुष्प्रापत्वं नितरां सम्पन्नम्। तदद्य तत्सहितस्यैवास्य प्रकटनाय यतमानोऽहमास्यायितिकसमितेरनुमति मवाप्य सम्पादने प्रवृत्तः।

ब्राह्मणस्थमन्त्रादीनां भाष्योद्धृतश्रुत्यादीनां च सङ्केताक्षरैः स्थानानि निर्देष्टुं, तत्रत्ययाज्ञिकपदानि च याज्ञिकग्रन्थादिभिश्च परिचाययितुं, टीप्पन्यादिभिर्भाष्याक्षराणां दुर्बोधत्व मपनोदयितुञ्चास्तीह मे प्रयासः। सञ्जातेऽस्य सम्पादने समालोचनं विविधसूचीसङ्कलनं च करिष्यामि यथाज्ञान मित्येवमपीच्छा विद्यते।

एतस्य पाठशुद्धिं पाठभेदांश्चापादयितु मनुपदं विवरिष्यमाणानि द्वादश पुस्तकानि सङ्गृह्य कार्य्यं मारब्धम्; अद्याप्यधिकपुस्तकसङ्ग्रहाय यत्नो मे न विलयं गतः।

तदिदं सम्पादन मीशकृपया सम्पूर्णता माप्य बह्वृचाना मनूचानानां, विविधविद्यालोचनपरायणानां तत्त्वदर्शिनां च सर्वेषां समादरणीयता मेतदुपागमिष्यत्, फलितः सर्वविषयको मनोरथद्रुमश्चेति शम् ॥

कलिकाता। संवत् १९५२।

सामश्रमिश्रीसत्यव्रतशर्म्मा,
(सम्पादकः)

॥ अथ द्वादशादर्शपुस्तकविवरणम् ॥

क … ऐतरेयब्राह्मणम्—सम्पादकपुस्तकालयीयम्; ख्री०१८६३ डा०हौग्-सम्पादितम्, सम्पूर्णम्, शुद्धम्।

ख … ऐतरेयब्राह्मणम्—गवर्णमेण्टपुस्तकालयीयम्; १७९६-संवल्लिखितम्, अतृतीयपञ्चमपञ्चिकम्, विशुद्धम्।

ग … ऐतरेयब्राह्मणम्—गवर्णमेण्टपुस्तकालयीयं द्वितीयम्; १६६०शकलिखितम्, सम्पूर्णम्, विशुद्धम्।

घ … ऐतरेयब्राह्मणम्—वेनारस्कलेजपुस्तकालयीयम्; १८३६-संवल्लिखित मसप्तमपञ्चिकम्, प्रायःशुद्धम्।

ङ … ऐतरेयब्राह्मणम्—काशीवासिपण्डितश्रीविन्ध्येश्वरीप्रसादस्य; १८६३-संवल्लिखितम् सम्पूर्णम्, शुद्धम्।

च … ऐतरेयब्राह्मणम्—आस्यायितिकसोसाइटीपुस्तकालयीयम्; षष्ठसप्तमपञ्चिकाद्वयमात्रम्प्राचीनं विशुद्धञ्च।

छ वा टी०क ऐतरेयभाष्यम्—आदिब्राह्मसमाजपुस्तकालयीयम्; १९०५-संवल्लिखितम्प्रथमद्वितीयपञ्चिकामात्रं शुद्धम्।

ज वा टी०ख सभाष्यैतरेयकम्—वेनारसकलेजपुस्तकालयीयम्; अनतिप्राचीनम्, अतृतीयपञ्चिकम्, प्रायःशुद्धम्।

झ वा टी०ग सभाष्यैतरेयकम्—गवर्णमेण्टपुस्तकालयीयम्; १९२२-संवल्लिखितम,५-७-८-पञ्चिकाहीन मनत्यशुद्धम्।

ञ वा टी०घ सभाष्यैतरेयकम्—कलिकातासंस्कृतकलेजस्य; १६६९-संवल्लिखितम्, द्वितीयपञ्चिकातः पूर्ण मतिशुद्धम्।

ट वा टी० ङ सभाष्यैतरेयकम्—कलिकातासंस्कृतकलेजस्य; १८३६-संवल्लिखितम्, चतुर्थपञ्चमपञ्चिकाद्वयम्, शुद्धम्।

ठ वा टी० च सभाष्यैतरेयकम्—आस्यायितिकसोसाइटीतोलब्धं; त्रयोदशाध्यायीयपञ्चमखण्डतः पूर्णम्, अनतिशुद्धम्।

॥ सङ्केताक्षरसूची ॥

अ०	अध्यायः ।
अथ०सं०	अथर्वसंहिता ।
अदा०	अदादिगणीयः ।
अधि०	अधिकरणम् ।
अधि०मा०	अधिकरणमाला ।
अनु०	अनुवाकः ।
अने०	अनेकार्थसङ्ग्रहः ।
अम०	अमरः ।
अर्थ०	अर्थसङ्ग्रहः ।
अव्य०	अव्ययकाण्डम् ।
आ० वा आर०	आरण्यकम् ।
आ०त०	आह्निकतत्त्वम् ।
आप०य०प०सू०	आपस्तम्बीययज्ञपरिभाषासूत्रम् ।
आश्व०	आश्वलायनीयम् ।
उ०	पूर्ववत् उपरिष्टात् ।
उ० आ०	उत्तरार्चिकः ।
उणा०	उणादिः ।
उप०	उपनिषत् ।
ऋ० सं०	ऋग्वेदसंहिता ।
ए.सो.	एसियाटिकसोसाइटी ।
ऐ० आ०	ऐतरेयारण्यकम् ।
ऐ० ब्रा०	ऐतरेयब्राह्मणम् ।
कपि०सू०	कपिलसूत्रम् ।
का० १	प्रथमं काण्डम् ।
का०छ०अ०	कात्यायनीयछन्दोऽनुक्रमणी ।
कात्या०	कात्यायनीयम् ।
को०	कोषः ।
ख०	खण्डः ।
गा० ना०	गार्ग्यनारायणीया ।
गृ०	गृह्यसूत्रम् ।
गो०	गोभिलीयम् ।
गौ०	गौतमीयम् ।
छ० आ०	छन्दआर्चिकः ।
छा०	छान्दोग्यम् ।
जै०	जैमिनीयम् ।
टी०	टीका ।
त०सं०	तर्कसङ्ग्रहः ।
ता०ब्रा०	ताण्ड्यब्राह्मणम् ।
तै०आ०	तैत्तिरीयारण्यकम् ।
तै०ब्रा०	तैत्तिरीयब्राह्मणम् ।
तै० सं०	तैत्तिरीयसंहिता ।
द्र०	द्रष्टव्यम् ।
धा०पा०	धातुपाठः ।
ना०शि०	नारदीया शिक्षा ।

नि० वा निरु०	निरुक्तम्।
नि०आ०	निरुक्तालोचनम्।
निघ०	निघण्टुः।
निवि०	निविदध्यायः।
पं०	इतः परस्तात्।
पं०	पङ्क्तिः।
पा०	पाणिनीयम्।
पा०१	प्रथमः पादः।
पा० महाभा०	पातञ्जलं महाभाष्यम्।
पा० शि०	पाणिनीया शिक्षा।
पि०	पिङ्गलसूत्रम्।
पु०	इतः पुरस्तात्।
पृ०	पृष्ठा।
प्र०	प्रपाठकः।
प्राति०	प्रातिशाख्यम्।
बृह०	बृहदारण्यकम्।
ब्रा०	ब्राह्मणम्।
भा०	भाष्यम्।
भा०१	प्रथमो भागः।
भाग०पु०	भागवतपुराणम्।
भू०	भूमिका।
भू०प०	भ्वादि-परस्मैपदी।
भ्वा०	भ्वादिगणीयः।
म० सं०	मनुसंहिता।
महाभा०	महाभारतम्।
मी०	मीमांसा।
मी०प०	मीमांसापरिभाषा।
मु०	मुद्रितम्।
मेदि०	मेदिनीकारः।
याज्ञ०सं०	याज्ञवल्क्यसंहिता।
या० दे०	याज्ञिकदेवः (का०श्रौ०सू०टीकाकारः)
रघु०	रघुवंश-काव्यम्।
रामा०	वाल्मीकिरामायणम्।
लाट्या०	लाट्यायनीयम्।
लौ०	लौगाक्षिभास्करः।
वा०	कात्यायनवार्त्तिकम्।
वा०सं०	वाजसनेयसंहिता।
विश्व०	विश्वकोषः।
वृ०	वृत्तिः।
वेदा०सा०	वेदान्तसारः।
वै०	वैदिकीप्रकरणम्।
शत०ब्रा०	शतपथब्राह्मणम्।
शबरः	शबरस्वामी (मीमांसासूत्राणां भाष्यकारः)।
सुश्रु०	सुश्रुतः।
श्रौ०	श्रौतसूत्रम्।

⁂

श्लो०	... श्लोकः ।	साङ्ख्या० ...	साङ्ख्यायनीयम् ।
षड्०ब्रा०	षड्विंशब्राह्मणम् ।	सि॰ कौ० ...	सिद्धान्तकौमुदी ।
सं०	... संहिता ।	सू० ...	सूत्रम् ।
सा०	... सायणीयम् ।	हे० ...	हेमचन्द्रः ।

॥ अथ परिच्छेदसूची ॥

॥ अथ प्रथमपञ्चिका ॥

(१) अथ प्रथमाध्यायः (अग्निष्टोमारम्भः) १२
  तत्र प्रथमः खण्डः (दीक्षणीयेष्टिविधिः) ... ,,
  अथ द्वितीयः खण्डः (दीक्षणीयेष्टिस्तुतिः) ... २८
  अथ तृतीयः खण्डः (तत्र संस्कृतिः) ... ३१
  अथ चतुर्थः खण्डः (तद्याज्यानुवाक्ये) ... ४१
  अथ पञ्चमः खण्डः (तदीयसंयाज्याः) .. ४७
  अथ षष्ठः खण्डः (तत्र सत्यकथनादिः) ... ५१
(२) अथ द्वितीयाध्यायः (तदेवेष्टिप्रकरणम्) ६१
  तत्र प्रथमः खण्डः (प्रायणीयेष्टिविधिः) ... ,,
  अथ द्वितीयः खण्डः (तदङ्गकर्माणि) ... ६७
  अथ तृतीयः खण्डः (तद्देवतादिकम्) ... [illegible]
  अथ चतुर्थः खण्डः (उदयनीयेष्टिविधिः) ... ७८
  अथ पञ्चमः खण्डः (तद्विशेषविषयः) ... ८१

(३) अथ तृतीयाध्याय: (तद्देवेष्टिप्रकरणम्) ९२
तत्र प्रथम: खण्ड: (सोमक्रयदिगुपदेशादि) ... ,,
अथ द्वितीय: खण्ड: (सोमप्रवहण्य: ऋच:) ... ९५
अथ तृतीय: खण्ड: (सोमोपावहरणम्) ... १०७
अथ चतुर्थ: खण्ड: (आतिथ्येष्टिविधि:) ... ११२
अथ पञ्चम: खण्ड: (अग्निमन्थनीया ऋच:) ११६
अथ षष्ठ: खण्ड: (आतिथ्यायां विशेषविधय:) १२१
(४) अथ चतुर्थाध्याय: (प्रवर्ग्यप्रकरणम्) १४०
तत्र प्रथम: खण्ड: (अभिष्टवोपक्रम:) ... ,,
अथ द्वितीय खण्ड: (अभिष्टवनीया ऋच:) ... १४३
अथ तृतीय: खण्ड: (अभिष्टवनीया ऋच:) ... १४७
अथ चतुर्थ: खण्ड: (अभिष्टवनीयसूक्तानि) ... १४९
अथ पञ्चम: खण्ड: (तत्रैवोत्तरपटलम्) ... १५८
अथ षष्ठ: खण्ड: (उपसदिष्टिविधि:) ... १६९
अथ सप्तम: खण्ड: (तानूनप्त्रविधानम्) ... १७६
अथ अष्टम: खण्ड: (धर्मसम्भारा व्रतोपायनञ्च) १८०
अथ नवम: खण्ड: (आप्यायननिह्नवे) ... १८८
(५) अथ पञ्चमाध्याय: (सोमप्रकरणम्) १९५
तत्र प्रथम: खण्ड: (राजक्रयब्राह्मणम्) ... ,,
अथ द्वितीय: खण्ड: (अग्निप्रणयनीया ऋच:) १९९
अथ तृतीय: खण्ड: (हविर्धानप्रवर्तनीया ऋच:) २१२
अथ चतुर्थ: खण्ड: (अग्नीषोमप्रणयनीया ऋच:) २२१

॥ अथ द्वितीयपञ्चिका ॥

(६) अथ प्रथमाध्याय: (यूपप्रकरणम्) २३३

तत्र प्रथमः खण्डः (यूपविधिः) २३२
अथ द्वितीयः खण्डः (यूपाञ्जनम्) ... २४०
अथ तृतीयः खण्डः (यूपप्रहरणविचारः) ... २५१
अथ चतुर्थः खण्डः (आप्रीणां विधानम्) ... २६०
अथ पञ्चमः खण्डः (पर्य्यग्निकरणाः उपप्रैषश्च) २६७
अथ षष्ठः खण्डः (अध्रिगुप्रैषविधिव्याख्याने) ... २७१
अथ सप्तमः खण्डः (अध्रिगुप्रैषव्याख्याशेषः) ... २८५
अथ अष्टमः खण्डः (पशुपुरोडाशविधिः) ... २९५
अथ नवमः खण्डः (वपादियाज्यामन्त्राः) ... ३००
अथ दशमः खण्डः (मनोतासूक्तविधिः, अङ्गयागस्य याज्याविधिः, वनस्पतियागविधिः, स्विष्टकृद्यागविधिः, इडोपह्वानञ्च) ... ३०५
(७) अथ द्वितीयाध्यायः (पशुप्रैषप्रातरनुवाकौ) ३११
तत्र प्रथमः खण्डः (पर्य्यग्निकरणादिविषयः) ... ,,
अथ द्वितीयः खण्डः (स्तोकानुवचनीयाः) ... ३१९
अथ तृतीयः खण्डः (स्वाहाकृतिविचारः) ... ३२५
अथ चतुर्थः खण्डः (वपाधानविधिः) ... ३३०
अथ पञ्चमः खण्डः (प्रातरनुवाकविधिः) ... ३३६
अथ षष्ठः खण्डः (प्रातरनुवाकीया ऋचः) . ३४२
अथ सप्तमः खण्डः (काम्याः प्रातरनुवाकीयाः) ३४७
अथ अष्टमः खण्डः (प्रातरनुवाकानुवचनप्रकारः) ३[illegible]
(८) अथ तृतीयाध्यायः (यज्ञप्रकरणारम्भः) ... ... ३[illegible]
तत्र प्रथमः खण्डः (अपोनप्त्रीयानुवचनम्) ,,
अथ द्वितीयः खण्डः (तद्विशेषविषयश्च) ... ३६७

··· अथ तृतीयः खण्डः (उपांश्वन्तर्यामग्रहौ) ··· ३७८
अथ चतुर्थः खण्डः (बहिष्पवमानार्थं प्रसर्पणम्) ३८१
अथ पञ्चमः खण्डः (सवनीयपुरोडाशविधिः) ३८७
अथ षष्ठः खण्डः (तद्विशेषोपदेशाः) ··· ··· ३९२
(९) अथ चतुर्थाध्यायः (द्विदेवत्यग्रहा ऋतुग्रहाश्च) ··· ३९९
अथ प्रथमः खण्डः (द्विदेवत्यग्रहविधिः) ··· ,,
अथ द्वितीयः खण्डः (द्विदेवत्यग्रहप्रशंसा) ··· ४०२
अथ तृतीयः खण्डः (तत्रैव विशेषविधयः) ··· ४०८
अथ चतुर्थः खण्डः (,,) ··· ४१२
अथ पञ्चमः खण्डः (ऋतुयाजविधिः) ··· ४१७
अथः षष्ठः खण्ड (इळोपह्वानग्रहशेषभक्षणयोः) ४२०
अथ सप्तमः खण्डः (तूष्णींशंसविधिः) ··· ४२३
अथ अष्टमः खण्डः (तूष्णींशंसप्रशंसा) ··· ४३०
(१०) अथ पञ्चमाध्यायः (निविदादिप्रकरणम्) ··· ४३४
तत्र प्रथमः खण्डः (आह्वावनिवित्सूक्तानां विधिः) ,,
अथ द्वितीयः खण्डः (निवित्पदानां व्याख्या) ४३८
अथ तृतीयः खण्डः (तदनन्तरभाविसूक्तप्रशंसा) ४४२
अथ चतुर्थः खण्डः (आज्यशस्त्र मैन्द्राग्नशस्त्रञ्च) ४४५
अथ पञ्चमः खण्डः (आज्यशस्त्रकालः) ··· ४५०
अथ षष्ठः खण्डः (होतृजपमन्त्रव्याख्या) ··· ४५७
अथ सप्तमः खण्डः (तूष्णींशंसविधानम्) ··· ४६२
अथ अष्टमः खण्डः (आज्यशस्त्रसूक्तव्याख्या) ४६८

॥ अथ याज्ञिकशब्दसूची ॥

शब्दः ... पृष्ठा
अक्षरपङ्क्तिः २९४
अग्निप्रणयनीयाः २०२
अग्निमन्थनीयाः ११९
अग्निविहरणम् ४४७
अग्निष्टोमः ९
अग्नीषोमप्रणयनम् २३१
अग्नीषोमप्रणयनीयाः २२३
अग्नीषोमीयः ... १८६, २७०, ३९५
अङ्गकर्माणि ३७४
अङ्गावदानम् ३०६
आङ्गिरसामयनम् ८
अच्छावाकः १७८
अच्छावाकीयशस्त्रम् ४४९
अतिथिः ११३
अतिरात्रः ९
अत्यग्निष्टोमः ९
अदितिः ६३
अध्रिगुः २७३
अध्वरकल्पा २७
अध्वर्युः १७८
अनुप्रहरणम् २५१
अनुबन्ध्या ३९५
अनुमन्त्रणम् ... ३८१, ३८३
अनुयाजदेवाः ३६०
अनुयाजाः ... ६९, ८५, १३५

शब्दः ... पृष्ठा
अनुवषट्कारः ... १६२, ३१९
अनुव्याहारः ३२९
अन्तर्यामग्रहः ३७९
अपरदीक्षी ४०
अपानः ७२
अपूपः ३२६
अपोनप्त्रीयाः ३६४
अप्तोर्यामः ९
अप्रतिष्ठितः १९
अभिमर्शनम् ३८१
अभिष्टवाः १५७
अमृताहुतिः ३३१
अवदानम् ३१८
अष्टाकपालः १९, २२०
असोमपाः (देवाः) ... ३५९
आगूःश्रवणम् ४१५
आग्नावैष्णवः १४, ३९०
आग्नीध्रः १७८, ४४७
आग्नेयः २८०
आज्यम् ३१
आज्यशस्त्रम् ४३४
[illegible] ३८५, ४४७
आञ्जनम् ३६
आतिथ्येष्टिः ... ११३, ११६, ३८६
आदित्यानामयनम् ८

शब्दः ... ... पृष्ठा
आध्वर्यवम् १०
आप्तोर्यामः ९
आप्रियः २६१, २६६
आयुतम् ३५
आयुष्टोमः ८
आरण्यकम् ८
आरादुपकारकाणि ... २९८
आर्भवपवमानस्तोत्राणि ... ३८५
आशीः १०३
आश्विनग्रहः ४०२
आश्वीनः ३५१
आहावः .. ४२८, ४३५, ४५९
आहुतिः ३०
इडाप्राशनम् ४२२
इडोपह्वानम् ... ३०५, ३०९, ४२२
इतिहासः ६
इष्टिः ३०
उक्थ्यः ९
उत्पूतम् ३९१
उदयनीया ६३
उदक्करणः ३७०
उदृक् १९१, ४२८
उद्गाता १७८
उद्गीथम् १०
उन्नेता १०८
उपप्रैषः २७०
उपयमनी १६६
उपयाजदेवाः ३६०
उपवसथः ३३९, ३९५

शब्दः ... ... पृष्ठा
उपवादः ४२९
उपसद् ... १६९, १७४, १८८, १८६
उपाकरणम् ३४१
उपांशु १९८, ४५९
उपांशुग्रहः ३०९
उपांशुसवनः ३८१
ऊतिः ३१
ऊर्णास्तुकाः २०८
ऊवध्यगोहम् २१६
ऊहः ९, ३१
ऋगावानम् ३६७
ऋतम् ५६
ऋतुग्रहाः ४१८
ऋतुयाजाः ४१८
एकधनाः ३७०, ३७४
एकादशकपालः १६, ३९०
ऐतरेयकम् ७
ऐन्द्रवायवग्रहः ४९२
ऐन्द्राग्नशस्त्रम् ४५९, ४४७
औद्गात्रम् १०
औपवसथ्यः १८६, ३३९
करम्भः ३९३, ३९६
कर्णातर्द्दः २२०
कल्पः ७
किंशारूणि ३०१
खरः १४५
गवामयनम ८
गाथा ७
गायत्रम ३९०

शब्दः ... पृष्ठा
गुणकर्माणि १९८
गोष्टोमः ८
ग्रावस्तुत् १०८
घर्मः ११६
घृतचरुः १९
घृतपदी २०६
घृतम् ३५
चतुरवत्ती ३३२
चमसिनाम् ५६
चमसभक्षणम् ४७२
चमसाध्वर्युः ३७२
छदिः २१६
जागतम् ३९०
ज्योतिष्टोमः ८
तपः ३४
तानूनप्त्रम् ... १७८, १८०, १८३
तीर्थम् ३८७
तुषाः २०१
तूष्णींशंसः ४२५, ४६
——(त्रिपदः) ... ४२७
——(षट्पदः) ... ४३१
तृचः ९९
तृतीयसवनम् ३९०, ३९५
[illegible] .. ३५९, ४५६
दिक्पालः . .. १९, ११८
[illegible] ३९०
दर्भपिञ्जूलम् ... ४६
दीक्षणीया १५, ५९
दीक्षा १५, ३४

शब्दः ... पृष्ठा
दीक्षितविमितः ... ३७
द्वादशकपालः ... ३९०
द्वादशाहः ... ८
द्विदेवत्याः ... ४०९
धानाः १९३, ३९६
धाय्या ९३
धिष्ण्यानि ... १७०
नराशंसपङ्क्तिः ... ३९५
नवकपालः ... ११३
नाकः ११७
नाराशंस्यः ... ७
निगदाः ३०८, ३७४
निर्वापः ... १५, ३८९
निविदः .. ४७५, ४६५
निष्कासम् ... ८७
निष्पक्वम् ... ७४
निह्नवः १९१
नेष्टा १०८
पञ्चावत्ती ३३२
पञ्चावत्तदानानि ... ३३३
पत्नीसंयाजाः ... ८६
पयस्या ... ३८७, ३९३, ३९४
परिधानीया ... ४१०
परिवापः ३९३, ३९५
परिस्रजा १९८, १९६
पर्यग्निकरणम् ... ३९८
पशुपुरोडाशः ... २९७, ३१७
पितृयज्ञः ९६
पिष्टम् ३०२

शब्दः ... पृष्ठा
पुरावृतम् ७
पुरोडाशः ... १४, २१५, ३८९
पुरोनुवाक्या ... ४४, ४७, ४७३
पुरोरुक् ४६५
पूर्वदीक्षी ... २९
पृष्ठस्तोत्राणि ... ३८५
पोता १७८
पौर्णमासम् ... २१
पौष्ण २८०
प्रकृतिः ९
प्रकृतिगामी ... २८
प्रतिप्रस्थाता ... १७८
प्रतिहर्ता ... १७८
प्रधानकर्माणि ... १९८, २७४
प्रयाजदेवाः २९०
प्रयाजाः ... ४९, ८५, १९५ २९१
प्रवर्ग्यः १६६, १६९, १८०
प्रसवनम् १६६
प्रसर्पणम् (बहिष्पवमानार्थम्) ३८९
प्रस्तरः १९४, २५७
प्रणीता १७८
प्राशः ७२
प्रातरनुवाकः ... ३१८
प्रातःसवनम् ... ३९०, ३९५
प्रायणीया ... ६१, ६२, ८८, १६७
प्रैषः ४१५
फलीकरणम् ... २८७, ३०१
बहिष्पवमानम् ... ३८९, ३९५, ४५१
बहुयाजी ...

शब्दः ... पृष्ठा
बार्हस्पत्यः ३९०
ब्रह्मत्वम् १०
ब्रह्मबन्धुः १२९
ब्रह्मा १७८
ब्राह्मणम् ९
ब्राह्मणाच्छंसी ... १७८
मख, ... ३५
महाभिषवः ... ३८२
महावीरः १६६
माध्यन्दिनपवमानस्तोत्राणि ३८५
माध्यन्दिनं सवनम् ... ३९०, ४९५
मित्रविन्देष्टिः ... २७
मैत्री २२०
मेषपतिः ... २७४
मेषः २८१
मैत्रावरुणः ... १७८
मैत्रावरुणग्रहः ... ४०२
यजनम् ४५३
यागः १५
याज्या ४५, ४७, ४७३
यूपः २३५
यूपाञ्जनीयाः ... २४२
यूपैकादशिनी ... २८०
रराटी २२८
राजीवम् १२१
राजक्रयः २३५
लक्ष्म ४५
वनस्पतियागः ... ३०८
वपाकाण्डम् ... [illegible]

शब्दः	पृष्ठा
वषट्कारः	४१५
वसतीवर्य्यः	३७०—३७४
वाग्विसर्गः	२०५, ३८०
वाजपेयः	९
वाक्याः	२८१
विकल्पः	१४८
विचक्षणम्	५६
विराट्	५३
वेदः	१,२
वेनः	१४८
वैप्रुषाः (होमाः)	३८२
वैमृधः	२८
व्यतिषङ्गः	८९
व्याहृतयः	४३१
शंसनम्	४५१
शमिता	२७२
शस्त्राणि	१३,४५३
शल्किणाः	४४९
श्रिता	१०६
षड्ढः	४६५
षोडशी	९
संस्थागा	४९
संवत्सरसत्राणि	८
संसवः	३९
संस्था	९
सञ्ज्ञपनम्	२९१, ३१६
सत्यम्	५९
सदस्यः	१७८
सदोमण्डपम्	१७०

शब्दः	पृष्ठा
सन्निपत्योपकारकाणि	२९८
सप्तदशर्त्विजः	१७८
समिष्टयजूंषि	८६
सम्भाराः	२०८
सवनपङ्क्तिः	१९५
सवनानि (पञ्च)	३९५
सवनीयपुरोडाशाः	३८८, ३९३
सवनीयाः	१७०,३८६
सादनम्	३१९
सामिधेनी	२३, २६, २१०
सारस्वती	३८०
सुत्या	८८
सुब्रह्मण्यः	१७८
सुमत्पद्ग्दे	३९४, ४२८, ४६०
सोमक्रयणी	१९७, १९९
सोमपाः (देवाः)	३५९
सोमपीथः	४२२
सोमप्रवहण्यः	१०६
सोमोपावहरणम्	१०९
सौमिकं काण्डम्	१७
सौम्यः	२८०
स्तवनम्	४५१
स्तोकाः	३२०
स्तोकानुवचनीयाः	३२७
स्तोत्राः	३३५
स्तोमम्	४५१
स्फ्यः	३७०
स्वाधारः	१९३
स्वधा	२९१

शब्दः पृष्ठा
[illegible]:
[illegible]: २५४, २५९
[illegible]ष्टकयागः ... ... , ३०८
हविर्धानप्रवर्त्तनम् ... २१५
हविर्धानप्रवर्तनीयाः ... २१४
हविर्धानम् ... १७१, २१४, २२०, २२४
हविष्यकृतिः ३९३
हवींषि ३८९, ३९१
होता ३२, १७८
होतृजपः ४२८, ४५९
होत्रम् १०

॥ अथेहालोच्यस्थानसूची ॥

पृ०	पं०	पृ०	पं०	पृ०	पं०	पृ०	पं०	पृ०	पं०
१२	६	३४	३	४८	१	५३	१२	५४	२
५४	८	६०	१८	६०	२०	६१	२	६१	३
६१	४	६१	६	८४	१४	९२	७	९२	८
९६	६	९६	१३	११२	११	११७	१३	११७	२०
११८	२०	११९	२	१४७	१०	१५१	६	१५९	१५
१८०	१३	१८१	७	१८१	९	१८१	१०	१९५	७
२००	१६	२१३	५	२१३	९	२२२	१३	२४२	१
२५१	११	२५१	१७	२५२	२	२५३	४	२६८	१
२७१	१८	२७२	१३	२८५	१९	२९४	१९	२९५	३
३००	११	३०१	२	३०१	५	३११	१६	३१२	७
३२०	१६	३३०	१४	३३१	७	३३१	१०	३३५	१७
३४७	९	३४७	१२	३४७	१६	३४८	१	३४८	८
३५५	७	३५५	११	३६२	५	३८२	२	३८८	८
४००	१	४०९	८	४१४	८	४१७	१९	४२४	१८
४३०	९	४३९	१६	४४३	१८	४४६	१६	४५०	१
४५१	१०	४५१	१७	४५७	२१	४६३	१०	४६३	१२
४६३	१७	४६८	५	४६८	१५	४६८	१९	४६९	४

अथ

॥ ऐतरेयब्राह्मणम् ॥

(तत्र)

॥ सायणभाष्यभूमिका ॥

॥ श्रीगणेशाय नमः ॥

वागीशाद्याः सुमनसः सर्वार्थाना मुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
यस्य निश्वसितं * वेदा यो वेदेभ्योऽखिलं जगत् —
निर्ममे ; तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ २ ॥
तत्कटाक्षेण तद्रूपं दधद्बुक्कमहीपतिः ।
आदिशन्माधवाचार्यं † वेदार्थस्य प्रकाशने ॥ ३ ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसङ्ग्रहात् ।
कृपालुर्माधवाचार्यो ‡ वेदार्थं वक्तु मुद्यतः ॥ ४ ॥

ननु कोऽयं वेदो नाम? के वा तस्य विषयप्रयोजनसम्बन्धाधिकारिणः? कथं वा तस्य प्रामाण्यम्? न खल्वेतस्मिन् सर्वस्मिन् असति वेदो व्याख्यानयोग्यो भवति। अत्रोच्यते—

इष्टप्राप्त्यनिष्टपरिहारयोरलौकिक मुपायं यो ग्रन्थो वेदयति

---

* निश्वसिता क। निःश्वसितं ग। † आदिशत्सायणाचार्यं ग।

‡ 'कृपालुः सायणाचार्यो'—इति मुद्रितेषु ऐतरेयारण्यक-तैत्तिरीयारण्यक-सामवेदीय छन्द आरण्यक-उत्तरा भाष्येषु माध्यन्दिनब्राह्मणभाष्येषु च पाठः।

स वेदः। अलौकिकपदेन प्रत्यक्षानुमाने व्यावर्त्त्येते। अनुभूयमानस्य स्रक्चन्दनवनितादेरिष्टप्राप्तिहेतुत्व मौषधादेरनिष्टपरिहारहेतुत्वं च प्रत्यक्षतः सिद्धम्, स्वेनानुभविष्यमाणस्य पुरुषान्तरगतस्य च तथात्व मनुमानगम्यम्। एवं तर्हि भाविजन्मगत मप्यनुमानगम्य मिति चेत्, न; तद्विशेषस्यानभिगमात्*। न खलु ज्योतिष्टोमादिरिष्टप्राप्तिहेतुः,—कलञ्जभक्षणवर्जनादिरनिष्टपरिहारहेतुरित्यमु मर्थं वेदव्यतिरेकेणानुमानसहस्रेणापि तार्किकशिरोमणिरप्यवगन्तुं शक्नोति; तस्माद् अलौकिकोपायबोधको वेद इति लक्षणस्य नातिव्याप्तिः। अतएवोक्तम्—

"प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता॥"-इति।

स एवोपायो वेदस्य विषयः। तद्बोध एव प्रयोजनम्। तद्बोधार्थी चाधिकारी। तेन सहोपकार्योपकारकभावः सम्बन्धः।

नन्वेवं सति स्त्रीशूद्रसहिताः सर्वेऽपि वेदाधिकारिणः स्युः। इष्टं मे स्यादनिष्टं मा भूदित्याशिषः सार्वजनीनत्वात्। मैवम्; स्त्रीशूद्रयोः सत्यप्युपायबोधार्थित्वे हेत्वन्तरेण वेदाधिकारस्य प्रतिबद्धत्वात्; उपनीतस्यैवाध्ययनाधिकारं ब्रुवच्छास्त्र मनुपनीतयोः स्त्रीशूद्रयोर्वेदाध्ययन मनिष्टप्राप्तिहेतुरिति बोधयति। कथं तर्हि तयोस्तदुपायावगमः? पुराणादिभिरिति ब्रूमः।

अतएवोक्तम् (भाग० पु० १.४.२५.)—

"स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा।
इति भारत माख्यानं मुनिना कृपया कृतम्॥"-इति।

तस्मादुपनीतैरेव त्रैवर्णिकैर्वेदस्य सम्बन्धः। तत्प्रामाण्यं तु बोध-

---

* तद्विशेषस्यानवगमात् ख।

प्रामाण्यं स्वत एव सिद्धम्। पौरुषेयवाक्यं तु बोधकमपि सत् भ्रान्तिमूलत्वसम्भावनया तत्परिहाराय मूलप्रमाण मपेक्ष्यैव प्रामाण्यम्। न तु वेदो मूलप्रमाण मपेक्षते; तस्य नित्यत्वेन कर्तृदोषशङ्काया अनुदयात्। एतदेव जैमिनिना सूत्रितम्— "तत्प्रमाणं वादरायणस्यानपेक्षत्वात्"-इति (१.१.५.)।

ननु वेदोऽपि कालिदासादिवाक्यवत्पौरुषेय एव, ब्रह्मकार्यत्वश्रवणात् (ऋ० सं० १०.९०.९.)—

"— — — ऋचः सामानि जज्ञिरे।

छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत"-इति हि श्रुतिः। अतएव भगवान् वादरायणः (१.१.३.) "शास्त्रयोनित्वात्"-इति-सूत्रेण ब्रह्मणो वेदकारणत्व मवोचत्। नैवम्; श्रुतिस्मृतिभ्यां नित्यत्वावगमात्। "वाचा विरूपनित्यया"-इति (ऋ० सं० ८.७५.६.) श्रुतिः, "अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा"-इति स्मृतिः *। वादरायणोऽपि देवताधिकरणे सूत्रयामास— "अतएव च नित्यत्वम्"-इति (१.३.२९.)। तर्हि परस्परविरोध इति चेत्, न; नित्यत्वस्य व्यावहारिकत्वात्। सृष्टेरूर्ध्वं संहारात् पूर्वो व्यवहारकालः; तस्मिन्नुत्पत्तिविनाशादर्शनात्। कालाकाशादयो यथा नित्याः एवं वेदोऽपि व्यवहारे कालिदासवाक्यवत् पुरुषविरचितत्वाभावान्नित्यः। आदिसृष्टौ तु कालाकाशादिवद्वेदोत्पत्तिराम्नायते। अतो विषयभेदान्न परस्परविरोधः। ब्रह्मणो निर्दोषत्वेन वेदस्य कर्तृदोषासम्भवात् स्वतः सिद्धं प्रामाण्यं तदवस्थम्। तस्माल्लक्षणप्रमाणसद्भावाद् विषयप्रयोजन-

---

* 'आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः'-इति चैतच्छ्लोकस्यापरार्धः ब्रह्मसूत्रस्य शाङ्करभाष्यादौ दृष्टः (१. ३. २८ सू० भा०)।

सम्बन्धाधिकारिसद्भावात् प्रामाण्यस्य सुस्थितत्वाद् वेदो व्याख्यातव्य एव * ॥

ननु वेदार्थावबोधे विध्यभावाद् बोधसाधनं व्याख्यानं व्यर्थमिति चेत्, न; अध्ययनविधेर्बोधपर्यवसायित्वात् †। एतच्च भट्टगुरुमतानुसारिभिर्बहुधा प्रपञ्चितम्। आम्नायते च—

"यद्गृहीत ‡ मविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥
स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥"-इति §।
"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च"-इति ‖ ॥

एवं तर्हि ज्ञानस्य पृथग् विधानादध्ययनम् पाठमात्रमिति चेत्, अस्तु नाम; वर्णयन्त्येवमेव शाङ्करदर्शनानुसारिणः।

कर्तुर्विधिव्यतिरेकेणानुष्ठानान्यथानुपपत्त्या वेदार्थज्ञानस्य प्रापितत्वान्नैतद्विधेयमिति चेत्, तर्हि तद्विधित्वाद् वेदनमात्रेण स्वतन्त्रं किञ्चिदपूर्वमस्तु; श्रूयते ह्यनुष्ठानज्ञानयोः स्वतन्त्रं पृथक् फलम्—"तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेद"-इति (तै० सं० ५.३.१२.२.)। अल्पप्रयाससाध्येन वेदनेन

---

* ननु कोऽयं वेद इत्यारभ्य व्याख्यातव्य एवेत्यन्तो ग्रन्थः तै० सं० भूमिकायामपि।

† अध्ययनविधिश्चैवः—"यस्तित्याज सखिविदं न तस्य वाच्यपि भागो अस्ति। यदीं शृणोत्यलकं शृणोति न हि प्रवेद सुकृतस्य पन्थाम्"-इति ऋ० सं० १०.७१.६। "अपि वै आर्त०—०सुकृतस्य पन्थामिति। तस्मात् स्वाध्यायोऽध्येतव्यः"-इति च तै० आ० २.१५।

‡ मुद्रितसंहिताभाष्यभूमिकायां निरुक्ते च (१.६.१.) एष एव पाठः; क-पुस्तके, पातञ्जलमहाभाष्यस्य पस्पशाह्निके तु 'यदधीत'-इति।

§ 'वचनद्वयं शाखान्तरगतम्'-इति ऋ० सं० सा० भा० भू०।

‖ पातञ्जलमहाभाष्यस्य पस्पशाह्निके चोक्तमिदं वचनम्।

तर्हिदं बह्वायाससाध्य मनुष्ठानं व्यर्थ मिति चेत्, न; [illegible] ब्रह्महत्याया मानसकायिकत्वादिभेदेन तारतम्योपपत्तेः । मनसा सङ्कल्पिता, वाचाऽभ्यनुज्ञाता, परहस्तेन कारिता, स्वयङ्कृता, पुनःकृता चेत्येवं तारतम्येनावस्थिता ब्रह्महत्या अनेकविधा । तन्निस्तरण मप्यनेकविधं यथा स्वर्गो बहुविधस्तद्वत् । 'अग्निहोत्रं जुहुयात् स्वर्गकामः', 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत', 'ज्योतिष्टोमेन स्वर्गकामो यजेत'-इत्याद्युच्चावचकर्मणा मेकविधफलासम्भवात् स्वर्गो बहुविधोऽभ्युपगन्तव्यः । तथा ब्रह्महत्यादिपापनिवृत्तेरपि बहुविधत्वाद् वेदनेनापि काचित् ब्रह्महत्या निवर्त्तत इति योग्यतानुसारेण कल्प्यताम् । किञ्च तत्तद्विधिसमीपे "य एवं वेद"-इति वचनानि वेदनफलं ब्रुवते । तान्यर्थवाद इति चेत्; अस्तु नाम सहामह एत मपराधम्, तेषां वचनानां विध्यर्थप्रशंसापरत्वात् । तर्हि 'यत्परो शब्दः स शब्दार्थः'-इति न्यायेन स्वार्थे प्रामाण्यं नास्तीति चेत्, मुख्यतात्पर्यस्य विधेयविषयत्वेऽप्यवान्तरतात्पर्यस्य स्वार्थविषयत्वानिवारणात् । 'ग्रावाणः प्लवन्ते'-इत्याद्यर्थवादस्यापि स्वार्थे प्रामाण्यं प्रसज्येतेति चेत्, न; प्रमाणान्तरबाधितत्वात् । "द्विः संवत्सरस्य सस्यं पच्यते (तै० सं० ५. १. ७. ३.)"-इत्याद्यर्थवादस्य तु बाधाभावेऽप्यनुवादत्वात् न स्वार्थे प्रामाण्यम्; वेदनफलवचनानि तु नानुवादकानि नापि बाध्यानि; तस्मादर्थवादत्वेऽप्येषां स्वार्थे प्रामाण्यम् । अन्यथा मन्त्रार्थवादादिभ्यो देवादीनां विग्रहादिमत्त्वं न सिध्येत् । अतएवोक्तम्—"विरोधे गुणवादः स्यादनुवादोऽवधारिते । भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः ॥"-इति * ।

---

* मीमांसार्थसङ्ग्रहे चोद्धृत मिदं वचनं व्याख्यातं च सोदाहरणम् ।

किं बहुना विद्यत एवावश्यं वेदप्रमाणादपूर्वम्। अतो वेदनाय वेदो व्याख्यायते ॥

तस्य च वेदस्य भागद्वयं कल्पसूत्रकारैरुदाहृतम्—“मन्त्रब्राह्मणयोर्वेदनामधेयम्”-इति (आप० य० प० सू० ३४.)। तत्र मन्त्रविषया विचाराः * संहिताव्याख्याने द्रष्टव्याः ; ब्राह्मणलक्षणं तु द्वितीयाध्यायस्य प्रथमपादे (जै० सू० ३३. अधि० ८.) विचारितम् —

“नास्त्येतद्ब्राह्मणेत्यत्र लक्षणं विद्यतेऽथवा ?
नास्तीयन्तो वेदभागा इति क्लृप्तेरभावतः।
मन्त्रश्च ब्राह्मणं चेति द्वौ भागौ तेन मन्त्रतः
अन्यद् ब्राह्मण मित्येतद्भवेद् ब्राह्मणलक्षणम् ॥”-इति।

चातुर्मास्येष्विद माम्नायते—‘एतद्ब्राह्मणान्येव पञ्च हवींषि’-—इति (तै० ब्रा० १.६.४.२ ; ७.१.१.)। तत्र ब्राह्मणस्य लक्षणं नास्ति, कुतः ? वेदभागाना मियत्तावधारणेन ब्राह्मणभागेष्वन्यभागेषु च वाच्यलक्षणस्याव्याप्त्यतिव्याप्त्योः शोधयितु मशक्यत्वादिति चेत्, न ; भागद्वयाङ्गीकारेण मन्त्रव्यतिरिक्तो भागो ब्राह्मण मिति लक्षणस्य निर्दोषत्वात्। ननु ब्रह्मयज्ञप्रकरणे मन्त्रब्राह्मणव्यतिरिक्ता इतिहासादयो भागा आम्नायन्ते,—“यद् ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नाराशंसीः (तै० आ० २.९.)”-इति ? नैवम् ; विप्रपरिव्राजकन्यायेन ब्राह्मणावान्तरभेदाना मेवेतिहासादीनां पृथगभिधानात्। “देवासुराः संयत्ता आसन् (तै० सं० १.५.१.१.)”-इत्यादय इतिहासाः। “इदं वा अग्रे नैव किञ्चनासीन्न द्यौरासीत् (तै० सं० २.२.९.१.)”-इत्या-

---

* मन्त्रविचाराः क।

दिकं जगतः प्रागवस्थान मुपक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणम्। कल्पस्तु आरुणकेतुकचयनप्रकरणे समाम्नायते— "इति मन्त्राः कल्पोऽत ऊर्ध्वं यदि बलिं हरेत् (तै० आ० १. २६.१.)"-इति। अग्निचयने—"यमगाथाभिः परिगायति (तै० सं० ५.१.८.२.)"-इति विहिता मन्त्रविशेषा गाथाः। मनुष्यवृत्तान्तप्रतिपादिका ऋचो नाराशंस्यः*। तस्मात् मन्त्रब्राह्मणव्यतिरिक्तवेदभागाभावान्मन्त्रव्यतिरिक्तं ब्राह्मण मित्येतल्लक्षणं सुस्थितम्॥

तस्य लक्षणस्य 'अग्निर्वै देवाना मवमः (ऐ० ब्रा० १.१.१.)'-इत्यादिग्रन्थे विद्यमानत्वादिदं ब्राह्मणम्। तच्चेतरानुपत्नादितरायाः पुत्रेण लब्धत्वादैतरेयक मित्युच्यते। महर्षीणां तत्तद्वेदभागलाभः स्मर्य्यते,—

'युगान्ते तर्हि तान्वेदान् सेतिहासान्महर्षयः।
लेभिरे तपसा पूर्व्व मनुज्ञातान् स्वयम्भुवः'-इति॥

प्रकृतस्य तु ब्राह्मणस्य ऐतरेयकत्वे सम्प्रदायविद एता माख्यायिका माचक्षते।—"कस्य चित् खलु महर्षेर्बह्व्यः पत्न्यो विद्यन्ते स्म। तासां मध्ये कस्याश्चिदितरेति नामधेयम्। तस्या इतरायाः पुत्रो महिदासाख्यः कुमारः। एतच्चारण्यकाण्डे समाम्नायते—'एतद्ध स्म वै तद्विद्वान्महिदास ऐतरेयः'-इति (ऐ० २ आ० १.८.२.)। तदीयस्य तु पितुर्भार्यान्तरपुत्रेष्वेव स्नेहातिशयः, न तु महिदासे। ततः कस्याञ्चिद्यज्ञसभायां स महिदास मवज्ञायान्यान् पुत्रान् स्वोत्सङ्गे स्थापयामास। तदानीं खिन्नवदनं महिदास मवगत्येतराख्या तन्माता स्वकीयकुलदेवतां भूमि मनु-

---

* ऐ०ब्रा०२.९.२. भाष्ये उदाहृतम्—"होता यक्षन्नराशंसम् (वा०सं०२१.३१.)"-इति।

[illegible]। सा च भूमिदेवता दिव्यमूर्तिधरा सती यज्ञसंसद्यां समागत्य महिदासाय दिव्यं सिंहासनं दत्त्वा तमेनं सुपवेश्य सर्वेष्वपि कुमारेषु पाण्डित्याधिक्य मवगमय्यैतद्ब्राह्मणप्रतिभा-लक्षणं वरं ददौ। तदनुग्रहात् तस्य महिदासस्य मनसा 'अग्निर्वै देवाना मवमः (ऐ०ब्रा०१.१.१.)'-इत्यादिकं 'स्तृणुते (ऐ०ब्रा०८.५.५.)'-इत्यन्तं चत्वारिंशदध्यायोपेतं ब्राह्मणं प्रादुरभूत्। तत ऊर्ध्वम् 'अथ महाव्रतम् (ऐ०१आ०१.१.१.)-इत्यादिकम् 'आचार्याः (ऐ०३आ०२.६.९.)-इत्यन्त मारण्यकव्रतरूपं च ब्राह्मण माविरभूत्''-इति *।

तस्यैतरेयस्य प्रादुर्भूते चत्वारिंशदध्यायोपेते ब्राह्मणे चतुःसंस्थो ज्योतिष्टोमः प्रथमं विधीयते † (१—१७अ०५ख०); ततो गवामयनम् (१७अ०६ख०—[illegible]अ०२ख०); तत आदित्यानामयनम् (१८अ०३—८ख०); ततोऽङ्गिरसामयनम् ‡ (१८अ०९—८ख०) ततो द्वादशाहः (१९—२४अ०); ततोऽन्यत्सर्वं § (२५—४०अ०) प्रासङ्गिक मिति द्रष्टव्यम्। गोष्टोमायुष्टोमादिषु सोमयागेषु ज्योतिष्टोमस्य ‖ प्राथम्य मुक्तम् ¶—"एष वाव प्रथमो यज्ञो

---

* अहो चित्र मेतत्? महानाम्न्याख्यमन्त्रात्मकस्य चतुर्थारण्यकस्यानैतरेयत्वेन कथं न ग्रहणं कृतमिति। तत्राग्रन्थे उक्त मिदम्—'तदिदं नवसहस्राणां ऋचां पुरीषपदानाञ्च प्रतिपादकं ग्रन्थजातं यद्यपि कर्मकाण्डे पठितुं युक्तं तथाप्यरण्ये एवाध्येतव्य मित्यभिप्रेत्य अनु-आरण्यककाण्डेनात्र पठितम्'-इति (प. सौ. सु. ३८४ पृ०)।

† तत्रापि प्रथमाध्याये दीक्षणीयेष्टिः, द्वितीये प्रायणीयेष्टिः उदयनीयेष्टिश्च, तृतीये आतिथ्येष्ट्यादयः, चतुर्थेऽभिष्टवादयः, पञ्चमे सोमक्रयाद्या इत्येवं सुगमं बोध्यम्।

‡ गवामयन मादित्यानामयन मङ्गिरसामयनं चेते संवत्सरसत्रविशेषाः।

§ अग्निहोत्रादिकम्, पशुविभागादिकम्, राजधर्म सोमपानयोर्विशेषादिकञ्चेति यावत्।

‖ "अथ यदेनं सूक्ष्मं सन्तं ज्योतिर्भूतं मध्ययंस्तस्मात् ज्योतिः-सोमं सन्तं ज्योतिष्टोम मित्याचक्षते"-इति ऐ० ब्रा० ३. ४. ५। ज्योतिष्टोमशब्देन सोमयागोऽभिधीयते।

¶ "ज्योतिष्टोमं प्रथम मुपयन्त्यग्निमेव तेन शीर्षे प्रतिष्ठिताः गोष्टोमं द्वितीय मुपयन्त्यन-

यज्ञानां ज्योतिष्टोमः'–इति श्रुतिः *। [illegible] संस्थोपेतस्य † 'अग्निष्टोमः, उक्थ्यः, षोडशी, अतिरात्रश्चेत्येताश्चतस्रः संस्थाः अत्रानुक्रमेण वक्ष्यन्ते ‡। तस्मिन्नपि चतुष्टये अग्निष्टोमः प्रकृतिः §; सम्पूर्णस्यानुष्ठेयस्य तस्मिन्नग्निष्टोमे प्रत्यक्षश्रुत्यैवोपदिष्टत्वात्। 'प्रकर्षेण क्रियते साकल्येनानुष्ठेय मुपदिश्यते यस्यां सा प्रकृतिः'–इति हि तच्छब्दव्युत्पत्तिः। उक्थ्यादयस्तु विकृतयः; विशेषस्यैव तत्र प्रत्यक्षोपदेशेन सम्पादितत्वात्। अवशिष्टं तु सर्व मनुष्ठेयं 'प्रकृतिवद्विकृतिः कर्त्तव्या'–इति न्यायेनैव सम्पाद्यते ‖। अतएवोपजीव्यत्वादग्निष्टोम एवादौ वक्तव्यः॥

रिक्ष एव तेन प्रतितिष्ठन्त्यायुष्टोमं तृतीय मुपयन्त्यमुष्मिन्नेव तेन लोके प्रतितिष्ठन्ति"–इति तै० सं० ७. ४. ११. १। ज्योतिष्टोमपद्धतिस्तु का० श्रौ० सू० ७—११ अध्यायेषु द्रष्टव्या।

* 'एष वाव प्रथमो यज्ञानां य एतेनानिष्ट्वाथान्येन यजेत गर्त्तपत्यमेव तज्जीयते प्र वा मीयते'–इति ता० ब्रा० १६. १। 'एष प्रथमः सोमः। [illegible]'–इति का० श्रौ० १०. ९. २५. २७।

† 'अग्निष्टोमो ऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयो ऽतिरात्रो ऽप्तोर्याम इति संस्थाः'–इति आश्व० श्रौ० ६. ११. १। 'सर्वे सोमयागाः संस्थया सप्तविधा एवेत्यर्थः'–इति च तत्र वृत्तिकारोपसंहारः। तदेवं सोमसम्पाद्य एक एव ज्योतिष्टोमः अग्निष्टोमाद्याकारः सप्तविधः। तथाहि —अग्निष्टोमसाम्ना यज्ञायज्ञीयाख्येन यज्ञसमाप्तिर्यस्य सोऽयं अग्निष्टोमः; तथैवाग्निष्टोमे राजन्यस्य षोडशिनं गृह्णीयादिति आम्नायबलादूर्ध्वं षोडशिस्तोत्रस्य समाप्तौ यदा अवसानं सोऽत्यग्निष्टोम इत्युच्यते। एव मुक्थ्यादयश्च।

‡ "तत्राग्निष्टोमः प्रथमाध्यायादि पञ्चदशाध्यायीयचतुर्थखण्डान्तं यावदुक्तः, पञ्चदशाध्यायीयान्त्यखण्डयोरुक्थ्यः, षोडशाध्यायीयादिचतुःखण्डेषु षोडशी, ततः पञ्चमषष्ठखण्डयोः सप्तदशाध्यायीयाद्यखण्डपञ्चके चातिरात्र इति विवेकः। "एतस्य अग्निष्टोमं प्रथम मुपयन्त्यथोक्थ्य मथ षोडशिन मथातिरात्र मनुपूर्वम्"–इति तै० सं० ७. ४. १०. १।

§ "अग्निष्टोम एकाहानां प्रकृतिः"–इति च आप० य० प० सू० १४१।

‖ "न प्रकृतावूहो विद्यते। विकृतौ यथार्थ मूहः"–इति आप० य० प० सू० १२३, १२४।

यद्यपि तत्राग्निष्टोमस्य प्रकरणेऽवश्यं ऋत्विग्वरणं वक्तव्यम्; 'सोमेन यक्ष्यमाणो ब्राह्मणानार्षेयानृत्विजो वृणीत,'-इत्यापस्तम्बेनाभिधानात् (श्रौ॰ १०. १. १.), तथापि ऋग्वेदस्य हौत्रकर्तव्यप्रतिपादकत्वात् *,—ऋत्विग्वरणस्य तु हौत्रत्वाभावात्तदुपेक्षयेष्टिरादौ विधीयते † ॥

ऋग्वेदस्य हौत्रत्वं समाख्याबलात् तृतीयाध्यायस्य तृतीयपादे विचारितम् (जै॰ सू॰ १३. अधि॰ ६.)—

> "वेदत्रयोक्तधर्माणां ऋत्विग्भिः सङ्करस्त्रिभिः,
> अनियत्या नियत्या वाऽनियतिर्वाऽनिरूपणात् ?
> हौत्रत्वादि समाख्यानं नियतेर्गमकं स्वतः ।
> निर्बाधं चान्यवत्तच्च तेनात्र विनियोजकम् ॥"-इति ।

याज्यापुरोनुवाक्यादयो धर्मा ऋग्वेदे प्रोक्ताः, दोहननिर्वापादयो यजुर्वेदे, आज्यस्तोत्रपृष्ठस्तोत्रादयः सामवेदे, तत्रास्यैवैते धर्मा इति नियामकस्य दुर्निरूपत्वाद् येन केनाप्यृत्विजा यः कोऽपि धर्म इच्छया सङ्गच्छत इति चेत्, मैवम्; हौत्र माध्वर्यव मौद्गात्र मिति समाख्यानेन नियतिर्बोध्यते; न च समाख्यानस्य बाधकं किञ्चित्पश्यामः। तस्मादबोधकत्वबाधितत्वयोरप्रामाण्य-

---

अतिदेशोहबाधाभ्युच्चयरूपः प्रकृतिविकृतिविचारस्तु जैमिनिदर्शने सप्तमाष्टमनवमदशमाध्यायेषु विशेषतः कृतो द्रष्टव्यः ।

* तथाहि—"ऋग्वेदेनैव हौत्र मकुर्वत यजुर्वेदेनाध्वर्यवं सामवेदेनोद्गीथम्"-इति शत॰ ब्रा॰ ११. ५. ८. ४। "तदाहुर्ब्रह्मवादिनः यदृचैव हौत्रं क्रियते यजुषाध्वर्यवं साम्नोद्गीथं व्यारब्धा त्रयी विद्या भवति। अथ केन ब्रह्मत्वं क्रियत इति ? त्रय्या विद्ययेति ब्रूयात्"—इति ऐतरेयोपरिष्टात् ५. ५. ८। एव मापस्तम्बोऽप्याह "ऋग्वेदेन होता करोति, सामवेदेनोद्गाता, यजुर्वेदेनाध्वर्युः, सर्वैर्ब्रह्मा, वचनाद् विप्रतिषेधाच्चान्यः कुर्यात्"-इति १९—२२ ।

† इष्टिः—दीक्षणीयेष्टिः। दीक्षणीयार्थवादे (१५०) द्रष्टव्यः ।

कारकयोरभावाच्छ्रुतिलिङ्गादिषट्प्रमाणमाश्रित्य* समाख्यादीन् धर्मा व्यवस्थाप्यन्ते ॥

नन्विष्टेरप्याध्वर्युकर्तृकत्वाद्यजुर्वेदे कर्तव्यता ; न त्वत्रेति चेत्, सत्यम् ! तथापीष्टिगतयोर्याज्यानुवाक्ययोर्होतृत्वेनात्र बह्वृचादिष्टेरनुक्तौ याज्यानुवाक्ये कुतस्त्ये इति विशेषसम्बन्धस्य ज्ञातुमशक्यत्वात् तदवबोधाय प्रथममिष्टिर्विधातव्या ॥

---

* तथाच जैमिनिदर्शनसूत्रम् —"श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्"--इति ३. ३. १४ ।

॥ ऐतरेयब्राह्मणम् ॥

(तत्र)

प्रथमपञ्चिकायाः प्रथमाध्यायस्य

प्रथमः खण्डः ।

* * *

॥ ॐ ॥ अग्निर्वै देवाना मवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवता आग्नावैष्णवं पुरोळाशं निर्वपन्ति दीक्षणीय मेकादशकपालं सर्वाभ्य वैनं तद्देवताभ्यो ऽनन्तरायं निर्वपन्त्यग्निर्वै सर्वा देवता विष्णुः सर्वा देवता एते वै यज्ञस्यान्त्ये न्वौ यदग्निश्च विष्णुश्च तद्यदाग्नावैष्णवं पुरोळाशं निर्वपन्त्यन्तत एव तद्देवानृध्नुवन्ति तदाहुर्यदेकादशकपालः पुरोळाशो द्वावग्नाविष्णू कैनयोस्तत्र क्लृप्तिः का विभक्तिरित्यष्टाकपाल आग्नेयो ऽष्टाक्षरा वै गायत्री गायत्र मग्नेश्छन्दस्त्रिकपालो वैष्णवस्त्रिर्हीदं विष्णुर्व्यक्रमत सैनयोस्तत्र क्लृप्तिः सा विभक्तिर्घृते चरुं निर्वपेत यो ऽप्रतिष्ठितो मन्येतास्यां वाव स न प्रतितिष्ठति यो न प्रतितिष्ठति तद्यद्घृतं तत् स्त्रियै पयो ये तण्डुलास्ते पुंसस्तन्मिथुनं मिथुनेनैवैनं तत् प्रजया पशुभिः प्रजनयति प्रजात्यै प्रजायते प्रजया

पशुभिर्य एवं वेदारब्धयज्ञो वा एष आरब्धदेवतो यो दर्शपूर्णमासाभ्यां यजत आमावास्येन वा हविषेष्ट्वा पौर्णमासेन वा तस्मिन्नेव हविषि तस्मिन् बर्हिषि दीक्षेतैषो एका दीक्षा सप्तदश सामिधेनी रनुब्रूयात् सप्तदशो वै प्रजापतिर्द्वादश मासाः पञ्चर्तवो हेमन्तशिशिरयोः समासेन तावान्संवत्सरः संवत्सरः प्रजापतिः प्रजापत्यायतनाभिरेवाभी राध्नोति य एवं वेद ॥ १ ॥

अतस्ता मिष्टिं विधातुं तद्देवतारूप मग्निं विष्णुञ्चादौ प्रशंसति— "अग्निर्वै देवाना मवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवताः"-इति । योऽयम् 'अग्निः' अस्ति, सोऽयं देवतामध्ये 'अवमः' प्रथमो द्रष्टव्यः । यस्तु 'विष्णुः', सोऽयं 'परमः' उत्तमः । 'वै'-शब्द उक्तार्थे मन्त्रप्रसिद्धिद्योतनार्थः । "अग्निर्मुखं प्रथमो देवतानां सङ्गताना मुत्तमो विष्णुरासीत्"-इति हि मन्त्र आम्नायते * । यद्वा 'वै'-शब्द उपपत्तिप्रसिद्ध्यर्थः । उपपत्तिश्चैवं योजनीया,— यद्यपि देवशब्दः साधारणत्वात् सर्वदेवतावाची, तथाप्यत्र प्रकरणबलादग्निष्टोमाङ्गेषु शस्त्रेषु प्रतीयमानाः प्रधानदेवता विवक्ष्यन्ते । शस्त्राणि च द्वादश † । तेष्वाज्यशस्त्रं प्रथमम्;

---

* इय मेवर्क्, आग्नावैष्णवस्य हविषो याज्या इति वक्ष्यति (४ अ०) ।

† तत्र आज्यशस्त्रं २. ५. ५—८, प्रउगशस्त्रं ३. १. १—७, मरुत्वतीयं शस्त्रं ३. २. ४—१०, निष्केवल्यं शस्त्रं ११—१२, आग्निमारुतं शस्त्रं ३. ६. ८—१४ । एव मच्छावाकशस्त्रादीन्यपि ।

तस्मिंश्च 'भूरग्निर्ज्योतिः'–इत्यग्निराम्नातः *। आग्निमारुतं शस्त्रमन्तिमम्; तस्मिन् 'विष्णोर्नु कम्'–इति विष्णुराम्नातः †। एवमग्निष्टोमसंस्थायां शस्त्रपाठापेक्षयाग्नेः प्राथम्यम्, विष्णोरुत्तमत्वं च। यद्वा, सर्वासु संस्थासूक्तन्यायेनाग्नेः प्राथम्यं विष्णोरुत्तमत्वम्; अन्तिमसंस्थाया माप्तोर्यामाख्याया स्त्रयस्त्रिंशत्स्तोत्रशस्त्रोपेताया अन्तिमं स्तोत्रं शस्त्रं च वैष्णव मिति तदपेक्षया द्रष्टव्यम्। यद्वा, प्रथमाया दीक्षणीयेष्टावग्निरिज्यते; अन्तिमाया मुदवसानीयेष्टौ ‡ वैष्णवी पूर्णाहुतिर्वाजसनेयिभिराम्नाता। सर्वथापि स्तोतव्यानां यष्टव्यानां च देवानामपेक्षयाग्नेः प्राथम्यं विष्णोरुत्तमत्वं च युक्तम्। 'तदन्तरेण' तयोः प्रथमोत्तमयोरग्नाविष्ण्वोर्मध्ये तत्तच्छस्त्रप्रतिपाद्याः 'अन्याः' इन्द्रवाय्वादयः 'सर्वाः' प्रधानदेवताः वर्त्तन्ते। तस्मात् सर्वदेवताना मुभयतो § रक्षकवदवस्थितावग्नाविष्णू प्रशस्तावित्यर्थः ॥

सौमिकेषु यष्टव्यासु स्तोतव्यासु च सर्वासु देवतास्वग्नाविष्णू प्रशस्य तद्देवताका मिष्टिं विधत्ते—"आग्नावैष्णवं पुरोळाशं निर्वपन्ति दीक्षणीय मेकादशकपालम्"–इति। अग्निश्च विष्णुश्चाग्नाविष्णू, तावुभौ परस्परव्यासक्तौ यस्य पुरोडाशस्यैका देवता सोऽय माग्नावैष्णवः ‖। यथोक्तदेवतां प्रति हविष्ट्वेन प्रदेयद्रव्यरूपः पक्वः

---

* 'आग्नेयं हौताज्यं शंसति'–इत्यादि २, ५, ५।

† 'विष्णोर्नु कं वीर्याणि प्रवोचम् (ऋ० सं १०, १५४, १.)–इति वैष्णवीं शंसति'–इति ३, ३, १४। 'आग्निमारुते शस्त्रे वैश्वानरीयेण सूक्तेन प्रतिपद्यते'–इति नि० ७, ६, ४।

‡ 'मुदवसानीयेष्टेः स्थाने' ख, ग।

§ " 'सर्वाः' प्रधानदेवताना मुभयतो"–इत्येवं क, ख।

‖ 'सास्य देवता'–इति पा० ४, २, २४।

पिष्टपिण्डः पुरोडाशं इत्युच्यते * । डकारस्थाने ळकारः, एतच्छाखाध्ययनसम्प्रदायेन प्राप्तितः † । शकटावस्थापितव्रीहिभ्यो निष्कृष्य मुष्टिचतुष्टयपरिमितानां व्रीहीणां शूर्पे प्रक्षेपो निर्वापः । तत्पूर्वको यागोऽत्र निर्वापशब्देनोपलक्ष्यते; आग्नावैष्णवं पुरोडाशमितिसामानाधिकरण्येनावगतस्य द्रव्यदेवतासम्बन्धस्य यागमन्तरेणानुपपन्नत्वात्;—सति तु यागे सम्बन्ध उपपद्यते; 'उद्दिश्य देवतां द्रव्यत्यागो यागोऽभिधीयते'-इति यागलक्षणस्य पूर्वाचार्यैरुक्तत्वात् । 'निर्वपन्तीत्ययं शब्दो न वर्त्तमानार्थः किन्तु विध्यर्थः । स च लकारो 'लिङर्थे लेडिति (पा० ३. ४. ७.) सूत्रेण विध्यर्थो द्रष्टव्यः । एवञ्च सति शाखान्तरेण संवादो भवति । तथाच तैत्तिरीया 'विस्पष्ट' विधिमामनन्ति—"आग्नावैष्णवमेकादशकपालं निर्वपति दीक्षिष्यमाणः (सं० ५.५.१.४.)"-इति । तत्रैकप्रयोगापेक्षमेकवचनम्; अत्र तु बहुप्रयोगगतं सत्रगतं वा यजमानबहुत्वमपेक्ष्य निर्वपन्तीति बहुवचनम् । यद्वा, छान्दसो वचनव्यत्ययः ‡ । सोमयागे प्रवृत्तस्य यजमानस्य संस्कारो दीक्षणम्; तस्य च संस्कारस्य हेतुः कर्मविशेषो 'दीक्षणीया'-शब्दवाच्यः । तस्य च कर्मविशेषस्य वाचकेन शब्देन तत्कर्मसाधन

---

* पुरोडाशपाकादिप्रकारस्तु आपस्तम्बीयश्रौतसूत्रे (१. २२—२५.) आद्यप्रश्नीयसप्तमाष्टमपटलयोः कात्यायनीयश्रौतसूत्रे २. ४. ५ च द्रष्टव्यः । "अङ्गुष्ठमनूपाकृतिं कूर्मस्येव प्रतिकृतिमश्वशफमात्रं करोति, यावन्तं वा मन्यते (आप० श्रौ० १. २५. ४, ५.)" इति सूत्राभ्यां पुरोडाशस्वरूपञ्चाधिगम्यम् । 'पुरोडाशमेव कूर्मं भूत्वा सर्पन्तम्'-इति च शत० ब्रा० १. ६. २. ३ । तैत्तिरीयब्राह्मणीये पौरोडाशिके काण्डे (३. २. ४—८.) च ।

† तथाहि— "द्वयोश्चास्य स्वरयोर्मध्यमेत्य सम्पद्यते स डकारो ळकारः"-इति ऋक्प्राति०

‡ 'व्यत्ययो बहुलम्'-इति पा० ३. १. ८५ ।

मुपलक्ष्यते । ततो होमणीयाख्यकर्मसाधनं पुरोडाश मिति सामानाधिकरण्य मुपपन्नम् । एकादशसु कपालेषु संस्कृतः पुरोडाशः एकादशकपालः * तेषु हि पुरोडाशः श्रप्यते † ॥

अत्र प्रथमोत्तमयोरग्नाविष्ण्वोः पुरोडाशदेवतात्वे फलितं दर्शयति—“सर्वाभ्य एवैनं तद्देवताभ्योऽनन्तरायं निर्वपन्ति”—इति । ‘तत्’ तेनाग्नावैष्णवत्वेन तयोरग्नाविष्ण्वोर्मध्यवर्त्तिनीनां सौभिकीनां सर्वासां देवताना मुपलक्षितत्वात् ‘अनन्तरायं’ निरवशेषं काचिदपि देवता अविशिष्टा यथा न भवति तथैनं पुरोडाशं यजमानाः ‘निर्वपन्ति’ एव । अनेन निर्वापेण सर्वा देवतास्तृप्यन्तीत्यर्थः । यथा वैयाकरणाः प्रत्याहारेष्वाद्यन्तयोर्वर्णयोर्ग्रहणेन मध्यपातिनां सर्वेषां वर्णानां ग्रहण मिच्छन्ति ‡ । न्यायस्तदीय एवं व्यवह्रियते—‘तन्मध्यपतितस्तद्ग्रहणेन गृह्यते’ इति § । यथा वा लोके भुञ्जानाना मेकपङ्क्तावुपविष्टाना माद्यन्तयोः ब्राह्मणयोः परितोषेण मध्यवर्त्तिनः सर्वे परितुष्टा इति निश्चितम्, तथेदन्द्रष्टव्यम् ॥

---

* ‘संस्कृतं भक्षाः’ इति पा० ४, २, १६ ।

† एकादशकपालस्थापनप्रकारस्त्वेवम्— पूर्वं मध्यम मुपदधाति, ततः पुरस्तात् द्वितीयम्, मध्यमाद् दक्षिणं चतुर्थम्, चतुर्थात् पूर्व मेकस्य कपालस्यान्तरालं परिशिष्य पञ्चमम्, चतुर्थपञ्चमयोरन्तराले षष्ठम्, चतुर्थस्य पश्चात् सप्तमम्, तस्य पश्चादष्टमम्, सर्वेभ्य उत्तरतो नवमदशमैकादशानि प्राक्संस्थानि । किञ्च पुरोडाशस्य कूर्माकारोक्त्या वृत्ताकारत्वप्रतीतेः यावत्कपालं प्रथनविधेश्च तदर्थकपालचितेरपि अर्थाद् वृत्ताकारत्वम् । कपालानि तु [illegible]पायेन तथा करणीयानि यथा च कपालचितिश्चेयं वृत्तं सम्पूर्यते ।

‡ तथाचैतत् पाणिनीयं सूत्रम्— “आदिरन्त्येन सहेता”—इति १, १, ७१ ।

§ “येन विधिस्तदन्तस्य”—इति पाणिनीयसूत्रस्य (१. १. ७२.) पतञ्जलिकृते महाभाष्ये पठितैषा परिभाषा, परिभाषेन्दुशेखरे च व्याख्याता (८६) ।

तत्राग्नाविष्णोरेव निर्वापे सम्बन्धः श्रूयते, न तु सर्वदेवतानाम्, तत्कथं तासां तृप्तिरित्याशङ्क्य तन्निवृत्त्यर्थं तयोरेव सर्वदेवतात्मभावं दर्शयति—"अग्निर्वै सर्वा देवता विष्णुः सर्वा देवताः"–इति। अग्नेः सर्वदेवतारूपत्वे श्रुत्यन्तरप्रसिद्धिद्योतनार्थो वै-शब्दः। तथाच तैत्तिरीयाः पौरोडाशिके काण्डे * समामनन्ति—"ते देवा अग्नौ तनूः संन्यदधत तस्मादाहुरग्निः सर्वा देवता इति"–इति (तै० ब्रा० ३. २. ८. १०.)। सौमिकेऽपि काण्डे † श्रूयते—"देवासुराः संयत्ता आसन् ते देवा बिभ्यतोऽग्निं प्राविशन् तस्मादाहुरग्निः सर्वा देवता इति"–इति (तै० सं० ६. २. २.)। 'विष्लृ व्याप्तौ (जु० १२)'–इत्यस्माद्धातोरुत्पन्नो विष्णुशब्दः ‡। व्याप्तिश्च सर्वजगदुपादानकारणत्वेन सर्वात्मकत्वादुपपद्यते। अतएव स्मरन्ति—"भूतानि विष्णुर्भुवनानि विष्णुरिति।

सर्वदेवतात्मकत्वेनाग्नाविष्णू प्रशस्य प्रकारान्तरेण पुनः प्रशंसति—"एते वै यज्ञस्यान्त्ये तन्वौ यदग्निश्च विष्णुश्च तद्यदाग्नावैष्णवं पुरोडाशं निर्वपन्त्यन्तत एव तद्देवानृध्नुवन्ति"–इति। अग्निश्च

---

* संहितायाः प्रथमकाण्डीयः प्रथमप्रपाठकः समग्र एवेष्टिकाण्ड उच्यते, तथैवान्यायाः पौरोडाशिक इत्यपि। ब्राह्मणस्य तृतीयकाण्डीयो द्वितीयप्रपाठकस्तस्यैव शेषः।

† संहितायाः प्रथमकाण्डीयं द्वितीयादि प्रपाठकत्रयं सौमिकं काण्डम्; षष्ठकाण्डं च तद्ब्राह्मणम्। तथाप्यवान्तरकाण्डानि नव। तदुक्तं मन्त्रक्रमस्थाम्—"अध्वरप्रभृति दीक्षितविधिर्वाजपेयकौ। सवाः शुक्रियकाण्डे च नवैन्द्रोरिति धारणा"—इति। तथाच अध्वरकाण्डम्, ग्रहकाण्डम्, दक्षिणाकाण्डम्, तमर्यविधिकाण्डम्, वाजपेयमन्त्रकाण्डम्, वाजपेयविधिकाण्डम्, सवकाण्डम्, शुक्रियमन्त्रकाण्डम्, शुक्रियविधिकाण्डं चेति नवकाण्डात्मकं सौमिकं काण्डम्।

‡ निघ० ३, १७, १२ ; ४, २, ३८. । निरु० ५, २, ३ ; १२, २, ७, ८.।

5477

विष्णुश्चेत्यनयोर्देवतयोर्यत् शरीरद्वय मस्ति, 'एते' उभौ 'तन्वौ' 'यज्ञस्यान्ते' सोमयागस्यादावन्ते च वर्त्तमाने। आद्या चान्त्या चेति विवक्षाया मेकशेषेणान्त्ये इति भवति; यथा माता च पिता चेत्यत्र पितरावित्येकशेषः, तद्वत्। आद्यन्तवर्त्तित्वं चाग्निर्वै देवाना मवम इत्यत्रैवोपपादितम् (१२ पृ०)। 'तत्' तथा सत्याद्यन्तवर्त्तित्वे सति तादृशदेवताकं 'पुरोडाशं निर्वपन्ति'-इति 'यद्' अस्ति, 'तत्' यथोक्तनिर्वापेण 'अन्ततः' यागस्यादावन्ते च 'देवान्' सर्वान् 'ऋध्नुवन्त्येव' परिचरन्त्येव। त मेतं सार्थवादं दीक्षणीयेष्टिविधिं तैत्तिरीया अपि विस्पष्ट मामनन्ति— "आग्नावैष्णव मेकादशकपालं निर्वपति दीक्षिष्यमाणोऽग्निः सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञञ्चारभतेऽग्निरवमो देवतानां विष्णुः परमो यदाग्नावैष्णव मेकादशकपालं निर्वपति देवता एवोभयतः परिगृह्य यजमानोऽवरुन्धे"-इति (सं० ५. ५. १.)।

इदानीं यथोक्तविधौ ब्रह्मवादिचोद्य मुद्भावयति—"तदाहुर्यदेकादशकपालः पुरोडाशो द्वावग्नाविष्णू कैनयोस्तत्र क्लृप्तिः का विभक्तिरिति"-इति। 'तत्' तत्र कपालसङ्ख्यायां ब्रह्मवादिनः 'आहुः' चोदयन्ति। एकादशसु कपालेषु संस्कृतः पुरोडाशः एक मेव द्रव्यम्, तस्य भोक्तारौ 'द्वौ' देवौ। अनयोः द्वयोः समप्रधानत्वेन विषमांशस्यायुक्तत्वात् 'तत्र' द्रव्ये 'का क्लृप्तिः' विभागकल्पनानिमित्तं किं स्यात्? 'का विभक्तिः' निमित्तविशेषाभावे नैमित्तिको विभागविशेषः कथं घटेत? 'इति'-शब्दश्चोद्यसमाप्त्यर्थः॥

ब्रह्मवादिष्वेव मध्ये अभिज्ञानां चोद्यपरिहार मुद्भावयति—

अष्टाकपाल आग्नेयो ऽष्टाक्षरा वै गायत्री गायत्र मग्नेश्छन्द-

त्रिकपालो वैष्णवस्त्रीणीदं विष्णुर्व्यक्रमत सैनयोरत्र क्लृप्तिः सा विभक्तिः"-इति। अष्टसु कपालेषु संस्कृतः पुरोडाशभागोऽग्नेः सम्बन्धी। स च सम्बन्धः छन्दोद्वारा द्रष्टव्यः। गायत्र्याख्यं छन्दोऽग्नेः सम्बन्धि ; तयोरग्निगायत्र्योः प्रजापतिमुखजन्यत्वसाम्यात् । एतच्च मुखजन्यत्वं तैत्तिरीयाः सप्तमकाण्डे (सं० १. १. ४.) पठन्ति—"प्रजापतिरकामयत प्रजायेयेति स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवतान्वसृजत गायत्रीच्छन्दः"-इति। तस्याश्च गायत्र्याः पादाक्षरेष्वष्टत्वं संख्या दृश्यते। सोऽयं यथोक्तपुरोडाशभागस्याग्नेश्च सम्बन्धः। त्रिषु कपालेषु संस्कृतः पुरोडाशभागो विष्णोः सम्बन्धी। 'हि' यस्मात् कारणाद्विष्णुरिदं सर्वं जगत् 'त्रिर्व्यक्रमत' त्रिरावृत्तेन स्वकीयपादविक्षेपेण व्याप्तवान्। तथा च मन्त्र आम्नायते—"इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्"-इति (ऋ० सं० १. २२. १७.), "त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः"-इति (१८) च। 'सा' यथोक्ता अष्टसंख्या त्रिसंख्या च 'एनयोः' देवयोः 'तत्र' पुरोडाशे 'क्लृप्तिः' विभागकल्पनाहेतुः। तदनुसारेण 'विभक्तिः' तादृशो विभागो अवगन्तव्यः ॥

इत्थं सार्थवादेन विधिवाक्येन 'दीक्षणीयेष्टिं' विधाय तस्यामेवेष्टौ प्रतिष्ठाकामस्य पुरोडाशमपोद्य द्रव्यान्तरं विधत्ते—"घृते चरुं निर्वपेत यो ऽप्रतिष्ठितो मन्येत"-इति। पुत्रादि-प्रजया गवादि-पशुभिश्च रहितत्वमप्रतिष्ठितत्वं तादृशोऽहमिति मन्यमानः यजमानः प्रतिष्ठार्थं घृतेन तण्डुलैश्चरुं निष्पादयेत्।

अप्रतिष्ठितस्यात्यन्तिकं दोषत्वं दर्शयति—"अस्यां वाव स न प्रतितिष्ठति यो न प्रतितिष्ठति"-इति। 'यः' यजमानः प्रजा-

पशुरूपया प्रतिष्ठया वर्जितः, 'सः' 'अस्यां वाव' अस्माया सर्व्यैतस्यां भूमौ 'न प्रतितिष्ठति' श्लाघ्यो न भवति। तस्मादप्रतिष्ठा परिहर्त्तव्येत्यर्थः।

घृतचरुणा तत्परिहारं दर्शयति—"तद्यद्घृतं तत् स्त्रियै पयो ये तण्डुलास्ते पुंसस्तन्मिथुनं मिथुनेनैवैनं तत्प्रजया पशुभिः प्रजनयति प्रजात्यै"–इति। 'तत्' तत्र घृतपक्वे चरौ 'यद्' 'घृतम्' अस्ति, 'तत्' 'स्त्रियै * पयः' स्त्रियाः शोणितम्। द्रवत्वसाम्येन पयः-शब्दः शोणित मुपलक्षयति। विलीनस्य घृतस्य ईषद्रक्तत्व-साम्येन योषिद्बीज मुपचर्यते। चरौ 'ये तण्डुलाः' सन्ति, 'ते' 'पुंसः' रेतः इति शेषः। श्वेतत्वं त्वत्र साम्यम्। 'तद्' घृत-तण्डुलोभयात्मकं चरु द्रव्यं मिथुनसदृशम्। 'तत्' तस्मात् कारणात् मिथुनरूपेणैव चरुद्रव्येणैव 'एनं' यजमानं पुत्रादि-प्रजया गवादि-पशुभिः च 'प्रजनयति' प्रवर्धयति। तस्मादिदं चरुद्रव्यं 'प्रजात्यै' प्रजननाय प्रतिष्ठारूपाय सम्पद्यत इत्यर्थः † ।

चरोः प्रतिष्ठाहेतुत्ववेदनं प्रशंसति—"प्रजायते प्रजया पशुभिर्य एवं वेद"–इति। तावेतौ पुरोडाशचरुपक्षावापस्तम्बेन दर्शितौ—"दीक्षणीयायास्तन्त्रम् प्रक्रमयत्याग्नावैष्णव मेकादशकपालं निर्वपत्याग्नावैष्णवं वा घृते चरुं पुरोडाशो ब्रह्मवर्चसकामस्य घृते चरुः प्रजाकामस्य पशुकामस्य वादित्यं घृते चरुं द्वितीयं प्रजाकाम-पशुकामस्यैके समामनन्ति"–इति (श्रौ० १०. ४. १—४.)॥

"षष्ठ्यर्थे चतुर्थीति वाच्यम्"—इति पा० २. ३. ६२. वा० १.।

प्रतिष्ठेत्यादिपाठो नास्ति ख-गयोः।

उक्ताया दीक्षणीयेष्टेः कालं विधत्ते—"आरब्धयज्ञो वा एष आरब्धदेवतो यो दर्शपूर्णमासाभ्यां यजत आमावास्येन वा हविषेष्ट्वा पौर्णमासेन वा तस्मिन्नेव हविषि तस्मिन् बर्हिषि दीक्षेतैषो एका दीक्षा"-इति । 'यः' पुमान् 'दर्शपूर्णमासाभ्यां यजते' तेन सर्वोऽपि यज्ञः प्रारब्धः ; सर्वस्य तदपेक्षत्वात् । सोमयागस्य दर्शपूर्णमासविकृतित्वाभावेऽप्यङ्गादीनां दीक्षणीया-प्रायणीयादीनाम् इष्टीनां तद्विकृतत्वात् अस्ति तदपेक्षा । अग्निहोत्रस्य तदङ्गानां च तन्निरपेक्षत्वेऽप्याहवनीयाद्यग्निसापेक्षत्वादग्नीनां च पवमानेष्टिसाध्यत्वादिष्टीनां दर्शपूर्णमासविकृतित्वादस्ति परम्परया तदपेक्षा । अतस्तदनुष्ठानेन सर्वस्यापि यज्ञस्य प्रारम्भः सिध्यति । यद्यपि यज्ञारम्भेणैव तदीयदेवतानां पूजयितु मारम्भः सिद्ध एव, तथापि प्राधान्यख्यापनार्थं मारब्धदेवत इति पुनर्देवताभिधानम् । यस्माद् दर्शपूर्णमासयाजिना सर्वोऽपि यज्ञ आरब्धप्रायः, अतएव देवतानां पूजा प्रारब्धप्राया । तस्मादारब्धस्य सोमयागस्यानुष्ठेयत्वाद् दर्शपूर्णमासानुष्ठानादूर्ध्वं 'दीक्षेत' दीक्षणीयेष्टिं कुर्यात् । अमावास्याकाले कर्तव्यं हविरामावास्यम्*, तद्वत् पौर्णमासञ्च । हविः-शब्दोऽत्र यज्ञ मुपलक्षयति । वा-शब्दौ समुच्चयार्थौ । अमावास्यादिसम्बन्धिना पौर्णमासीसम्बन्धिना च यज्ञेनेष्ट्वा दीक्षेत । उक्तार्थ एव तस्मिन्नित्यादिना प्रपञ्च्यते । हविः-शब्दवत् बर्हिः-शब्दोऽपि यज्ञोपलक्षकः । तस्मिन्नामावास्याख्ये हविषि यज्ञे, तस्मिन् पौर्णमासाख्ये बर्हिषि यज्ञे, अनुष्ठिते सति पश्चादेव दीक्षेत । तदाह आश्वलायनः—'दर्शपूर्णमासाभ्या मिष्ट्वेष्टिपशुचातुर्मास्यैरथ सोमेन'-इति (४.१.१) ; यजेतेति शेषः । इष्टि-

---

* 'सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्'-इति पा० ४. ३. १६ ।

ग्रायणेष्टिः *। पशुर्निरूढपशुबन्धः †। आपस्तम्बोऽप्याह—"अथ दर्शपूर्णमासावारभते ताभ्यां संवत्सर मिष्ट्वा सोमेन पशुना वा यजते"—इति (श्रौ० ५. २३. २.) ‡। एतच्छब्दानुसार चकारोऽपिशब्दपर्यायः; एषाप्येका दीक्षा। एव मुक्ते सत्यन्यापि काचिद्दीक्षास्तीति सूचितं भवति। अतएव आश्वलायन इष्टिपूर्वत्वं सोमपूर्वत्वं चेत्युभौ पक्षावुदाजहार—"ऊर्ध्वं दर्शपूर्णमासाभ्यां यथोपपत्त्येके प्रागपि सोमेनैके"—इति (४. १. २.)। उपपत्तिः द्रव्यादिसम्पत्तिस्ता मनतिक्रम्येति यथोपपत्तिः। दर्शपूर्णमासाभ्या मूर्ध्वं द्रव्यादिसम्पत्तौ सत्यां सोमेन यजेतेति केषांचिन्मतम्; ताभ्यां प्रागपि सम्पत्तौ सोमयाग इत्यपरेषां मतम्। तैत्तिरीयाश्चेष्टिपूर्वत्व मभिप्रेत्य वसन्तादिकालविशेषेष्वाधान माम्नाय पुनः सोमपूर्वत्व मभिप्रेत्य कालनियम मन्तरेणाधान मामनन्ति—"अथो खलु यदैवैनं यज्ञ उपनमेत् अथादधीत सैवास्यर्द्धिः"—इति (ब्रा० १. १. २. ८.)। आपस्तम्बोऽपीद मेव सोमाधान मभिप्रेत्य वसन्तादिकालविशेषप्रतीक्षां वारयति—'नर्तुं सूर्क्षेत नक्षत्रम्' इति (श्रौ० ५. ३. २१.) §। तस्मात् पक्षद्वयम्॥

---

* "आग्रयण मैन्द्राग्न मग्रपाकस्य व्रीहीणां यवानां च" कात्या० श्रौ० ४. ६. १। "आग्रयणं व्रीहिश्यामाकयवानाम्" आश्व० श्रौ० २. ९. १। "य आहिताग्निराग्रयणेनानिष्ट्वा नवान्नं प्राश्नीयात् तस्य का प्रायश्चित्तिः" ऐ० ब्रा० ७. २. ८। "आग्रयणेष्ट्या यजेत"—इति च शत० ब्रा० २. ४. ३. १।

† कात्या० श्रौ० षष्ठाध्यायो द्रष्टव्यः। तै० ब्रा० २. २. २. ३; ३. ६. ३।

‡ कात्यायनोऽप्याह—"दर्शपूर्णमासाभ्या मिष्ट्वाऽन्येन यजेतेति श्रुतेः"—इति ७. १. १।

§ "अथ नक्षत्राणि; कृत्तिकासु ब्राह्मण आदधीत ०—० वसन्तो ब्राह्मणस्य ०—० सोमेन यक्ष्यमाणो नर्तुं सूर्क्षेन्न नक्षत्रम्"—इति तत्र पाठः। 'न सूर्क्षेत्=नाद्रियेत'—इति तट्टीका [illegible]। "सोमेन यक्ष्यमाणो नर्तुं पृच्छेन्न नक्षत्रम्"—इति आश्व० श्रौ० २. १. १४।

चोदकप्राप्तां पञ्चदशसंख्यां * अपवदितुं संख्यान्तरं विधत्ते—“सप्तदश सामिधेनीरनुब्रूयात्”–इति । ‘प्र वो वाजा अभिद्यवः’–इत्याद्या (तै० ब्रा० ३. ५. २. १—१२.) एकादशसंख्याकाः † ऋचो वह्निसमिन्धनहेतुत्वात्सामिधेन्य इत्युच्यन्ते ‡ । तासु “त्रिः प्रथमा मन्वाह त्रिरुत्तमाम् (तै० सं० २. ५. ७. १.)”–इतिवचनात् ताः पञ्चदश सम्पद्यन्ते । प्रकृतावेव विहितासु पञ्चदशस्वृक्षु चोदकप्राप्तासु ये समिध्यमान-समिद्धवत्यौ द्वे ऋचौ §, तयोर्मध्ये धाय्याभिधेये ऋचौ प्रक्षेप्तव्ये ‖ । तथाच आश्वलायनः—‘दीक्षणीयाया धाय्ये विराजौ (४. २. १.)’–इति । तत्र ‘पृथुपाजा अमर्त्यः (सं० ३. २७. ५.)’–इत्येका, ‘तं सबाधो यतस्रुचः’ (सं० ३. २७. ६.)’ इति द्वितीया । एतच्च प्रयोगसङ्ग्रहकारेणो-

---

* तथाहि प्रकृतौ ‘पञ्चदश सामिधेनीरन्वाह’–इति तै० सं० २. ५. ८. २. ।

† यद्यपि मूले द्वादश पठितास्तथाप्यन्त्ययोः पुरुषभेदेन विकल्पितत्वात् एकादशैव ।

‡ पा० ४. ३. १२०. वा० ६ । ‘समिन्धे सामिधेनीभिर्होता तस्मात्सामिधेन्यो नाम’–इति शत० ब्रा० १. ३. ५. १ । तासामुत्पत्तिरेव समाम्नायते—“ऋषेर्ऋषेर्वा एता निर्मिता यत्सामिधेन्यः.” इति तै० सं० २. ५. ७. ५ । ‘भिन्नेभ्य ऋषिभ्यः प्रदर्शितास्ताः सामिधेन्यः’–इति च तत्र भाष्ये सायणः ।

§ समिध्यमाना ऋक् (तै० ब्रा० ३. ५. २.) नवमसामिधेनी—ऋ० सं० ३. २७. ४ ; समिद्धवती ऋक् तु (तै० ब्रा० ३. ५. २.) दशमसामिधेनी—ऋ० सं० ५. २८. ५ । तथा चाश्वलायनः ‘अथ सामिधेन्यः’–इत्युपक्रम्याह—‘समिध्यमानो अध्वरे समिद्धो अग्न आहुतेति द्वे’—इति श्रौ० सू० १. २. ७ ।

‖ सामिधेन्य ऋच एकादशैव । तासु प्रथमस्या अन्तिमायाश्च त्रिःपाठेन पञ्चदशसङ्ख्या पूरणीया भवति । सप्तदशसङ्ख्यायाः पूरणीयत्वं तु पृथुपाजेत्याद्यपरं द्वयस्य तासु प्रक्षेपोऽपि विधीयते । एवमेकविंशतित्वे सम्पादनीये यथा मध्यमां प्रक्षेपणीयता विहिता । ताः प्रक्षेपणीयत्वं एव धाय्या उच्यन्ते (ऐ० ब्रा० १. २. ७.) । तत्र धाय्ययोर्धाय्यानां वा प्रक्षेपस्तु समिध्यमान-समिद्धवत्योर्मध्ये एव भवति । ते च ऋचौ सामिधेनीषु दशमैकादश्यौ ।

दाहृतम्—‘अथ दीर्घघोयायां धाय्ये भवतः ओजिष्ठोऽग्नस्तमीमर्त्यो पृथुपाजास्त्वं सबाधः’–इति। “अग्नये समिध्यमानायानुब्रूहि (शत० ब्रा० १. ३. ५. २.)”–इत्येव मध्वर्युणा प्रेषितो होता * सामिधेनीः सप्तदश अनुब्रूयात्।

ता मेतां संख्यां प्रशंसति—“सप्तदशो वै प्रजापतिर्द्वादश मासाः पञ्चर्त्तवो हेमन्तशिशिरयोः समासेन तावान्त्संवत्सरः संवत्सरः प्रजापतिः”–इति। सप्तदश चावयवा यस्य प्रजापतेः सोऽयं सप्तदशः। तस्मिन्नर्थे वैशब्दोक्तप्रसिद्धिर्द्वादशेत्यादिना स्पष्टीक्रियते। चैत्राद्या मासा द्वादश प्रसिद्धाः। यद्यपि ‘षड्वा ऋतवः’–इति (३. १. ६.) श्रुत्यन्तराल्लोकप्रसिद्धेश्च वसन्ताद्याः षट्संख्याकाः, तथापि शीतत्वसाम्येन हेमन्तशिशिरावेकीकृत्य पञ्चसंख्योच्यते। द्वादशभिर्मासैस्तन्मेलनात्मकपञ्चभिः ऋतुभिश्च यावान् कालो भवति, तावान् कालः संवत्सर इत्युच्यते। स च संवत्सरः, तत्तदृतूचितवर्षादिनिष्पादनेन प्रजानां पालकत्वात् प्रजापतिः। तदीयत्वेन सप्तदशसंख्या प्रशस्तेत्यर्थः।

सप्तदशसंख्यावेदनं प्रशंसति—“प्रजापत्यायतनाभिरेवाभी राध्नोति य एवं वेद”–इति। संवत्सरात्मकः प्रजापतिः आयतनमाश्रयो यासां सामिधेनीनां प्रजापत्यायतनाः; तदीयसङ्ख्योपेतत्वात् तदायतनत्वम्। तादृशीभिः सामिधेनीभिः वेदिता ‘राध्नोति’ समृद्धो भवति; सति वेदने तदनुष्ठानप्रवृत्तेः फलप्राप्तिरुपपद्यते॥

---

* “अग्नये समिध्यमानायानुब्रूहीति संप्रेष्यति”–इति आप० श्रौ० २. १२. १। ‘होतेति शेषः’–इति, ‘गृहीतप्रकारः श्रावयितव्यः’–इति च तट्टीका। ‘ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः’–इति च पा० ८. २. ९१।

अथ मीमांसोदाह्रियते। पञ्चमाध्यायस्य चतुर्थपादे इदं चिन्तितम् (जै० सू० ५—९. अधि० ३.) —

"दर्शादीष्ट्वा सोमयागः क्रमोऽयं नियतो न वा।
उक्तेराद्यो न सोमस्याधानानन्तरताश्रुतेः॥

'दर्शपूर्णमासाविष्ट्वा सोमेन यजेत'–इति (तै० स० २. ५. ६.) क्त्वा-प्रत्ययेनावगम्यमानः क्रमो नियतः ? इति चेन्नैवम्; 'सोमेन यक्ष्यमाणोऽग्नीनादधीत'–इत्याधानानन्तरताया अपि श्रवणात्*। तस्मादिष्टिसोमयोः पौर्वापर्यं न नियतम्॥"—इति।

"विप्रस्य सोमपूर्वत्वं नियतं वा न वाग्रिमः।
उत्कर्षतो नैव मग्नीषोमीयस्यैव तच्छ्रुतेः॥

इष्टिपूर्वत्वं सोमपूर्वत्वं च विकल्पितम्—इति यदुक्तम्, तत्र ब्राह्मणस्य सोमपूर्वत्वं नियतम्। कुतः? उत्कर्षश्रवणात्। 'आग्नेयो वै ब्राह्मणो देवतया सोमेनेष्ट्वाऽग्नीषोमीयो भवति, यदेवादः पौर्णमासं हविस्तदनुनिर्वपेत्तर्हि स उभयदेवतो भवति'—इति (तै० सं० ५. ५. १.)। अस्यायमर्थः। प्रजापतेर्मुखादग्निर्ब्राह्मणश्चेत्युभावुत्पन्नौ (तै० स० ७.१.२.४.), ततो ब्राह्मणस्याग्निरेक एव देवतेत्याग्नेय एव ब्राह्मणो न तु सौम्यः; सोमस्य तद्देवतात्वाभावात्। यदा स ब्राह्मणः सोमेन यजेत,—तदा सोमोऽप्यस्य देवतेत्यग्नीषोमीयो भवति;—तस्याग्नीषोमीयस्य ब्राह्मणस्यानुरूपं पौर्णमासमग्नीषोमीयपुरोडाशरूपं हविः सोमादूर्ध्वमनुनिर्वपेत्, तदा स ब्राह्मणो देवताद्वयसम्बन्धी भवतीति। यद्यप्यत्र कर्मान्तरं किञ्चिद् विधीयत इति केचित्

---

* 'यः सोमेन यक्ष्यमाणोऽग्नीनादधीत, नर्तुं स प्रतीक्षेत न नक्षत्रम्'—इति तत्पूर्णपाठः।

गम्यते, तथापि पौर्णमासं हविरिति विस्पष्टप्रत्यभिज्ञानाच्च कर्मान्तरं किं तु दर्शपूर्णमासयोः सोमादूर्ध्व मुत्कर्षः। तस्माद् विप्रस्य सोमपूर्व्वत्व मेव नियत मिति प्राप्ते ब्रूमः ;— नात्र दर्शशब्दः पूर्णमासशब्दो वा कश्चिद्यागवाची श्रूयते, पौर्णमास मित्येतत् तद्धितान्तं हविर्विशेषणत्वेनोपन्यस्यते *, तच्च हवि-रग्नीषोमीयपुरोडाशरूप मिति देवताद्वयेन संस्तवादवगम्यते। तस्मादेकस्यैव हविष उत्कर्षः ; न तु कृत्स्नयोर्दर्शपूर्णमासयोः। तथा सति ब्राह्मणस्यैकस्मिन्नेवाग्नीषोमीयपुरोडाशसोमपूर्वत्व-नियमः। इतरत्र क्षत्रियवैश्ययोरिवास्यापीष्टिपूर्व्वत्वसोमपूर्वत्वे विकल्प्येते॥"—इति च।

तृतीयाध्यायस्य षष्ठे पादे चिन्तितम् (जै॰ सू॰ ८, अधि॰ २.)—

"सामिधेनीः सप्तदश प्रकृतौ विकृतावुत।
पूर्ववत् प्रकृतौ पाञ्चदश्येनैतद्विकल्प्यते॥
विकृतौ साप्तदश्यं स्यात् प्रकृतौ प्रक्रियाबलात्।
पाञ्चदश्याविरुद्धत्वादाकाङ्क्षाया निवृत्तता॥

अनारभ्य† श्रूयते—'सप्तदश सामिधेनीरनुब्रूयात् (१२ पृ॰ ४ पं॰)—इति। 'प्र वो वाजाः'—इत्याद्या अग्निसमिन्धनार्था ऋचः सामिधेन्यः (तै॰ ब्रा॰ ३. ५. २. १—१२)। तासां साप्तदश्यं पूर्वाशयेन प्रकृतिगतम्। यदि प्रकृतौ 'पञ्चदश सामिधेनीरन्वाह'—इति (तै॰ सं॰ २. ५. ८. २.) विधिः स्यात्, तर्हि

---

* 'सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्'—इति पा॰ ४. ३. १६। पौर्णमासं हविरिदमेषां मयि'—इति च स्फुटम् तै॰ ब्रा॰ १. ७. ४. ४.।

† अनारब्धः ख. ग।

पाञ्चदश्यसाप्तदश्ये विकल्पेयाता मिति प्राप्ते ब्रूमः ;—विकृतावेव साप्तदश्यं निविशते ; प्रकृतौ पाञ्चदश्यावरुद्धायां सामिधेनीनां सङ्ख्याकाङ्क्षाया अभावात् । न च पाञ्चदश्यसाप्तदश्ययोः समानबलत्वादवरोधाभाव इति शङ्कनीयम् ; पाञ्चदश्ये प्रकरणानुग्रहस्याधिकत्वात् । तस्मात् मित्रविन्दाध्वरकल्पादिविकृतौ साप्तदश्य मवतिष्ठते *। न चात्र पूर्वन्यायोऽस्ति ; साप्तदश्यस्य चोदकप्राप्त्यभावेन पुनर्विधाने दोषाभावात् ॥”—इति ।

तत्रैवान्यविध मपि (जै० सू० १०. अधि० ३.)—

“साप्तदश्यं तु वैश्यस्य विकृतौ प्रकृतावुत ।
पूर्ववच्च न सङ्कोचो नित्यनैमित्तिकोक्तितः ॥
गोदोहनेन प्रणयेत्कामीत्यन्यदुदाहरन् ।
भाष्यकारस्तदप्यस्तु न्यायस्यात्र समत्वतः ॥

‘सप्तदशानुब्रूयाद् वैश्यस्य (तै० सं० २. ५. १. २.)’—इति श्रुतं वैश्यनिमित्तकं साप्तदश्यं पूर्वन्यायेन विकृतिगत मिति चेत् नैवम् ; नैमित्तिकेनानेन वचनेन प्रकृतिगतस्य नित्यस्य पाञ्चदश्यस्य वैश्यव्यतिरिक्तविषयतया सङ्कोचनीयत्वात् । नित्यं सामान्यरूपतया सावकाशत्वेन दुर्बलम् ; नैमित्तिकं तु विशेषरूपत्वनिरवकाशत्वाभ्यां प्रबलम् ; तस्माद् वैश्यनिमित्तकं साप्तदश्यं प्रकृतावतिष्ठते ॥

अत्र भाष्यकारो† ऽन्यदुदाजहार—‘चमसेनापः प्रणयेद्गोदो-

---

* मित्रविन्देष्टिः वाजसनेयके श्रूयते । शत० ब्रा० ११. ४. ३. २० । शाङ्खा० श्रौ० ३. ७. १ । कात्या० श्रौ० ५. १२. १ । अध्वरकल्पस्तु हविर्यज्ञविशेषः । सोऽपि वाजसनेयके एव । शत० ब्रा० १. १. ४. ७ ; ६. ६. १. ४ ।

† मीमांसाभाष्यकारः शबरस्वामी । ३ अ० ६ पा० १० सू० ।

दोहनेन पशुकामस्य'—इति । तत्र प्रकृतौ चमसेनावरुद्धत्वाद्गोदोहनं विकृताविति पूर्वपक्षः । कामनानिमित्तकेन गोदोहनेन नित्यस्य चमसस्य निष्कामविषयतया सङ्कोचनीयत्वात् प्रकृतावेव गोदोहनमिति राद्धान्तः ॥"—इति ।

दशमाध्यायस्याष्टमपादे चिन्तितम् (जै० सू० १७—१८. अधि ६.)

“सामिधेनीसाप्तदश्यं वैमृध्यादावपूर्वगीः ।
संहृतिर्वोपकारस्य क्लृप्तत्वादाज्यभागवत् ॥
सामिधेनीश्चोदकाप्ताः साप्तदश्यन्तु वैमृधे ।
पुनर्वाक्येन संहार्य्यमनारभ्योक्तिचोदितम् ॥

अनारभ्य किञ्चिदाम्नायते—'सप्तदश सामिधेनीरनुब्रूयात् (१२ पृ० ४ पं०)'—इति । तथा वैमृधे *, अध्वरकल्पायां, पशौ, चातुर्मास्येषु, मित्रविन्दायाम्, आग्रयणेष्ट्यादौ च पुनः साप्तदश्यं विहितम् । यद्यप्यनारभ्याधीतानां प्रकृतिगामित्वं न्याय्यम्, तथापि श्रुतेन पाञ्चदश्येनावरुद्धत्वाद् विकृतिष्वेव निविशते । तथा सति वैमृधादिषु विकृतिष्वनारभ्यवादप्राप्ताः सप्तदश सामिधेन्यः प्राकरणिकेन विधिना पुनर्विधीयमाना गृहमेधीयाज्यभागवत् क्लृप्तोपकारत्वेनेतिकर्त्तव्यताकाङ्क्षां पूरयन्त्यश्चोदकं लोपयन्त्यो वैमृधादेरपूर्वकर्मतां गमयन्ति ; साप्तदश्यन्त्वनारभ्यवादप्राप्तमनूद्यत इति प्राप्ते ब्रूमः ;— वैमृधादिषु सामिधेन्य आज्यभागवत् न विधीयन्ते, किन्तु चोदकप्राप्ता अनूद्य साप्तदश्यं विधीयते ; तच्च साप्तदश्यं वैमृधादिप्रकरणेष्वाम्नातैर्विधिभिः कासुचिदेव विकृतिषु प्राप्तम्, अनारभ्यवादेन तु सर्वासु विकृतिषु ; तत्रानारभ्यवादो

---

* वैमृधेष्टिः तै० सं० २, ५, २, ४ । शत० ब्रा० ६, ५, २, ५ ।

विलम्बते । प्रथमं विधेयस्य साप्तदश्यस्य सामिधेनीसम्बन्धाव-बोधः, तत्सम्बन्धान्यथानुपपत्त्या क्रतुप्रवेशं परिकल्प्य प्रकृतौ पाञ्चदश्यपराहतत्वेन विकृतिषु सर्वासु निवेशः क्रियत इति विलम्बः। प्राकरणिकैर्विधिभिः सामिधेनीसम्बन्ध एव बोधनीयः। विकृतौ तद्विशेषे च प्रवेशो न कल्पनीयः; प्रत्यक्षप्रकरणे पाठेनैव तत्सिद्धेः। तत्र साप्तदश्यस्य वैमृधादिविकृतिविशेषसम्बन्धे सहसा प्रतिपन्ने सति तद्विरोधात्, सर्वप्रकृतिसम्बन्धो न कल्पयितुं शक्यः। अनारभ्यवादस्तु चोदकप्राप्तस्य पाञ्चदश्यस्य बाधकः। सर्वथापि चतुर्धाकरणवदुपसंहारो न त्वाज्यभागवदपूर्वं कर्म॥"
--इति॥ १॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमाध्याये प्रथमः खण्डः॥ १॥

अथ द्वितीयः खण्डः।

यज्ञो वै देवेभ्य उदक्रामत् तमिष्टिभिः प्रैष मैच्छन् यदिष्टिभिः प्रैष मैच्छंस्तदिष्टीना मिष्टित्वं त मन्वविन्दन्ननुवित्तयज्ञो राध्नोति य एवं वेदाहूतयो वै नामैता यदाहुतय एताभिर्वै देवान् यजमानो ह्वयति तदाहुतीना माहूतित्वं मूतयः खलु वै ता नाम याभिर्देवा यजमानस्य हव मायन्ति ये वै पन्थानो याः स्रुतयस्ता वा ऊतयस्त उ एवैतत् स्वर्गयाणा यजमानस्य भवन्ति तदाहुर्यदन्यो जुहोत्यथ योऽनु चाह यजति च

वषार्त्तं होतेत्याचक्षत इति यथार्ष स तस्य यथाभाजनं देवता अमु मावहामु मावहेत्यावाहयति तदेव होतुर्होतृत्वं होता भवति होतेत्येन मा चक्षते य एवं वेद ॥ २ ॥

दीक्षणीयेष्टिं निरूप्य तत्प्रशंसार्थ मिष्टिशब्दनिर्वचनं दर्शयति—"यज्ञो वै देवेभ्य उदक्रामत् त मिष्टिभिः प्रैष मैच्छन् यदिष्टिभिः प्रैष मैच्छंस्तदिष्टीना मिष्टित्वं त मन्वविन्दन्"-इति। ज्योतिष्टोमाभिमानी यज्ञपुरुषः, केनापि निमित्तेनापरक्तो 'देवेभ्यः' अपक्रान्तवान्। 'तं' यज्ञं दीक्षणीया-प्रायणीयादिभिः 'इष्टिभिः' 'प्रैषम्' अन्वेष्टुम् 'ऐच्छन्' इच्छन्ति। यज्ञ माभिरिच्छन्तीतीष्टिशब्दस्य व्युत्पत्तिः। यजतिधातोरिष्टिशब्दः सर्वत्र प्रसिद्धः *; अत्र त्विच्छतिधातोरिति विशेषः †। अन्विष्य 'तं' यज्ञ मनुक्रमेण लब्धवन्तः।

तन्नामवेदनं प्रशंसति—"अनुवित्तयज्ञो राध्नोति य एवं वेद"-इति। वेदिता तदनुष्ठानेन लब्धयज्ञः फलेन समृद्धो भवति॥

पुनरपि दीक्षणीयादीष्टिप्रशंसार्थं तास्विष्टिषु विद्यमानाना माहुतीनां वाचकं शब्दं निर्वक्ति—"आहूतयो वै नामैता यदाहुतय एताभिर्वै देवान् यजमानो ह्वयति तदाहुतीना माहुतित्वम्"-इति। आहुतय इत्युकारेण ह्रस्वेन, आहूतय इत्येवं दीर्घेण युक्तं द्रष्टव्यम्। ह्वयत्याभिरिति तद्व्युत्पत्तिः। जुहोतिधातो-

---

* "श्रुयजीषिस्तुभ्यः करणे"--इति पा० ३. ३. ९४, वा० १। अम० ३. ४. ४१।

† 'मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः'--इति पा० ३. ३. ९६।

[illegible] शब्दः पूर्वं प्रसिद्धः * ; अथ [illegible] विशेषः † ॥

इष्टीराहुतीश्च मिलित्वा प्रकारान्तरेण प्रशंसति—“[illegible] खलु वै ता नाम याभिर्देवा यजमानस्य हवमायन्ति ये वै पन्थानो या स्रुतयस्ता वा ऊतयस्त उ एवैतत् स्वर्गयाणा यजमानस्य भवन्ति”–इति । इज्यन्ते देवा अस्मिन्निति इष्टी ऽत्र सोमयागः । 'याभिः' इष्टिभिस्तदन्याभिराहुतिभिश्च निमित्तभूताभिः 'देवाः' 'यजमानस्य' यज्ञमागच्छन्ति, 'ताः' इष्टय आहुतयश्च 'ऊतयः' –इत्येतत् 'नाम' प्रतिपद्यन्ते । 'खलु'-शब्दो 'वै'-शब्दश्च प्रसिद्धार्थः । अवन्ति रक्षन्तीत्यवतेर्धातोरूतिशब्दः प्रसिद्धः ; 'आयन्ति' आगच्छन्ति याभिरित्याङ्पूर्वस्यायतिधातोर्वा वर्णविकारेणोतिशब्दः । यद्वा, तस्मादेव धातोः स्वर्गप्रापकत्वाभिप्रायेणोतिशब्दो व्युत्पाद्यते ‡ । 'ये' केचित् 'पन्थानः' इष्टिरूपाः स्वर्गस्य प्रौढमार्गाः सन्ति, 'याः' च 'स्रुतयः' तन्मार्गावयवरूपा आहुतयः सन्ति, तद्द्विविधाः 'ऊतयः' इत्युच्यन्ते । 'त उ एव एतत्' त एवैते द्विविधा अपि मार्गाः 'यजमानस्य' 'स्वर्गयाणाः' स्वर्गप्रापकाः 'भवन्ति' ॥

पुनरपीष्टिप्रशंसार्थं तदङ्गभूतयोर्याज्यानुवाक्ययोर्वक्तरि प्रयुज्यमानं होतृशब्दं निर्वक्तुं ब्रह्मवादिनां प्रश्नमवतारयति—

“तदाहुर्यदन्यो जुहोत्यथ योऽनु चाह यजति च कस्मात् तं होतेत्याचक्षत इति”–इति । 'तत्' तास्विष्टिषु किञ्चिच्चोद्यम्

---

* '[illegible] धातुपसर्गस्येति वक्तव्यम्'–इति पा० ३. २. १२५. वा० १ । उणा० २. ८४ । 'जुहोतेर्होतेत्यौर्णवाभः'–इति निरु० ७. ४. २ ।

† "ह्वातव्यः"—इति, "होतारं ह्वातारम्"–इति च निरु० ४. ४ ५ ; ७. ४. २ ।

‡ 'ऊतिः' निघ० ४. २. १५ ; 'ऊतिरवनात्'–इति च निरु० ५. १. ३ ।

'आहुः';— 'यद्' यस्मात् कारणात्, होतुः 'अन्यः' अध्वर्युः 'जुहोति', तस्मात् तत्कारणात् तद्धातुनिष्पन्नो होतृशब्दस्तस्याध्वर्योः युक्तः ; याज्ञिकास्तु तमध्वर्युं होतेति नाचक्षते ; 'अथ' 'यः' पुमान् 'अनु चाह' पुरोऽनुवाक्यां चानुब्रूते, 'यजति च' याज्याञ्च पठति, 'तं' पुमांसम् 'अनुवक्ता'-इति 'यष्टा'-इति चानभिधाय 'कस्मात्' कारणात् 'होता-इत्याचक्षते'? 'इति'-शब्दः प्रश्नसमाप्त्यर्थः ॥

अभिज्ञाना मभिप्रेतं प्रश्नस्योत्तरं दर्शयति—"यद्वाव स तत्र यथाभाजनं देवता अमु मावहामु मावहेत्यावाहयति तदेव होतुर्होतृत्वं होता भवति"—इति। 'यद्वाव' यस्मादेव कारणाद्याज्यानुवाक्ययोर्वक्ता 'सः' पुमान् 'तत्र' यागे 'यथाभाजनं' यथास्थानं सर्वाः 'देवताः' 'आवाहयति',—'अमुम्' अग्निम् 'आवह', 'अमुं' सोमम् 'आवह' 'इति' * ; 'तदेव' तस्मादेव कारणाद्याज्ञिकाभिमतस्य होतुस्तन्नाम सम्पन्नम्। अत्र ण्यन्तस्य वहधातोश्छान्दस्या प्रक्रियया निष्पत्तिः ; न तु जुहोतिधातोः। तस्माद्धोमकर्तृत्वाभावेऽप्यावाहयितृत्वसद्भावात् 'होतृत्वम्' उपपन्नम् ;—'इति' अयं याज्यानुवाक्ययोर्वक्तापि 'होता' भवत्येव।

होतृत्ववेदनं प्रशंसति—"होतेत्येन माचक्षते य एवं वेद"-इति। याज्ञिकाः 'एवं' वेदितारं होतारं मुख्यो 'होता'-इति कथयन्ति ; हौत्रे कर्म्मणि कुशलो भवतीत्यर्थः † ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमाध्याये द्वितीयः खण्डः ॥ २ ॥

---

* "अग्नि मग्न आवह। सोम मावह। अग्नि मावह"-इत्यादयः तै० ब्रा० ३, ५, ३, १।

† 'तस्य धर्म्यम्। अण् महिष्यादिभ्यः'-इति पा० ४, ४, ४७, ४८।

॥ अथ तृतीयः खण्डः ॥

पुनर्वा एत मृत्विजो गर्भं कुर्वन्ति यं दीक्षयन्त्यद्भिरभिषिञ्चन्ति रेतो वा आपः सरेतस मेवैनं तत् कृत्वा दीक्षयन्ति नवनीतेनाभ्यञ्जन्त्याज्यं वै देवानां सुरभि घृतं मनुष्याणा मायुतं पितॄणां नवनीतं गर्भाणां तद्यन्नवनीतेनाभ्यञ्जन्ति स्वेनैवैनं तद्भागधेयेन समर्धयन्त्याञ्जन्त्येनं तेजो वा एतदक्ष्योर्यदाञ्जनं सतेजस मेवैनं तत् कृत्वा दीक्षयन्त्येकविंशत्या दर्भपिञ्जूलैः पावयन्ति शुद्ध मेवैनं तत्पूतं दीक्षयन्ति दीक्षितविमितं प्रपादयन्ति योनिर्वा एषा दीक्षितस्य यद्दीक्षितविमितं योनि मेवैनं तत् स्वां प्रपादयन्ति तस्माद् ध्रुवाद्योनेरास्ते च चरति च तस्माद् ध्रुवाद्योनेर्गर्भा धीयन्ते च प्र च जायन्ते तस्माद्दीक्षितं नान्यत्र दीक्षितविमितादादित्यो ऽभ्युदियाद्वाभ्यस्तमियाद्वापि वाभ्याश्रावयेयुर्वाससा प्रोर्णुवन्त्युल्बं वा एतद्दीक्षितस्य यद्वास उल्बेनैवैनं तत्प्रोर्णुवन्ति कृष्णाजिन मुत्तरं भवत्युत्तरं वा उल्बाज्जरायु जरायुणैवैनं तत् प्रोर्णुवन्ति मुष्टी कुरुते मुष्टी वै कृत्वा गर्भोऽन्तः शेते मुष्टी कृत्वा कुमारो जायते तद्यन् मुष्टी कुरुते यज्ञञ्चैव तत्सर्वाश्च देवता मुष्ट्योः कुरुते तदाहुर्न पूर्वदीक्षिणः

संसवोऽस्ति परिगृहीतो वा एतस्य यज्ञः परिगृहीता देवता नैतस्यार्तिरस्त्यपरदीक्षिण एवं यथा तथेत्युन्मुच्य कृष्णाजिन मवभृथ मभ्यवैति तस्मान्मुक्ता गर्भा जरायोर्जायन्ते सहैव वाससाभ्यवैति तस्मात्सहैवोल्बेन कुमारो जायते ॥ ३ ॥

इत्थ मिष्ट्याहुत्यूतिहोतृशब्दानां निर्वचनेन दीक्षणीयेष्टिं प्रशस्य तयेष्ट्या दीक्षितस्य संस्कारविशेषान्विधातुं प्रस्तौति—"पुनर्वा एत मृत्विजो गर्भं कुर्वन्ति यं दीक्षयन्ति"-इति । 'यं' यजमानं दीक्षणीयेष्ट्या दीक्षितं कुर्वन्ति, तं यजमानं पुरा मातापितरौ कस्मिंश्चित्काले गर्भं कृतवन्तौ, पुनरप्येन मिदानीम् 'ऋत्विजः' यज्ञकाले 'गर्भं कुर्वन्ति' गर्भवदसौ संस्कारैः पालनीय इत्यर्थः ॥

एकं * संस्कारं विधत्ते—"अद्भिरभिषिञ्चन्ति"-इति । अप्सु स्नपयन्तीत्यर्थः । एतदेवाभिप्रेत्य तैत्तिरीया यजमानस्य वपनादूर्ध्वं स्नान मामनन्ति—'अङ्गिरसः सुवर्गं लोकं यन्तोऽप्सु दीक्षातपसी प्रावेशयन्नप्सु, स्नाति साक्षादेव दीक्षातपसी † अवरुन्धे'-इति (तै० स० ६, १.१.२.)। यजमानस्य स्नानकर्तृत्वेऽपि ऋत्विजां स्नपयितृत्व मभिप्रेत्याभिषिञ्चन्तीत्युक्तम् ।

उक्ताना मपां प्रशंसा माह—"रेतो वा आपः सरेतस मेवैनं तत् कृत्वा दीक्षयन्ति"-इति । कार्यकारणयोरभेदादपां रेतस्त्वम् ; वैराजदेहगताद्रेतस आप उत्पन्नाः । तथाचारण्यके सृष्टि-

---

* एवं क ।

† 'मुण्डनादिसंस्कारो दीक्षा, आहारादिनियमस्तपः; अप्सु स्नानेन तदुभय मव्यवधानेनैव प्राप्नोति'- इति च स तत्रार्थं माननीयम् ।

प्रकरणे समाम्नायते—'शिश्नाद्रेतो रेतस आपः (२. ४. १. ६.)'-इति । यद्वा, मनुष्यादिशरीरगतं रेतोमूत्रादिक मपां कार्यम् । तच्च गर्भोपनिषद्याम्नातम्—'अस्मिन् पञ्चात्मके शरीरे यत्कठिनं सा पृथिवी, यद्द्रवं तदापः'-इति । 'तत्' तेनाभिषेचनेन 'एनं' यजमानं 'सरेतसं' पुत्रोत्पादनसमर्थं 'कृत्वा' संस्कुर्वन्ति ॥

संस्कारान्तरं विधत्ते—"नवनीतेनाभ्यञ्जन्ति"-इति । सर्वस्मिन्नपि शरीरेऽनुलेपयन्तीत्यर्थः ॥

नवनीतस्य गर्भस्थानीययजमानयोग्यतां दर्शयति—'आज्यं वै देवानां सुरभि घृतं मनुष्याणा मायुतं पितृणां नवनीतं गर्भाणां तद्यन्नवनीतेनाभ्यञ्जन्ति स्वेनैवैनं तद्भागधेयेन समर्धयन्ति'-इति । आज्यघृतयोर्भेदः पूर्वाचार्यैरुदाहृतः—'सर्पिर्विलीन माज्यं स्याद् घनीभूतं घृतं विदुः'-इति । ईषद्विलीन मायुतं सुरभि योग्यं प्रिय मित्यर्थः । घृतायुतनवनीतेष्वप्येतत्पद मनुवर्त्तते । ननु तैत्तिरीया घृतस्य देवप्रियत्व मामनन्ति—'घृतं देवानां मस्तु पितॄणां निष्पक्वं मनुष्याणाम् (सं० ६. १. १. ४.)'-इति * । ईषद्विलीनं मस्तु ; निःशेषेण विलीनं निष्पक्वम् । नायं दोषः ; उभयत्र नवनीतप्रशंसारूपार्थवादत्वेन घृताज्ययोः व्यत्ययेन पाठेऽपि विरोधाभावात् । तथा सति नवनीतस्य गर्भयोग्यत्वे सति यदि नवनीतेनाभ्यङ्गं कुर्युः, तदानी मेनं यजमानं स्वोचितेनैव भागेन समृद्धं कुर्वन्ति ॥

नेत्रयोरञ्जनेन संस्कारं विधत्ते—"आञ्जन्त्येनम्"-इति ।

---

* "नवनीतस्य पाकजन्यास्तिस्रोऽवस्थाः : अपक्वम्, ईषत्पक्वम्, निःशेषपक्वं च ; इत्या[illegible] सुरभि निःशेषपक्वम् । अतएव बह्वृचाः पठन्ति—'आज्यं वै देवानाम्'-इति (ऐ० ब्रा० १. १, ३.)" इति तत्रैव सा० भा० ।

अक्ष्णोर्दृष्टिप्रसादहेतुत्वेनाञ्जनं प्रशंसति—"तेजो वा एतदक्ष्योर्यदाञ्जनं सतेजसमेवैनं तत् कृत्वा दीक्षयन्ति"-इति। आञ्जनस्याक्षितेजस्त्वं लोके सिद्धम्। तत्प्रकारविशेषः शाखान्तरे "दक्षिणं पूर्वमाङ्क्ते" इत्यादिना विहितः (तै॰ सं॰ ६.१.१.५,६.)* ॥

संस्कारान्तरं विधत्ते—"एकविंशत्या दर्भपिञ्जूलैः पावयन्ति"-इति। दर्भपिञ्जूल-शब्देन कुशसङ्घा उच्यन्ते। तैरेकविंशतिसङ्ख्याकैः यजमानं मार्जयित्वा शुद्धं कुर्युः।

यद्यप्यसावभिषेकेणैव शुद्धः, तथापि अतिशयेन शुद्धिरित्येवमभिप्रायं दर्शयति—"शुद्धमेवैनं तत् पूतं दीक्षयन्ति"-इति। पूर्वमपि शुद्धमेव सन्तमेतं यजमानं पुनरपि तत्तेन कुशसङ्घमार्जनेन पूतं कृत्वा संस्कुर्वन्ति। यद्यपि शाखान्तरे†—'द्वाभ्यां पावयति, त्रिभिः पावयति'-इत्यादिना सङ्ख्यान्तरविषया बहवः पक्षा उपन्यस्ताः, तथाप्येते सर्वे एकविंशतावन्तर्भावादनुवादरूपाः प्रशंसार्थाः। अतएव तत्रान्तिमे पर्याये एकविंशत्या पावयतीत्युपसंहारः कृतः‡ ॥

उक्तैः संस्कारैः संस्कृतस्य दीक्षितस्य प्राचीनवंशाख्यशाला-

---

* तद्यथा—'दक्षिणं पूर्वमाङ्क्ते ; सव्यं हि पूर्वं मनुष्या आञ्जते, न निधावति ; नीव हि मनुष्या धावन्ते । पञ्चकृत्व आङ्क्ते, ०—०, अपरिमितं हि मनुष्या आञ्जते । सतूलया आङ्क्ते, अपतूलया हि मनुष्या आञ्जते ०—०'-इति । 'मनुष्येषु योषित्सु अञ्जने वामभागपूर्वत्वं प्रसिद्धम् । अञ्जनीयेनाङ्गुलिः चक्षुषि सहसा पुनः पुनः पर्यायेण निधावनं । तच्च मनुष्याः कुर्वन्ति । + । + । अग्रसहिता शरेषीका सतूला । मनुष्याणामिषीकानियम एव नास्ति कुतः सतूलत्वनियमः'-इत्यादि तत्र । सा॰ भा॰ शतपथब्राह्मणेऽपि "अथाक्ष्यावनक्ति"-इत्यादि ३. १. ३. ९—१६ ।

† तै॰ सं॰ ६. १. १. ७, ८ । तत्सङ्ख्या अपि तत्रैव पुरस्तात् १. २. १ ।

‡ द्वाभ्याम्, त्रिभिः, पञ्चभिः, षड्भिः, सप्तभिः, नवभिः, एकविंशत्या ।

प्रवेशं विधत्ते—"दीक्षितविमितं प्रपादयन्ति"-इति । दीक्षितस्य प्रवेशार्थं विशेषेण निर्मितः प्राचीनवंशो दीक्षितविमितः ; तं प्रवेशयेयुः ।

पूर्वत्र दीक्षितस्य गर्भत्वाभिधानादौचित्येन प्राचीनवंशं योनित्वेन प्रशंसति—"योनिर्वा एषा दीक्षितस्य यद्दीक्षितविमितं योनिमेवैनं तत् स्वाम्प्रपादयन्ति"-इति । प्राचीनवंशस्य योनित्वोपचारात् 'तत्' तेन प्राचीनवंशप्रवेशेन स्वकीययोनिप्रवेशः सम्पाद्यते । सोऽयं प्रवेशः शाखान्तरे विस्पष्टमाम्नायते—'बहिः पावयित्वान्तः प्रपादयति मनुष्यलोक एवैनं पावयित्वा पूतं देवलोकं प्रणयति' इति (तै० सं० ६. १. २. १.) । आपस्तम्बोऽप्याह—'आ वो देवास ईमह इति पूर्वया द्वारा प्राग्वंशं प्रविश्य' इति (श्रौ० १०. ८. १.) ॥

तस्य दीक्षितस्य कञ्चिन्नियमं विधत्ते—"तस्माद् ध्रुवाद् योनेरास्ते च चरति च" इति । अत्र तिस्रः पञ्चम्यः सप्तम्यर्थे द्रष्टव्याः । अस्मिन् दीक्षितार्थं निर्मिते देवयजनाख्ये स्थिरस्थाने स दीक्षित उपवेशनं सञ्चरणं च कुर्यात् ।

विहितमर्थं प्रशंसति—"तस्माद् ध्रुवाद्योनेर्गर्भा धीयन्ते च प्र च जायन्ते" इति । यस्माद् गर्भस्थानीयस्य दीक्षितस्य स्थिरे देवयजनस्थाने योनिरूपे उपवेशनं सञ्चरणं च ; तस्माल्लोकेऽपि स्थिरे योनिमध्ये नवसङ्ख्याकान् मासान् 'गर्भा धीयन्ते'*। तस्मादेव स्थिरात् योनिमध्यात् उत्पद्यन्ते ॥

तस्य दीक्षितस्य देवयजनाद् बहिर्निर्गमनं निषेधति—"तस्माद्

---

* 'गर्भाः' धार्यन्ते क ।

दीक्षितं नान्यत्र दीक्षितविमितादादित्योऽभ्युदियान्नाभ्यस्तमियान्नापि वाभ्याश्रावयेयुः’’-इति। यस्माद् दीक्षितस्योपवेशनसञ्चरणयोर्देवयजन मेव स्थानम्, तस्मात् कारणात् ‘दीक्षितविमिताद्’ देवयजनदेशाद् ‘अन्यत्र’ बहिर्देशे ‘दीक्षितम्’ ‘अभि’ लक्ष्य ‘आदित्यो नोदियान्नास्तमियात्’ च। किञ्च ऋत्विजो बहिरवस्थितं दीक्षित मभिलक्ष्य आश्रावणादिकं न कुर्युः। यद्यपि ध्रुवाद्योनेरास्ते चरति विधानादेवाय मर्थः सिद्धः, तथापि मलमूत्रविसर्गाद्यावश्यककार्यार्थं कदाचिद्बहिर्निर्गमन मभ्युपगम्य तत्र विशेषाभिधान मेतत्। कालान्तरे कथञ्चिद्गमनेऽप्युदयास्तमयाश्रवणादिकालेषु सर्वथा न निर्गच्छेदित्यर्थः। तदेतद् दृष्टान्तपुरःसरं शाखान्तरे प्रपञ्चितम्--‘गर्भो वा एष यद्दीक्षितो योनिर्दीक्षितविमितं यद्दीक्षितविमित मभ्येत्य वसेद्यथा योनेर्गर्भः स्कन्दति तादृगेव तत् प्रवस्तव्य मात्मनो गोपीथायेति’* ॥

संस्कारान्तरं विधत्ते—‘‘वाससा प्रोर्णुवन्ति उल्बं वा एतद्दीक्षितस्य यद्वास उल्बेनैवैनं तत्प्रोर्णुवन्ति’’ इति। उल्बशब्देन गर्भस्याभ्यन्तरं चर्मवेष्टन मुच्यते। अय मर्थः शाखान्तरे स्पष्टीकृतः—‘गर्भो वा एष यद्दीक्षित उल्बं वासः प्रोर्णुते तस्माद्गर्भाः प्रावृता जायन्ते’-इति (तै० सं० ६. १. ३. २.)। वाससो बहिर्वेष्टनान्तरं विधत्ते—‘‘कृष्णाजिन मुत्तरं भवति’’ इति। बहिर्वेष्टनत्वसाम्येन कृष्णाजिनस्य जरायुरूपत्वं दर्शयति—‘‘उत्तरं वा उल्बाज्जरायु जरायुणैवैनं तत्प्रोर्णुवन्ति’’-इति ॥

संस्कारान्तरं विधत्ते—‘‘मुष्टी कुरुते’’-इति। यजमानो हस्त-

---

* शत० ब्रा० ३, २, १ द्रष्टव्यञ्च।

योर्मुष्टिं कुर्यात्। तत्प्रकार आपस्तम्बेन स्पष्टमभिहितः—'अथाङ्गुलीर्न्यञ्चति। स्वाहा यज्ञं मनसेति द्वे स्वाहा दिव इति द्वे स्वाहा पृथिव्या इति द्वे स्वाहोरोरन्तरिक्षादिति द्वे स्वाहा यज्ञं वातादारभ इति मुष्टी करोति' इति (श्रौ० १०.११.२,४.)।

गर्भसाम्येन यज्ञस्य सर्वदेवतानां च धारणेन प्रशंसति—"मुष्टी वै कृत्वा गर्भोऽन्तः शेते मुष्टी कृत्वा कुमारो जायते तद्यन्मुष्टी कुरुते यज्ञं चैव तत्सर्वाश्च देवता मुष्ट्योः कुरुते"—इति। गर्भस्य मुष्टिद्वये शास्त्रप्रसिद्ध्यर्थो 'वै' शब्दः। जायमानस्य मुष्टिद्वयं लोके प्रसिद्धम्। मुष्टिमध्ये यज्ञधारणं शाखान्तरेऽप्याम्नातम्—'मुष्टी करोति वाचं यच्छति यज्ञस्य धृत्यै' इति (तै० सं० ६.१.४.२.)।

प्रकारान्तरेण मुष्टिद्वयं प्रशंसति—"तदाहुर्न पूर्वदीक्षिणः संसवोऽस्ति परिगृहीतो वा एतस्य यज्ञः परिगृहीता देवता नैतस्यार्त्तिरस्त्यपरदीक्षिण एव यथा तथेति"—इति। तत्र मुष्ट्योः करणे ब्रह्मवादिनः किञ्चिद्वचनम् 'आहुः'। द्वयोर्बहूनां वा यजमानानां सम्भूय सोमाभिषवः 'संसवः', स च महान् दोषः; तस्मिन्नेव देशे तस्मिन्नेव काले मत्सरग्रस्तैर्यजमानैः प्रवर्त्तितत्वात्। नद्या वा पर्वतेन वा व्यवधानरहितयोः समीपवर्त्तिनोः परस्परमन्त्रध्वनिश्रवणयोग्ययोर्देशयोः स्पर्द्धमानाभ्यां यजमानाभ्यां प्रवर्त्तितौ यौ सोमयागौ, तयोरयं संसवाख्यो दोषः। तथाच सूत्रकार आह—"संसवोऽनन्तर्हितेषु नद्या वा पर्वतेन वा"—इति (आ० श्रौ० ६. ६. ११.)। सोऽयं दोषः 'पूर्वदीक्षिणो नास्ति'। एकस्मिन्नेव दिवसे द्वयोर्यजमानयोर्मध्ये यः पूर्वं दीक्षणीयेष्टिं करोति, स पूर्वदीक्षी। 'एतस्य' मुष्ट्योर्मध्ये 'यज्ञः' परिगृहीतः, सर्वाश्च 'देवताः' परिगृहीताः; तदानीं मितवसम्बन्धिनो यज्ञस्या-

प्रबलत्वेन 'तत्र गच्छामः'–इत्येवं यज्ञस्य देवतानां चाऽऽलोचनाभावात्। पश्चाद्दीक्षणीयेष्टिं कुर्वाणस्यापरदीक्षितस्य यज्ञो देवताश्च सुलभा न भवन्ति; पूर्वं मन्येन यजमानेनावरुद्धत्वात्। तस्मात् 'अपरदीक्षिणः' 'आर्त्तिः' यो विनाशो 'यथा' अस्ति, 'तथा' पूर्वदीक्षिण आर्त्तिर्नैवास्ति। "संवेशाय त्वोपवेशाय त्वा"–इत्यादिमन्त्रेण येयं संस्रवप्रायश्चित्ताहुतिः*, सेय मपरदीक्षिणैव कर्तव्या; न पूर्वदीक्षिणेत्यर्थः। 'इति'-शब्दो ब्रह्मवादिवचनसमाप्त्यर्थः॥

यदेतत् कृष्णाजिनवेष्टनं विहितम्, तस्यावभृथगमनात् प्रागेवोन्मोचनं विधत्ते—"उन्मुच्य कृष्णाजिन मवभृथ मभ्यवैति तस्मात् मुक्ता गर्भा जरायोर्जायन्ते"–इति। योनिस्थानीयाद्देवयजनदेशान्निर्गत्यावभृथगमनं गर्भरूपस्य दीक्षितस्य जन्मस्थानीयम्। जन्म च लोके जरायुरूपवेष्टने छिन्ने सति पश्चात्सम्पद्यते, तस्मादत्रापि जरायुस्थानीयं कृष्णाजिन मुन्मुच्य जन्मस्थानीय मवभृथदेशगमनं कुर्यात्॥

कृष्णाजिनवद्वाससोऽपि प्रसक्त मुन्मोचनं वारयति–"सहैव वाससाभ्यवैति तस्मात् सहैवोल्बेन कुमारो जायते"–इति। उल्बाख्यस्याभ्यन्तरवेष्टनस्य जन्मकालेऽप्यनिवृत्तिदर्शनात् उल्बस्थानीयवस्त्रस्यावभृथगमनकालेऽप्यनिवृत्तिर्द्रष्टव्या॥

अथ मीमांसा। पञ्चमाध्यायस्य तृतीयपादे (जै० सू० २८—३१; अधि० ११.) चिन्तितम्—

"इष्टिदण्डादिभिर्दीक्षा किं वेष्ट्यैवोक्तितोऽग्रिमः।
युक्तः संस्कार इष्ट्यैव दण्डादिर्व्यञ्जकत्वतः॥

---

* तत्र संवेशाय त्वेत्यादयः पञ्च मन्त्राः; तै० सं० ३, १, ७, १।

ज्योतिष्टोमे श्रूयते—"आग्नावैष्णव मेकादशकपालं निर्वपति दीक्षिष्यमाणः"—इति (तै॰ सं॰ ५.६.१.४.) । अन्यदपि श्रुतम्—"दण्डेन दीक्षयति", "कृष्णाजिनेन दीक्षयति"—इति (तै॰ सं॰ ६. १. ३. २.) । अत्रेष्टिवद् दण्डादीना मपि साधनत्वविधानात् सर्वैरियं दीक्षेति चेत्, मैवम् ; इष्टेः क्रियारूपत्वात् संस्कारहेतुत्वं हि युक्तम् ; दण्डादयस्तु द्रव्यरूपा न पुरुषं संस्कर्तुं प्रभवन्ति । न चैवं दण्डादेर्वैयर्थ्यम् ; दीक्षितोऽय मित्यभिव्यक्तिरूपस्य दृष्टप्रयोजनस्य सद्भावात् । तस्मादिष्ट्यैव दीक्षा सिध्यति"—इति ॥ ३॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमाध्याये तृतीयः खण्डः ॥ ३ ॥

अथ चतुर्थः खण्डः ।

त्व मग्ने सप्रथा असि सोम यास्ते मयोभुव इत्याज्यभागयोः पुरोनुवाक्ये अनुब्रूयाद्यः पूर्व मनीजानः * स्यात् तस्मै त्वया यज्ञं वितन्वत इति यज्ञ मेवास्मा एतद्वितनोत्यग्निः प्रत्नेन मन्मना सोम गीर्भिष्ट्वा वय मिति यः पूर्व मीजानः † स्यात् तस्मै प्रत्न मिति पूर्वं कर्माभिवदति तत्तन्नादृत्य मग्निर्वृत्राणि जङ्घनत् त्वं सोमासि सत्पतिरिति वार्त्रघ्नावेव

---

*, † उभयत्रैव निर्विसर्गान्तपाठः सर्वेष्वस्मद्दृष्टेषु मूलपुस्तकेषु ।

कुर्या॑द् वृक्णं वा एष हन्ति॑ यं यज्ञ उपनमति॑ * तस्मादार्षभावेव कर्त्तव्या॑वग्निर्मुखं प्रथमो देवताना॑ मग्निश्च विष्णो तप उत्तमं मह इत्या॑ग्नावैष्णवस्य हविषो याज्यानुवाक्ये भवत॑ आग्नावैष्णव्यौ रूपसमृद्धे॑ एतद्वै यज्ञस्य समृद्धं॑ यद्रूपसमृद्धं॑ यत्कर्म क्रियमाणमृगभिवदत्य॑ग्निश्च ह वै विष्णुश्च॑ देवानां दीक्षापालौ॑ तौ दीक्षाया ईशा॑ते तद्यदाग्नावैष्णवं हविर्भवति॑ यौ दीक्षाया ईशा॑ते तौ प्रीतौ दीक्षां प्रयच्छतां॑ यौ दीक्षयितारौ॑ तौ दीक्षयेता मिति॑ त्रिष्टुभौ भवतः सेन्द्रियत्वाय॑ ॥ ४ ॥

विवक्षितस्य हौत्रस्योपोद्घातत्वेन दीक्षणीयेष्टिं विधाय तत्र च बहुधा प्रशंस्य प्रसङ्गाद् दीक्षितसंस्कारा विहिताः ; अथ विवक्षितं हौत्रं विधत्ते— “त्व मग्ने सप्रथा असि, सोम यास्ते मयोभुव इत्याज्यभागयोः पुरोनुवाक्ये अनुब्रूयाद्यः पूर्वं मनीजानः स्यात्तस्मै” इति। ‘यः’ यजमानः इतः पूर्वं सोमयागं न कृतवान्, इदानीं क्रियमाण एव प्रथमः ; ‘तस्मै’ यजमानाय, तदर्थं दीक्षणीयेष्टौ ; प्रथमस्याज्यभागस्य ‘त्व मग्ने’-इति (सं० ५. १३. ४.) पुरोनुवाक्या, द्वितीयस्य ‘सोम यास्ते’-इति (सं० १. ९१. ९.) पुरोनुवाक्या। तदुभय मध्वर्युणा प्रेषितो होता ‘अनुब्रूयात्’* ॥

---

* ‘यज्ञ मुपनमति’ क।

† आश्व० श्रौ० —‘प्रेषितो जपति’ १. १. २७, ‘द्वे द्वे तु याज्यानुवाक्ये’ २. १. ७, ‘देवलक्षणा याज्यानुवाक्याः’ २. १४. १८।

उक्तस्य प्रथममन्त्रस्य प्रथमप्रयोगानुकूल्यं दर्शयति—"त्वया यज्ञं वितन्वत इति यज्ञ मेवास्मा एतद्वितनोति"–इति । तस्मिन् मन्त्रे त्वयेत्यादिस्तृतीयः पादः * ; तस्याय मर्थः— हे अग्ने ! क्रियमाण मस्मदीय मिमम् ऋत्विजः 'त्वया' त्वत्प्रसादेन 'वितन्वते' विस्तारयन्ति-'इति' । 'एतत्' एतेन मन्त्रवचनेन 'अस्मै' यजमानाय 'यज्ञं' वितनोत्येव' पूर्वं मविस्तारित मपि यज्ञ मिदानीं विस्तारयत्येव ॥

अधिकारविशेषेण प्रकारान्तरं विधत्ते—"अग्निः प्रत्नेन मन्मना, सोम गीर्भिष्ट्वा वय मिति यः पूर्वं मीजानः स्यात्तस्मै"–इति । 'यः' यजमानः 'पूर्वं' सोमयागं कृतवान्, 'तस्मै' यजमानार्थं पुनः सोमयागप्रयोगे दीक्षणीयेष्टौ 'अग्निः प्रत्नेन' इति (मं० ८. ४४. १२.) प्रथमस्याज्यभागस्य पुरोनुवाक्या, 'सोम गीर्भिः' इति (मं० १. ९१. ११.) द्वितीयस्य † ।

तत्र प्रथममन्त्रस्य पुनःप्रयोगानुकूल्यं दर्शयति—"प्रत्न मिति पूर्वं कर्माभिवदति"–इति । तस्मिन् मन्त्रे यत् 'प्रत्न मिति' पदं तेन पदेन 'पूर्वम्' अनुष्ठितं सोमयागाख्यं 'कर्म' अभिधीयते ; 'पुराणे प्रतन प्रत्न-पुरातन चिरन्तनाः' इति (अम० ३. १. ७७.) प्रत्न-शब्दस्याभिधानकारैः पुरातनपर्यायत्वाभिधानात् ॥

ईजानानीजानभेदेन व्यवस्थितं यन्मन्त्रचतुष्टय मुक्तम्, सोऽयं पूर्वः पक्षः; तमभिप्रेत्य दूषयति—"तत्तन्नादृत्यम्"–इति । 'तत्' तत्र दीक्षणीयेष्टिगतयोराज्यभागयोस्त्वमग्न इत्यादिक मनुब्रूयादिति यन्मत मस्ति, 'तत्' मतं 'न' आदरणीयम् ॥

---

* पूर्णार्धस्त्वयम् "त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः । त्वया यज्ञं वितन्वते"–इति ।

† आश्व० श्रौ० १. ५. २५ । तै० ब्रा० ३. ५. ६. ४, ५ ; मं० १. ६. २ ।

र्ति तन्नादरणीय मित्याशङ्क्याह—"अग्निर्वृत्राणि जङ्घनत्, त्वं सोमासि सत्पतिरिति वार्त्रघ्नावेव कुर्याद्"-इति। वृत्रं शत्रुं हन्तीति वृत्रहा ; वृत्रघ्नः सम्बन्धिनौ मन्त्रौ 'वार्त्रघ्नौ' ; वृत्राणि जङ्घनदिति तल्लिङ्गात्तत्सम्बन्धित्वम् । 'अग्निर्वृत्राणि'-इति (सं० ६. १६. ३४.) प्रथमस्याज्यभागस्य पुरोनुवाक्या, 'त्वं सोमासि'-इति (सं० १. ९१. ५.) द्वितीयस्य * ।

एतयोर्मन्त्रयोरानुकूल्यं दर्शयति—"वृत्रं वा एष हन्ति यं यज्ञ उपनमति तस्माद्वार्त्रघ्नावेव कर्तव्यौ"-इति । 'यं' यजमानं 'यज्ञ उपनमति' सोमयागे प्रेरयति, 'एषः' यजमानो 'वृत्रं' पापरूपं शत्रुं 'हन्ति' एव ; 'तस्मात्' कारणात् वृत्रहत्यासम्बन्धिनौ 'एव' मन्त्रौ 'कर्तव्यौ' । यथा प्रथममन्त्रे 'वृत्राणि जङ्घनत्'—इति लिङ्गमस्ति †, तथा द्वितीयेऽपि 'त्वं राजोत वृत्रहा'—इति लिङ्गं विद्यते ‡ । तस्मादुभयोरपि तत्सम्बन्धित्वं पूर्वोक्तयोस्तु पक्षयोः विलम्बते । वृत्र मित्यानुकूल्यलिङ्गं प्रथमयोरेव मन्त्रयोर्दृश्यते, न तूत्तरयोः तस्मात् तन्नादरणीय मिति दूषयित्वा उभयलिङ्गसद्भावादयं पक्षः स्वीकृतः ॥

आज्यभागरूपेऽङ्गकर्मणि पुरोनुवाक्या-युग्मं विधाय प्रधानकर्मणि हविषि याज्यानुवाक्ये विधत्ते—"अग्निर्मुखं प्रथमो देवतानामग्निश्च विष्णो तप उत्तमं मह इत्याग्नावैष्णवस्य हविषो याज्यानुवाक्ये भवतः"-इति । प्रथमनिर्दिष्टत्वादग्निर्मुखमित्येषा

---

* आश्व० श्रौ० १. ५ २९ । तै० ब्रा० ३. ५. ६. १, २ , मं० ९. ६. २ ।

† तद्यथा—"अग्निर्वृत्राणि जङ्घनद् द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतः ॥"-इति ।

‡ तथाच तत्पाठः—"त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा । त्वं भद्रो असि क्रतुः"-इति ।

(तै० सं० २.४.१.१. *) पुरोनुवाक्या ; पश्चाग्निर्हिष्ट्वाद्दक्षिणेति (तै० सं० २.४. १.४. †) याज्या ‡ । यद्यप्यर्थानुसारेण अनुवाक्यायाज्ये भवत इति विधातव्यम्, तथापि 'अल्पाच्तर मिति' व्याकरणसूत्रानुसारेण (पा० २. २. ३४.) याज्या-शब्दस्य पूर्वनिपातो द्रष्टव्यः § ॥

तयोः ऋचोः कर्मानुकूल्यं दर्शयति—"आग्नावैष्णव्यौ रूपसमृद्धे एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदति"–इति । अग्निश्च विष्णुश्च ययोः ऋचोः प्रतिपाद्ये देवते भवतः, ते उभे ऋचौ आग्नावैष्णव्यौ ‖ । ते च कर्मानुकूल्येन रूपेण समृद्धे । न च रूपसमृद्धं वैयर्थ्यं शङ्कनीयम् ;—कर्मणो यदङ्गं रूपसमृद्धं भवति, 'एतत्' एव 'यज्ञस्य' अङ्गेषु 'समृद्धं' सम्पूर्णम्, न तु तस्मिन् किञ्चिदपि वैकल्य मस्ति । कथं रूपसमृद्धिरिति चेत्, पठ्यमानेयम् 'ऋक्' अनुष्ठीयमानं 'कर्माभिवदति' साकल्येन ब्रवीतीति यदस्ति, एषैव रूपसमृद्धिः ॥

---

*, † ऋचावेते; यथाम्नातौ समस्ते ; आश्वलायनेन हि सपठा विहिते (श्रौ० ४. २. ३), तैत्तिरीयपाठस्तु किञ्चिद्भिन्न एवेति ।

‡ 'सर्वेषां मध्ये ऽनुवाक्यान्ता याज्याः'–इति आश्व० श्रौ० १. ७, २ ।

§ "याज्यानुवाक्ययोर्लक्षणं दर्शयति —'पुरस्ताल्लक्ष्मा पुरोऽनुवाक्या भवति ; जातानेव भ्रातृव्यान् प्रणुदते । उपरिष्टाल्लक्ष्मा याज्या ; जनिष्यमाणानेव प्रति नुदते'—इति (तै० सं० २. ६. २. ३.) । मन्त्रप्रतिपाद्यायाः देवतायाः नामधेयं लक्ष्म । तद्यस्याः ऋचः पूर्वार्द्धे विद्यते सा पुरोऽनुवाक्या ; तन्नाम यस्याः मुत्तरार्द्धे विद्यते सा याज्या । तद्यथा—'अग्निर्मूर्द्धा' इति पूर्वार्द्धे ऽग्निशब्दः. 'जिह्वा मध्ये चरुपं ह्युत्तरार्द्धे ऽग्निशब्दः'–इति सा० भा० । 'अनुवाक्या—तिष्ठन्नन्वाह ; आसीनो याज्यां यजति'–इति च शत० ब्रा० १. ४. २. १८, १९ ।

‖ 'विष्णुकादिभ्योऽण्', 'देवताद्वन्द्वे च', 'इद् वृद्धौ', 'विष्णौ न'–इति पा० ५. १. ६१ ; ७. ३. २१ ; ६. ३. २८ , वा० १ ।

मन्त्रप्रतिपाद्यदेवताप्रशंसाद्वारेण पुनरपि अग्नी प्रशंसति—"अग्निश्च ह वै विष्णुश्च देवानां दीक्षापालौ तौ दीक्षाया ईशाते तद्यदाग्नावैष्णवं हविर्भवति यौ दीक्षाया ईशाते तौ प्रीतौ दीक्षां प्रयच्छतां यौ दीक्षयितारौ तौ दीक्षयेतामिति"-इति। योऽयमग्निः सर्वेषां देवानां प्रथमः, यश्च विष्णुः सर्वेषामुत्तमः; तावुभौ देवानां मध्ये दीक्षाख्यस्य च व्रतस्य पालयितारौ। 'तौ' उभौ 'दीक्षायाः' 'ईशाते' स्वामिनौ भवतः। तस्मात् तयोर्दीक्षापालकत्वं युक्तम्। तथा सति यद् अग्नाविष्णुदेवताकं 'हविः' दीक्षणीयेष्टौ 'भवति', तदानीं 'यौ दीक्षायाः' स्वामिनौ देवौ, 'तौ प्रीतौ' यजमानाय 'दीक्षां प्रयच्छताम्'। उक्तस्यैव व्याख्यानं 'यौ दीक्षयितारौ'- इत्यादिकम्। 'इति'-शब्दोऽभिप्रायपरामर्शार्थः *; अनेनाभिप्रायेणाग्नावैष्णवं हविः क्रियते। तस्मान्मन्त्रप्रतिपाद्यावग्नाविष्णू प्रशस्तावित्यर्थः॥

अनेनाभिप्रायेण मन्त्रगतं छन्दः प्रशंसति—"त्रिष्टुभौ भवतः सेन्द्रियत्वाय"-इति। त्रिष्टुप्छन्दस इन्द्रियसाधनत्वं श्रुत्यन्तरे श्रुतम्—"इन्द्रियं वै त्रिष्टुप् † -इति" (तै० ब्रा० १. ७. ८. २.)। अतो मन्त्रगतं छन्दो यजमानस्य सेन्द्रियत्वाय भवति॥

अथ मीमांसा। द्वादशाध्यायस्य चतुर्थपादे (जै० सू० २, ३. अधि० २.) चिन्तितम्—

---

* 'इति करणोऽर्थनिर्देशार्थः'-इत्यादि पात० भा० १ अ. १ पा. ६ आह्निके द्रष्टव्यम्। ऋ० प्राति० १. १९। अम० को० ३. ४. ११. ७। है० अने० को० ७. २१, २२। मेदि० अव्य० २१, २३।

† तत्र तु त्रिष्टुगिति पाठः। 'गायत्री पुरोऽनुवाक्या भवति, त्रिष्टुग् याज्या'-इति (तै० सं० २. ६. २. ५.) च तद्विधायकं वचनम्।

"पुरोऽनुवाक्यया याज्या विकल्प्या वा समुच्चिता ।
पृथगाख्या समाख्यानाद्वचनाच्च समुच्चयः ॥

देवताप्रकाशनकार्यस्यैकत्वात् तुल्ययोर्व्रीहियववद्विकल्पः, तयोरेकसूक्तगतयोरिति चेत्, मैवम्; पुरोऽनुवाक्येतिसमाख्यया उभयकालीनयाज्या मन्त्रत्वेनानुपपत्तेः। किञ्च 'पुरोऽनुवाक्ययानूच्य याज्यया जुहोति'-इति प्रत्यक्षवचनेन देवतोपलक्षणहविःप्रकाशनकार्यभेदोक्तिपुरःसरं साहित्यं विधीयते *। तस्मात् समुच्चयः"-इति ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमाध्याये चतुर्थः खण्डः ॥ ४ ॥

॥ अथ पञ्चमः खण्डः ॥

गायत्र्यौ स्विष्टकृतः संयाज्ये कुर्वीत तेजस्कामो ब्रह्मवर्चसकामस्तेजो वै ब्रह्मवर्चसं गायत्री तेजस्वी ब्रह्मवर्चसी भवति य एवं विद्वान् गायत्र्यौ कुरुत उष्णिहावायुष्कामः कुर्वीतायुर्वा उष्णिक् सर्वमायुरेति य एवं विद्वानुष्णिहौ कुरुतेऽनुष्टुभौ स्वर्गकामः

---

* पुरोऽनुवाक्या देवताह्वानार्था भवति, याज्या तु हविःप्रदानार्था । तथाहीयं शतपथश्रुतिः—'ह्वयति वा अनुवाक्यया; प्रयच्छति याज्यया'-इति १. ७. २. १७ । अत एवाश्वलायनेन च सूचितम्—'सर्वेषां भवेऽर्थेऽनुवाक्यावती याज्याः'-इति १. ७. १ ।

कुर्वीत द्वयोर्वा अनुष्टुभोश्चतुःषष्टिरक्षराणि त्रय इम ऊर्ध्वा एकविंशा लोका एकविंशत्यैकविंशत्यैवेमांल्लोकान् रोहति स्वर्ग एव लोके चतुःषष्टितमेन प्रतितिष्ठति प्रतितिष्ठति य एवं विद्वाननुष्टुभौ कुरुते बृहत्यौ श्रीकामो यशस्कामः कुर्वीत श्रीर्वै यशश्छन्दसां बृहती श्रियमेव यश आत्मन् धत्ते य एवं विद्वान् बृहत्यौ कुरुते पङ्क्ती यज्ञकामः कुर्वीत पाङ्क्तो वै यज्ञ उपैनं यज्ञो नमति य एवं विद्वान् पङ्क्ती कुरुते त्रिष्टुभौ वीर्यकामः कुर्वीतौजो वा इन्द्रियं वीर्यं त्रिष्टुबोजस्वीन्द्रियवान् वीर्यवान् भवति य एवं विद्वांस्त्रिष्टुभौ कुरुते जगत्यौ पशुकामः कुर्वीत जागता वै पशवः पशुमान् भवति य एवं विद्वान् जगत्यौ कुरुते विराजावन्नाद्यकामः कुर्वीतान्नं वै विराट् तस्माद्यस्यैवेह भूयिष्ठमन्नं भवति स एव भूयिष्ठं लोके विराजति तद्विराजो विराट्त्वं वि स्वेषु राजति श्रेष्ठः स्वानां भवति य एवं वेद ॥५॥

प्रधानस्य हविषो याज्यानुवाक्ये विधाय स्विष्टकृद्रूपस्य यागस्य फलविशेषाय छन्दोविशेषयुक्ते याज्यानुवाक्ये विधातुकामः प्रथमं द्वे ऋचौ विधत्ते—"गायत्र्यौ स्विष्टकृतः संयाज्ये कुर्वीत तेजस्कामो ब्रह्मवर्चसकामः"-इति। 'स हव्यवाडमर्त्यः'-इत्येका (सं० ३. ११. २.) गायत्री, 'अग्निर्होता पुरोहितः'-इत्यपरा

गायत्री (सं० ३. ११. १.); ते उभे स्विष्टकृद्यागस्य * संयाज्ये कुर्यात् । कीदृशोऽधिकारी ? तेजः शरीरकान्तिः, ब्रह्मवर्चसं श्रुताध्ययनसम्पत्तिः, तदुभयकामोऽत्राधिकारी । संयाज्यशब्दार्थमाश्वलायन आह— 'स हव्यवाळमर्त्योऽग्निर्होता पुरोहित इति स्विष्टकृतः संयाज्ये इत्युक्ते सौविष्टकृती प्रतीयात्'-इति (श्रौ० २. १. २१.)। स्विष्टकृत्सम्बन्धिन्यौ याज्यानुवाक्ये इत्यर्थः ॥

गायत्र्या उक्तफलसाधनत्व मुपपादयति—"तेजो वै ब्रह्मवर्चसङ्गायत्री"-इति । 'तत्सवितुर्वरेण्यम्'-इत्यस्या ऋचि (सं० ३.६२. १०.) यद्गायत्रीच्छन्दस्तस्य तेजोब्रह्मवर्चससाधनत्वेन तद्रूपत्वं लोके प्रसिद्धम् । स्नानधौतवस्त्रदर्भतिलकधारणपुरःसरं गायत्रीं जपमानस्य ब्राह्मणस्य देहे काचिदाकारशोभा दृश्यते, तदिदं तेजः । स च जपिता वेद मधीते तदर्थं च शृणोति, तदिदं ब्रह्मवर्चसम् । वेदनपुरःसर मनुष्ठातुः फलं दर्शयति—"तेजस्वी ब्रह्मवर्चसी भवति य एवं विद्वान् गायत्र्यौ कुरुते"-इति । यद्यपि विधिवाक्येऽनुष्ठानमात्रात् फल मुक्तम्, तथापि वेदनपूर्वकानुष्ठाने तस्मिन्नेव फले कश्चिदतिशयो द्रष्टव्यः ॥

फलान्तराय छन्दोऽन्तरं विधत्ते—"उष्णिहावायुष्कामः कुर्वीत" इति । ['अग्ने वाजस्य गोमतः'-इत्येका (सं० १. ७९. ४.) उष्णिक्, 'स इधानो वसुष्कविः'-इत्यपरा (सं० १. ७९. ५.); ते उभे शतसंवत्सरायुष्कामः कुर्वीत । †] गायत्र्या आयुष्य-

---

* "स्विष्टकृद्यागानुमन्त्रणम् तै० सं० १. ६. २. ४ । तद्व्याख्यानम्, तदर्थवचनमूलको मन्त्रश्च तत्रैव भाष्ये । स्विष्टकृद्यागविधिस्तु तै० सं० २. ६. ६. ५ । तद्विधानन्तु बौ० श्रौ० सू० ३. ४, ४२—४५ ; पुनः ४६, ४७ ; तथा: ४. १. २८—३२ ।

† अत्रापरत्र चैवंविधचिह्नान्तःकृतो ग्रन्थः खगयोर्न दृश्यते, परं प्रयोजनीयः ।

चतुष्टयेनोष्णिक्छन्दसोऽधिकत्वात्* आयुर्वृद्धिहेतुत्वं युक्त मित्यभिप्रेत्योष्णिगायुषोरभेद माह—"आयुर्वा उष्णिग्"-इति। पूर्ववद्वेदनं प्रशंसति—"सर्व मायुरेति य एवं विद्वानुष्णिहौ कुरुते"-इति ॥

फलान्तराय छन्दोऽन्तरं विधत्ते—"अनुष्टुभौ स्वर्गकामः कुर्वीत"-इति। ['त्व मग्ने वसून्'-इति द्वे (सं० १.४५.१,२.) अनुष्टुभौ।] अनुष्टुभोः स्वर्गहेतुत्व मुपपादयति—"द्वयोर्वा अनुष्टुभोश्चतुःषष्टिरक्षराणि त्रय इम ऊर्ध्वा एकविंशा लोका एकविंशत्यैकविंशत्यैवेमांल्लोकान् रोहति स्वर्ग एव लोके चतुःषष्टितमेन प्रतितिष्ठति"-इति। श्रुत्यन्तरे (तै० सं० २.५.१०.३.) "द्वात्रिंशदक्षरानुष्टुप्"-इत्यभिधानात् द्वयोरनुष्टुभोर्मिलित्वा चतुःषष्टिसङ्ख्याकान्यक्षराणि सम्पद्यन्ते†। 'इमे' पृथिव्यन्तरिक्षस्वर्गरूपाः, एकैकस्मादूर्ध्वत्वेन वर्तमानाः, प्रत्येक मेकविंशत्यवयवसमूहरूपाः 'लोकाः' त्रयो विद्यन्ते। तेष्वेकैकं लोक मेकैकाक्षरगतयैकविंशतिसङ्ख्यया यजमानः 'आरोहति', अन्तिमेन 'चतुःषष्टितमेन' अक्षरेण तृतीये 'स्वर्ग एव लोके' यजमानः 'प्रतितिष्ठति' स्थिरोऽवतिष्ठते। वेदनं प्रशंसति—"प्रतितिष्ठति य एवं विद्वाननुष्टुभौ कुरुते"-इति ॥

फलान्तराय छन्दोऽन्तरं विधत्ते—"बृहत्यौ श्रीकामो यशस्कामः कुर्वीत"-इति। श्रीर्धनधान्यादिसम्पत्तिः; यशः सत्कुल-

---

* तथाचेदं पिङ्गलसूत्रम्—'चतुरश्चतुरः प्राजापत्यायाः'-इति ३.११।

† "अनुष्टुबनुष्टोभनात्। 'गायत्री मेव त्रिपदां सतीं चतुर्थेन पादेनानुष्टोभति'-इति ब्राह्मणम्"-इति निरु० ७.३.७। 'द्वात्रिंशदक्षरानुष्टुप् चत्वारोऽष्टाक्षराः समाः'-इति च ऋक्प्राति० १६.२७।

दानादिजन्या कीर्तिः। 'एना वो अग्निम्'-इति द्वे (सं० ७. १६. १, २.), ['उदस्य शोचिरस्थात्'-इति (सं० ७. १६. ३.)] बृहत्यौ श्रीयशसोः कारणत्वेन। बृहत्यास्तदुभयरूपत्वं दर्शयति—"श्रीर्वै यशश्छन्दसां बृहती"-इति। गायत्र्यादीनां छन्दसां मध्ये येषा बृहती, सैव श्रीरूपा यशोरूपा च; सर्वेषां छन्दसां पशुसम्पादनसामर्थ्ये सति बृहती विजय माप्ता; पशुरूपत्वाच्छ्रीरूपत्वम्। तथा च तैत्तिरीया आमनन्ति—"छन्दांसि पशुष्वाजिमयुस्तान् बृहत्युदजयत्तस्माद्बार्हताः पशव उच्यन्ते"-इति (सं० ५. १. २. ३, ४.)। इतरच्छन्दोभिराश्रितत्वादपि श्रीरूपत्वं त एवामनन्ति—"यानि छन्दांस्यत्यरिच्यन्त, यानि च नोदभवन्, तानि निर्वीर्याणि हीनान्यमन्यन्त, साब्रवीद् बृहती, मा मेव भूत्वा, मा मुपसंश्रयतेति"-इति (तै० ब्रा० १. ५. १२. ३.)। मध्यं ह्येषा मङ्गाना मात्मा, मध्यं छन्दसां बृहतीति मध्यत्वेन प्रशंसनाद्यशोरूपत्व मपि द्रष्टव्यम्। वेदनं प्रशंसति—"श्रिय मेव यश आत्मन् धत्ते य एवं विद्वान् बृहत्यौ कुरुते"-इति। 'एव'-कारः श्रीयशसोः समुच्चयार्थः॥

अहीनसत्रादुत्तरयज्ञप्राप्तिकामस्य छन्दोऽन्तरं विधत्ते—"पङ्क्ती यज्ञकामः कुर्वीत"-इति। 'अग्निं तं मन्ये'-इति द्वे (सं० ५. ६. १, २.) पङ्क्ती। यज्ञस्य पङ्क्तिसम्बन्धित्वं दर्शयति—"पाङ्क्तो वै यज्ञः"-इति। ['वै'-शब्दो वक्ष्यमाणचतुर्विधपाङ्क्तत्वप्रसिद्धिप्रदर्शनार्थः। वेदनं प्रशंसति—"उपैनं यज्ञो नमति य एवं विद्वान् पङ्क्ती कुरुते"-इति]॥

वीर्यप्राप्त्यर्थं छन्दोऽन्तरं विधत्ते—"त्रिष्टुभौ वीर्यकामः कुर्वीत"-इति। 'द्वे विरूपे चरतः'-इति द्वे (सं० १. ९५. १, २.)

त्रिष्टुभौ। त्रिष्टुप्छन्दसो वीर्यसाधनत्वेन तद्रूपत्वं दर्शयति—"ओजो वा इन्द्रियं वीर्यं त्रिष्टुप्"-इति। वीर्यं शरीरबलम्। तच्चौजस इन्द्रियस्य चोपलक्षणम्। ओजो बलहेतुरष्टमो धातुः*, इन्द्रियं चक्षुरादिपाटवम्। वेदनं प्रशंसति—"ओजस्वीन्द्रियवान् वीर्यवान् भवति य एवं विद्वांस्त्रिष्टुभौ कुरुते"-इति॥

गवादिपशुप्राप्तये छन्दोऽन्तरं विधत्ते—"जगत्यौ पशुकामः कुर्वीत"-इति। 'जनस्य गोपाः'-इति द्वे (सं० ५. ११. १, २.) जगत्यौ। पशूनां जगतीच्छन्दःसाध्यत्वेन तत्सम्बन्धं दर्शयति—"जागता वै पशवः"-इति। वेदनं प्रशंसति—"पशुमान् भवति य एवं विद्वान् जगत्यौ कुरुते"-इति॥

भक्तुं योग्यमन्नं कामयमानस्य छन्दोऽन्तरं विधत्ते—"विराजावन्नाद्यकामः कुर्वीत"-इति। 'प्रेद्धो अग्ने, 'इमो अग्ने'-इति द्वे (सं० ७, १. ३, १८.) विराजौ †। अन्नस्य विराजनहेतुत्वेन विराड्रूपत्वमाह—"अन्नाद्यकामः कुर्वीतान्नं वै विराट्"-इति। तदेव स्पष्टयति—"तस्माद्यस्यैवेह भूयिष्ठमन्नं भवति, स एव भूयिष्ठं लोके विराजति तद्विराजो विराट्त्वम्"-इति। यस्मादन्नस्य विराजनहेतुत्वम् 'तस्मात्' कारणात् 'इह' लोके 'यस्यैव' पुरुषस्य 'अन्नं' प्रभूतं 'भवति', 'स एव' जनमध्ये अत्यन्तं शोभते। तस्माद्विराजत्यनेनेति व्युत्पत्त्या विराट्शब्दो निष्पन्नः।

---

* निघ० २. ९. १। अम० को० ३. ४. २३५। हैम० अने० २. ५७७। मेदि० सा० १६। छा० उप० ३. १३. ५। बृह० १. ४. १२; २०. १०। 'ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते'-इति च साहित्यदर्पणे। 'ओजस्तेजसि धातूनामवष्टम्भप्रकाशयोः। ओजो बले च दीप्तौ च'--इति विश्वः ३. १९.। रघु० ५. २७।

† 'प्रेद्धो अग्न इमो अग्न इति संयाज्ये विराजावविमुक्ते एते प्रतीयात्' आश्व० श्रौ० २.१.३०।

वेदनं प्रशंसति—"वि स्वेषु राजति श्रेष्ठः स्वानां भवति य एवं वेद"-इति। 'यः पुमान् विराजो महिमानं वेत्ति, सः पुमान् स्वकीयेषु ज्ञातिषु मध्ये विशेषेण 'राजति' लौकिकसामर्थ्येन शोभते ; तथा स्वीयानां ज्ञातीनां मध्ये वृत्तविद्याविनयादिभिः 'श्रेष्ठः' भवति ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमाध्याये पञ्चमः खण्डः ॥ ५ ॥

॥ अथ षष्ठः खण्डः ॥

अथो पञ्चवीर्यं वा एतच्छन्दो॑ यद्विराड् यत्त्रिपदा॑ तेनो॑ष्णिहा गायत्र्यौ॑ यदस्या एकादशाक्षराणि पदानि॑ तेन त्रिष्टुब् यत्त्रयस्त्रिंशदक्षरा॑ तेनानुष्टुभ्॑ न वा एकेनाक्षरेण छन्दांसि वियन्ति॑ * न द्वाभ्यां॑ यद्विराट् तत्पञ्चमं॑ सर्वेषां छन्दसां वीर्यमवरुन्धे॑ सर्वेषां छन्दसां वीर्यमश्नुते॑ सर्वेषां छन्दसां सायुज्यं सरूपतां सलोकताम॑श्नुतेऽन्नादोऽन्नपतिर्भवत्यश्नुते प्रजयान्नाद्यं॑ य एवं विद्वान् विराजौ कुरुते॑ तस्माद् विराजावेव कर्त्तव्ये॑ प्रेष्ठो अग्न इष्टो अग्न इत्येते॑ ऋतं

---

* 'छन्दांसि व्यन्ति' ग ।

वाव दीक्षा सत्यं दीक्षा तस्माद्दीक्षितेन सत्य मेव वदितव्य मथो खल्वाहुः कोऽर्हति मनुष्यः सर्वं सत्यं वदितुं सत्यसंहिता वै देवा अनृतसंहिता मनुष्या इति विचक्षणवतीं वाचं वदेच्चक्षुर्वै विचक्षणं वि ह्येनेन पश्यतीत्येतद्ध वै मनुष्येषु सत्यं निहितं यच्चक्षुस्तस्मादाचक्षाण माहुरद्रागिति स यद्यदर्श मित्याहाथास्य श्रद्दधति यद्यु वै स्वयं पश्यति न बहूनाञ्चनान्येषां श्रद्दधाति तस्माद्विचक्षणवती मेव वाचं वदेत्सत्योत्तरा हैवास्य वागुदिता भवति भवति ॥ ६ ॥

॥ इत्यैतरेयब्राह्मणे प्रथमपञ्चिकायां प्रथमोऽध्यायः ॥

काम्ये संयाज्ये नानाविधे विधाय नित्ये संयाज्ये विधातुं विराट् छन्दः प्रशंसति---"अथो पञ्चवीर्यं वा एतच्छन्दो यद्विराड्" -इति । 'अथो' काम्यसंयाज्याकथनानन्तरं नित्ये संयाज्ये कथ्येते इति शेषः । विराडाख्यं यच्छन्दोऽस्ति, 'एतच्छन्दः' पञ्चविधवीर्योपेतत्वेन प्रसिद्धम् । तदेव विस्पष्टयति—"यत्त्रिपदा तेनोष्णिहा गायत्री यदस्या एकादशाक्षराणि पदानि तेन त्रिष्टुब् यत्त्रयस्त्रिंशदक्षरा तेनानुष्टुभ् न वा एकेनाक्षरेण छन्दांसि वियन्ति न द्वाभ्यां यद्विराट् तत्पञ्चमम्"-इति । यस्मात्कारणादियं विराट् पादत्रयोपेता 'तेन' कारणेनोष्णिग्रूपा गायत्रीरूपा च भवति; तयोरपि पादत्रयोपेतत्वेन समत्वात् । अतस्तयोः उभयोर्वीर्यं

त्रिष्टुब्वीर्यमस्ति । यस्मात्कारणादस्याः विराजः पादा एकादशाक्षरोपेताः, 'तेन' कारणेनेयं 'त्रिष्टुप्' रूपा भवति ; तदीयं वीर्यं प्राप्नोति । यस्मात्कारणादियं 'त्रयस्त्रिंशदक्षरा' विराडिति श्रूयते, — तत्र, 'प्रेद्धो अग्ने'—इत्यस्यामृचि (सं० ७. १. ३.) एकोनत्रिंशदक्षराणि, 'इमो अग्ने'—इत्यस्यामृचि (सं० ७. १. १८.) द्वात्रिंशदक्षराणि ; अतस्तयोः न विराट्त्व मिति चेत्, मैवम् ; 'न वा एकेनाक्षरेण'—इति वाक्येनैव परिहृतत्वात् *। यस्मात् 'विराट्', तस्मादेतदीयं 'पञ्चमं' वीर्यमस्ति ।

एवंविधविराड्वेदनं प्रशंसति—"सर्वेषां छन्दसां वीर्यमवरुन्धे, सर्वेषां छन्दसां वीर्य मश्नुते, सर्वेषां छन्दसां सायुज्यं सरूपतां सलोकता मश्नुते, ऽन्नादोऽन्नपतिर्भवत्यश्नुते, प्रजयान्नाद्यं य एवं विद्वान् विराजौ कुरुते"—इति । गायत्र्युष्णिक्त्रिष्टुबनुष्टुब्विराड्रूपाणां 'सर्वेषां छन्दसां' यत्सामर्थ्य मस्ति, तदयं वेदिता 'अवरुन्धे' अभिमुखीकरोति ; कृत्वा च 'अश्नुते' प्राप्नोति । तथा सर्वच्छन्दोभिमानिदेवानां 'सायुज्यं' सहभावं, 'सरूपतां' समानरूपत्वं, 'सलोकताम्' एकस्थाननिवासञ्च प्राप्नोति । 'अन्नादः' अन्नभक्षणसमर्थो नीरोगः, 'अन्नपतिः' बह्वन्नस्वामी 'भवति' । न केवलं स्वय मेव ; किं तु स्वकीयया पुत्रादिप्रजया सह 'अन्नाद्यम् अश्नुते' ॥

इत्थं छन्दः प्रशंस्येदानीं विधत्ते—"तस्माद्विराजावेव कर्त्तव्ये"

---

* वस्तुतः त्रिंशदक्षरैव विराट् सर्ववेदप्रसिद्धा ; तथा चाम्नातं तैत्तिरीयैः स्फुटम्—'त्रिंशदक्षरा विराट्'—इति (सं० २. ५. १०. ३.)। 'विराजो दिशः'—इति (४. ५.) च वैदिकच्छन्दःसूत्रं तदनुगतम् । इह त्वाख्याता एकाक्षरन्यूनत्वेन छन्दःशास्त्रमते निचृदिति विशेषणान्वितं विराट्त्व मपरायास्तु, स्वराडिति विशेषणान्वित मित्यभिप्रायः (पि० ३.५९,६०.)।

—इति। यस्माद्विराजो युक्तमन्नमस्ति तस्मादित्यर्थः। तयोः प्रतीकद्वयं दर्शयति—'प्रेद्धो अग्ने', 'इमो अग्ने'—इत्येते इति ॥

दीक्षणीयेष्टौ स्विष्टकृतः संयाज्ये विधाय दीक्षितस्य सत्यवदनं विधत्ते—"ऋतं वाव दीक्षा सत्यं दीक्षा तस्माद्दीक्षितेन सत्यमेव वदितव्यम्"—इति। मनसा यथावस्तुचिन्तनम् ऋतशब्दाभिधेयम्; वाचा यथावस्तुकथनं सत्यशब्दाभिधेयम्। तदुभयात्मिका दीक्षा; तदैकात्म्यं विवक्षितम्। अस्मादेव 'तस्माद्दीक्षितेन सत्यमेव वदितव्यम्' न तु किञ्चिदप्यनृतं वदेत्। तदशक्याभिधानमित्यनुजिघृक्षया प्रकारान्तरं विधातुं प्रस्तौति—"अथो खल्वाहुः कोऽर्हति मनुष्यः सर्वं सत्यं वदितुं सत्यसंहिता वै देवा अनृतसंहिता मनुष्या इति"—इति। प्रकारान्तरद्योतकोऽयम् 'अथो'-शब्दः। ब्रह्मवादिन एवम् 'आहुः'—'खलु मनुष्यः कः नाम 'सर्वं वाक्यं सत्यं वदितुमर्हति'? न कश्चिदपि तथा कर्तुं शक्नोति; 'देवाः' एव 'सत्यसंहिताः' सत्ये [illegible]। इति—शब्दो ब्रह्मवादिवचनसमाप्त्यर्थः ॥

इदानीं सत्यवदनफलसिद्ध्यर्थं प्रकारान्तरं विधत्ते—'विचक्षणवतीं वाचं वदेत्'—इति। विचक्षणशब्दयुक्तचतुष्टयात्मकोऽयं मन्त्रः; तदुदाहार्यं प्रयुञ्जीत—देवदत्त विचक्षण! गा मानय यज्ञदत्त विचक्षण! गां बधानेत्येवं तत्प्रयोगः। तदाहापस्तम्बः—'चनसितं विचक्षणमिति नामधेयान्तेषु निदधाति; चनसितेति ब्राह्मणं विचक्षणेति राजन्यवैश्यौ' इति (१०.१२.७,८)*।

---

* "चनसितं विचक्षणमिति च प्रतिपदं [illegible] न [illegible]। [illegible] यति 'चनसितेति ब्राह्मणम्' [illegible]। आमन्त्रयीतेत्य भारद्वाजः। 'देवदत्त चनसित! [illegible]!'—इति तट्टीका। 'विचक्षण चनसितवतीं वाचम्' इति च काठक० श्रौ० [illegible]।

[illegible] प्रवेतिमस्य सत्यवदनप्रवृत्तिहेतुत्वं प्रतिपादयति—'चक्षुर्वै विचक्षणं वि ह्येनेन पश्यतीति'—इति । चक्षुरिन्द्रियमेव विचक्षणशब्दवाच्यम्, तदेव स्पष्टीक्रियते—'चक्षिङ् दर्शने' (धा॰ ७)—इत्यस्माद्धातोरयं शब्दो निष्पन्नः; तथा सति विशेषेण [illegible] अनेनान्तष्टे 'पश्यतीति विचक्षणं' नेत्रम् । तस्माच्चक्षुर्विचक्षणमिति पर्यायौ । उक्तनिर्वचनप्रदर्शनार्थः 'इति'-शब्दः ।

अस्त्वेवं तयोः पर्यायत्वम्, कथं नेत्रेण सत्यसम्पूर्तिसिद्धिरित्याशङ्क्याह—'एतद्वै मनुष्येषु सत्यं निहितं यच्चक्षुः'—इति । प्रत्यक्षानुमानादिप्रमाणेषु[1] मध्ये प्रत्यक्षप्रमितिसाधनं 'यच्चक्षुः' इन्द्रियमस्ति, एतदेव 'मनुष्येषु' मध्येषु सत्यं 'निहितं' यथावस्तुज्ञानसाधनत्वेनाभिमतम्; तस्माच्चक्षुःपर्यायविचक्षणशब्दप्रयोगेण सत्यसम्पूर्तिर्भवति । अन्वयव्यतिरेकाभ्यां चक्षुषो यथावस्तुदर्शनसाधनत्वं साधयति—'तस्मादाचक्षाणमाहुरद्राक्षीरिति स यद्यदर्श[illegible]मित्याचक्षाणस्य [illegible] स्वयं पश्यति न बहूनां चनान्येषां श्रद्दधाति [illegible] चक्षुषः सत्यहेतुत्वं मनुष्याणामभिप्रेतं [illegible] 'आचक्षाणं' पुरुषमिति [illegible] 'आहुः'—'अद्राक्षीरिति', [illegible] त्वमेव अद्राक्षीः ? इत्यर्थः । [illegible] स पुरुषो 'यदि' अहमेव अद्राक्षमिति ब्रूयात्, तदा 'अस्य' वचनं सत्यमिति सभ्याः सर्वे 'श्रद्दधति' विश्वासं कुर्वन्ति । [illegible] 'यदि-उ-वै' इत्ययं निपातसमूहः उदा-

---

[1] [illegible] इति [illegible] । 'तदेतत् [illegible] (धर्मस्य) प्रमाणम्'—[illegible] । 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि'—इति गौ॰ सू॰ १ । १ । ३ ।

दृष्टान्तरप्रदर्शनार्थः । अथवा कश्चित् पुमान् 'स्वयम्' न चक्षुषा स्वान्धमूलादुपेतं स्वाक्षु 'पश्यति'; अन्ये बहवः पुरुषाः दूरदर्शिनो * पश्यन्तः पुरुषोऽय मित्याचक्षते । 'चन'-शब्दोऽपि-शब्दार्थः; 'बहूनाम्' अपि 'अन्येषां' वचन मयं पुरुषो 'न श्रद्दधाति' किन्तु स्वकीयं चाक्षुषदर्शन मेव श्रद्दधाति । वाजसनेयिनोऽप्यामनन्ति—"द्वौ विवदमानावेयाता मह मदर्श मह मश्रौष मिति; य एव ब्रूयादह मदर्श मिति, तस्मा एव श्रद्दध्याम"-इति (शत० ब्रा० १. ३. १. २७.) † । तैत्तिरीयाश्चामनन्ति—"अनृतं वाचा वदति अनृतं मनसा ध्यायति, चक्षुर्वै सत्य मद्रागित्याहाह मदर्श मिति तत्सत्यम्"-इति ‡ ॥

तथाविधचक्षुःपर्यायस्य विचक्षणशब्दस्य सत्यसम्पूर्तिहेतुत्व मुपपाद्य पूर्वोक्तं विधि मुपसंहरति—"तस्माद्विचक्षणवती मेव वाचं वदेत्सत्योत्तरा हैवास्य वागुदिता भवति भवति" इति । 'अस्य' विचक्षणशब्दोपेतवचनवादिनो § या 'वाग्' अस्ति, सा

---

* 'बहवः पुरोवर्त्तिनो' ख, ग ।

† 'चक्षुषा वै सम्राट् पश्यन्त माहुरद्राक्षीरिति स आहाद्राक्ष मिति तत् सत्यं भवति'-इति च पुनस्तत्रैवोपरिष्टात् १४. ६. १०. = बृ० उप० ४. १. ४ ।

‡ 'नानृतं वदेत्'-इति (तै० सं० २. ५. ५. ६.) विधौ विचारितं च मीमांसायाम् (जै० सू० ३. ४. १२, १३ । तदधिकरणं चोद्धृतं स-व्याख्यानं तत्रैव तैत्तिरीयसंहिताभाष्ये सायणेन 'अनृतं न वदेदेषः पुंधर्मो वा क्रतुगोः'-इत्यादि (जै० अधि० मा० ३. ४. ४.) ।

§ अस्मन्मते तु 'विचक्षणवती मेव वाचं वदेत्'-इत्यस्य वचनस्य हि दृष्टविषयमात्र-कथन-विधानेऽदृष्टविषयकथननिषेधं च तात्पर्यम्; विचक्षणेतिशब्दयुक्तमिथ्याकथनेऽपि न दोष इति नाभिप्रेतो ब्राह्मणकृत इति । चनसितविचक्षणान्वितनामधेयकरणस्य विधानन्तु इतः पृथक् (आप० श्रौ० १०. १२. ७, ८ ; कात्या० श्रौ० ७. ५. ७ ; लाट्या० श्रौ० ३. ३. १४.) दीक्षितधर्मान्तर मिति दिक् ।

'सर्वोत्तरा' सर्वशेषाहुतिरपि विच्छिन्नेतिमन्त्रसामर्थ्येन सम्पूरिता एव भवति ; अच्युतदोषो न स्पृशतीत्यर्थः ॥ 'भवति'-शब्दस्याभ्यासोऽध्यायसमाप्त्यर्थः * ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमाध्याये षष्ठः खण्डः ॥ ६ ॥

दार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
मर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायाः प्रथमोऽध्यायः ॥

---

* दीक्षणीयेष्टिरेव सर्वेष्टिमूलम् । श्रूयते हि 'दीक्षणीयेष्टिस्तायते तामेवानु याः काश्चेष्टयस्ताः सर्वा अग्निष्टोम मपियन्ति' इति (३. ४. २.) । सैषा प्रथमेष्टिः शतपथब्राह्मणस्य तृतीये काण्डे प्रथमाध्यायतो द्वितीयाध्यायीय-द्वितीयब्राह्मणान्तं यावच्छ्रूयते, तैत्तिरीये सांहितिकब्राह्मणे च ६ का० १ प्र० १-४ अनु० । एवम् आश्व० श्रौ० ४. २. १ —१० । तथा 'दीक्षणीयायामन्त' प्रक्रमति'-इत्यादि आप० श्रौ० १०. ४—२०. । कात्या० श्रौ० सप्तमाध्यायस्य प्रथमकण्डिकातः पञ्चमकण्डिकाया द्वादशसूत्रं यावत् । अपि तथान्यकाण्डभागाः समस्तसूत्रस्य वृत्तौ याज्ञिकदेवेन दीक्षितधर्माश्च कतिचित् सङ्गृह्य प्रदर्शिताः ॥

॥ अथ द्वितीयाध्यायः ॥

(तत्र)

॥ प्रथमः खण्डः ॥

॥ ओं ॥ स्वर्गं वा एतेन लोक मुपप्रयन्ति॑ यत्प्रायणीयस्तत्प्रायणीयस्य प्रायणीयत्वम्॑ प्राणो वै प्रायणीय॑ उदान उदयनीयः॑ समानो होता भवति॑ समानौ हि प्राणोदानौ॑ प्राणानां क्लृप्त्यै॑ प्राणानां प्रतिप्रज्ञात्यै॑ यज्ञो वै देवेभ्य उदक्रामत्॑ ते देवा न किञ्चनाशक्नुवन्॑ कर्तुं न प्राजानंस्ते॑ऽब्रुवन्नदितिं॑ त्वयेमं यज्ञं प्रजानामेति॑ सा तथेत्यब्रवी॑त्सा वै वो वरं वृणा इति वृणीष्वेति॑ सैत मेव वर मवृणीत॑ मत्प्रायणा यज्ञाः सन्तु॑ मदुदयना इति तथेति॑ तस्मादादित्यश्चरुः॑ प्रायणीयो भवत्या॑दित्य उदयनीयो॑ वरवृतो ह्यस्या॑ अथो एतं वर मवृणीत॑ मयैव प्राचीं दिशं प्रजानाथा॑ग्निना दक्षिणां॑ सोमेन प्रतीचीं॑ सवित्रोदीची मिति॑ पथ्यां यजति॑ यत्पथ्यां यजति॑ तस्मादसौ पुर उदेति॑ पश्चास्त मेति॑ पथ्यां ह्येषोऽनुसञ्चरत्य॑ग्निं यजति॑ यदग्निं॑ यजति॑ तस्माद्दक्षिणतोऽग्र॑ ओषधयः पच्यमाना आयन्त्या॑ग्नेय्यो

ह्योषधयः सोमं यजति यत्सोमं यजति तस्मात् प्रतीच्योऽप्यापो बह्व्यः स्यन्दन्ते सौम्या ह्यापः सवितारं यजति यत्सवितारं यजति तस्मादुत्तरतः पश्चादयं भूयिष्ठं पवमानः पवते सवितृप्रसूतो ह्येष एतत्पवत उत्तमा मदितिं यजति यदुत्तमा मदितिं यजति तस्मादसाविमां वृष्ट्याभ्युनत्त्यभिजिघ्रति पञ्च देवता यजति पाङ्क्तो यज्ञः सर्वा दिशः कल्पन्ते कल्पते यज्ञोऽपि तस्यै जनतायै कल्पते यत्रैवं विद्वान् होता भवति ॥ १ ॥

प्रथमे दीक्षणीयेष्टिस्तत्स्तुतिस्तत्र संस्कृतिः ।
याज्यानुवाक्ये संयाज्याः सत्योक्तिश्चेति वर्णिताः ॥

अथ प्रायणीयादिकं * विधातुं द्वितीयोऽध्याय आरभ्यते । तत्रादौ प्रायणीयशब्दार्थं वदति—"स्वर्गं वा एतेन लोकमुपप्रयन्ति यत्प्रायणीयस्तत्प्रायणीयस्य प्रायणीयत्वम्"–इति । प्रायणीयाख्यो यः कर्मविशेषोऽस्ति, 'एतेन' यजमानाः 'स्वर्गं लोकं' सामीप्येन प्राप्नुवन्ति । तस्मात्प्रयन्त्यनेनेतिव्युत्पत्त्या तत्प्रायणीयनाम सम्पन्नम् ॥

---

* 'दीक्षान्तं प्रायणीयम्' का० श्रौ० ७. ५. १३ । 'दीक्षान्ते राजक्रयः । तदहः प्रायणीयेष्टिः' आश्व० श्रौ० ४. २, १८ ; ३. १ । 'दीक्षाहःसु परिसमाप्तेषु अनन्तरं यदहः, तस्मिन्नहनि राजक्रयः कर्त्तव्यः ; सोमः क्रेतव्य इत्यर्थः । यस्मिन्नहनि सोमः क्रीयते, तदहः प्रायणीया नामेष्टिः कार्या'–इति तट्टीका ग्रा० ना० ।

अथ विधास्यमानौ प्रायणीयोदयनीयाख्यौ कर्म्मविशेषौ स्तः, तौ सह प्रशंसति—"प्राणो वै प्रायणीय उदान उदयनीयः समानो होता भवति; समानौ हि प्राणोदानौ प्राणानां कॢप्त्यै प्राणानां प्रतिप्रज्ञात्यै"–इति। प्राणवायोः प्रायणीयकर्म्मणश्च प्र-शब्दसाम्यादभेदः; उदानवायोरुदयनीयकर्म्मणश्चोच्छब्दसाम्यादभेदः। किञ्च प्रायणीयोदयनीययोः कर्म्मणोर्याज्यानुवाक्यादिप्रयोगार्थ मेक एव होता भवति; प्राणोदानवायू चैकदेहवर्त्तित्वादेकेन होत्रा अनुष्ठेयाभ्यां कर्म्मभ्यां समानौ; अतो वायुविशेषयोश्चाभेदः। तच्च कर्मद्वयानुष्ठानं प्राणवायूनां कॢप्त्यै स्वस्वव्यापारसामर्थ्याय भवति; तथा प्राणवायूनां प्रत्येकम्, अयं प्राणो अय मुदान इत्यादिविशेषस्य प्रज्ञानाय भवति। तस्मात्कर्म्मद्वयं प्रशस्त मित्यर्थः * ॥

अथ देवताविशेषविधानायाख्यायिका मुपक्रमते—"यज्ञो वै देवेभ्य उदक्रामत्ते देवा न किञ्चनाशक्नुवन् कर्तुं न प्राजानंस्तेऽब्रुवन्नदितिं त्वयेमं यज्ञं प्रजानामेति सा तथेत्यब्रवीत्सा वै वो वरं वृणा इति; वृणीष्वेति सैत मेव वर मवृणीत मत्प्रायणा यज्ञाः सन्तु मदुदयना इति, तथेति; तस्मादादित्यश्चरुः प्रायणीयो भवत्यादित्य उदयनीयो वरवृतो ह्यस्यै" इति। योऽयं 'यज्ञः' सोमयागाभिमानी पुरुषः, सोऽयं केनापि निमित्तेनापरक्तः सन् देवसकाशादुपक्रम्य गतवान्। यज्ञपुरुषे गते सति 'ते देवाः' किं मपि यज्ञाङ्गं 'कर्त्तुं' शक्तिरहितास्तदभिज्ञानरहिताश्चाभवन्। ततः ते सर्वे समागत्य 'अदितिं' प्रार्थितवन्तः। हे अदिते! त्वत्प्रसादेन वयम् 'इमं यज्ञं' कर्तुं ज्ञातुं च शक्ताः भूयास्मेति। ततोऽदितिरङ्गीकृत्य

---

* 'द्वे शीर्षे प्रायणीयोदयनीये (यज्ञस्य)'–इति निरु० १३.१.७। 'शिरो वै यज्ञस्यातिथ्यम्, बाहू प्रायणीयोदयनीयौ' शत० ब्रा० ३. २. ३. २०। आतिथ्येष्टिं तृतीयेऽध्याये वक्ष्यति।

प्रापयितुं शक्ता अतएव 'एतं वरमवृणीत',—ये सोमयागास्ते सर्वे 'मत्प्रायणाः' मदुपक्रमाः; 'मदुदयनाः' मदवसानाश्च 'असन्निति' । तस्य वरस्य देवैरङ्गीकृतत्वात् प्रायणीयः प्रारम्भकालीनेष्टिगतश्चरुरदितिदेवताकः कर्तव्यः ; उदयनीयः समाप्तकालीनोऽपि चरुरदितिदेवताकः कर्तव्यः * । यस्मादस्या अदितेस्तादृशश्च वरो वरेण प्रार्थितः, तस्मात्तथानुष्ठानं युक्तम् † । त मिम मर्थं तैत्तिरीया आमनन्ति—"देवा वै देवयजन मध्यवसाय दिशो न प्राजानन् ते१ऽन्यो ऽन्य मुपाधावन् त्वया प्रजानाम त्वयेति तेऽदित्या१ँ सम-म्रियन्त त्वया प्रजानामिति साब्रवीद्वरं वृणै मत्प्रायणा एव वो यज्ञा मदुदयना असन्निति तस्मादादित्यः प्रायणीयो यज्ञाना मादित्य उदयनीयः"—इति (सं० ६. १. ५. १.) ।

अदितेर्वरान्तरं दर्शयति—"अथो एतं वर मवृणीत, मयैव प्राचीं दिशं प्रजानाथाग्निना दक्षिणां सोमेन प्रतीचीं सवित्रोदीचीमिति"—इति । 'अथो' अपिचेत्यर्थः । मयेत्यादिना वरः प्रपञ्च्यते । हे देवाः ! यूय मिदं देवयजनं समीचीन मित्येवं बहुधा विचारयन्तः तदर्थं बहुषु देशेषु पर्यटन्तो दिग्भ्रमं प्राप्य प्राच्यादि

---

* तदेवं प्रायणीयेष्ट्या सोमयाग आरभ्यते, उदयनीयेष्ट्या च स समाप्यते इति व्यक्तम् ।

† अदितिर्देवता 'अदितिरदीना देवमाता'—इत्यादिना, 'अदितिर्दाक्षायणी'—इत्यादिना (४. ४. २ ; ११. ३. २.) च निरुक्ते व्याख्याता । 'अग्निरप्यदितिरुच्यते'—इति च (११. ३. २.) तत्रैव । इतो ज्ञायते अस्ति काचिदखण्डनीया ज्योतिःस्वरूपा ऐशी शक्तिः ; सैवास्य जगतो जननी, सैवादितिः, सैव वेदान्तिनां माया, साङ्ख्यानां प्रकृतिश्चेति । अतः सर्व एवैते भावा आदित्या एव, तत्र मुख्यः सूर्य इति तत्रादित्यशब्दो योगरूढः । कश्यपश्चेश्वरः ; 'कश्यपः पश्यको भवति ; यत्सर्वं परिपश्यतीति सौक्ष्म्यात्'—इति हि तै० आर० १, ८, ११ । अतएव च कश्यपप्रजापतेः पत्नी अदितिः, तयोः सृष्टिर्वा दृष्टिरिति पौराणिकाः [illegible] उपदिशन्ति । ऋ० सं० १,८९,१० ; १०,७२,८,९ ; तै० सं० ६.५.६. इ० ।

दिशं न ज्ञातवन्तः, ततो [illegible] दिग्विशेषज्ञापनाय पथ्या अग्निः सोमः सविता चेत्येते चत्वारः चतुर्षु देशेषु अवस्थिताः। तथा सति यत्राहमस्मि सा प्राची दिगित्येवं 'मयैव प्राचीं दिशं' बुध्यध्वम्। एवमग्न्यादिभिः दक्षिणादयस्तिस्रो दिशो बोद्धव्याः। इत्येष द्वितीयो वरः। एते देवा अनेन क्रमेण तत्र तत्र यष्टुं योग्या इति तात्पर्यार्थः * ॥

तत्र प्रथमं यागं विधत्ते—"पथ्यां यजति"–इति। पथ्येति देवताया नामधेयम् †। यद्यपि शाखान्तरे "पथ्यां स्वस्तिं यजति प्राचीमेव तया दिशं प्रजानाति"-इति (तै० सं० ६. १. ५. २.) पथ्यास्वस्तिरित्येतं नामधेय माम्नातम्, तथापि भीमशब्दवन्नामैकदेशेनात्र व्यवहारः। ननु पूर्वत्र "मयैव प्राचीं दिशं प्रजानाथ"–इत्यदितेर्वाक्य माम्नातम्, इह तु पथ्यां यजतीत्युक्तौ पूर्वापरविरोधः? इति चेत्, नायं दोषः; अदितिदेवताया एव पथ्याख्यं मूर्त्यन्तर मिति वक्तुं शक्यत्वात्॥

उक्तं विधि मनूद्य प्रशंसति—"यत्पथ्यां यजति तस्मादसौ पुर उदेति पश्चास्त‡मेति पथ्यां ह्येषोऽनुसञ्चरति"–इति। 'यद्' यस्मात् कारणात् पूर्वस्यां दिश्यवस्थितां 'पथ्यां' देवतां 'यजति', तस्मात् कारणाद् 'असौ' आदित्यः 'पुरः' 'पूर्वस्यां दिशि 'उदेति',

---

* अस्याः श्रुतेर्दिगुपदेश एव वा स्यात् तात्पर्यम्।

† 'पथ्या स्वस्तिः— पन्था अन्तरिक्षम्, तन्निवासात्'—इति, तन्निगम-गत 'देवगोपा'—इत्येतत्पदस्य व्याख्यानाय च पुनः 'देवी गोपत्नी, देवान् गोपायत्विति, देवा एना गोपायन्त्विति वा'—इति च निरु० ११. ४. ११, १२। 'देवाः— माध्यमिका द्युस्थाना वा रश्मयः'—इति च तट्टीका। आदित्य मन्तरिक्षस्थिता [illegible] एव 'पथ्या स्वस्ति'—इति गम्यते।

‡ 'पश्च पश्चा च च्छन्दसि'—इति पा० ५. ३. ३३।

'पश्चात्' * पश्चिमायां दिशि 'अस्तमेति'; 'हि' यस्मात् कारणात् 'एषः' आदित्यः पथ्याख्यां देवताम् 'अनुसृत्य' 'सञ्चरति', तस्मात् पूर्वापरयोरुदयास्तमययोरुपपत्तौ। न च पूर्वदिशः पथ्यासम्बन्धोऽस्ति पश्चिमदिशः स नास्तीति वाच्यम्; उदयनीयायां पश्चिमदिशि पथ्याया यक्ष्यमाणत्वात्। द्वयोर्दिशोस्तत्सम्बन्धे सति आदित्यस्य तदनुसञ्चारो युक्तः॥

दक्षिणदिग्वर्तिनोऽग्नेर्यागं विधत्ते—"अग्निं यजति"-इति। तं विधिमनूद्य प्रशंसति—"यदग्निं यजति तस्माद्दक्षिणतोऽग्र ओषधयः पच्यमाना आयन्त्याग्नेय्यो ह्योषधयः"-इति। यस्माद्दत्र देवानां दिग्विशेषज्ञापनाय दक्षिणदिग्व्यवस्थितम् 'अग्निं यजति', 'तस्मात्' कारणाद् विन्ध्यपर्वतस्य दक्षिणभागे व्रीह्याद्योषधयः 'अग्रे पच्यमानाः' 'आयन्ति' तत्तत्स्वामिगृहेष्वागच्छन्ति। विन्ध्यस्योत्तरभागे यवगोधूमचणकादिधान्यप्राचुर्यम्, तानि च धान्यानि माघफाल्गुनयोः पच्यन्त इति पश्चाद्भावीनि; दक्षिणदिग्भागे तु यवादिप्राचुर्याभावात् प्राचुर्येण च व्रीह्यादीनीति कार्तिकमार्गशीर्षयोः पच्यमानत्वादग्रे पाकोऽभिहितः। 'हि' यस्मात् कारणाद् 'ओषधयः आग्नेय्यः' तासां पाकस्याग्न्यधीनत्वात्। यथौदनरूपेण बाह्यपाकोऽग्न्यधीनः, एवं बीजरूपेण सस्यपाकोऽपि तदन्तर्वर्त्यग्न्यधीन इति द्रष्टव्यम्। तस्मादग्निसम्बन्धिन्यां दक्षिणस्यां दिशि अग्रे पाको युक्तः॥

पश्चिमदिग्व्यवस्थितस्य सोमस्य यागं विधत्ते—"सोमं यजति" -इति। तं विधिमनूद्य प्रशंसति—"यत्सोमं यजति, तस्मात्

---

* अस्मद्दृष्टेषु सर्वेष्वेव मूलपुस्तकेषु 'पश्चास्तमेति'-इत्येवंविध एव पाठः; ततोऽत्र पर्यन्तिमप्रतीकधृतस्यैव भाष्यम्।

प्रतीच्योऽप्यापो बह्व्यः स्यन्दन्ते ; सौम्या ह्यापः”—इति। यस्माद् ‘आपः’ सोमसम्बन्धिन्यः, सोमस्याप्लवकारणत्वात्, तस्मात् ‘बह्व्यः आपः’ ‘प्रतीच्योऽपि’ प्रत्यङ्मुखोऽपि सत्यः ‘स्यन्दन्ते’; पश्चिमसमुद्र-समीपे प्रवहन्तीनां नदीनां पश्चिमाभिमुखत्वदर्शनात्। सोमस्यात्र पश्चिमदिश्यवस्थितेन तदीयाना मपां तन्मुखत्वं युक्तम् ॥

उत्तरदिश्यवस्थितस्य सवितुर्यागं विधत्ते—“सवितारं यजति” -इति। तं विधि मनूद्य प्रशंसति—“यत्सवितारं यजति, तस्मादुत्तरतः पश्चादयं भूयिष्ठं पवमानः पवते ; सवितृप्रसूतो ह्येष एतत्पवते”—इति। सविता प्रेरको देवः। सोऽत्र यस्मादुत्त-रस्यां दिश्यवतिष्ठते, ‘तस्मात्’ तेन सवित्रा प्रेरितो वायुरुत्तरपश्चि-मयोरन्तरालवर्त्तिन्यां, वायव्यां दिशि ‘भूयिष्ठं पवते’ अत्यधिकं सञ्चरति ॥

ऊर्द्धदिग्वर्त्तिन्या अदितेर्यागं विधत्ते—“उत्तमा मदितिं यजति”-इति। ‘उत्तमाम्’ ऊर्द्धावस्थिता मित्यर्थः। अतएव तैत्ति-रीया आमनन्ति—“पथ्याᳶ स्वस्ति मयजन् प्राची मेव तया दिशम् प्राजानन्नग्निना दक्षिणां सोमेन प्रतीचीᳶ सवित्रोदीचि मदित्योर्ध्वाम्”-इति (सं॰ ६. १. ५. २.)। उक्तं विधि मनूद्य प्रशंसति—“यदुत्तमा मदितिं यजति तस्मादसाविमां वृष्ट्याभ्यु-नत्त्यभिजिघ्रति”—इति। यस्मादूर्द्धदिग्वर्त्तिनी अदितिः, ‘तस्माद्’ ऊर्द्धदिग्वर्त्तिनी द्यौः ‘इमाम्’ अधोवर्त्तिनीं स्वकीयया ‘वृष्ट्याऽभ्यु-नत्ति’ सर्वतः क्लेदयति ; पुनरपि घर्मकाले ‘अभिजिघ्रति’ भूमि-गतं रस माभिमुख्येनादत्ते ॥

अत्र पथ्यादीनां ‘चतसृणां’ देवताना माज्येन यागः ; अदितेस्तु चरुणेति द्रष्टव्यम्। तदाहापस्तम्बः—‘चतुर आज्यभागान् प्रति-

दिशं यजति, पथ्यां स्वस्तिं पुरस्तादग्निं दक्षिणतः सोमं पश्चात्सवितारमुत्तरतो मध्ये ऽदितिं हविषा'-इति (१०. २१. ११.) ॥

यथोक्तदेवतागतां सङ्ख्यां प्रशंसति—"पञ्च देवता यजति, पाङ्क्तो यज्ञः, सर्वा दिशः कल्पन्ते ; कल्पते यज्ञो ऽपि"-इति । पथ्याद्यदित्यन्ताः 'पञ्च देवताः', यज्ञस्य पञ्चसङ्ख्यायोगात् पाङ्क्तत्वं बहुधा श्रूयते ; अतो यज्ञे देवताविषया पञ्चसङ्ख्या युक्ता । 'दिशः' अपि प्राच्याद्या ऊर्ध्वान्ताः पञ्चसङ्ख्याकाः । अतो देवतागतपञ्चसङ्ख्यया एताः 'सर्वा दिशः' 'कल्पन्ते' समर्था भवन्ति, पूर्वमविज्ञाताः सत्यो ज्ञाता भवन्तीत्यर्थः । 'यज्ञोऽपि' अनया 'कल्पते' स्वप्रयोजनसमर्थो भवति ॥

वेदनं प्रशंसति—"तस्यै जनतायै कल्पते यत्रैवं विद्वान् होता भवति"-इति । 'यत्र' यस्यां 'जनतायां' याज्ञिकजनसमूहे 'होता' प्रायणीयदेवतानां वेदिता 'भवति', तस्यां जनताया मयं होता स्वप्रयोजनसमर्थो भवति ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां द्वितीयाध्याये
प्रथमः खण्डः ॥ १ (७) ॥

॥ अथ द्वितीयः खण्डः ॥

यस्तेजो ब्रह्मवर्चसमिच्छेत्प्रयाजाहुतिभिः प्राङ् स इयात् तेजो वै ब्रह्मवर्चसं प्राची दिक् तेजस्वी

ब्रह्मवर्चसी भवति' य एवं विद्वान् प्राङेति' योऽन्नाद्य मिच्छेत्' प्रयाजाहुतिभिर्दक्षिणा स इयादन्नादो वा एषोऽन्नपतिर्यदग्निरन्नादोऽन्नपतिर्भवत्यश्नुते प्रजयान्नाद्यं' य एवं विद्वान् दक्षिणैति' यः पशूनिच्छेत् प्रयाजाहुतिभिः प्रत्यङ् स इयात्' पशवो वा एते यदापः' पशुमान् भवति' य एवं विद्वान् प्रत्यङेति' यः सोमपीथ मिच्छेत्' प्रयाजाहुतिभिरुदङ् स इयादुत्तरा ह वै सोमो राजा प्र सोमपीथ माप्नोति' य एवं विद्वानुदङेति' स्वर्ग्यैवोर्ध्वा दिक्' सर्वासु दिक्षु राध्नोति' सम्यञ्चो वा इमे लोकाः सम्यञ्चोऽस्मा इमे लोकाः' श्रियै दीद्यति य एवं वेद' पथ्यां यजति' यत्पथ्यां यजति' वाच मेव तद्यज्ञमुखे सम्भरति' प्राणापानावग्नीषोमौ' प्रसवाय सविता' प्रतिष्ठित्या अदितिः' पथ्या मेव यजति' यत्पथ्या मेव यजति' वाचैव तद्यज्ञं पन्था मपि नयति' चक्षुषी एवाग्नीषोमौ' प्रसवाय सविता' प्रतिष्ठित्या अदितिश्चक्षुषा वै देवा यज्ञं प्राजानंश्चक्षुषा वा एतत् प्रज्ञायते यदप्रज्ञेयं' तस्मादपि मुग्धश्चरित्वा यदैवानुष्ठ्या चक्षुषा प्रजानात्यथ प्रजानाति' यद्वैतद्देवा यज्ञं प्राजानन्नस्यां' वाव तत्प्राजानन्नस्यां समभरन्नस्यै वै यज्ञस्तायते'

ऽग्नौ क्रियते ऽग्नौ सम्भ्रियत ऊर्ध्वं यददितिस्तदुत्तमा मदितिं यजति यदुत्तमा मदितिं यजति यज्ञस्य प्रज्ञात्यै स्वर्गस्य लोकस्यानुख्यात्यै ॥ २ (८) ॥

प्रायणीयेष्टिं विधाय तत्र प्रयाजानां काम्यप्रकारविशेषं विधत्ते—“यस्तेजो ब्रह्मवर्चस मिच्छेत्, प्रयाजाहुतिभिः प्राङ् स इयात्; तेजो वै ब्रह्मवर्चसं प्राची दिक्”-इति । ‘समिधो यजति’, ‘तनूनपातं यजति’-इत्यादिना विहिताः पञ्च प्रयाजाहुतयः * । तासां प्रकृतावनुष्ठानप्रकार आपस्तम्बेन दर्शितः—“पञ्च

---

* ‘समिधो यजति वसन्त मेवर्तूना मवरुन्धे, तनूनपातं यजति ग्रीष्म मेवावरुन्धे, इडो यजति वर्षा एवावरुन्धे, बर्हिर्यजति शरद मेवावरुन्धे, स्वाहाकारं यजति हेमन्त मेवावरुन्धे’-इति तै० सं० २. ६. १. १ । तन्मन्त्राः तै० ब्रा० ३.५.५. द्रष्टव्याः । तेषु च ‘विभक्तिं करोति’-इति विभक्तिविधानं भवति (तै० सं० १. ५. २.)। ताश्च विभक्तयः सूत्रे दर्शिताः—‘अग्नाऽग्नावग्ने ऽग्निनाऽग्निमग्न इति चतुर्षु प्रयाजेषु [illegible] विभक्तीर्दधाति’-इति (आप० श्रौ० ५. २८. ६.)। तदुक्तं पातञ्जले महाभाष्ये पस्पशाह्निके—‘विभक्तिं कुर्वन्ति । याज्ञिकाः पठन्ति—प्रयाजाः सविभक्तिकाः कर्तव्या इति । न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम् । तस्मादध्येयं व्याकरणम्’-इति । तथाच ‘समिधो अग्न आज्यस्य वियन्तु । तनूनपादग्न आज्यस्य वेतु’-इत्येवं मन्त्रपाठाः सम्पद्यन्ते । अत एव श्रूयते शतपथब्राह्मणे ‘व्यन्तु वेत्वित्येव प्रयाजानां रूपम्’-इति २. २. १. २७। तै० ब्रा० अनुशासनाद् ‘व्यन्तु’ इति ‘वियन्तु’ भवति । ‘प्रयाजान् प्रधानस्य प्रमुखे यष्टव्यान् तन्नामकान् हविर्भागान्’-इति सा० भा० (ऋ० सं० ८. १. ११. ३.)। ‘आज्येन प्रयाजा इज्यन्ते’-इति च तै० सं० ६. ३. ११. ७। यास्केन हि ‘किं देवताः प्रयाजानुयाजाः ?’—इत्युपक्रम्य बहुविचारानन्तरम् ‘आग्नेया इति तु स्थितिः’-इति निर्णीतम् (निरु० ८.३.६,७) अत्र च मीमांसासूत्राणि बहूनि (२. २. २ ; ९. ९. ५९, ६०. ; १०. १. १४, १५ ; ३. ३, ११ ; ३. १. १९, २० ; ४. १. २२—२९ ; ४०. ४१ ; ५. २. १६.)। तान्यवलम्ब्य अधिकरणानि चाष्टौ रचितानि माधवाचार्येण जैमिनीयन्यायमालाया मिति ।

प्रयाजान् प्राचो यजति । प्रतिदिशं वा ; समिधः पुरस्तात्, तनूनपातं दक्षिणतः, इडः पश्चाद्, बर्हिरुत्तरतः, स्वाहाकारं मध्ये"–इति (२. १७. १, २.)। स प्रकारोऽत्र चोदकप्राप्तस्त मपोद्य शरीरकान्तिं श्रुताध्ययनसम्पत्तिं च कामयमानस्य प्रकारान्तरं विधीयते। 'यः' पुमान् 'तेजो ब्रह्मवर्चस मिच्छेत्', 'सः' पुमान् 'प्रयाजाहुतिभिः' 'प्राङियात्' प्रागपवर्गास्ता आचरेदित्यर्थः। आदित्योदयेन प्राच्यास्तेजस्त्वम्, तदाभिमुख्येन गायत्रीजपानुष्ठानात् ब्रह्मवर्चसत्वञ्च। वेदनं प्रशंसति—"तेजस्वी ब्रह्मवर्चसी, भवति य एवं विद्वान् प्राङेति"–इति ॥

अन्नाद्यकामस्य दक्षिणापवर्गत्वं विधत्ते—"यो ऽन्नाद्य मिच्छेत्, प्रयाजाहुतिभिर्दक्षिणा स इयादन्नादो वा एषो ऽन्नपतिर्यदग्निः" –इति। दक्षिणस्यां दिश्यवस्थितो 'यः' अग्निः, 'सोऽग्निः' 'अन्नादः' भक्षितस्यान्नस्योदराग्निना जीर्यमाणत्वात्। सस्येष्ववस्थाय व्रीह्यादिपाकहेतुत्वात्, स्थाल्यादिष्ववस्थायौदनपाकहेतुत्वादन्नपतित्वम्। अतोऽन्नाद्यकामस्य दक्षिणापवर्गत्वं युक्तम्। वेदनं प्रशंसति—"अन्नादोऽन्नपतिर्भवत्यश्नुते प्रजयान्नाद्यं य एवं विद्वान् दक्षिणैति"–इति॥

पशुकामस्य प्रत्यपवर्गत्वं विधत्ते—"यः पशूनिच्छेत्, प्रयाजाहुतिभिः प्रत्यङ् स इयात्; पशवो वा एते यदापः"–इति। प्रत्यग्दिश्यवस्थितस्य सोमस्य सम्बन्धिन्य आपः इति पूर्व मुक्तम्। तासां चापां पानद्वारेण, तृणोत्पादनद्वारेण वा पशूपकारित्वात् पशुत्वम्। अतः पशुकामस्य तथाविधं प्रत्यपवर्गत्वं युक्तम्। वेदनं प्रशंसति—"पशुमान् भवति य एवं विद्वान् प्रत्यङेति"–इति ॥

[illegible] सोमपाने [illegible] विधत्ते —"यः सोमपीथ मिच्छेत्, प्रयायाहुतिभिरुदङ् स इयादुत्तरा वै सोमो राजा"-इति। 'यः' सोमभक्षणेच्छुः, राजमानत्वेन 'राजा'; तस्योत्तरस्यां दिशि प्रभूतत्वात्तद्रूपत्वम्। अतः सोमपानद्वारा अस्योत्तरायणगत्वं युक्तम्। वेदनं प्रशंसति—"प्र सोमपीथ माप्नोति, य एवं विद्वानुदङेति"-इति ॥

स्वर्गकामस्याहवनीये प्रयाजहोमविधि मर्थवादेनोन्नयति—"स्वर्ग्यैवोर्ध्वा दिक्, सर्वासु दिक्षु राध्नोति"-इति। येयं 'ऊर्ध्वा दिक्' स्वर्गाय हितैव; तस्मात् स्वर्गकामः ऊर्ध्वां दिशं भावयन्, आहवनीय-मध्ये प्रयाजान् यजेतेत्यर्थः। यथा स्वर्गं प्राप्नोति, तथा सर्वासु दिक्षु समृद्धश्च भवति। अतः समृद्धिकामो मध्ये यजेतेत्यवगन्तव्यम्। वेदनं प्रशंसति—"सम्यञ्चो वा इमे लोकाः, सम्यञ्चोऽस्मा इमे लोकाः, श्रियै दीद्यति, य एवं वेद"-इति। 'इमे' भूरादयस्त्रयो 'लोकाः', ते 'सम्यञ्चः' स्वस्वोचितभोगप्रदाः; अतो 'यः' 'एवम्' आहवनीयमध्ये होमं 'वेद', 'अस्मै' यजमानाय भूरादयः 'इमे लोकाः', 'सम्यञ्चः' स्वस्वोचितभोगप्रदाः सन्तः 'श्रियै' धनधन्यादि-सम्पदे 'दीद्यति' प्रकाशते ॥

इत्थं काम्यान् प्रयाजहोमप्रकारान् विधाय पूर्वोक्त-प्रायणीय-देवताः क्रमेण स्तोतुं प्रथमदेवतां प्रशंसति—"पथ्यां यजति; यत्पथ्यां यजति, वाच मेव तद्यज्ञमुखे सम्भरति"-इति। पथ्याभिधां देवतां यजतीति पूर्वोक्तविधिरत्र स्मारितः; प्रयाजविधिभिर्व्यवहितत्वात् स्तोतव्यस्य स्मारण मपेक्षितम्; स्मारितस्य स्तुतावन्वेतुं पुनरनुवादः। पथ्यायागेन 'यज्ञमुखे' सोमयागप्रारम्भे 'वाच मेव' मन्त्ररूपां 'सम्भरति' सम्पादयति। यतो यज्ञानुष्ठानरूपाय मार्गाय

ष्ठिता पथ्या मन्त्ररूपा वाक् तादृशी ; अतः पथ्यायाग एव वाक्सम्पादनम् ॥

अग्न्यादिकाश्चतस्रो देवताः प्रशंसति—"प्राणापानावग्नीषोमौ, प्रसवाय सविता, प्रतिष्ठित्या अदितिः"-इति । मुखनासिकाभ्यो वहिः सञ्चरन्नुच्छ्वासरूपो वायुः प्राणः । स औष्ण्यं शरीरे जनयति । ततोऽग्नेः प्राणरूपत्वं प्रतिनिवृत्त्य मुखनासिकाभ्यामन्तः सञ्चरन्वायुरपानः । स च शरीरे शैत्यं जनयतीति निःश्वासस्य सोमरूपत्वम् । 'सविता' देवः 'प्रसवाय' यज्ञकर्म्मणि प्रेरणायोपयुज्यते । 'अदितिः' भूमिः 'प्रतिष्ठित्यै' स्थिरावस्थानायोपयुज्यते ।

पुनरपि प्रकारान्तरेण प्रथमां देवतां स्तौति—"पथ्या मेव यजति; यत्पथ्या मेव यजति, वाचैव तद्यज्ञं पन्था मपि नयति"-इति । अत्रैवकारः पूर्वोक्तस्तुतिविशेषः । तस्यायमर्थः,—देवतान्तरं परित्यज्य प्रथमतः 'पथ्या मेव यजति', ईदृशं यजनं 'यद्' अस्ति, 'तत्' तेन यजनेन मन्त्ररूपया 'वाचैव' क्रियमाणं 'यज्ञं' वैकल्यपरिहारेण समीचिनं अनुष्ठानमार्गं प्रापयति ; देवतान्तरस्य प्रथमयागे तु नैतत्सम्भवतीति ।

द्वितीयाद्यां देवतां प्रशंसति—"चक्षुषी एवाग्नीषोमौ प्रसवाय सविता, प्रतिष्ठित्या अदितिः"-इति । अग्नीषोमयोस्तेजस्वित्वाद् दिग्विशेषज्ञानहेतुत्वाच्चक्षुरिन्द्रियरूपत्वम् । चतुर्थपञ्चमदेवतयोस्तु पूर्वोक्तस्तुतिरेव समीचीनेत्यभिप्रेत्य न पुनस्तत्पाठः । अग्नीषोमयोश्चक्षुःस्वरूपत्वे कोऽतिशयः ? इत्याशङ्क्याह—"चक्षुषा वै देवा यज्ञं प्राजानंश्चक्षुषा वा एतत् प्रज्ञायते यदप्रज्ञेयं तस्मादपि मुग्धश्चरित्वा यदैवानुष्ठ्या चक्षुषा प्रजानात्यथ प्रजानाति"-इति । 'देवाः' पुरा यज्ञपुरुषे उत्क्रान्ते सत्यन्विष्य 'चक्षुषा' एव प्रज्ञात-

[illegible] वस्तु [illegible] एव प्रज्ञायते । 'तस्मात्'-इत्यादिना तदेवोदाहरति । तस्मात् दुर्ज्ञेय मपि चक्षुषा ज्ञातुं शक्यम्, तस्मादेव कारणात् लोके 'मुग्धा' दिङ्मोहं प्राप्तः पुरुषो वनेषु चक्षुषा 'चरित्वा' 'यदैव' यस्मिन्नेव काले 'अनुष्ठ्या' * केनापि प्रयत्नविशेषेण पर्वतारोहणादिरूपेण सूर्योदयादिरूपं दिग्विशेषलिङ्गं 'चक्षुषा प्रजानाति', 'अथ' तदानी मेव ग्रामादिमार्गं 'प्रजानाति' । तस्माच्चक्षुःस्वरूपाभ्या मग्नीषोमाभ्यां दिग्विशेषज्ञानं युक्तम् ।

अथादितेः प्रतिष्ठाहेतुत्वं प्रपञ्चयति—"यद्वै तद्देवा यज्ञं प्राजानन्नस्यां वाव तत्प्राजानन्नस्यां समभरन्नस्यै वै यज्ञस्तायतेऽस्यै क्रियतेऽस्यै सम्भ्रियत इयं ह्यदितिस्तदुत्तमा मदितिं यजति, यदुत्तमा मदितिं यजति, यज्ञस्य प्रज्ञात्यै स्वर्गस्य लोकस्यानुख्यात्यै" इति । पूर्वत्र (७२ पृ०) "चक्षुषा वै देवा यज्ञं प्राजानन्"-इति यदुक्तम्, 'तत्' प्रज्ञानं 'यद्वै' यस्मिन्नेव काले सम्पन्नम्, 'तत्' तस्मिन् काले 'अस्यां वाव प्राजानन्' भूमावेव यज्ञपुरुषं प्रज्ञातवन्तः । ततोऽस्यां भूमौ 'समभरन्' यज्ञसाधनानि सम्पादितवन्तः । 'अस्यै वै' अस्या मेव भूमौ 'यज्ञः' 'तायते' विस्तीर्यते । न केवलं यज्ञस्यैव भूमिराधारः, किन्तु लौकिकं कृष्यादिक मस्यां 'क्रियते', तत्साधनं सस्यमस्यां सम्पद्यते । न च भूमेः प्राधान्ये सति अदितेः किं आयात मिति वाच्यम्; 'हि'

---

* शतपथव्याख्यायाम् 'अनुष्ठ्या – अनुष्ठानेन'–इत्याह हरिस्वामी (१. ४. ५. १०; पृ. १. ९.), सायणेन तूक्तं तथापि 'अनुष्ठ्या = अनुष्ठानेन'–इति (२. ९. २. १२.)। ऋग्वेदे तु अनुष्ठी-अनुष्ठु-अनुष्ठा-अनुष्ठान-शब्दाः समानार्थाः प्रतीयन्ते । [illegible] [illegible], अनुष्ठु-शब्दस्यानुष्ठुवीति ([illegible]) च ।

यस्मात् 'इयम्' भूमिः 'अदितिः', 'तत्' तस्मात् 'अदितिम्' 'उत्तमां' परमदेवतां 'यजति'। तादृशं यजनं यदस्ति, तत्, क्रियमाणस्य 'यज्ञस्य' अदितिद्वारा देवेषु प्रस्थानाय सम्पद्यते। तच्च देवप्रस्थानं यजमानस्य स्वर्गलोकावगमाय भवति ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां द्वितीयाध्याये
द्वितीयः खण्डः ॥ २ (८) ॥

॥ अथ तृतीयः खण्डः ॥

देवविशः कल्पयितव्या इत्याहुस्ताः कल्पमाना अनु मनुष्यविशः कल्पन्त इति सर्वा विशः कल्पन्ते कल्पते यज्ञोऽपि तस्यै जनतायै कल्पते यत्रैवं विद्वान् होता भवति स्वस्ति नः पथ्यासु धन्वस्वित्यन्वाह स्वस्त्यप्सु वृजने स्वर्वतीति स्वस्ति नः पुत्रकृथेषु योनिषु स्वस्ति राये मरुतो दधातनेति मरुतो वै देवानां विशस्ता एवैतद्यज्ञमुखेऽचीकॢपत् सर्वैश्छन्दोभिर्यजेदित्याहुः सर्वैर्वै छन्दोभिरिष्ट्वा देवाः स्वर्गं लोकमजयंस्तथैवैतद्यजमानः सर्वैश्छन्दोभिरिष्ट्वा स्वर्गं लोकं जयति स्वस्ति नः पथ्यासु धन्वसु स्वस्तिरिद्धि प्रप

श्रेष्ठेति पथ्यायाः स्वस्तेस्त्रिष्टुभावग्ने नय सुपथा राये अस्मानादेवाना मपि पन्था मगन्मेत्यग्नेस्त्रिष्टुभौ त्वं सोम प्रचिकितो मनीषा या ते धामानि दिवि या पृथिव्या मिति सोमस्य त्रिष्टुभावा विश्वदेवं सत्पतिं य इमा विश्वा जातानीति सवितुर्गायत्र्यौ सुत्रामाणं पृथिवीं द्या मनेहसं मही मू षु मातरं सुव्रताना मित्यदितेर्जगत्यावेतानि वाव सर्वाणि छन्दांसि गायत्रं त्रैष्टुभं जागत मन्वन्यान्येतानि हि यज्ञे प्रतमा मिव क्रियन्त एतैर्ह वा अस्य छन्दोभिर्यजतः सर्वैश्छन्दोभिरिष्टं भवति य एवं वेद ॥ ३ (९) ॥

प्रायणीयेष्टौ काम्यान् प्रयाजप्रकारान्विधाय देवताश्च प्रोच्य तासां देवतानां सम्बन्धिन्यौ याज्यानुवाक्ये क्रमेणाभिधास्यन् प्रस्तौति—“देवविशः कल्पयितव्या इत्याहुस्ताः कल्पमाना अनु मनुष्यविशः कल्पन्त इति सर्वा विशः कल्पन्ते, कल्पते यज्ञोऽपि”-इति। विश इत्ययं शब्दः प्रजामात्रवाची, वैश्यजातिविशेषवाची वा ; सन्ति हि देवेष्वपि जातिविशेषाः। अग्निर्बृहस्पतिश्च देवेषु ब्राह्मणौ ; “अग्ने महाँ२ असि ब्राह्मण भारत (तै० ब्रा० ३.५.३. *)”, “ब्रह्म वै देवानां बृहस्पतिः”-इति (तै० सं० २.

---

* एतन्मन्त्रस्य तैत्तिरीये ब्राह्मणे, वाजसनेयिब्राह्मणे च व्याख्यानं द्रष्टव्यम् (तै० सं० २. ५. ९. १, तथा शत० ब्रा० १. ४. २. २)।

२. ८. १.)"-इति श्रुतिः *। क्षत्रियादिजातयस्तु सृष्टिप्रकरणे वाजसनेयिभिः स्पष्ट मेवाम्नाताः—"तच्छ्रेयो रूप मत्यसृजत क्षत्रं यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति ०—० स विश मसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वे देवा मरुत इति ०—० स शौद्रं वर्ण मसृजत पूषणम्"-इति (शत० ब्रा० १४. ४. २. २३—२५. †)। एवम् "आदित्यो वै दैवं क्षत्रम्"-इत्यादिक मुदाहार्यम् ‡। एवं सति देवेषु विशो वैश्यजातिरूपाः प्रजा मरुदादयो याः सन्ति, ता अस्मिन् यागे 'कल्पयितव्याः' सम्पादयितव्याः, 'इति' एवम् ब्रह्मवादिनः 'आहुः'। 'कल्पमानाः' सम्पन्नाः 'ता देवविशः' 'अनु'सृत्य 'मनुष्यविशः' अपि तदनुग्रहात्सम्पद्यन्ते 'इति' एवं दैव्यो मानुषश्च 'सर्वा विशः' यजमानस्य सम्पद्यन्ते। तासु सम्पन्नासु द्रव्यलाभात् 'यज्ञोऽपि'

---

* "ब्रह्म हि ब्राह्मणः" शत० ब्रा० ५. १. १. ११ ; १३. १. ५. ३।

† तदाद्यन्तपाठस्त्वेवम्—"ब्रह्म वा इदमग्र आसीत् एक मेव तदेकꣳ सन्न व्यभवत् तच्छ्रेयोरूप०—० रीशान इति तस्मात् क्षत्रात् परं नास्ति। तस्माद् ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये क्षत्र एव तद्यशो दधाति। सैषा क्षत्रस्य योनिर्यद् ब्रह्म। तस्माद् यद्यपि राजा परमतां गच्छति ब्रह्मैवान्तत उपनिश्रयति स्वां योनिम्। य उ एनꣳ हिनस्ति स्वाꣳ स योनिमृच्छति। स पापीयान् भवति। यथा श्रेयाꣳसꣳ हिंसित्वा। स नैव व्यभवत्। स विश०—० मरुत इति। स नैव व्यभवत्। स शौद्र०—० पूषणम्। इयं वै पूषा। इयꣳ हीदꣳ सर्वं पुष्यति यदिदं किञ्च। स नैव व्यभवत्। तच्छ्रेयोरूप मत्यसृजत धर्मम्। तदेतत् क्षत्रस्य क्षत्रं यद्धर्मः। तस्माद्धर्मात् परं नास्ति। अथो अबलीयान् बलीयाꣳस माशꣳसते धर्मेण। यथा राज्ञा। एवं यो वै स धर्मः सत्यं वै तत्। तस्मात् सत्यं वदन्त माहुर्धर्मं वदतीति, धर्मं वा वदन्तꣳ सत्यं वदतीति। एतद्ध्येवैतदुभयं भवति। तदेतद् ब्रह्म क्षत्रं विट् शूद्रः"-इति शत० ब्रा० १४.४.२.२३—२७=बृ० उप० १.४.११—१५।

‡ उपरिष्टादिहैव ७. ४. २।

'कल्पते' अस्य योगक्षेमौ भवति । अत्रैवं प्रशंसति—"कल्पतेऽस्मै जनतायै कल्पते य एवं विद्वान् होता भवति"-इति । पूर्ववत् (६७ पृ०) व्याख्येयम् ।

प्रथमं देवताया: पुरोऽनुवाक्या विधत्ते—"स्वस्ति नः पथ्यासु धन्वस्वित्यन्वाह"-इति । स एष प्रथमः पादः अस्याया ऋचः प्रतीकपठनार्थः * । अस्या ऋचि देवविशां वाचकं मरुच्छब्दं दर्शयितु मवशिष्टं पादत्रयं पठति—"स्वस्त्यप्सु वृजने स्वर्वति, स्वस्ति नः पुत्रकृथेषु योनिषु, स्वस्ति राये मरुतो दधातनेति" -इति । 'इति' शब्दो मन्त्रसमाप्त्यर्थः । मन्त्रस्यायमर्थः—हे 'मरुतः' ! 'नः' अस्माकं 'धन्वसु पथ्यासु' मरुदेशरूपेषु मार्गेषु 'स्वस्ति दधातन' जलप्रदानेन क्षेमं कुरुत । किञ्च सत्स्वपि 'अप्सु' 'वृजने' वर्जिते जनशून्ये 'स्वर्वति' स्वर्गयुक्ते मार्गे 'स्वस्ति' दधातन । तथा 'पुत्रकृथेषु' पुत्रोत्पत्तिकरणेषु 'योनिषु' स्थानेषु 'नः' अस्माकं 'स्वस्ति' दधातन । तथा 'राये' धनाय 'स्वस्ति' अस्तु (सं० १०.६३. १५.) । अस्या ऋचि मरुच्छब्दः, अथ मेतावतैव विशां कथन मित्याह—"मरुतो वै देवानां विशस्ता एवैतद्यज्ञमुखेऽचीकॢपत् सर्वैश्छन्दोभिर्यजेदित्याहुः ; सर्वैर्वै छन्दोभिरिष्ट्वा देवाः स्वर्गं लोक मजयंस्तथैवैतद्यजमानः("-इति । 'एतत्' एतेन मरुच्छन्दोपेत-मन्त्रपाठेन 'यज्ञमुखे' यज्ञप्रारम्भरूपे कर्मणि 'ता देवानां विशः' 'अचीकॢपत्' कल्पितवान् भवति । छन्दोबाहुल्य मभिधाय प्रशंसति—")सर्वैश्छन्दोभिरिष्ट्वा स्वर्गं लोकं जयति"-इति । स्पष्टोऽर्थः † ॥

---

* तथाच सूत्रम्—'ऋचं पादग्रहणे'-इति आश्व० श्रौ० १. १. १७ ।

† सप्तमीविभक्त्यन्तो ग्रन्थः ख-ग-पुस्तकयोर्नास्ति ।

मन्त्रविशेषान्, तत्र छन्दांसि च, पथ्यादीनां देवानां क्रमेणोदाहरति—"स्वस्ति नः पथ्यासु धन्वसु, स्वस्तिरिद्धि प्रपथे श्रेष्ठेति पथ्यायाः स्वस्तेस्त्रिष्टुभावग्ने नय सुपथा राये अस्मानादेवाना मपि पन्था मगन्मेत्यग्नेस्त्रिष्टुभौ; त्वं सोम प्रचिकितो मनीषा, या ते धामानि दिवि या पृथिव्या मिति सोमस्य त्रिष्टुभावा विश्वदेवं सत्पतिं, य इमा विश्वा जातानीति सवितुर्गायत्र्यौ; सुत्रामाणं पृथिवीं द्या मनेहसं, मही मू षु मातरं सुव्रताना मित्यदितेर्जगत्यौ"–इति। 'स्वस्ति नः'–इत्यनुवाक्या (सं० १०. ६३. १५.); 'स्वस्तिरिद्धि'–इति याज्या (सं० १०. ६३. १६.)। 'अग्ने नय'–इत्यनुवाक्या (सं० १. १४९. १.); 'आ देवानाम्'–इति याज्या (सं० १०. २. ३.) 'त्वं सोम'–इत्यनुवाक्या (सं० १. ९१. १.); 'या ते धामानि'–इति याज्या (सं० १. ९१. ४.)। 'आ विश्वदेवम्'–इत्यनुवाक्या (सं० ५. ८२. ७.); 'य इमा'–इति याज्या (सं० ५. ८२. ९.)। 'सुत्रामाणम्'–इत्यनुवाक्या (सं० १०, ६३, १०.); 'मही मू षु'–इति याज्या (वा० सं० २१. ५.) *। नन्वत्र त्रीण्येव छन्दांस्युक्तानि, न तु सर्वाणीत्याशङ्क्याह—"एतानि वाव सर्वाणि छन्दांसि गायत्रं त्रैष्टुभं जागत मन्वन्यान्येतानि हि यज्ञे प्रतमा मिव क्रियन्ते"–इति। मुख्यानि 'सर्वाणि छन्दांसि' त्रीण्येव, इतराणि तु मुख्यान्यनुसृत्य वर्त्तन्ते। मुख्यत्व मेव 'एतानि' इत्यादिना स्पष्टीक्रियते। 'हि' यस्मात्कारणात् 'एतानि' त्रीणि 'यज्ञे' 'प्रतमाम् इव क्रियन्ते' अत्यन्तप्राचुर्येणैव प्रयुज्यन्ते; ततो मुख्य-

---

* आश्व० श्रौ० ४. ३. २। कात्या० श्रौ० १६. ७. १६।

त्वम् । एतद्वेदनं प्रशंसति—"एतैर्वै [illegible] सर्वैश्छन्दोभिरिष्टं भवति य एवं वेद"—इति । स्पष्टोऽर्थः ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां द्वितीयाध्याये
तृतीयः खण्डः ॥ ३ (८) ॥

॥ अथ चतुर्थः खण्डः ॥

ता वा एताः प्रवत्यो नेतृमत्यः पथिमत्यः स्वस्तिमत्य एतस्य हविषो याज्यानुवाक्या एताभिर्वा इष्ट्वा देवाः स्वर्गं लोकमजयंस्तथैवैतद्यजमान एताभिरिष्ट्वा स्वर्गं लोकं जयति तासु पदमस्ति स्वस्ति राये मरुतो दधातनेति मरुतो ह वै देवविशोऽन्तरिक्षभाजनास्तेभ्यो ह योनिवेद्यः स्वर्गं लोकमेतीश्वरा हैनं नि वा रोद्धोर्वि वा मथितोः स यदाह स्वस्ति राये मरुतो दधातनेति तं मरुद्भ्यो देवविड्भ्यो यजमानं निवेदयति 'न ह वा एनं मरुतो देवविशः स्वर्गं लोकं यन्तं निरुन्धते न विमथ्नते स्वस्ति हैनमत्यर्जन्ति स्वर्गं लोकमभि

य एवं वेद विराजावेतस्य हविषः स्विष्टकृतः संयाज्ये स्यातां ये त्रयस्त्रिंशदक्षरे सेदग्निरग्नीं(ँ)* रत्यस्त्वन्यान्सेदग्निर्यो वनुष्यतो निपातीत्येते विराड्भ्यां वा इष्ट्वा देवाः स्वर्गं लोकमजयंस्तथैवैतद्यजमानो विराड्भ्यामिष्ट्वा स्वर्गं लोकं जयति ते त्रयस्त्रिंशदक्षरे भवतस्त्रयस्त्रिंशद्वै देवा अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च तत्प्रथमे यज्ञमुखे देवता अक्षरभाजः करोत्यक्षरेणाक्षरेणैव तद्देवतां प्रीणाति देवपात्रेणैव तद्देवतास्तर्पयति ॥४ (१०)॥

पञ्चानां देवानां क्रमेण याज्यानुवाक्ये उदाहृते; अथ संयाज्ये वक्ष्ये । तत्रादौ तावदुदाहृता याज्यानुवाक्याः प्रशंसति— “ता वा एताः प्रवत्यो नेतृमत्यः पथिमत्यः स्वस्तिमत्य एतस्य हविषो याज्यानुवाक्या, एताभिर्वा इष्ट्वा देवाः स्वर्गं लोकमजयंस्तथैवैतद्यजमान एताभिरिष्ट्वा स्वर्गं लोकं जयति”–इति । ‘स्वस्ति नः पथ्यासु धन्वसु’-इत्याद्याः, ‘महो मू षु मातरम्’-इत्यन्ताः, दशर्चो याः पूर्वमुदाहृताः (७८ पृ०), ‘ताः’ एव ‘एताः’ प्रशब्द-नेतृशब्द-पथिशब्द स्वस्तिशब्दवत्यः । तत्र । ‘प्र’शब्दः—‘स्वस्तिरिद्धि प्रपथे’, ‘त्वं सोम प्रचिकितो’–इत्यत्र श्रूयते । ‘नेतृ’शब्दः— ‘अग्ने नय’-इत्यत्र श्रूयते ; नयति धातोः कर्तुस्तथावगमात् ।

---

* ‘रग्नीँ’ क, ङ ; ‘रग्नीँ’ घ । वस्तुत संहितायां ‘दीर्घादटि (पा० ८, ३, ९.)’- इति नत्वे सत्वे ‘आतोऽटि नित्यम् (पा० ८, ३, ३.)’-इत्यीकारः आनुनासिक इतीव ।

'पथि' शब्दः—'अग्ने नय सुपथा', 'आ देवानामपि पन्थाम्'-इत्यत्र श्रूयते। 'स्वस्ति' शब्दः—'स्वस्ति नः पथ्यासु', 'स्वस्तिरिद्धि'-इत्यत्र श्रूयते। तथा सति छत्रिन्यायेन सर्वा अप्येता ऋचः प्रादिभिः शब्दैर्युक्ता इति वक्तुं शक्याः। एवं सत्युक्तार्थद्योतकैः एतैः शब्दैर्युक्ताः, एता ऋचः प्रायणीयेष्टिगतस्य 'हविषो याज्यानुवाक्याः' प्रशस्ता भवन्ति। 'एताभिरिष्ट्वा'-इत्यादेरर्थो विस्पष्टः॥

प्रथमायाम् ऋचि चतुर्थं पादमादाय तत्स्थस्य मरुच्छब्दस्य अन्वयव्यतिरेकाभ्यां तात्पर्यं दर्शयति—"तासु पद मस्ति, स्वस्ति राये मरुतो दधातनेति मरुतो ह वै देवविशोऽन्तरिक्षभाजनास्तेभ्यो ह योऽनिवेद्य स्वर्गं लोकमेतीश्वरा हैनं नि वा रोद्धोर्वि वा मथितोः; स यदाह स्वस्ति राये मरुतो दधातनेति तं मरुद्भ्यो देवविड्भ्यो यजमानं निवेदयति; न ह वा एनं मरुतो देवविशः स्वर्गं लोकं यन्तं निरुन्धते न विमथ्नते"—इति। 'तासु' पूर्वोक्तासु ऋक्षु 'पदं' पादः, तस्मिन् पादे प्रोक्ताः 'मरुतः' देवानां वैश्याः, अन्तरिक्षे निवसन्ति *, 'एनं' यजमानम् 'नि वा रोद्धोः' † स्वर्गगमनं निरोद्धुं वा, 'वि वा मथितोः' ‡ विशेषेण मथितुमालोडयितुं विनाशयितुं वा, ते 'मरुतः' ईश्वराः §, समर्थाः। सोऽयं व्यतिरेकः; बाधस्यात्रोपन्यस्तत्वात्। 'सः यदाह'-इत्यादिरन्वयः, उक्तबाधसमाधानस्य; तत्रोपन्यासात्। यदि होता 'स्वस्ति राये'-इत्यादि पादं पठेत्, तदानीं 'मरुद्भ्यो यजमानं निवेदयति'। ततो 'मरुतः स्वर्गं लोकं गच्छन्तं' यजमानं 'न' एव

---

* 'अथातो मध्यस्थाना देवगणाः। 'तेषां मरुतः प्रथमागामिनो भवन्ति'-इत्यादि निरु० ११. २. १, २। ते च रुद्रपुत्राः ऋ० सं० १. ८. ६. १ ; ४. ३, २१. १. सा० भा०।

†, ‡, § 'ईश्वरे तोसुन्-कसुनौ' पा० ३. ४. १३।

ग्निरुक्ती', नापि 'विष्णूक्ती' विनाशयन्ति। वेदनं प्रशंसति— "स्वस्ति हैन मत्यर्जन्ति स्वर्गं लोक मभि य एवं वेद"-इति। 'स्वर्गम्' 'अभि'लक्ष्य जिगमिषुम् 'एनं' वेदितारं 'स्वस्ति' क्षेमो यथा भवति तथा मरुतो अतिशयेन प्रापयन्ति॥

इत्थं मुख्ये प्रधानहविषो याज्यानुवाक्ये प्रशस्य संयाज्ये विधत्ते—"विराजावेतस्य हविषः स्विष्टकृतः संयाज्ये स्यातां ये त्रयस्त्रिंशदक्षरे"-इति। विराट्छन्दस्कानां बहूनां विद्यमानत्वात् त्रयस्त्रिंशदक्षरशब्देन ते ऋचौ विशेष्येते। तयोर्ऋचोः प्रथमपादावुदाहरति— "सेदग्निरग्नीँरत्यस्त्वन्यान्, सेदग्निर्यो वनुष्यतो निपातीत्येते"-इति*। विराजौ प्रशंसति—"विराड्भ्यां वा इष्ट्वा देवाः स्वर्गं लोक मजयंस्तथैवैतद्यजमानो विराड्भ्या मिष्ट्वा स्वर्गं लोकं जयति"-इति। 'तथैवैतत्'-इति दार्ष्टान्तिकप्रतिज्ञा; 'यजमानः'-इत्यादिकं तद्विवरणम्। ऋचोः त्रयस्त्रिंशता अक्षरसंख्यां प्रशंसति—"ते त्रयस्त्रिंशदक्षरे भवतस्त्रयस्त्रिंशद्वै देवा अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च; तत्प्रथमे यज्ञमुखे देवता अक्षरभाजः करोत्यक्षरेणाक्षरेणैव तद्देवतां प्रीणाति देवपात्रेणैव तद्देवतास्तर्पयति"-इति। वषट्कारो देवताविशेषः। 'तत्' तथा सति, देवताना मक्षराणां च संख्यासाम्ये सति, यज्ञमुखं यज्ञोपक्रमः; स च सुत्यादिने प्रातरनुवाकादिना भविष्यति, तदपेक्षया प्रायणीयेष्टिः प्रथमं यज्ञमुखम्; तस्मिन् 'यज्ञमुखे' वस्वादिकाः सर्वाः 'देवताः' संख्यासाम्यात् 'अक्षरभाजः करोति'। 'तत्' तेन देवताना मक्षर-

---

* ऋ० सं० ७. १. १४, १५। आश्व० श्रौ० ४. २, १।

[illegible] इयता [illegible] देवा[illegible] फल मेवैक मभवत्; तेनैव पापेन 'सत्' तदानीं देवाः 'सर्व- वति' प्रोक्तातीत्यस्यैव विवरण मेतत् ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां द्वितीयाध्याये
चतुर्थः खण्डः ॥ ४ (१०) ॥

॥ अथ पञ्चमः खण्डः ॥

प्रयाजवदननुयाजं कर्तव्यम्प्रायणीय मित्याहुर्हीन मिव वा एतदीङ्खित मिव यत्प्रायणीयस्यानुयाजा इति तत्तन्नादृत्यम् प्रयाजवदेवानुयाजवत्कर्तव्यम् प्राणा वै प्रयाजाः प्रजानुयाजा यत्प्रयाजानन्तरियात्प्राणांस्तद्यजमानस्यान्तरियाद्यदनुयाजानन्तरियात्प्रजान्तद्यजमानस्यान्तरियात् तस्मात्प्रयाजवदेवानुयाजवत्कर्तव्यम्पत्नीर्न संयाजयेत् संस्थितयजुर्न जुहुयात्तावतैव यज्ञोऽसंस्थितः प्रायणीयस्य निष्कासं निदध्यात्त मुदयनीयेनाभिनिर्वपेद्यज्ञस्य सन्तत्यै यज्ञस्याव्यवच्छेदायाथो खलु यस्या मेव स्थाल्यां प्रायणीयं निर्व-

पेत्तस्मा मुदयनीयं निर्वपेत्तावतैव यज्ञः सन्तातो ऽव्यवच्छिन्नो भवत्यमुष्मिन्वा एतेन लोके राध्नुवन्ति नास्मिन्नित्याहुर्यत्प्रायणीयमिति प्रायणीयमिति निर्वपन्ति प्रायणीयमिति चरन्ति प्रयन्त्येवास्माल्लोकाद्यजमाना इत्यविद्ययैव तदाहुर्व्यतिषजेद्याज्यानुवाक्या याः प्रायणीयस्य पुरोनुवाक्यास्ता उदयनीयस्य याज्याः कुर्याद्या उदयनीयस्य पुरोनुवाक्यास्ताः प्रायणीयस्य याज्याः कुर्यात् तद् व्यतिषजत्युभयोर्लोकयोरृद्ध्या उभयोर्लोकयोः प्रतिष्ठित्या उभयोर्लोकयोरृध्नोत्युभयोर्लोकयोः प्रतितिष्ठति प्रतितिष्ठति य एवं वेदादित्यश्चरुः प्रायणीयो भवत्यादित्य उदयनीयो यज्ञस्य धृत्यै यज्ञस्य वर्सनह्यै यज्ञस्याप्रस्रंसाय तद्यथैवाद इति ह स्माह तेजन्या उभयतोऽन्तयोरप्रस्रंसाय वर्सौ नह्यत्येवमेवैतद्यज्ञस्योभयतोऽन्तयोरप्रस्रंसाय वर्सौ नह्यति यदादित्यश्चरुः प्रायणीयो भवत्यादित्य उदयनी पथ्ययैवेतः स्वस्त्या * प्रयन्ति पथ्यां स्वस्तिमभ्युद्यन्ति स्वस्त्येवेतः प्रयन्ति स्वस्त्युद्यन्ति स्वस्त्युद्यन्ति ॥ ५ (११) ॥

इत्यैतरेयब्राह्मणे प्रथमपञ्चिकायां द्वितीयोऽध्यायः ॥२॥

---

* 'पथ्ययैवेत स्वस्त्या'—इति निर्विसर्गपाठः ख-ग पुस्तकयोः।

णीयाख्यं विधाय प्रयाजानुयाजविषये किञ्चिद् विशेषविधानं न शाखान्तरीयमत मुपन्यस्यति— "प्र[illegible]नुय[illegible]म् प्रायणीय मित्याहुर्हीन मिव वा एतदी[illegible]त मिव यत्प्रायणीयस्यानुयाजा इति"-इति। प्रायणीयेष्टेर्दर्श[illegible]मास[illegible]त-ताचोदकेन प्रयाजा अनुयाजाश्च प्राप्ताः। "समि[illegible] आज्यस्य" इत्याद्या मन्त्रसाध्याः पञ्च प्रयाजाः (तै० ब्रा० [illegible] १—५.)। 'देवं बर्हिः"-इत्याद्या मन्त्रसाध्यास्त्रयोऽनु[illegible] [illegible] ब्रा० २. ५. [illegible]. १—३.)। प्रायणीयाख्यं कर्म्म प्रयाजो[illegible] [illegible]वर्जितं * कर्त्तव्य मिति शाखान्तरीया आहुः†। तदे[illegible] [illegible]‡। 'प्रायणीयस्यानुयाजाः'-इति यदस्ति, तत् 'एतत्' 'हीन मिव वै'; तस्यैव व्याख्यानम् 'ईङ्खित मिव'-इति, विलम्बित मित्यर्थः। [illegible]नुयाजेष्विज्यमानेषु कर्म्मणि विलम्बो भवेत्; तस्मात् न यष्टव्या अनुयाजाः। 'इति'-शब्दः पूर्वपक्षसमाप्त्यर्थः। यथा प्रायणीये कर्म्मणि अनुयाजा वर्ज्यन्ते, तथैवोदयनीये कर्म्मणि प्रयाजा [illegible]नीया इति पूर्वपक्षाभिप्रायः। त मेतं तैत्तिरीया विस्पष्ट माम[illegible]न्ति— "प्रयाजवदननुयाजं प्रायणीयं कार्य मनुय[illegible]जवदप्र[illegible] [illegible]दय[illegible]यम्"-इति (तै० सं० ६. १. ५. ३.)। स्वोक्तं पूर्व[illegible] निर[illegible]ष्टे—"तत्तन्नादृत्यम्"-इति। (तस्मिन् प्रायणीये कर्म्म[illegible]

---

* अनुयाज मिति [illegible]पाठस्तैत्तिरीयाणाम्, बह्वृचां तु अनुयाज [illegible] [illegible]; यथाह तैत्तिरीयं सर्वं भाष्यकारोऽपि (८६ पृ०)। पर [illegible] सर्वेष्वेव[illegible] [illegible]ष्वः, तत्र लिपिकारप्रमादप्रवाह एव हेतुर्गम्यते।

† तथाहि – शत० ब्रा० "तदिडान्तं भवति, नानुयाजान् यजन्ति [illegible]दि-[illegible]र्भवति नानुयाजान् [illegible]न्ति"-इत्यादि (३. ४. १. २६.)। तथा कात्या० '[illegible]नुयाजप्रतिषेधाद्य[illegible] (७. ५. २४.)'-इति॥

‡ क, ख, ग।

तद्' यथा, अनुयाजवर्जनरूपम् 'च' आदरणीयम् । *) अत्रैव बाध मुपन्यस्यति—“प्रयाजवदेवानुयाजवत्कर्त्तव्यम् ; प्राणा वै प्रयाजाः प्रजानुयाजा यत्प्रयाजानन्तरियात्प्राणांस्तद्यजमानस्यान्तरियाद्यदनुयाजानन्तरियात्प्रजांस्तद्यजमानस्यान्तरियात्”-इति । प्रथमप्रश्नसामान्यात्प्रथमभावित्वाच्च 'प्रयाजाः' यजमानस्य प्राणरूपाः; पश्चाद्भावित्वाद् 'अनुयाजाः' पुत्रादिरूपाः; यदा प्रयाजा वर्ज्यन्ते, तदा यजमानसम्बन्धिनां प्राणानामन्तरयो विच्छेदः स्यात्; अनुयाजवर्जने पुत्रादिविच्छेदः। अयमेव पूर्वपक्षबाधस्तैत्तिरीयैराम्नातः—“तत्तथा न कार्यमात्मा वै प्रयाजाः प्रजानूयाजा यत्प्रयाजानन्तरियादात्मानमन्तरियाद्यदनुयाजानन्तरियात्प्रजामन्तरियात्”-इति (तै० सं० ६. १. ५. ४.) । यद्यपि प्रायणीये प्रयाजवर्जनमप्रसक्तम्, तथापि उदयनीये तैत्तिरीयोपन्यस्तं प्रयाजवर्जनमभिप्रेत्यायं बाधोपन्यासः । इत्थं पूर्वपक्षे बाधमुपन्यस्य चोदकैः प्राप्तस्योभयानुष्ठानस्य प्रतिप्रसवरूपं सिद्धान्तं विधत्ते—“तस्मात् प्रयाजवदेवानुयाजवत्कर्त्तव्यम्”-इति। यस्मादन्यतरत्यागे बाधस्तस्मादित्यर्थः। तैत्तिरीया अप्येतदामनन्ति—“प्रयाजवदेवानूयाजवत् प्रायणीयं कार्यम्; प्रयाजवदनूयाजवदुदयनीयम्”-इति (तै० सं० ६. १. ५. ५.) । अत्र सर्वत्रैतरेयपाठेऽनुयाज इति ह्रस्व उकारः; तैत्तिरीयपाठे दीर्घ इति विवेकः ॥

चोदकप्राप्तान् पत्नीसंयाजान् समिष्टयजुश्च निषेधति—“पत्नीः संयाजयेत्, संस्थितयजुर्न जुहुयात्”-इति † । ततः कि

---

* [illegible] एष पाठो नास्ति क-पुस्तके ।

† पत्न्यनुष्ठेयाश्चत्वारो यागाः पत्नीसंयाजा उच्यन्ते । ते च दधिमधव

येषाया माह—"तावतैव यज्ञो ऽसंस्थितः"—इति । तदानीं यज्ञस्य समाप्तत्वादुत्तरकालीनं सोमक्रयादिकं न प्रवर्त्तेत ; एतेषामनुष्ठानमात्रेण यज्ञोऽसमाप्तो भवति, ततः उत्तरानुष्ठानं निर्बाधं प्रवर्त्तते ॥

किञ्चिद्विशेषं विधत्ते—"प्रायणीयस्य निष्कासं निदध्यात्तमुदयनीयेनाभिनिर्वपेद्यज्ञस्य सन्तत्यै, यज्ञस्याव्यवच्छेदाय"—इति । भाण्डगतो लेपरूपो हविःशेषो निष्कासः । प्रायणीयकर्मसम्बन्धिनं निष्कासं कस्मिंश्चित् पात्रे स्थापयेत् । ततः सुत्या-

---

[illegible]प्भादिकं कृत्वा शालाद्वार्ये भवन्ति (कात्या० १०.८.१०.)। "ते वै पत्नीः संयाजयिष्यन्तः प्रतिपर[illegible]यन्ति०—० अथ पत्नीः संयाजयन्ति०—० तस्मात् पत्नीः संयाजयन्ति । चतस्रो देवता यजति०—० अथ सोमं यजति०—० अथ त्वष्टारं यजति०—० अथ देवानां पत्नीर्यजति० [illegible] गृहपतिं यजति०—० एव मेवैतत् पत्नीषु स्वगा करोति"—इति शत० ब्रा० ९. २. १—१५ । तैत्तिरीयकेऽपि—'सोमं यजति'—इत्यादि 'आशीरन पत्नीसंयाजाः'—इत्यन्तं द्रष्टव्यम् (तै० सं० २. ६. १०.)। तन्मन्त्रादिविधयस्तु तद्ब्राह्मणे ३. ५. १२. १३ । मीमांसायामृतीयाध्यायीयतृतीयपादे चैतन्मूलक मधिकरण मेक मारचितम् (जै० सू० ३. ३. २०—२२. अधि० १०.)।

"अथ समिष्टयजूंषि जुहोति०—० या वा एतेन यज्ञेन देवता ह्वयति, याभ्य एष यज्ञस्तायते, [illegible] वै तया: उमिष्टा भवन्ति, [illegible] सर्वाः समिष्टाः स्वयैतज्जुहोति, तस्मात् समिष्टयजूंषि नाम०—० तस्मात् समिष्ट[illegible] यथेति, यस्मात्"—इति शत० ब्रा० १. ९. २. २५—२७ । तथा हुतिप्रक्षेप [illegible] "समिष्टयजूं[illegible] २. १ । एता[illegible] । [illegible] क्रूरं, यद्विलिष्टं, [illegible] यदतिकरोति [illegible]"—इति तै० सं० ६. [illegible] इधानं च तत्पुरस्तादेव [illegible] (२. ६. १०.). [illegible] सा[illegible] —'देवा गातुविदः'—इत्ययं मन्त्रः (वा० सं० ८. २१.) समिष्टयजुरित्युच्यते । स च मन्त्र आध्वर्यवकाण्डे समाम्नातो व्याख्यातश्च—इति । तत्र आध्वर्यवे (तै० सं० १. १. ४४.) समिष्टयजुर्होमो निरूपितः । "नव समिष्टयजूंषि जुहोति"—इत्यादि शत० ब्रा० ४. ४. ४. १. द्रष्टव्यम् । "समिन्द्रेण"—इति (वा० सं० ८. १५.) नव समिष्टयजूंषि जुहोति प्रतिमन्त्रम्"—इति च कात्या० श्रौ० १०. ८. ११ ।

दिने * सोमयागस्यावसाने उदयनीयेष्टिगतेन हविषा सह तं 'निष्कासं' 'समभिनिर्वपेत्'। एवं सति प्रायणीयशेषस्यानुवर्त्तनात् सोमयागः सन्ततो भवति; न तु तस्य विच्छेदः प्राप्नोति। तैत्तिरीयाश्चामनन्ति—"प्रायणीयस्य निष्कास उदयनीय मभिनिर्वपति, सैव सा यज्ञस्य सन्ततिः"-इति (तै० सं० ६. १. ५. ५.)। प्रकारान्तर माह—"अथो खलु यस्या मेव स्थाल्यां प्रायणीयं निर्वपेत्तस्या मुदयनीयं निर्वपेत्तावतैव यज्ञः सन्ततो ऽव्यवच्छिन्नो भवति"-इति। नात्र निष्कासोऽपेक्षितः किन्तु स्थाल्यैकत्वमात्रेण यज्ञस्य सन्ततत्वादव्यवच्छेदराहित्यं सिध्यति। सान्तत्याव्यवच्छेदराहित्ययोरर्थत एकत्वेऽप्यन्वयव्यतिरेकरूपत्वेन पृथगुपन्यासः ॥

अथ प्रायणीयोदयनीययोरिष्ट्योर्याज्यानुवाक्याव्यत्यासं विधा प्रस्तौति—"अमुष्मिन्वा एतेन लोके राध्नुवन्ति नास्मिन्नित्याहुः प्रायणीय मिति; प्रायणीय मिति निर्वपन्ति, प्रायणीय मिति चरन्ति; प्रयन्त्येवास्माल्लोकाद्यजमाना इति"-इति। ब्रह्मवादिनः किञ्चिद् † दोषम् 'आहुः'—'प्रायणीयम्' इति एवंविधनामो[illegible] 'यत्' कार्यमस्ति, 'एतेन' कर्म्मणा, यजमानाः [illegible] एव समृद्धि प्राप्नुवन्ति; 'नास्मिन्' लोके। [illegible] ते से 'प्रायणीयम्' 'इति' एतत् नाम, मनसा [illegible] नाम्नो [illegible]पन्ति; च[illegible] प्रयन्त्येव [illegible] तथैव 'चरन्ति' [illegible]। तस्य च [illegible]— अनेन कर्म्मणा 'यजमानाः' अस्माल्लोकात् [illegible]; न त्वस्मिंल्लोके कञ्चित्कालं प्रतितिष्ठन्ति। तस्मात् प्रायणीय-

---

* सुत्याख्यक मित्येव चतुर्थाध्याये वक्ष्यति भाष्यकारः— 'यस्यां क्रियायां सोम अभिषूयते, सा सुत्या'-इति। तथा च सुत्यादिने इत्यस्य अभिषवक्रियादिवस इत्यर्थः।

† 'कञ्चिद्' ख, ग।

नाम [illegible] । [illegible] समाधेयं । अथ तद्दोषसमाधानं विधत्ते—“[illegible] कुर्व्यतिषजेद्याज्यानुवाक्याः”–इति । यज्ञानेनैव ब्रह्मवादिनः तत्र चन प्राहुः, न त्वत्र तदुक्तदोषोऽस्ति । तद्दोषानुदयाय ‘स्वस्ति नः पथ्यासु’-इत्यारभ्य ‘मही मू षु मातरम्’-इत्यन्तानां (७८ पृ०) याज्यानुवाक्यानां व्यतिषङ्गं कुर्यात् । तमेव व्यतिषङ्गं विस्पष्टयति—“याः प्रायणीयस्य पुरोनुवाक्यास्ता उदयनीयस्य याज्याः कुर्याद् ; या उदयनीयस्य पुरोनुवाक्यास्ताः प्रायणीयस्य याज्याः कुर्यात् ; तद् व्यतिषजत्युभयोर्लोकयोर्ऋद्ध्या उभयोर्लोकयोः प्रतिष्ठित्या उभयोर्लोकयोर्ऋध्नोत्युभयोर्लोकयोः प्रतितिष्ठति”–इति । ‘तत्’ तेन ‘याः प्रायणीयस्य’-इत्युक्तप्रकारेण व्यतिषङ्गः सम्पद्यते । स च लोकद्वये भोग्यवस्तुसमृद्ध्यै, स्थैर्येणावस्थानाय भवति ;—तथानुष्ठानेन यजमानो लोकद्वये समृद्धः प्रतिष्ठितश्च भवति । यथोक्तदोषसमाधाने तैत्तिरीया आमनन्ति—“याः प्रायणीयस्य याज्या यत्ता उदयनीयस्य याज्याः कुर्यात्, पराङमुं लोकमारोहेत् प्रमायुकः स्यात् ; याः प्रायणीयस्य पुरोनुवाक्यास्ता उदयनीयस्य याज्याः करोत्यस्मिन्नेव लोके प्रतितिष्ठति”–इति (सं० ६. १. ५. ५.) । व्यतिषङ्गवेदनं प्रशंसति—“प्रतितिष्ठति य एवं वेद”–इति ॥

योऽयं प्रथमखण्डे (६२ पृ०) प्रायणीयोदयनीययोरदितिनिर्दिष्टदेवताकश्चरुर्विहितः, तमिमं प्रशंसति—“आदित्यश्चरुः प्रायणीयो भवत्यादित्य उदयनीयो यज्ञस्य धृत्यै यज्ञस्य बर्सनध्यै यज्ञस्याप्रस्रंसाय”–इति । सोमयागस्यादौ प्रायणीयेष्टिः, अन्ते चोदनीयेष्टिः ; तयोरुभयोरदितिदेवताकः ‘चरुः’ ; सोऽयं तस्य ‘यज्ञस्य’ धारणाय ;

मत्स्याकारो ग्रन्थिविशेषः तस्य बन्धनम्, तत्सिद्ध्यर्थमुभयत्रादित्यचरुकरणम्; बन्धनस्थानीयेन चरुणा 'यज्ञस्य' धारणं सिध्यति। सति च धारणे यज्ञाङ्गं किञ्चिदपि स्रस्तं लुप्तं न भवति। ततो 'यज्ञस्याप्रस्रंसाय' उभयतश्चरुः। अत्र दृष्टान्तमाह—"तद्यथैवाद इति ह स्माह तेजन्या उभयतोऽन्तयोरप्रस्रंसाय वसौ नह्यत्येवमेवैतद्यज्ञस्योभयतोऽन्तयोरप्रस्रंसाय वसौ नह्यति यदादित्यश्चरुः प्रायणीयो भवत्यादित्य उदनीयः"-इति। 'अदः' वक्ष्यमाणं निदर्शनं यथा भवति तथा दार्ष्टान्तिकम्—'इति' एवं कश्चिद्ब्रह्मवादी 'आह स्म'—'तेजन्या'-इत्यादिना। तावेव दृष्टान्तदार्ष्टान्तिकौ स्पष्टीक्रियेते—'तेजनिः' रज्जुः, तस्या उभयोः 'अन्तयोः' 'अप्रस्रंसाय' विश्लेषनिवारणाय लौकिकः पुरुषो 'वसौ नह्यति', मत्स्याकारौ ग्रन्थी बध्नाति, 'एव मेव' चरुद्वयं 'यज्ञे' अस्ति, तत् 'एतद्यज्ञस्य' उपक्रमोपसंहाररूपयोः 'उभयोरन्तयोः' अविश्लेषाय मत्स्याकारबन्धनस्थानीयं भवति॥

येयं प्रायणीये पथ्याख्या प्रथमा देवतास्ति, उदयनीये तस्या उत्तमात्व मर्थवादेनोन्नयति—"पथ्ययैवेतः स्वस्त्या प्रयन्ति पथ्यां स्वस्ति मभ्युद्यन्ति, स्वस्त्येवेतः प्रयन्ति स्वस्त्युद्यन्ति स्वस्त्युद्यन्ति"-इति। 'इतः'-शब्दः षष्ठ्यर्थे वर्तते। आसां [illegible] देवतानां मध्ये 'पथ्ययैव स्वस्त्या' एतच्छब्दद्वयाभिहितयैव देवतया 'प्रयन्ति' प्रारभन्ते; प्रायणीये तां देवतां प्रथमां यजन्तीत्यर्थः। 'पथ्यां स्वस्ति मभि' शब्दद्वयाभिहितां देवतामभिलक्ष्य 'उद्यन्ति' समापयन्ति; उदयनीये तां देवतां उत्तमां यजन्तीत्यर्थः। स्वस्त्याख्याया देवताया आद्यन्तयोर्योगे सति यजमानाः 'इतः' अस्मिन् कर्मणि 'स्वस्त्येव' क्षेम एव यथा भवति तथा

'प्रयन्ति', प्रारभन्ते; तथा 'उदवस्यन्ति' क्षेमेण समापयन्ति। अभ्यासोऽध्यायसमाप्त्यर्थः ॥

अथ मीमांसा। एकादशाध्यायस्य द्वितीयपादे (जै० सू० ६४—६६. अधि० १५.) चिन्तितम्—

"प्रायणीयस्य निष्कासे यो निर्वापोऽर्थकर्म्म तत्।
निष्कासप्रतिपत्तिर्वोदयनीयस्य संस्कृतिः ॥
उताद्यः पूर्ववन्मैवं मुख्यस्य प्रकृतत्वतः।
मध्योऽस्तु नोपयोक्ष्यः संस्कारस्य गुरुत्वतः ॥

ज्योतिष्टोमे श्रूयते—"प्रायणीयस्य निष्कास उदयनीय मभिनिर्वपति"-इति (तै० सं० ६.१.५.५.)। अत्र पूर्वन्यायेन निष्कासद्रव्यक मुदयनीय मयमानधर्म्मक मन्यत् अर्थकर्मेत्याद्यः पक्षः। मध्यस्त्वौदयनीयस्य प्रकृतत्वाद्भिन्नप्रकरणाम्नातात्पृथग्धर्म्मानिर्देशात् उदयनीयस्य धर्म्मातिदेशस्याप्यसम्भवान्नार्थकर्म्मत्वम्। यदि तर्हि निष्कासप्रतिपत्तिरिति मध्यमः पक्षोऽस्तु, सोऽपीत्थं न सम्भवति; उपयुक्तसंस्कारादुपयोक्ष्यमाणसंस्कारस्य गरीयस्त्वात्। तस्मादुदयनीयस्य संस्कारः"-इति ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां द्वितीयाध्याये पञ्चमखण्डः ॥५(११)॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायाः द्वितीयोऽध्यायः ॥

॥ अथ तृतीयाध्यायः ॥

(तत्र)

॥ प्रथमः खण्डः ॥

॥ ॐ ॥ प्राच्यां वै दिशि देवाः सोमं राजानमक्रीणंस्तस्मात्प्राच्यां दिशि क्रीयते तं त्रयोदशान्मासादक्रीणंस्तस्मात् त्रयोदशो मासो नानुविद्यते न वै सोमविक्रय्यनुविद्यते पापो हि सोमविक्रयी तस्य क्रीतस्य मनुष्यानभ्युपावर्त्तमानस्य दिशो वीर्याणीन्द्रियाणि व्युदसीदंस्तान्येकयर्चा ऽवारुरुत्सन्त तानि नाशक्नुवंस्तानि द्वाभ्यां तानि तिसृभिस्तानि चतसृभिस्तानि पञ्चभिस्तानि षड्भिस्तानि सप्तभिर्नैवावारुन्धत तान्यष्टाभिरवारुन्धताष्टाभिराश्नुवत यदष्टाभिरवारुन्धताष्टाभिराश्नुवत तदष्टानामष्टत्वमश्नुते यद्यत्कामयते य एवं वेद तस्मादेतेषु कर्मस्वष्टावष्टावनूच्यन्त इन्द्रियाणां वीर्याणामवरुध्यै ॥ १ (१२) ॥

प्रायणीया तदङ्गं च देवतादिकमीरितम् ।
तथैवोदयनीया च तद्विशेषाश्च वर्णिताः * ॥

---

* द्वितीयाध्यायार्थसङ्ग्रहश्लोक एषः । तत्र पञ्चसु खण्डेषु क्रमात् (१) प्रायणीयेष्टिः, (२) प्रयाजादिविकल्पं प्रायणीयाङ्गकर्म, (३) प्रायणीयदेवतादिकम्, (४) उदयनीया तद्विशेषाश्चेति पञ्चार्था उपदिष्टा इत्यर्थः ।

अथ सोमप्रवहणाङ्गमन्त्रादयो वक्तव्याः । तत्रादौ सोमक्रयणस्य दिशं विधत्ते—"प्राच्यां वै दिशि देवाः सोमं राजानमक्रीणंस्तस्मात्प्राच्यां दिशि क्रीयते"-इति । प्राचीनवंशात् पूर्वस्यां 'दिशि' देवैः पुरा सोमस्य क्रीतत्वादृत्विग्भिरपि तथा सोमः क्रेतव्य इत्यर्थः * । प्रसङ्गात्सोमविक्रयिणः प्रत्यवायं दर्शयति—"तं त्रयोदशान्मासादक्रीणंस्तस्मात् त्रयोदशो मासो नानुविद्यते ; न वै सोमविक्रय्यनुविद्यते ; पापो हि सोमविक्रयी"-इति । पुरा संवत्सरस्य त्रयोदश मासाः ; सन्ति नेदानीम् ; देवाः त्रयोदशमासस्याभिमानिनः पुरुषाः 'तं' सोमं क्रीतवन्तः । यस्मात्तदभिमानी पुरुषः सोमविक्रयी, तस्माल्लोके तदीयः 'त्रयोदशो मासो नानुविद्यते' शुभकर्म्मानुकूलो नास्ति । मेषादिसंक्रान्त्यादिरहितत्वान्मलमास इत्यभिप्रेत्य तस्मिन्मासे शिष्टाः शुभकर्म्माणि वर्जयन्ति । अतएवेदानीमपि 'सोमविक्रयी' शिष्टाचारस्यानुकूलो 'न' एव 'विद्यते' । सोमविक्रयिणः पापरूपत्वे श्रुत्यन्तरप्रसिद्धिद्योतनार्थो 'हि'-शब्दः । अत एव श्रुत्यन्तरे तद्विषयो मन्त्र एवं व्याख्यायते—"अस्मे ज्योतिः सोमविक्रयिणि तम इत्याह ; ज्योतिरेव यजमाने दधाति ; तमसा सोमविक्रयिणमर्पयति" इति (तै० सं० ६. १. १०. ४. †) । अत्र 'तमः'-शब्दः पापवाची ॥

---

* सोमक्रयाख्यायिकादिकं तु पश्चाद्वक्ष्यति, सोमक्रयप्रकारादयस्त्वाध्वर्यवेषु विशेषतः श्रुताः ।

† 'अस्मे ज्योतिः'-इत्येकः, 'सोमविक्रयिणि तमः'-इत्यपरः ; तैत्तिरीयके पठ्येते (सं० १. २. ७.) । तयोरेव व्याख्यानमिदं ब्राह्मणम् । तत्राद्यस्य विनियोग एवं सूत्रे आपस्तम्बेन—'अस्मे ज्योतिरिति शुक्लां कृष्णास्तुकां यजमानाय प्रयच्छति'-इत्यादि (१०. २६. ११.), द्वितीयस्य चैवम्—'कृष्णा सर्णास्तुका अभि. [illegible] सर्पाणां दन्दशूकानां ग्रीवा उप

अथादूर्ध्वं प्राचीनवंशं प्रति नीयमाने सोमे पठितव्यानामृचामष्टसङ्ख्यामादौ प्रशंसति—'तस्य ह वै तस्य मनुष्यानभ्युपावर्त्तमानस्य दिशो वीर्याणीन्द्रियाणि व्युदसीदंस्तान्येकयर्चाऽवारुरुत्सन्त तानि नाशक्नुवंस्तानि द्वाभ्यां तानि तिसृभिस्तानि चतसृभिस्तानि पञ्चभिस्तानि षड्भिस्तानि सप्तभिर्नैवावारुन्धत, तान्यष्टाभिरवारुन्धताष्टाभिराश्नुवत; यदष्टाभिरवारुन्धताष्टाभिराश्नुवत, तदष्टानामष्टत्वम्'' इति। अतः सोमो यदा 'मनुष्यान्' यजमानादीन् 'अभि' लक्ष्य आगच्छत्, तदानीं 'तस्य' सोमस्य दिगादीनि 'व्युदसीदन्' विशेषेणोत्साद्याभवन्। दिक्शब्देनाधिष्ठानमुपलक्ष्यते। सोमस्य तदधिष्ठानम्, यच्च वीर्यं सोमनिष्ठम् बलप्रदानसामर्थ्यम्, यच्चेन्द्रियं चक्षुरादिपाटवहेतुत्वम्, तत्सर्वं विनष्टम्। तदानीं ते यजमाना ये मनुष्याः, 'तानि' दिगादीनि 'एकयर्चा' अवरोद्धुं स्वाधीनं कर्तुम् ऐच्छन्, ततः 'तानि' अवरोद्धुं 'नाशक्नुवन्'। एवं द्वित्वादिसप्तपर्यन्ततया मन्त्रसङ्ख्यया नैवावरोधं कृतवन्तः; अष्टसङ्ख्यया त्ववरोधं कृत्वा तानि दिगादीनि प्राप्तवन्तः। तस्मादवरुन्धत एभिरश्नुवत एभिरिति वा व्युत्पत्त्या अष्टशब्दो निष्पन्नः। एतद्वेदनं प्रशंसति—''अश्नुते यद्यत्कामयते य एवं वेद''-इति। तत्रास्य अश्नुत इति योज्यम्। इदानीमष्टसङ्ख्यां विधत्ते—''तस्मादेतेषु कर्मस्वष्टावष्टावनूच्यन्त इन्द्रियाणां वीर्याणामवरुध्यै'' इति*। इदानीं प्रस्तुतं सोमप्रवहणाख्यं यत्कर्म, तत्र क्रियमाणं तस्मादुत्तरम्, तथाविधेषु प्रत्येकम् 'अष्टौ'

[illegible] तथा: सोमविक्रयिणं विध्यति सोमविक्रयिणि तम इति'—इति (१८.)।

'अग्निष्टोमभिर्निर्मिता तनुः, ऊर्णामृदुका'—इति तै० सा० भा०।

* तत्र सोमप्रवहण्यो नामाष्टौ ऋच उत्तरत्रैव खण्डे विधास्यन्ते।

अष्टौ ऋचो होतानुब्रूयात् । तथाष्टसङ्ख्याया इन्द्रियाणि वीर्याणि चावरुद्धानि भवन्ति ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां तृतीयाध्याये
प्रथमः खण्डः ॥ १ (१२) ॥

॥ अथ द्वितीयः खण्डः ॥

सोमाय क्रीताय प्रोह्यमाणायानुब्रूहीत्याहाध्वर्युर्भद्रादभि श्रेयः प्रेहीत्यन्वाहायं वाव लोको भद्रस्तस्मादसावेव लोकः श्रेयान्त्स्वर्गमेव तं लोकं यजमानं गमयति बृहस्पतिः पुर एता ते अस्त्विति ब्रह्म वै बृहस्पतिर्ब्रह्मैवास्मा एतत्पुरोगवमकर्न वै ब्रह्मण्वद्रिष्यत्यथेमवस्य वर आ पृथिव्या इति देवयजनं वै वरं पृथिव्यै देवयजन एवैनं तदवसाययत्यारे शत्रून् कृणुहि सर्ववीर इति द्विषन्तमेवास्मै तत्पाप्मानं भ्रातृव्यमपबाधतेऽधरं पादयति सोम यास्ते मयोभुव इति तृचं सौम्यं गायत्रमन्वाह सोमे राजनि प्रोह्यमाणे स्वयैवैनं तद्देवतया स्वेन

छन्दसा समर्धयति सर्वे नन्दन्ति यशसागतेनेत्यन्वाह यशो वै सोमो राजा सर्वो ह वा एतेन क्रीयमाणेन नन्दति यश्च यज्ञे लप्स्यमानो भवति यश्च न सभासाहेन सख्या सखाय इत्येष वै ब्राह्मणानां सभासाहः सखा यत् सोमो राजा किल्बिषस्पृदित्येष उ एव किल्बिषस्पृद् यो वै भवति यः श्रेष्ठता मश्नुते स किल्बिषं भवति तस्मादाहुर्मानुवोचो मा प्रचारीः किल्बिषन्नु मा यातयन्निति पितुषणिरित्यन्नं वै पितु दक्षिणा वै पितु तामेवैनमेतत्सनोत्यन्नसनिमेवैनं तत् करोत्यरंहितो भवति वाजिनायेतीन्द्रियं वै वीर्यं वाजिनमाजरसं हास्मै वाजिनं नापच्छिद्यते य एवं वेदागन्देव इत्यागतो हि स तर्हि भवत्यृतुभिर्वर्धतु क्षयमित्यृतवो वै सोमस्य राज्ञो राजभ्रातरो यथा मनुष्यस्य तैरेवैनं तत्सहागमयति दधातु नः सविता सुप्रजा मिष मित्याशिष माशास्ते स नः क्षपाभिरहभिश्च जिन्वत्वित्यहानि वा अहानि रात्रयः क्षपा अहोरात्रैरेवास्मा एता माशिष माशास्ते प्रजावन्तं रयि मस्मे समिन्वत्वित्याशिष मेवाशास्ते या ते धामानि हविषा यजन्तीत्यन्वाह ता ते विश्वा परिभूरस्तु यज्ञं गयस्फानः प्रतरणः सुवीर

ऊतिर्गवां नः स्फावयिता* प्रतारयितैधीत्येव तदाह वीरहा प्र चरा सोम दुर्यानिति गृहा वै दुर्या बिभ्यति वै सोमाद्राज्ञ आयतो यजमानस्य गृहाः स यदेतामन्वाह शान्त्यैवैनं तच्छमयति सोऽस्मै शान्तो न प्रजां न पशून् हिनस्तीमां धियं शिक्षमाणस्य देवेति वारुण्या परिदधाति वरुणदेवत्यो वा एष तावद्यावदुपनद्धो यावत्परिश्रितानि प्रपद्यते स्वयैवैनं तद्देवतया स्वेन छन्दसा समर्धयति शिक्षमाणस्य देवेति शिक्षते वा एष यो यजते क्रतुं दक्षं वरुण संशिशाधीति वीर्यं प्रज्ञानं वरुण संशिशाधीत्येव तदाह ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेमेति यज्ञो वै सुतर्मा नौः कृष्णाजिनं वै सुतर्मा नौर्वाग्वै सुतर्मा नौर्वाचमेव तदारुह्य तया स्वर्गं लोकमभि सन्तरति ता एता अष्टावन्वाह रूपसमृद्धा एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदति तासां त्रिः प्रथमामन्वाह त्रिरुत्तमां ता द्वादश सम्पद्यन्ते द्वादश वै मासाः संवत्सरः संवत्सरः प्रजापतिः प्राजापत्यायतनाभिरेवाभी राध्नोति य एवं वेद त्रिः

---

* 'न स्फावयिता'--इति निर्विसर्गपाठः ख, ग, घ।

प्रथमां त्रिरुत्तमामन्वाह यज्ञस्यैव तद् बर्सौ नह्यति स्थेम्ने बलायाविस्रंसाय ॥ २ (१३) ॥

मन्त्रगतां सङ्ख्यां विधाय मन्त्रान् विधातुमादौ प्रैषमन्त्रं विधत्ते—"सोमाय क्रीताय प्रोह्यमाणायानुब्रूहीत्याहाध्वर्युः"-इति। यः सोमः क्रीतः, सः क्रयदेशात् प्राचीनवंशं प्रति प्रोह्यते, नीयते ; तदर्थमनुकूला ऋचो हे होतः! अनुक्रमेण ब्रूहि। तमेवं प्रैषमन्त्रमध्वर्युः पठेत्। अथ होतुः प्रथमामृचं विधत्ते—"भद्रादभि श्रेयः प्रेहीत्यन्वाह" इति। सेयमृक् तैत्तिरीयशाखायामेव समाम्नाता*—"भद्रादभि श्रेयः प्रेहि बृहस्पतिः पुर एता ते अस्तु। अथेमवस्य वर आ पृथिव्या आरे शत्रून् कृणुहि सर्ववीरः" इति (सं० १. २. ३. ३.)। तस्याय मर्थः—हे सोम! 'भद्रात्' मङ्गलात्, भूलोकरूपात् तस्मात् क्रयदेशात् 'श्रेयः' श्रेष्ठम् स्वर्गलोकस्थानीयं प्राचीनवंशदेशम् 'अभि' लक्ष्य 'प्रेहि' प्रकर्षेण आगच्छ। तथागच्छतः 'ते' 'बृहस्पतिः' 'पुरः एता' पुरतो गन्ता 'अस्तु'। 'अथ' गमनादूर्ध्वम्, 'पृथिव्याः' सम्बन्धिनि 'आ' समन्तात् 'वरे' श्रेष्ठे देवयजने 'इमम् अवस्य' इदं तवावस्थानयोग्यं स्थानं निश्चिनु। सर्वैः 'वीरः' शूरस्त्वं 'शत्रून्' पापरूपान् यज्ञविद्विषिणः 'आरे कृणुहि' दूरे कुरु, निराकुर्वित्यर्थः। तस्या ऋचि प्रथमपादं व्याचष्टे—"अयं वाव लोको भद्रस्तस्मादसावेव लोकः श्रेयान्त्स्वर्गमेव तं लोकं यजमानं गमयति"-इति। 'तत्' तेन

---

* न तु स्वशाखायामिति यावत्। अतएवाश्वलायनेन सपठ्य विहितः, न तु प्रतीकग्रहणमात्रेणेति द्रष्टव्यम् (आश्व० श्रौ० ४. ४. २.)। एषा शैली कल्पसूत्रकाराणां प्रायः सर्वत्रैव।

प्रथमपादपाठेन *। स्पष्ट मन्यत् । द्वितीयपाद मनूद्य व्याचष्टे—“बृहस्पतिः पुर एता ते अस्त्विति; ब्रह्म वै बृहस्पतिर्ब्रह्मैवास्मा एतत् पुरोगव मकर्न वै ब्रह्मण्वद्रिष्यति”-इति। बृहस्पतिः ब्रह्मत्वं ब्राह्मणजातिमत्त्वम् “ब्रह्म वै देवानां बृहस्पतिः”-इत्यादिश्रुत्यन्तरे प्रसिद्धम् (तै०सं० २.२.९.१. †)। ‘एतत्’ एतेन द्वितीयपादपाठेन ‘अस्मै’ यजमानार्थम् ‘ब्रह्म एव’ ब्राह्मण मेव ‘पुरोगवम्’ पुरोगन्तारम् ‘अकः’ करोति; ‘ब्रह्मण्वत्’ ब्राह्मणसहायोपेतं कर्म ‘न वै रिष्यति’ सर्वथा नाशं न प्राप्नोति। तृतीयपाद मनूद्य व्याचष्टे—“अथे मवस्य वर आ पृथिव्या इति, देवयजनं वै वरं पृथिव्यै देवयजन एवैनं तदवसाययति; आरे शत्रून् कृणुहि सर्ववीर इति; द्विषन्त मेवास्मै तत्पाप्मानं भ्रातृव्य मपबाधते ऽधरं पादयति”-इति। देवयजनाख्यस्य यागदेशस्य पृथिवीसम्बन्धिश्रेष्ठस्थानत्वात् तत्र ‘एव’ ‘एनं’ सोमं ‘तत्’ तेन तृतीयपादपाठेन ‘अस्मै’ यजमानाय द्वेषं कुर्वन्तं पापरूपं शत्रुम् ‘अपबाधते’, ‘अधरं पादयति’ निकृष्टं पदं प्रापयतीत्यर्थः॥

सोमानुवाक्या द्वितीयाद्यास्तिस्र ऋचो विधत्ते—“सोम यास्ते मयोभुव इति तृचं सौम्यं गायत्र मन्वाह; सोमे राजनि प्रोह्यमाणे स्वयैवैनं तद्देवतया स्वेन छन्दसा समर्धयति”-इति। तिसृणा मृचां सङ्घातस्तृचः ‡। स च सोमदेवताको गायत्रीच्छन्दस्कश्च। सोमानयनकाले तं तृच मनुब्रूयात् §। ‘तत्’ तेनानुवचनेन स्वाश्र-

---

* ‘तस्मै’-इति ख, ग (८५ पृ० १८ पं०), तत्पाठ सायणाचार्यसंमत भाष्यम्।

† ब्रह्माण्युपरिष्टात् ‘ब्रह्म वै बृहस्पतिः, ब्रह्म सोम आसीत्’-इति २. ५. ६।

‡ ‘ऋचि त्रेरुत्तरपदादिलोपश्च छन्दसि’-इति पा० ६. १. ३४. वा०।

§ स च तृचः ऋ० सं० १.९१.९,१०,११। आश्वलायनेनाप्येष विहितः (४.४.४.)।

रूपया 'देवतया' स्वकीयच्छन्दसा च 'एनं' सोमं समृद्धं करोति । अत्र क्रीयमाणद्रव्यविशेषः सोमः ; मन्त्रदेवताप्यसावेव । तस्मात् स्वात्मरूपत्वम् । गायत्री द्युलोकात्सोम मानीतवती । तैत्तिरीयाः कद्रूश्चेत्यनुवाके समामनन्ति (सं० ६. १. ६. १.)* । तस्मात् छन्दसः स्वकीयत्वम् ॥

पञ्चमी मृचं विधत्ते—"सर्वे नन्दन्ति यशसागतेनेत्यन्वाह"-इति । सा च संहितायामेवमाम्नाता—"सर्वे नन्दन्ति यशसागतेन सभासाहेन सख्या सखायः । किल्बिषस्पृत्पितुषणिर्ह्येषा मरं हितो भवति वाजिनाय"-इति (१०. ७१. १०.) । तस्या ऋचोऽय मर्थः—'सर्वे सखायः' यजमानप्रभृतयः 'सख्या' सोमरूपेण 'नन्दन्ति' तुष्यन्ति । कीदृशेन सख्या ? 'यशसा' यशोहेतुना 'आगतेन' समीपं प्राप्तेन, 'सभासाहेन' विद्वत्सभां विद्याप्रसङ्गेन सहते अभिभवति सभासाहः, तादृशेन । स तादृशः सोमरूपः सखा, 'एषाम्' ऋत्विग्यजमानानां 'किल्बिषस्पृत्' किल्बिषात् पापात् स्पृणोति पालयति किल्बिषस्पृत् । 'पितु'-शब्दोऽन्नवाची †, तस्य सनिर्दानं येन सोमेन लभ्यते, सोऽयम् 'पितुषणिः' । सोमस्य पापनिवारकत्व मन्नप्रदानेन । सर्वशास्त्रप्रसिद्धिद्योतनार्थो 'हि' शब्दः । तथायं सोमो वाजिनशब्दाभिधेयायेन्द्रियाय वीर्याय वा 'अरं हितः' अलम् अत्यन्तं हितो भवतीति। तस्या ऋचः प्रथमं पादं व्याचष्टे—"यशो वै सोमो राजा; सर्वो ह वा एतेन क्रीयमाणेन नन्दति, यश्च यशो लप्स्यमानो भवति, यश्च न"-इति । यशःकारणात् सोमस्य यशस्त्वम् । 'यः'

---

* तथा शतपथेऽपि द्रष्टव्यम्—'दिवि वै सोम आसीत्'-इत्यादिः ३. २. ४ ।

† 'पितुरित्यन्ननाम ; पातेर्वा पिबतेर्वा प्यायतेर्वा'-इत्यादि निरु० ९. २. २ ।

पुमान् ऋत्विग् भूत्वा 'यशो' धनं लभते, 'यश' इष्ट, सोमागत: 'न' तु धनार्थी ; 'सर्वः' अप्यसौ सोमक्रयणं दृष्ट्वा तुष्यति । द्वितीयपाद मनूद्य व्याचष्टे—"सभासाहेन सख्या सखाय इत्येष वै ब्राह्मणानां सभासाहः सखा, यत् सोमो राजा"-इति । योऽयं राजमान: सोम:, सोऽयं ब्राह्मणसभा मतिभवति, सर्वे ब्राह्मणाः सोमाधीना भवन्तीत्यर्थ: । तृतीयपादे प्रथमं पद मनूद्य व्याचष्टे —"किल्बिषस्पृदित्येष उ एव किल्बिषस्पृद्"-इति । योऽयं सोमोऽस्ति, 'एष उ एव' किल्बिषात् पालयति ; सर्वकामहेतोः सोमयागस्य पापक्षयायानुष्ठातुं शक्यत्वात् । यज्ञानुष्ठाने च प्रवृत्तानां ऋत्विग्यजमानानां क: किल्बिषप्रसङ्ग: ? इत्याशङ्क्याह —"यो वै भवति, य: श्रेष्ठता मश्नुते, स किल्बिषं भवति"-इति । 'य:' पुमान् प्रौढ़े यज्ञे प्रवृत्तो 'भवति', तत्रापि 'य:' 'श्रेष्ठतां' प्रयोगपाटवाभिमानम् 'अश्नुते' प्राप्नोति, 'स:' तादृश: पुरुष: कर्मसमाप्ति-व्यग्रतया पण्डितम्मन्यत्वेन वाग्वैकल्यं कुर्वन् 'किल्बिषं भवति' पापं प्राप्नोति । त मेतं पापप्रसङ्गं विस्पष्टयति—"तस्मादाहुर्मा नु वोचो मा प्रचारी: ; किल्बिषन्नु मा यातयन्निति"-इति । यस्मादृत्विजां किल्बिषं सम्भाव्यते, 'तस्माद्' यजमाना: एवम् 'आहु:'—हे होत: ! त्वम् 'मा नु वोच:' अन्यचित्त: सन् पुरोनुवाक्यां मा पठ । हे अध्वर्यो ! 'मा प्रचारी:' व्यग्रतया प्रचार मन्यथानुष्ठानं मा कार्षी: । 'नु' क्षिप्रं कुर्वन्तो भवन्त: 'किल्बिष'' 'मा यातयन्' मा प्राप्नुवन्त: । 'इति'शब्दो यजमानानां उक्तिसमाप्तौ । इत्थं सम्भावितात् किल्बिषात् सोम: पालयति । तृतीयपादे द्वितीयपद मनूद्य व्याचष्टे—"पितुषणिरित्यन्नं वै पितु ; दक्षिणा वै पितु ; ता मेनेन सनोत्यन्नसनि-

मेवैनं तत्करोति"-इति। अन्नवाची पितुशब्दो लक्ष्यलक्षणसाम्यात् दक्षिणा मप्युपलक्षयति। 'तां' दक्षिणा मेतेन सोमेन निमित्तभूतेन 'सनोति' ऋत्विग्भ्यो ददाति। 'तत्' तेन, पितुशब्दपाठेन 'एनं' सोमम् 'अन्नसनिम्' अन्नदाननिमित्तभूतम् 'एव करोति'। चतुर्थं पाद मनूद्य तत्र वाजिनशब्दं व्याचष्टे—"सर्वं हितो भवति वाजिनायेतीन्द्रियं वै वीर्यं वाजिनम्"-इति। वेदनं प्रशंसति—"आजरसं हास्मै वाजिनं नापच्छिद्यते य एवं वेद"-इति। जरासमाप्तिपर्यन्तं वेदितुरिन्द्रियवीर्ययोरपच्छेदो न भवति॥

षष्ठं मन्त्रं विधत्ते—"आगन्देव इत्यन्वाह"-इति। स च मन्त्रः संहिताया माम्नातः—"आगन् देव ऋतुभिर्वर्धतु क्षयं दधातु नः सविता सुप्रजा मिषम्। स नः क्षपाभिरहभिश्च जिन्वतु प्रजावन्तं रयि मस्मे समिन्वतु" इति (४. ५३. ७.)। तस्याय मर्थः। सोऽसौ 'देवः' 'आगन्' इह कर्मणि आगच्छतु। आगत्य च 'ऋतुभिः' सह 'क्षयं' निवासस्थानं 'वर्धतु' वृद्धिं प्रापयतु। 'नः' अस्माकं 'सविता' प्रेरकः स देवः 'सुप्रजां' शोभनापत्यम्, 'इषम्' अन्नं च 'दधातु' सम्पादयतु। 'सः' देवः 'नः' अस्मान् 'क्षपाभिः' रात्रिभिः, अहोभिः च 'जिन्वतु' प्रीणयतु। तथा 'प्रजावन्तं रयिम्' प्रजोपेतं धनम् 'अस्मे समिन्वतु' अस्मासु सम्यक् प्रापयत्विति।

अस्या ऋचः प्रथमपादे पूर्वभागं व्याचष्टे—"आगतो हि स तर्हि भवति"-इति। 'तर्हि' तस्मिन् क्रयोत्तरकाले 'सः' सोमः 'आगतो भवति'-इति प्रसिद्धम्। उत्तरभाग मनूद्य व्याचष्टे—"ऋतुभिर्वर्धतु क्षय मित्यृतवो वै सोमस्य राज्ञो राजभ्रातरो यथा

मनुष्यस्य ; तैरेवैनं सहागमयति''–इति । यथा लोके कस्यचिन्मनुष्यस्य भ्रातरोऽपि मनुष्यजातीयाः, तथा राजजातीयस्य सोमस्य भ्रातरोऽपि राजजातीयाः । 'तत्' तेन मन्त्रभागपाठेन 'तैः' ऋतुभिः भ्रातृभिः 'सह' 'एनं' सोमं अस्मिन् कर्मणि 'आगमयति' । द्वितीयपादमनूद्य व्याचष्टे—''दधातु नः सविता सुप्रजा मिष मित्याशिष माशास्ते''–इति । आशासनीयोऽपेक्षणीयः प्रजादिपदार्थ आशीः; ताम्, अनेन पादपाठेन 'आशास्ते' । तृतीयपादमनूद्य व्याचष्टे—''स नः क्षपाभिरहभिश्च जिन्वत्वित्यहानि वा अहानि, रात्रयः क्षपाः, अहोरात्रैरेवास्मा एता आशिष माशास्ते, प्रजावन्तं रयिं अस्मे समिन्वत्वित्याशिष मेवाशास्ते'' –इति । लोकप्रसिद्धानि 'अहानि' एवात्र मन्त्रोक्तानि 'अहानि'; अहोभिरिति वक्तव्ये वर्णविकारेणाहभिरित्युक्तत्वात् * । शङ्कास्पदमभ्युदसितु मिदं व्याख्यानम् ;—एव मत्र व्याख्यातव्यः पदविशेषो नास्ति, किन्तु आशीः-प्रार्थनरूपं तात्पर्य मेवेत्यभिप्रेत्य एवकारः प्रयुक्तः ॥

[illegible] ऋचं विधत्ते—''या ते धामानि हविषा यजन्तीत्यन्वाह''–इति । सेय मृक् संहितायामाम्नाता—''या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् । गयस्फानः प्रतरणः सुवीरोऽवीरहा प्र चरा सोम दुर्यान्''-इति (१. ९१. १९.) । हे सोम! 'ते' तव 'धामानि' यान्युत्तरवेद्यादिस्थानानि, यजमानाः 'हविषा यजन्ति', 'ते' तव, 'ता विश्वा' तानि सर्वाणि स्थानानि व्याप्येति शेषः । ततो भवान् 'यज्ञं' 'परिभूरस्तु' परितः प्राप्तवान् भवतु । किञ्च त्वं 'गयस्फानः' गयानाम् अस्मदीयानां गवां वर्ध-

---

* 'कालहलच्स्वरकर्तृयङां च व्यत्यय मिच्छति'–इति पा० ३. १. ८५. वा० ।

यिता, 'प्रतरणः' प्रतारयिता सर्वापदुत्तारणहेतुः, 'सुवीरः' शोभनपुत्रपौत्रादिप्रदो भवेति शेषः। हे सोम! 'अवीरहा' अस्मदीयानां वीरपुरुषाणां हनन मकुर्वाणो 'दुर्यान्' अस्मदीयगृहान् प्रति 'प्र चर' प्रकर्षेणागच्छ।

अत्र प्रथमपादस्य स्पष्टार्थत्वबुध्या व्याख्यान मुपेक्ष्य द्वितीयपाद मपि स्पष्टार्थाभिप्रायेणैव पठति—"ता ते विश्वा परिभूरस्तु यज्ञम्"-इति। तृतीयपाद मनूद्य व्याचष्टे—"गयस्फानः प्रतरणः सुवीर इति; गवां नः स्फावयिता प्रतारयितैधीत्येव तदाह"-इति। 'स्फावयिता' वर्धयिता। चतुर्थपाद मनूद्य व्याचष्टे—"अवीरहा प्र चरा सोम दुर्यानिति; गृहा वै दुर्याः, बिभ्यति वै सोमाद्राज्ञ आयतो यजमानस्य गृहाः; स यदेता मन्वाह शान्त्यैवैनं तच्छमयति; सोऽस्य शान्तो न प्रजां न पशून् हिनस्ति"-इति। 'आयतः' आगच्छतः 'सोमात् राज्ञः' 'यजमानस्य' 'गृहाः' गृहवर्त्तिनो वीरपुरुषाः। केनापि परिचर्यावैकल्येन राजा कोपं करिष्यतीति मत्वा, तस्मात् सर्वे 'बिभ्यति'। तदानीं 'सः' होता यदि 'एताम्' अवीरहेतिपदयुक्ता मृचम् 'अन्वाह', 'तत्' तेनानुवचनेन 'शान्त्या' शान्तिहेतुभूतया सुवीरपदोक्त्यैवैतं राजानं 'शमयति' शान्तं करोति, 'सः' च राजा 'शान्तः' सन् 'अस्य' यजमानस्य पुत्रादिकाम् 'प्रजां' गवादिपशूंश्च 'न हिनस्ति'॥

अष्टमी मृचं विधत्ते—"इमां धियं शिक्षमाणस्य देवेति वारुण्या परिदधाति"-इति। इय मृक् वरुणदेवताका; तया 'परिदधाति' अनुवचनं समापयेदित्यर्थः। सेय मृक् संहिताया मेव माम्नाता—"इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण सं

शिशाधि । ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेम''-इति (८. ४२. ३.) । तस्याय मर्थः—हे 'वरुण !' 'इमां' 'धियं' यज्ञानुष्ठानविषयां बुद्धिं 'शिक्षमाणस्य' अभ्यस्यतो यजमानस्य 'क्रतु' यज्ञविषयं वीर्यम्, 'दक्षं' कौशलं यज्ञविषयप्रज्ञानं 'सं शिशाधि' सम्यगुपदिश। 'यया' नावूपया नावा 'विश्वा दुरिता' सर्वाणि पापानि 'अति तरेम', तादृशीं 'सुतर्माणं' सुष्ठु-तरणहेतुं नावूपां 'नावम्' 'अधि रुहेम' आधिक्येनारोहणं कुर्म इति ।

वारुण्या समापने कारणमाह—"वरुणदेवत्यो वा एष तावद्यावदुपनद्धो यावत्परिश्रितानि प्रपद्यते, स्वयैवैनं तद्देवतया स्वेन छन्दसा समर्धयति"-इति । 'यावत्' कालं सोमः 'उपनद्धः' वस्त्रादिना बद्धः स्यात्, 'यावत्' च 'परिश्रितानि' प्राचीनवंशादिस्थानानि 'प्रतिपद्यते', तावत् 'एषः' सोमो वरुणदेवताकः; बन्धनस्य वरुणपाशाधीनत्वात्*, आवरणस्यापि वरुणाधीनत्वात्† । 'तत्' तथा सति वारुण्या परिदधानो होता 'स्वयैव' सोमसम्बन्धिन्यैव 'देवतया' 'स्वेन' सम्बन्धिना 'छन्दसा' तम् 'एनं' सोमं समृद्धं करोति‡ ।

अस्या ऋचस्त्रिष्टुप् छन्दः । सा च त्रिष्टुप्, सोम माहर्तुं द्युलोके गता दक्षिणां तपसाहृतवती । तथाच शाखान्तरे श्रूयते —"सा दक्षिणाभिश्च तपसा चागच्छति"-इति (तै० सं० ६. १. ६. २.) । तस्मादिदं छन्दः सोमस्य स्वकीयम् ।

---

* 'उदुत्तमं वरुण पाशम् (ऋ० सं० १. २४. १५.)'-इत्यादि च तत्र मन्त्रलिङ्गम् ।

† 'वरुणो वृणोतीति सतः'-इति निरु० १०. १. ३ ।

‡ "वारुणो वै क्रीतः सोम उपनद्धः"-इत्यादि, वारुण्यर्चा परिदधाति स्वयैवैनं देवतया परिदधातीत्यन्तम् ब्राह्मणम् तै० सं० ६. १. ११ ; [illegible] १. २. ७—८ ।

प्रथमपादे शिक्षमाणस्येति पदं व्याचष्टे— "शिक्षमाणस्य देवेति शिक्षते वा एष यो यजते"-इति। पुनःपुनरभ्यासः शिक्षा। यजनशीलस्य सोऽस्ति। द्वितीयपाद मनूद्य व्याचष्टे— "क्रतुं दक्षं वरुण सं शिशाधीति, वीर्यं प्रज्ञानं वरुण सं शिशाधीत्येव तदाह"-इति। द्वितीयार्द्ध मनूद्य व्याचष्टे— "ययाति विश्वा दुरिता तरेम, सुतर्माण मधि नावं रुहेमेति; यज्ञो वै सुतर्मा नौः; कृष्णाजिनं वै सुतर्मा नौर्वाग्वै सुतर्मा नौः; वाच मेव तदारुह्य तया स्वर्गं लोक मभि सन्तरति"-इति। यत्र यज्ञस्य वा कृष्णाजिनस्य वा प्रस्तावः, तत्र तत्परत्वेन सुतर्मशब्दो व्याख्येयः; इह तु मन्त्ररूपा वाक् विवक्षिता। 'तत्' तेन मन्त्रपाठेन वाग्रूपा मेव नावम् 'आरुह्य' 'तया' नावा। 'स्वर्गम्' 'अभि'लक्ष्य सम्यक् स्वर्गं 'तरति'॥

उक्ताः सर्वा ऋचः प्रशंसति— "ता एता अष्टावन्वाह रूपसमृद्धाः"-इति। विवक्षितार्थप्रतिपादकेन रूपेण समृद्धाः*। ता मेव समृद्धिं विशदयति— "एतद्वै यज्ञस्य समृद्धं यद् रूप समृद्धम्; यत्कर्म क्रियमाण मृगभिवदति"-इति। पूर्ववद् व्याख्येयम् (४५ पृ० ११ पं०)। आद्यन्तयोः ऋचोरावृत्तिं विधत्ते— "तासां त्रिः प्रथमा मन्वाह, त्रिरुत्तमाम्"-इति। आवृत्तिसहिताना मृचां सङ्ख्यां प्रशंसति— "ता द्वादश सम्पद्यन्ते; द्वादश वै मासाः संवत्सरः; संवत्सरः प्रजापतिः"-इति। वेदनं प्रशंसति— "प्रजापत्यायतनाभिरेवाभी राध्नोति य एवं वेद"-इति। आवृत्ति

---

* एता एवाष्टावृचः सोमप्रवहणे उच्यन्ते। आपस्तम्बेन तु विहिता विशेषतः (४. ४. १, ४, ६.), तथा कात्यायनेनापि ७. ९. २२—२४। तत्र सोमस्योपोन्नाहादि-मन्त्राश्च तै० सं० १. २. ८ अनु०। तद्ब्राह्मणं च ६. १. ११ अनु०।

प्रशंसति —"वि प्रथमां विकसमा मनुष्व, यत्रस्यैव तद्द वर्ष्मा नह्यति, स्थूमे वलायाविस्रंसाय"—इति । 'तत्' तेनावष्टम्भेन नभ्यौ वृक्ष उभयोरन्तयोः स्थितौ मध्याकारौ ग्रन्थौ । तद्द्वाराय 'नह्यति' बध्नाति । तच्च बन्धनं 'स्थेम्ने' स्थैर्याय भवति । स्थैर्यानुज्ञातिरिक्ताभ्यां व्याख्यानं प्राबल्य मविस्रंसनं च ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां तृतीयाध्याये
द्वितीयः खण्डः ॥ २ (१३) ॥

॥ अथ तृतीयः खण्डः ॥

अन्यतरोऽनड्वान् युक्तः स्यादन्यतरो विमुक्तोऽथ राजान मुपावहरेयुर्यदुभयोर्विमुक्तयोरुपावहरेयुः पितृदेवत्यं राजानं कुर्युर्यद्युक्तयोरयोगक्षेमः प्रजा विन्देत् ताः प्रजाः परिप्लवेरन् योऽनड्वान्विमुक्तस्तच्छालाभृतां प्रजानां रूपं यो युक्तस्तच्चक्रियाणां ते ये युक्तेऽन्ये विमुक्तेऽन्य उपावहरन्त्युभावेव ते क्षेमयोगौ कल्पयन्ति देवासुरा वा एषु लोकेषु समयतन्त त एतस्यां प्राच्यां दिश्ययतन्त तांस्ततोऽसुरा अजयंस्ते दक्षिणस्यां दिश्ययतन्त तांस्ततोऽसुरा अजयंस्ते प्रतीच्यां दिश्ययतन्त तांस्ततोऽसुरा अजयंस्त

उदीच्यां दिश्ययतन्त तांस्ततो ऽसुरा अजयंस्त उदीच्यां प्राच्यां दिश्ययतन्त ते ततो न पराजयन्त सैषा दिगपराजिता तस्मादेतस्यां दिशि यतेत वा यातयेद्वेश्वरो हानृणा कर्त्तोस्ते देवा अब्रुवन्नराजतया वै नो जयन्ति राजानं करवामहा इति तथेति ते सोमं राजान मकुर्वंस्ते सोमेन राज्ञा सर्वा दिशो जयन्नेष वै सोमराजा * यो यजते प्राचि तिष्ठत्यादधति तेन प्राचीं दिशं जयति तं दक्षिणा परिवहन्ति तेन दक्षिणां दिशं जयति तं प्रत्यञ्च मावर्त्तयन्ति तेन प्रतीचीं दिशं जयति त मुदीचस्तिष्ठन्त उपावहरन्ति तेनोदीचीं दिशं जयति सोमेन राज्ञा सर्वा दिशो जयति य एवं वेद ॥ ३ (१४) ॥

सोमप्रवहणीर्ऋचो विधाय सोमस्य शकटादवरोहणं विधत्ते —"अन्यतरोऽनड्वान् युक्तः स्यादन्यतरो विमुक्तोऽथ राजान मुपावहरेयुः"-इति । अग्रदेशे सोमं शकटं प्रक्षिप्य प्राचीनवंशसमीपे समानीय शकटबद्धयोरनडुहोर्मध्ये कञ्चिदनड्वाहं विमुच्य इतर मविमुच्य 'राजानं' शकटादधस्तादृत्विजः 'उपावहरेयुः'। 'युक्तः' शकटे बद्धः। 'विमुक्तः' शकटाद्वियोजितः। उभयोरनडुहोर्विमोचने दोष मुद्भावयति † —"यदुभयोर्विमुक्तयोरुपावहरेयुः पितृदेवत्यं राजानं कुर्युः"-इति। राज्ञः सोमस्य पितृभिः स्वीकृ-

---

* 'सोमो राजा' क। † 'मुपन्यस्यति' ग, घ।

तत्त्वादयं सोमो देवयोग्यो न भवेत्। उभयोरनडुहोः शकटयोगेऽपि दोष माह—"यद् युक्तयोरयोगक्षेमः प्रजा विन्देत्, ताः प्रजाः परिप्लवेरन्"-इति ; अप्राप्तस्य धनादेः सम्पादनं योगः, प्राप्तस्य रक्षणं क्षेमः ; योगसहितः क्षेमो योगक्षेमः, तदभावः ; 'प्रजाः' [illegible] विन्देत्' लभेत, प्राप्नुयात्। "यो ऽनड्वान् विमुक्तस्तच्छालासदां प्रजानां रूपं, यो युक्तस्तच्चक्रियाणां, ते ये युक्ते ऽन्ये विमुक्ते ऽन्य उपावहरन्त्युभावेव ते क्षेमयोगौ कल्पयन्ति"-इति। 'यः अनड्वान् विमुक्तः', 'तत्' एतत् 'शालासदां' गृहावस्थितानां 'प्रजानां' पुत्रादीनां 'रूपम्' ; 'यः' अनड्वान् अधस्ताच्छकटे 'युक्तः', 'तत्' 'च' 'क्रियाणां' लौकिकानां वैदिकानां च स्वरूपम्। यद्वा, चक्र मस्यास्तीति चक्रि शकटम्, तेन चक्रिणा यान्तीति, शकटमारुह्य गच्छन्तः प्रजाः चक्रियाः, तासां रूपम्। एवं सति 'ते' यजमानानां मध्ये 'ये' केचिद् बुद्धिमन्तो यजमानाः 'अन्ये युक्ते' एकस्मिन्ननडुहि शकटबद्धे, 'अन्ये विमुक्ते' इतरस्मिन्ननडुहि शकटाद्वियोजिते सति सोमम् 'उपावहरन्ति'। 'ते' बुद्धिमन्तः 'उभावेव' क्षेमं योगं च सम्पादयन्ति। त मिम मर्थं तैत्तिरीयाश्चामनन्ति—"यदुभौ विमुच्यातिथ्यं गृह्णीयाद्यज्ञं विच्छिन्द्याद्यदुभावविमुच्य यथानागतायातिथ्यं क्रियते तादृगेव तद्विमुक्तोऽन्योऽनड्वान् भवत्यविमुक्तोऽन्योऽथातिथ्यं गृह्णाति यज्ञस्य सन्तत्यै"-इति (सं० ६. २. १. २.)। नन्वत्र सोमावरोहणकाल उच्यते, इतरत्रातिथ्येष्टिकाल इति न समानविषयत्वम्? इति चेत्, न; उभयोरेककालीनत्वात्॥

अथाख्यायिकामुखेन सोमोपावहरणाय प्राचीं दिशं विधत्ते—"देवासुरा वा एषु लोकेषु समयतन्त ; त एतस्यां प्राच्यां दिश-

यतन्त, तांस्ततोऽसुरा अजयंस्ते दक्षिणस्यां दिश्ययतन्त, तांस्ततोऽसुरा अजयंस्ते प्रतीच्यां दिश्ययतन्त, तांस्ततोऽसुरा अजयंस्त उदीच्यां दिश्ययतन्त, तांस्ततोऽसुरा अजयंस्त उदीच्यां प्राच्यां दिश्ययतन्त ; ते ततो न पराजयन्त ; सैषा दिगपराजिता ; तस्मादेतस्यां दिशि यतेत वा यातयेद्वेश्वरो हानृ [illegible] र्तोः''-इति। 'समयतन्त' सङ्ग्राम मकुर्वन्। प्राच्यादिषु चतसृषु दिक्षु देवानां पराजय आसीत्, ऐशान्यां दिशि नास्ति पराजयः ; तस्मात्तस्यां 'दिशि' सोमोपावहरणाय 'यतेत' प्रयत्नं कुर्याद् 'वा', 'यातयेत्' प्रयत्नं कारयेद् 'वा'। एव मेव वैकल्यराहित्य [illegible] प्रभुर्भवति। अथवा सोमस्य राज्ञो विजयित्वेनोत्तरत्र प्रशंसा [illegible] देवासुरा वा इत्यादिना लौकिकस्य राज्ञ ऐशान्यां दिशि [illegible] भृत्यप्रेरणं प्रतिपादितम्॥

इदानीं सोमस्य जयहेतुत्वं दर्शयति---''ते देव [illegible] राजतया वै नो जयन्ति, राजानं करवामहा इति ; [illegible] सोमं राजान मकुर्वंस्ते सोमेन राज्ञा सर्वा दिशो जयन्[illegible] राजा, यो यजते, प्राञ्चि तिष्ठत्यादधति ; तेन प्राचीं दिशं जयति ; तं दक्षिणा परिवहन्ति, तेन दक्षिणां दिशं जयति ; तं प्रत्यञ्च मावर्तयन्ति, तेन प्रतीचीं दिशं जयति ; त मुदीचस्तिष्ठन्त उपावहरन्ति, तेनोदीचीं दिशं जयति ; सोमेन राज्ञा''-इति। 'ते देवाः' परस्पर मेवम् 'अब्रुवन्'--- अस्माकं राजाभावात् प्राच्यादिदिक्षु पराजय आसीत्, असुराणां जय आसीत्, ; ततो 'राजानं' सम्पादयामः 'इति' विचार्य 'सोमम्' एव 'राजानं' कृत्वा प्राच्यादिदिक्षु जयम् प्राप्ताः। एवं सति 'यः' यजमानः सोमयागं करोति, 'एषः' एव। सोमो राजा यस्येति बहुव्रीहिः। अतः सोमाख्यस्वामिनः

प्रसादादयं यजमानः सर्वा 'जयति'। तत्कथ मिति चेत्, तदुच्यते —सोमवाहनार्थे शकटे 'प्राचि तिष्ठति' प्राङ्मुखेऽवस्थिते सत्यृत्विजस्तत्र सोमम् 'आदधति' प्रक्षिपन्ति, 'तेन' सोमसम्बन्धिशकटस्य प्राङ्मुखत्वेन यजमानः प्राच्यां दिशि जयं प्राप्नोति। शकटस्थितं सोमं 'दक्षिणा परिवहन्ति' शकटं दक्षिणाभिमुखत्वेन पर्यावृत्त्य वहन्ति, तेन दक्षिणस्यां दिशि जयः। ततः शकटं प्रत्यङ्मुखम् 'आवर्त्तयन्ति', 'तेन' प्रतीच्यां दिशि जयः। 'उदीचस्तिष्ठतः' उदङ्मुखेनावस्थितात् शकटात् 'तं' सोमम् 'उपावहरन्ति', 'तेन' उदङ्मुखत्वेन उदिच्यां दिशि जयः। एवं सोमराजप्रसादात् यजमानः सर्वा दिशो जयति। अत्रार्थवादेन विधेया उन्नेयाः *; —प्राङ्मुखे शकटे सोम मादध्युः, ततो दक्षिणाभिमुखत्वेन परिवहेयुः, ततः प्रत्यङ्मुखत्वेनावर्त्तयेयुः, तत उदङ्मुखात् शकटात् सोम मुपावहरेयुरिति॥ एतत् सर्वं मभिप्रेत्यापस्तम्बः सञ्जग्राह— "प्रच्यवस्व भुवस्पत इति प्राञ्चो ऽभिप्रयाय प्रदक्षिण मावर्तन्ते"-इति ०—० "अग्रेण प्राग्वंशं प्रागीष मुदगीषं वा शकट मवस्थाप्य"-इति (१०. २९. १—११.)। वेदनं प्रशंसति—"सर्वा दिशो जयति य एवं वेद"-इति। अन्त्यशब्दादेकश्रुतस्यापि 'सर्वा दिशो जयति'-इतिवाक्यस्य द्विरावृत्तिः कर्तव्या ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां तृतीयाध्याये
तृतीयः खण्डः ॥ ३ (१४) ॥

---

* विधेयास्त्विह चत्वारः; त एव प्रदर्श्यन्ते प्राङ्मुख इत्यादिना।

॥ अथ चतुर्थः खण्डः ॥

हविरातिथ्यं निरुप्यते सोमे राजन्यागते सोमो वै राजा यजमानस्य गृहानागच्छति तस्मा एत * हविरातिथ्यं निरुप्यते तदातिथ्यस्यातिथ्यत्वं नवकपालो भवति नव वै प्राणाः प्राणानां क्लृप्त्यै प्राणानां प्रतिप्रज्ञात्यै वैष्णवो भवति विष्णुर्वै यज्ञः स्वयैवैनं तद्देवतया स्वेन छन्दसा समर्धयति सर्वाणि वाव छन्दांसि च पृष्ठानि च सोमं राजानं क्रीत मन्वायन्ति यावन्तः खलु वै राजान मनुयन्ति तेभ्यः सर्वेभ्य आतिथ्यं क्रियतेऽग्निं मन्थन्ति सोमे राजन्यागते तद्यथैवादो मनुष्यराज आगते † ऽन्यस्मिन् वार्हत्युक्षाणं ‡ वा वेहतं वा क्षदन्त एव मेवास्मा एतत् क्षदन्ते यदग्निं मन्थन्त्यग्निर्हि देवानां पशुः ॥ ४ (१५) ॥

सोमोपावहरणं विधायातिथ्येष्टिरूपं कर्म्म विधत्ते—"हविरातिथ्यं निरुप्यते सोमे राजन्यागते"—इति। प्राचीनवंशसमीपे 'सोमे राजनि' समागते सति, तस्यातिथिरूपत्वात् तदीय मातिथ्याख्यकर्म्मसम्बन्धि हविर्निर्वपेत्। यद्यप्यस्य हविषोऽतिथिर्देवता न भवति, विष्णुदेवताया वक्ष्यमाणत्वात्, तथापि सोमस्यातिथिरूपस्य उपचाराय क्रियमाणत्वादातिथ्य मिति कर्म्मनाम युक्तम्।

---

* 'तस्मादेत' ख। † 'मनुष्यराजन्नागते' क। ‡ 'वा महोक्षाणं' क, ख, ग।

एत मेवाभिप्रायं विस्पष्टयति—“क्रीतो वै राजा यजमानस्य गृहानागच्छति, तस्मा एतद्धविरातिथ्यं निरुप्यते; तदातिथ्यस्यातिथ्यत्वम्”-इति। तिथिविशेष मनपेक्ष्य भोजनार्थं कस्यचिद् गृहं प्रति अकस्मात् समागतः, सोऽतिथिः। सोमोऽपि तथाविधत्वादतिथिरित्युच्यते। तत्सम्बन्धित्वात् ‘आतिथ्यम्’ इति नामधेयम् *।

हविर्विशेषं विधत्ते—“नवकपालो भवति, नव वै प्राणाः, प्राणानां क्लृप्त्यै प्राणानां प्रतिप्रज्ञात्यै”-इति। नवसु कपालेषु संस्कृतः पुरोडाशो ‘नवकपालः’। पुरुषस्य शिरोगतेषु सप्तसु छिद्रेषु वर्तमानाः सप्त प्राणाः, अधोभागावस्थितयोर्वर्तमानौ द्वौ; एवं नवसङ्ख्याकाः प्राणाः। तथा चान्यत्र श्रूयते—“सप्त वै शीर्षण्याः प्राणा द्वाववाञ्चौ”-इति। एवं सति कपालगता नवसङ्ख्या ‘प्राणानां क्लृप्त्यै’ स्वव्यापारसामर्थ्याय भवति। सामर्थ्ये च प्राणोऽय मीदृश इति सर्वे प्राणाः प्रज्ञाता भवन्ति॥

द्रव्यं विधाय देवतां विधत्ते—“वैष्णवो भवति विष्णुर्वै यज्ञः स्वयैवैनं तद्देवतया स्वेन छन्दसा समर्धयति”-इति। विष्णुर्देवता यस्य पुरोडाशस्य सोऽयं वैष्णवः। विष्णोर्व्यापित्वात् सर्वयज्ञस्वरूपत्वम्। तथा सत्यातिथ्येष्टेरपि यज्ञत्वात् ‘विष्णुः’ स्वकीया देवता भवति। तया ‘देवतयैनं’ समृद्धं करोति। यद्यप्यत्र मन्त्राविशिष्ट-

---

* “अथ यदातिथ्यं नाम। अतिथिर्वा एष एतस्यागच्छति यत् सोमः क्रीतस्तस्मा एतद्, यथा राज्ञे वा ब्राह्मणाय वा महोक्षं वा महाजं वा पचेत्, तदह मानुषं हविर्देवाना मेव मस्मा एतदातिथ्यं करोति। तदाहुः। पूर्वोऽतिथय आश्नीयादिति यत्र वा अर्हन्त मागच्छन्ति नापचायन्ति क्रुध्यति वै स तत्र तथा ह्यपचितो भवति”-इत्यादि शत० ब्रा० ३.४.१.२,३। ‘क्रीतं सोमं शकटे संस्थाप्य प्राचीनवंशं प्रति आनीयमानेऽभिमुखे या इष्टिं निर्वपति, सैव आतिथ्या’-इति मी० अधि० टी० ४. २. १४।

स्यात् तच्छन्दो न प्रज्ञातम्, तथापि यज्ञस्य विहितत्वाद्याज्यानुवाक्ययोरवश्यम्भावेन छन्दोऽर्थसिद्धम्। तेन स्वकीयेन 'छन्दसा' यज्ञं समृद्धं करोति। ते च याज्यानुवाक्ये आश्वलायनेन दर्शिते—“इदं विष्णुर्विचक्रमे, तदस्य प्रिय मभिपाथो अश्याम्”-इति (श्रौ० ४. ५. ३.)। तयोश्च गायत्री त्रिष्टुप् चेति छन्दोद्वयम्। तेन छन्दोद्वयेनास्य यज्ञस्य समृद्धिः। अत्र शाखान्तरीयान् “अग्नेरातिथ्य मसि विष्णवे त्वा”-इत्यादिकांश्च निर्वापमन्त्रान् * अभिधाय तत्प्रशंसारूप मर्थवादं दर्शयति—“सर्वाणि वाव छन्दांसि च पृष्ठानि च सोमं राजानं क्रीत मन्वायन्ति; यावन्तः खलु वै राजान मनुयन्ति, तेभ्यः सर्वेभ्य आतिथ्यं क्रियते”-इति। गायत्रीत्रिष्टुबित्यादीनि सर्वच्छन्दांसि, बृहद्रथन्तरवैरूपादिसामसाध्यानि पृष्ठस्तोत्राणि, तदुभयाभिमानिनो देवा अनुचराः सन्तो राजानम् 'अनुयन्ति' यजमानगृहं प्रत्यागच्छन्ति। अतो राज्ञा सहागतेभ्यः 'सर्वेभ्यः' सह 'आतिथ्यम्' कर्तव्यम्। तथा सति 'अग्नेरातिथ्य मसि'-इत्यादिभिः मन्त्रैः (तै० सं० १.२.१०. १—५.)। सर्वेषा मनुचराणां गायत्र्यादीनां तृप्तिर्भवतीत्यर्थः। तथा च तैत्तिरीया आमनन्ति—“यावद्भिर्वै राजानुचरैरागच्छति, सर्वेभ्यो वै तेभ्य आतिथ्यं क्रियते; छन्दांसि खलु वै सोमस्य राज्ञोऽनुचराण्यग्नेरातिथ्य मसि विष्णवे त्वेत्याह, गायत्रिया एवैतेन करोति; सोमस्यातिथ्य मसि विष्णवे त्वेत्याह, त्रिष्टुभ एवैतेन करोति”-इत्यादि (तै० सं० ६. २. १. १.)॥

---

* अग्नेरातिथ्य मसीति पञ्च निर्वापमन्त्राः तै० सं० प्रथमे काण्डे (१. २. १०. १—५.) श्रुताः; षष्ठे (६. २. १.) च ते व्याख्याताः; आपस्तम्बेन विहिताश्च 'अग्ने रातिथ्य मसीत्येतैः प्रतिमन्त्रम्'-इति (१०. ३०. ८.)।

अथातिथ्येष्टिमध्येऽग्निमन्थनं मानवसूत्रम् आह—“चतुर्होतातिथ्य मासाद्य सप्तहूयजूंषि व्याचष्टे । यजमानं वाचयत्यसौत्वेति । पञ्चभिर्मन्थ्याः सामिधेन्यश्च”-इति (श्रौ० १०.२१.१०—१२.) । आश्वलायनोऽप्याह—“अथातिथ्येऽक्रान्ता । तस्या अग्निमन्थनम्” -इति (श्रौ० ४. ५. १, २.) । तदिदमग्निमन्थनं विधत्ते—“अग्निं मन्थन्ति सोमे राजन्यागते तद्यथैवादो मनुष्यराज आगतेऽन्यस्मिन् वार्हत्युक्षाणं वा वेहतं वा क्षदन्त एव मेवास्मा एतत् क्षदन्ते यदग्निं मन्थन्त्यग्निर्हि देवानां पशुः”-इति । लोके ‘यथैव’ ‘अदः’ अतिथिसत्करणम्, तथैव सोमस्यापि ‘तत्’ सत्करणं द्रष्टव्यम् । तावेतौ दृष्टान्तदार्ष्टान्तिकौ मनुष्यराज इत्यादिना स्पष्टीक्रियेते * । महति मनुष्यभूपतौ वा, ‘अन्यस्मिन्’ चिद् विद्यावृत्तादिसम्पन्नत्वेन ‘अर्हति’ पूज्ये महति ब्राह्मणे वा † गृहं प्रत्यागते सति अतिथिसत्कारार्थं शास्त्रकुशलाः शिष्टाः कश्चित् ‘उक्षाणं’ वृषभं ‘वा’, ‘वेहतं’ गर्भघातिनीं वृद्धां गां ‘वा’, ‘क्षदन्ते’ हिंसन्ति । अयं संस्कारः स्मृतिषु प्रसिद्धो युगान्तरधर्मो द्रष्टव्यः ‡ । ‘एव मेव’ अत्रापि ‘अग्निं मन्थन्ति’-इति ‘यद्’ अस्ति, ‘एतद्’ ‘अस्मै’ सोमायातिथिसत्कारार्थं ‘क्षदन्ते’; अग्नेर्देवपशुत्वाद्;—यथानड्वान् हव्यं वहति, तथा अग्निरपि हव्यं वहति, तस्मादग्नेः पशुसाम्यम् ॥

---

* शतपथे च श्रुत मेव मेव (११३ पृ० ‘*’) ।

† ‘द्वव्यौ भवतः । आचार्यं ऋत्विक् स्नातको राजा विवाह्यः प्रियोऽतिथिरिति’-इति गौ० ध० ५. २२, २३ ।

‡ शत० ब्रा० ३. ४. १. २ । गौ० ध० ४. १०. १ । ‘महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्’-इति याज्ञ० सं० १. १. ९ । “दाणश्चोघ्नौ सम्प्रदाने”-इति पा० ३. ४. ७३ । ‘गोघ्नोऽतिथिः’ सि० कौ० । उत्तररामचरिते (४) च—‘श्रोत्रियायाभ्यागताय वत्सतरीं महोक्षं वा निर्वपन्ति गृहमेधिनः’-इति ।

अथ मीमांसा। सप्तमाध्याये तृतीयपादे (जै० सू० १७. अधि० ६.) चिन्तितम्—

“वैष्णवे त्रिकपाले वैष्णवान्नवकपालतः ।
धर्म्मातिदेशः स्यान्नो वा विद्यतेऽत्राग्निहोत्रवत् ॥
श्रुत्या वैष्णवशब्दोऽयं देवताया विधायकः ।
स गौणवृत्ति माश्रित्य धर्म्मान्नातिदिशत्यतः ॥

आतिथ्येष्टौ वैष्णवो नवकपालो विहितः। तत्र श्रुतौ वैष्णवशब्दो राजसूयगते वैष्णवे त्रिकपाले प्रयुज्यमानोऽग्निहोत्रशब्दवन्नवकपालधर्म्मानतिदिशतीति पूर्वपक्षः। विष्णुर्देवता यस्येति विग्रहे विहिततद्धितप्रत्ययो * देवता मभिधत्ते, न तु धर्म्मान्; तस्मान्नातिदिशति”–इति ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां तृतीयाध्याये
चतुर्थः खण्डः ॥ ४ (१५) ॥

॥ अथ पञ्चमः खण्डः ॥

अग्नये मथ्यमानायानुब्रूहीत्याहाध्वर्युर॑भि त्वा देव सवितरिति सावित्रीमन्वाह॑ तदाहुर्यदग्नये मथ्यमानायानु वाचाहा॑थ कस्मात्सावित्रीमन्वाहेति॑

---

* 'सास्य देवता'–इति पा० ५. २. २४.

सविता वै प्रसवाना मीशे सवितृप्रसूता एवैनं तन्मन्थन्ति तस्मात्सावित्री मन्वाह मही द्यौः पृथिवी च न इति द्यावापृथिवीया मन्वाह तदाहुर्यदग्नये मथ्यमानायानु वाचाहाथ कस्माद् द्यावापृथिवीया मन्वाहेति द्यावापृथिवीभ्यां वा एतं जातं देवाः पर्यगृह्णंस्ताभ्या मेवाद्यापि परिगृहीतस्तस्माद् द्यावापृथिवीया मन्वाह त्वा मग्ने पुष्करादधीति तृच माग्नेयं गायत्र मन्वाहाग्नौ मथ्यमाने स्वयैवैनं तद्देवतया स्वेन छन्दसा समर्द्धयत्यथर्वा निरमन्थतेति रूपसमृद्ध मेतद्वै यज्ञस्य समृद्धं यद् रूपसमृद्धं यत्कर्म क्रियमाण मृगभिवदति स यदि न जायेत यदि चिरं जायेत राक्षोघ्नी गायत्री ऽनूच्या अग्ने हंसि न्यत्रिण मित्येता रक्षसा मपहत्यै रक्षांसि वा एनं तर्ह्यालभन्ते यर्हि न जायते यर्हि चिरं जायते स यद्येकस्या मेवानूक्तायां जायेत यदि द्वयोरुत ब्रुवन्तु जन्तव इति जाताय जातवती मभिरूपा मनुब्रूयाद्यद्यज्ञेऽभिरूपं तत्समृद्धं मा यं हस्ते न खादिन मिति हस्ताभ्यां ह्येनं मन्थन्ति शिशुं जात मिति शिशुरिव वा एष प्रथमजातो यदग्निर्न बिभ्रति विशा मग्निं स्वध्वर मिति यद्वै देवानां नेति तदेषा मो३मिति प्र देवं

देववीतये भरता वसुवित्तम मिति प्रक्रियमाणायाभिरूपा यद्यज्ञे ऽभिरूपं तत्समृद्ध मा स्वे योनौ निषीदत्वित्येष ह वा अस्य स्वो योनिर्यदग्निरग्ने रा जातं जातवेदसीति जात इतरो जातवेदा इतरः प्रियं शिशीतातिथि मित्येष ह वा अस्य प्रियोऽथितिर्यदग्निरग्नेः स्योन आ गृहपति मिति शान्त्या मेवैनं तद्दधात्यग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा हव्यवाड् जुह्वास्य इत्यभिरूपा यद्यज्ञे ऽभिरूपं तत् समृद्धं त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन्त्सतेति विप्र इतरो विप्र इतरः सन्नितरः सन्नितरः सखा सख्या समिध्यस इत्येष ह वा अस्य स्वः सखा यदग्निरग्नेस्तम्मर्जयन्त सुक्रतुं पुरो यावान माजिषु स्वेषु क्षयेषु वाजिन मित्येष ह वा अस्य स्वः क्षयो यदग्निरग्नेर् यज्ञेन यज्ञ मयजन्त देवा इत्युत्तमया परिदधाति यज्ञेन वै तद्देवा यज्ञ मयजन्त यदग्निनाग्नि मयजन्त ते स्वर्गं लोक मायंस्तानि धर्माणि प्रथमान्यासन् ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवा इति छन्दांसि वै साध्या देवास्ते ऽग्रे ऽग्निनाग्नि मयजन्त ते स्वर्गं लोक मायन्नादित्याश्चैवेहासन्नङ्गिरसश्च ते ऽग्रेऽग्निनाग्नि मयजन्त

ते स्वर्गं लोकमायन्नेषा वा आहुतिरहुताहुतिर्यदि ह वा अप्यब्राह्मणोक्तो यदि दुरुक्तोक्तो यजतेऽथ हैवास्याहुतिर्गच्छत्येव देवान् न पाप्मना संसृज्यते गच्छत्यस्याहुतिर्देवान् नास्याहुतिः पाप्मना संसृज्यते य एवं वेद ता एतास्त्रयोदशान्वाह रूपसमृद्धा एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदति तासां त्रिः प्रथमा मन्वाह त्रिरुत्तमां ताः सप्तदश सम्पद्यन्ते सप्तदशो वै प्रजापतिर्द्वादश मासाः पञ्चर्तवस्तावान्त्संवत्सरः संवत्सरः प्रजापतिः प्राजापत्यायतनाभिरेवाभी राध्नोति य एवं वेद त्रिः प्रथमां त्रिरुत्तमा मन्वाह यज्ञस्यैव तद् बर्सौ नह्यति स्थेम्ने बलायाविस्रंसाय ॥ ५ (१६) ॥

अग्निमन्थनं विधाय तत्रत्या ऋचो विधातुं प्रैषमन्त्रं विधत्ते —"अग्नये मथ्यमानायानुब्रूहीत्याहाध्वर्युः"-इति। तत्र प्रथमामृचं विधत्ते —"अभि त्वा देव सवितरिति सावित्री मन्वाह"-इति। सविता देवता यस्या ऋचः, सा सावित्री। अत्र च अभि त्वा देव सवितरिति सविता मन्त्रदेवत्वेन श्रूयते, तस्मादियमृक् (सं० १. २४. ३.) सावित्री। अत्र प्रैषानुवचनमन्त्रयोर्वैयधिकरण्यरूपं चोद्य मुद्भावयति—"तदाहुर्यदग्नये मथ्यमानायानु वाचाहाथ कस्मात्सावित्री मन्वाहेति"-इति। 'तत्' तत्र ब्रह्मवादिनश्चोद्यम् 'आहुः'। 'यत्' यस्मात्कारणादध्वर्युः 'अग्नये मथ्य-

मानाय'-इति प्रैषार्थे 'अनु'शब्दः 'ब्रूहि' प्रैष[illegible] 'आह'। 'तत्' तस्मात् कारणात् आग्नेयी होत्रानुवक्तव्या; तां [illegible] 'अथ' अनन्तरं 'कस्मात्' कारणाद्धोता 'सावित्रीम्' ऋचम् 'अनु'ब्रूयात् 'इति'-शब्दश्चोद्यसमाप्त्यर्थः। तस्य चोद्यस्योत्तरमाह--"सविता वै प्रसवानामीशे, सवितृप्रसूता एवैनं तन्मन्थन्ति; तस्मात् सावित्रीमन्वाह"-इति। योऽयं 'सविता' देवः, स एव 'प्रसवानां' कर्मस्वनुज्ञातानाम् 'ईशे' स्वामी भवति। [illegible] सति 'तत्' तेन मन्त्रपाठेन सवित्रानुज्ञाताः 'एव' सन्तः 'एनम् अग्निं' 'मन्थन्ति'; 'तस्मात्' कारणात् 'सावित्रीम्' ऋचम् 'अनु'ब्रूयात् ॥

द्वितीयामृचं विधत्ते-"मही द्यौः पृथिवी च न इति द्यावापृथिवीयामन्वाह" इति (सं० [illegible].२२.[illegible])। द्यौश्च पृथिवी च देवते यस्या ऋचः, सेयं द्यावापृथिवीया। अत्रापि पूर्ववच्चोद्यपरिहारौ दर्शयति -"तदाहुर्यदग्नये मथ्यमानायानुवाचाहाथ कस्माद् द्यावापृथिवीयामन्वाहेति; द्यावापृथिवीभ्यां वा एतं जातं देवाः पर्यगृह्णन्; ताभ्यामेवैनं परिगृह्णाति; तस्माद् द्यावापृथिवीयामन्वाह" इति। पुरा [illegible] उत्पन्नमग्निं द्यावापृथिवीभ्यां परिगृहीतवन्तः, 'ताभ्यामेव' [illegible] ताभ्यामेवायं परिगृहीतः [illegible] —पावकोऽग्निर्भूम्या परिगृहीतः, प्रकाशकः सूर्यरूपोऽग्निर्दिवा परिगृहीतः। 'तस्माद्' [illegible] परिग्रहाय द्यावापृथिवीदेवताकायाः ऋचोऽनुवचनं युक्तम् ॥

तृतीयामन्तिमामृचं विधत्ते —"त्वामग्ने पुष्करादधीति (सं० ६.१६.१३--१५) [illegible] आग्नेयं गायत्रम् [illegible] अग्नौ मथ्यमाने स्वयैवैनं तद् देवतया स्वेन छन्दसा समर्धयति"-इति। अस्य तृचस्य अग्निदेवताकत्वेन वैयधिकरण्यदोषाभावात् स्वयैवैतया

दिना प्रशंसैव क्रियते । गायत्रीच्छन्दोऽग्नेः स्वकीयम्; उभयोः प्रजापतिमुखजन्यत्वात् (१८ पृ०) । प्रथमाया ऋचि द्वितीयपादमनूद्य प्रशंसति—"अथर्वा निरमन्थतेति रूपसमृद्धमेतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं; यत् कर्म क्रियमाण मृगभिवदति"-इति । अथर्वाख्य ऋषिः निःशेषेण मन्थनं कृतवानित्युच्यते । तदेतद्वचनमग्निमन्थनस्यानुकूल्येन रूपेण समृद्धम् ॥

इत्थमुक्तास्वग्निमन्थनास्वृक्षु पञ्चसु, अनुक्तासु षष्ठप्रभृतीनामृचामनुवचनात् पूर्वं नैमित्तिकाः काश्चिदृचो विधत्ते—"स यदि न जायेत, यदि चिरं जायेत, राक्षोघ्न्यो गायत्र्योऽनूच्याः"-इति । पञ्चानामृचामनुवचने सति तस्मिन् काले 'यदि' 'सः' अग्निः न उत्पद्येत, तत उत्पत्तिलिङ्गं धूमादिरूपं यदि न दृश्येत; दृश्यमानेऽपि वा लिङ्गे 'यदि' सहसा नोत्पद्यते, किन्तु विलम्बेन; तदानीं सहसा तदुत्पत्त्यर्थं रक्षोहननलिङ्गोपेता गायत्रीच्छन्दस्का ऋचोऽनुब्रूयात् । प्रतीकग्रहणेन ता ऋचो दर्शयति—"अग्ने हंसि न्यत्रिणमित्येताः"-इति (सं॰ १०.११८. १—९.) । अग्ने हंसीत्यादिके सूक्ते नवर्चो विद्यन्ते; एता रक्षोहननलिङ्गकाः* । तासामनुवचने प्रयोजनमाह—"रक्षसामपहत्यै"-इति । कः प्रसङ्गो रक्षसामित्याशङ्क्याह—"रक्षांसि वा एनं तर्ह्यालभन्ते,—यर्हि न जायते यर्हि चिरं जायते"-इति । यस्मिन् काले मथ्यमानस्य वह्नेः सर्वथानुत्पत्तिः, विलम्बो वा भवेत्, तदानीम् 'एनं'

---

* तथाचानुक्रम्यते—'अग्ने हंस्युरुक्षय आमहीयव आग्नेयं राक्षोघ्नं गायत्रं तु'-इति । आश्वलायनेनापि सूचितम्—'अजायमाने त्वं तस्मिन् वाचस्तोऽर्ध्यं हंसि न्यत्रिणमिति सूक्तमावर्तयेत'-इति श्रौ० २. १६. ३, ४ ।

वह्निं 'रक्षांसि' एव 'आत्मभक्ते' संपृच्यन्ति, प्रतिबध्नन्तीत्यर्थः। ततो रक्षोहननाय ता ऋचः पठनीयाः ॥

नैमित्तिका ऋचो विधाय प्रकृता मेव षष्ठी मृचं विधत्ते—"स यद्येकस्या मेवानूक्तायां जायेत, यदि द्वयोरथोत ब्रुवन्तु जन्तव इति; जाताय जातवती मभिरूपा मनुब्रूयाद्"-इति। रक्षोघ्नीना मृचां मध्ये 'यद्येकस्या मेव' पठितायां 'सः' वह्निः 'जायेत', 'यदि' वा 'द्वयोः' पठितयोरुत्पद्येत। एवं तृतीयादीना मुपलक्षणम्। 'अथ' इदानी मुत्पत्तिक्षण एव 'उत ब्रुवन्तु'-इत्येताम् (सं० १. ७४. ३.) 'अनुब्रूयात्'। सा च 'जातायाभिरूपा' जातस्याग्नेरनुकूला। तदेवानुकूल्यं 'जातवतीम्'-इतिशब्देन स्पष्टीक्रियते। जातं जन्मवाचि पदं तदस्या मस्तीति जातवती; तस्या ऋचो द्वितीयः पाद एवं पठ्यते, "उदग्निर्वृत्रहाजनि"-इति। तस्मिन् अजनीति जन्मवाचकं पद मस्ति। अस्या ऋचोऽभिरूपत्वं प्रशंसति—"यद्यज्ञेऽभिरूपं तत्समृद्धम्"-इति ॥

सप्तमी मृचं विधत्ते—"आ यं हस्ते न खादिनम्"-इति। अनुब्रूयादिति शेषः। सा च संहितायां पठिता—"आ यं हस्ते न खादिनं शिशुं जातं न बिभ्रति। विशा मग्निं स्वध्वरम्"-इति। (सं० ६. १६. ४०.)। तस्या अय मर्थः—'यं'-शब्दः प्रसिद्धवाची, 'न'-शब्द उपमार्थः। 'यं' मन्थनेन प्रसिद्धम् 'अग्निं' 'हस्ते न' हस्ते इव ऋत्विजः 'आ बिभ्रति' समन्ताद्धारयन्ति, तत्तदृत्विजां हस्ताभ्यां मन्थनं हस्तधारणसदृशं 'शिशुं जातम् न'-इत्यनेन दृष्टान्तोऽभिधीयते,—जातं शिशु मिव; यथा सद्यः समुत्पन्नं शिशुं हस्ताभ्यां धारयन्ति, तद्वत्। कीदृश मग्निम्? 'विशां स्वध्वरं' शोभनाध्वरो

यागो यस्याग्नेः सोऽयं 'स्वध्वरः', 'विशां' प्रजानाम् ऋत्विग्-यजमानरूपाणा मध्वरनिष्पादकम् । पुनरपि कीदृशम् ? 'खादिनं' हविरादीनां भक्षक मिति । अस्या ऋचि प्रथमपादे ब्राह्मणेन विवक्षित मर्थं दर्शयति—“हस्ताभ्यां ह्येनं मन्थन्ति”-इति । 'हि' यस्मात् 'एनम्' अग्निं 'हस्ताभ्यां मन्थन्ति', तस्माद्धस्ते धारण मुपपद्यते । द्वितीयपादे पूर्वभाग मनूद्य तात्पर्यं दर्शयति—“शिशुं जात मिति शिशुरिव वा एष प्रथमजातो यदग्निः”-इति । योऽग्निर्मन्थनेन प्रथम मुत्पन्नः, एष शिशुना सदृश इत्येतस्य भागस्य तात्पर्यम् । द्वितीयपादस्योत्तरभागं तृतीयपादं चानुवदति—“न बिभ्रति विशा मग्निं स्वध्वरम्”-इति । अत्र नेति पदं व्याचष्टे—“अह देवानां नेति तदेषा मो३मिति”-इति । 'देवानां' सम्बन्धिनि मन्त्रे क्वचित् क्वचित् 'न इति' पदं 'यद्' एवास्ति, 'तद्' 'एषां' देवप्रतिपादकानां मन्त्राणां 'नेति' पदम्, 'ओ३म्'-इत्येतस्मिन्नर्थे वर्त्तते* । लोके प्रतिषेधवाची नेति शब्दः, वेदे ओङ्कारवाची च ; 'न', 'ओम्'-इत्यस्य पदस्यार्थे वर्त्तते । तथा सति लोकवैपरीत्यस्य दृष्टत्वात् उपमार्थोऽपि वक्तुं शक्यते । तदेतदुभयं निरुक्तकारेणोक्तम्—“नेति प्रतिषेधार्थीयो भाषायाम्”-इति, “उपरिष्टादुपाचार उपमार्थीयः”-इति च (निरु० १.२.१.)। अयं च नेतिशब्दः 'शिशुं जातं न'-इत्युपमेयादुपरिष्टात्प्रयुज्यते, तस्मादुपमार्थीयः । 'देवानाम्'-इत्यत्र देवप्रतिपादकानां मन्त्राणां सम्बन्धीति व्याख्यानम् ; यद्वा, दकारवकारयोर्विपर्यासेन वेदानां सम्बन्धीति व्याख्येयम् ॥

---

* 'यद्वै नेत्यर्चि ओ मिति तत्'-इति च शत० ब्रा० १. ४. १. ३०, [illegible]

अस्ति च परस्तात्—'ओ मिति वै दैवं तथेति मानुषम्'-इति ७, ५. ६ ।

अष्टमीमृचं विधत्ते—"प्र देवं देववीतये भरता वसुवित्तममिति प्रक्रियमाणायाभिरूपा"-इति। अनुवक्तव्येति शेषः *। आहवनीये प्रक्षिप्यमाणोऽयं मथितोऽग्निः प्रक्रियमाणः। तस्यैव ऋगनुरूपा। कथमिति चेत्, तदुच्यते;—'देववीतये' देवानां कामायाभिलाषाय 'वसुवित्तमम्' अतिशयेन हविर्लक्षणधनाभिज्ञं 'देवं' मथितमग्निम्, हे ऋत्विजः! 'प्र भरत' आहवनीये प्रहरत, प्रक्षिपत; तस्मात् प्रक्रियमाणानुरूपत्वम्। अत 'जातायानुब्रू३हि'† -इत्यध्वर्युणा प्रेषितो होता, पूर्वोक्ताम् 'उत ब्रुवन्तु जन्तवः'-इत्येतामनुब्रूयात्। तथा 'प्रक्रियमाणायानुब्रूहि'-इत्येवं प्रेषितः 'प्र देवम्'-इत्यादिकामृचं ब्रूयात्। एवमुत्तरा अपि। तदेतत्सर्वं तैत्तिरीयाः सङ्गृह्यामनन्ति—"अग्नये मथ्यमानायानुब्रूहीत्याह, सावित्रीमृचमन्वाह, सवितृप्रसूत एवैनं मन्थति; जातायानुब्रूहि,—प्रक्रियमाणायानुब्रूहीत्याह, काण्डे काण्ड एवैनं क्रियमाणे समर्धयति गायत्रीः सर्वा अन्वाह"-इति (सं० ६. ३. ५. ३.)। प्र देवमित्यस्या ऋचः प्रक्रियमाणायाभिरूपत्वे यज्ञाङ्गसमृद्धिरूपं प्रयोजनं दर्शयति—"यद्यज्ञेऽभिरूपं तत् समृद्धम्"-इति। अस्या ऋचस्तृतीयपादमनुवदति—"आ स्वे योनौ निषीदत्विति"-इति। अयं मथितोऽग्निरागत्य 'स्वे योनौ' स्वकीयस्थाने आहवनीयाख्ये नितरामुपविशत्विति पादस्यार्थः। तस्मिन् पादे योनिपदं व्याचष्टे "एष ह वा अस्य स्वो योनिर्यदग्निरग्नेः"-इति। आहवनीयाख्यो यः 'अग्निः' अस्ति, 'एष वा' 'अस्य' मथितस्य 'अग्नेः' स्वकीयं स्थानम्॥

---

* 'प्र देवं देववीतय इति (सं० ६. १६. ४१.) च'-इति आश्व० श्रौ० २. १६. ७।

† 'ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः'-इति (पा० ८. २. ९१.) प्लुतिः।

नवमीं सूचं विधत्ते—"आ जातं जातवेदसीति"-इति। अनुब्रूयादिति शेषः। सा चैवं संहितायामाम्नाता—"आ जातं जातवेदसि प्रियं शिशीतातिथिम्। स्योन आ गृहपतिम्"-इति (सं० ६. १६. ४२.)। अस्याय मर्थः—हे ऋत्विजः! इदानीं 'जातम्' एन मग्निम्, पूर्व मेव स्थिते 'जातवेदसि' आहवनीयेऽग्नौ 'शिशीत' शाययत, स्थापयत। कीदृशम्? 'प्रियम्' आहवनीयस्य प्रीतिहेतुम्, 'अतिथिम्' इदानी मागतत्वादतिथिरूपम्, 'स्योने' सुखकरे आहवनीये 'आ गृहपतिम्' आगत्य गृहस्वामित्वेन वर्त्तमानम्। तस्या ऋचि प्रथमपादे पदद्वयं व्याचष्टे—"जात इतरो जातवेदा इतरः" इति। 'इतरः' इदानीं मथितोऽग्निः, अद्यः समुत्पन्नत्वात् 'जातः'-इत्युच्यते; 'इतरः' पूर्वसिद्धाहवनीयोऽग्निरिदानीं जात मिम मग्निं वेत्तीति 'जातवेदाः'-इत्युच्यते। द्वितीयपाद मनूद्य व्याचष्टे—"प्रियं शिशीतातिथि मित्येष ह वा अस्य प्रियोऽतिथिर्यदग्निरग्नेः" इति। यः 'अग्निः' मथनोत्पन्नः, 'एषः' एव 'अस्य' पूर्वसिद्धस्याहवनीयस्य 'अग्नेः' 'प्रियः' च 'अतिथिः' च। तृतीयपाद मनूद्य व्याचष्टे—"स्योन आ गृहपति मिति, शान्त्या मेवैनं तद्दधाति"-इति। 'स्योने' सुखरूपे पूर्वाग्नौ स्थापनं यदस्ति, 'तत्' तेन स्थापनेन नूतन मेव मग्निं 'शान्त्या मेव' स्थापयति; पूर्वाग्नेः सुखनिवासहेतुत्वात् शान्तित्वम्॥

दशमीं सूचं विधत्ते—"अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा, हव्यवाड् जुह्वास्य इत्यभिरूपा; यद्यज्ञे अभिरूपं तत्समृद्धम्"-इति। अनूच्येति शेषः। अस्याय मर्थः—'अग्निना' आधारभूतेनाहवनीयेनानुगृहीत इदानीं प्रसूतः 'अग्निः' सम्यग् दीप्यते।

कीदृशोऽग्निः ? 'कविः' विद्वान्, आकूताभिज्ञः ; अतएव 'गृहपतिः' यजमानस्य गृहस्य पालकः, 'युवा' नूतनः, देवेभ्यो हव्यं वहतीति 'हव्यवाट्', होमसाधनभूतः । जुहूरेवास्यं मुखं यस्यासौ 'जुह्वास्यः'। सेयमृक् (सं० १. १२. ६.) प्रक्रियमाणाग्निगुणकीर्त्तनात् तस्याग्नेरनुरूपा । तदेतदानुरूप्यं प्रशंसति—'यद् यज्ञे ऽभिरूपं तत् समृद्धम्"-इति ॥

एकादशीमृचं विधत्ते—"त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन्त्सता"-इति । अनुब्रूयादिति शेषः । हे नूतन ! 'अग्ने !' 'त्वं' सिद्धेन आहवनीयेन 'अग्निना', 'समिध्यसे'-इति तृतीयपादगतेन* पदेन योज्यम् । उभयोरप्यग्न्योर्विद्यमानत्वात् सम्यगनुष्ठाननिर्वाहकत्वाद् वा सच्छब्दवाच्यत्वम् । "अग्ने महाꣳ असि ब्राह्मण भारत"-इति (तै० ब्रा० ३.५.२.) श्रुतेः ब्राह्मणजात्यभिमानित्वाद् विप्रत्वम् । तदेतदुभयं विशदयति—"विप्र इतरो विप्र इतरः, सन्नितरः सन्नितरः"-इति । तृतीयपादमनूद्य व्याचष्टे—"सखा सख्या समिध्यस इत्येष ह वा अस्य स्वः सखा यदग्निरग्नेः"-इति । यः अग्निः आहवनीयाख्यः 'एषः' एव 'अस्य अग्नेः' मथितस्य स्वकीयः 'सखा' ॥

द्वादशीमृचं विधत्ते—"तं मर्जयन्त सुक्रतुं पुरोयावानमाजिषु, स्वेषु क्षयेषु वाजिनमिति"-इति (सं० ८. ८४. ८.) । अनुब्रूयादिति शेषः । हे ऋत्विजः ! 'तं' नूतनमग्निं 'मर्जयन्त' शोधयन्त । कीदृशम् ? शोभनस्य क्रतोः निर्वाहकम्, 'आजिषु' सङ्ग्रामेषु 'पुरोयावानं' पुरोगन्तारम्, 'स्वेषु क्षयेषु' स्वकीयेषु गृहेषु आहवनीयादिषु 'वाजिनम्' अन्नवन्तं गच्छन्तं वा ; जयशब्देन

---

* स एष तृतीयपादः—"सखा सख्या समिध्यसे"-इति सं० ८. ४३. १४ ।

अत्र आहवनीयाग्निरूपमन्त्रविवक्षां दर्शयति— "[illegible] [illegible] सत्यो यदग्निरग्ने:"-इति ॥

अथोत्तमा मृचं विधत्ते—"यज्ञेन यज्ञ मयजन्त देवा इत्युत्तमया परिदधाति"-इति। (सं० १. १६४. ५०; १०. ९०. १६.)। 'उत्तमया' चानया 'परिदधाति' अनुवचनं समापयेत्। यदाहाश्वलायनः—"यज्ञेन यज्ञ मयजन्त देवा इति परिदध्यात्। सर्वासाम् परिधानीयेति विद्याद्"-इति (श्रौ० २. १६. ७, ८.)। उदाहृत मृचः पादं व्याचष्टे—"यज्ञेन वै तद्देवा यज्ञ मयजन्त यदग्निनाग्नि मयजन्त ते स्वर्गं लोक मायन्"-इति। 'अग्निना' क्रियमाणेन नूतनेन, पूर्वसिद्ध माहवनीयम् 'अग्निम्' 'अयजन्त' पूजितवन्तः इति 'यद्' अस्ति, तेन कारणेन 'यज्ञेन वै देवा यज्ञ मयजन्त'-इत्युच्यते। उभौ यज्ञशब्दौ स्वकारणभूत मग्निद्वय मुपलक्षयतः। देवशब्देनेदानीं देवत्वेन वर्त्तमानाः पूर्वसिद्धा ऋत्विजो विवक्षिताः; 'ते' च पूर्व मनुष्ठितेन 'स्वर्गं लोकं' प्राप्ताः। अवशिष्टं पादत्रयं पठति—"तानि धर्माणि प्रथमान्यासन्, ते ह नाकं महिमानः सचन्त, यत्र पूर्वे साध्याः सन्ति देवाः"-इति। इदानीं देवत्वेन वर्त्तमानैः पूर्वसिद्धैः ऋत्विग्-यजमानैः यानि ज्योतिष्टोमादीनि कर्माण्यनुष्ठितानि, 'तानि' सर्वाणि 'प्रथमानि' 'धर्माणि' आदिसृष्टिकालीनानि सुकृतिसाधनानि 'आसन्'। 'ते ह' ते चानुष्ठातारः 'महिमानः' महत्त्वोपेताः 'नाकं सचन्त'। कं सुखम्, अकं दुःखम्, तद्रहितो भोगो नाकः, सम्प्राप्तवन्तः। 'यत्र' यस्मिन् लोके 'पूर्वे' साध्याः पूर्वसृष्टिगताः यज्ञादिसाधकाः, इदानीं यज्ञादिभिः साध्यत्वेन वर्त्तमानाः, 'देवाः' 'सन्ति' वर्तन्ते; तं नाकं सचन्तेति पूर्वत्रान्वयः। चतुर्थपादस्य तात्पर्यं दर्शयति—

"छन्दांसि वै साध्या देवास्ते ऽग्रे ऽग्निनाग्नि मयजन्त, ते स्वर्गं लोक मायन्"-इति। 'छन्दांसि वै' गायत्र्यादिच्छन्दोऽभिमानिन एव 'साध्याः' इदानीं जनैः पूज्याः 'देवाः'। 'ते' एव पूर्वसृष्टेन 'अग्निना' मथितेनाग्निना आहवनीयम् 'अग्निम्' अयजन्त, पूजितवन्तः। 'ते' च तेन यागेन 'स्वर्गं' प्राप्ताः। न केवलं छन्दोदेवा एव चतुर्थपादे विवक्षिताः, किन्तु अन्येऽपीत्याह—"आदित्याश्चैवेहासन्नङ्गिरसश्च ते ऽग्रे ऽग्निनाग्नि मयजन्त ते स्वर्गं लोक मायन्"-इति। इदानीं मादित्यशब्देनाभिधेया ये देवाः, अङ्गिरःशब्देनाभिधेया ये च ऋषयः, ते द्विविधा अपि 'इहैवासन्' भूमावेव पूर्वसृष्टौ मनुष्यरूपेणावस्थिताः। 'तेऽग्रे'-इत्यादि पूर्ववत्। तदेवं चतुर्थपादतात्पर्यद्वय मुक्तम्। यद्वा, छन्दांसीत्यादिक मेव चतुर्थपादतात्पर्यम्, आदित्यादिक मितरपादतात्पर्य मिति द्रष्टव्यम् * ॥

येय माहवनीयेऽग्नौ मथिताग्निप्रक्षेपलक्षणा आहुतिः, तां प्रशंसति—"सैषा स्वर्ग्याहुतिर्यदग्न्याहुतिर्यदि ह वा अप्यब्राह्मणोक्तो यदि दुरुक्तोक्तो यजतेऽथ हैषाहुतिर्गच्छत्येव देवान्, न पाप्मना संसृज्यते"-इति। अग्निरूपद्रव्याहुतिर्या विद्यते, 'सैषा' स्वर्गाय हिता †। 'यदि ह' इत्यादिना स्वर्गत्व मेव स्पष्टीक्रियते। ब्राह्मणं विधायकं वाक्यम्, तेन प्रेरितो ब्राह्मणोक्तः,—तद्विपरीतः; परित्यक्तमन्त्रः स्वबुद्ध्यैव यत् किञ्चिद् योऽनुष्ठति, सोऽयम् 'अब्राह्म-

---

* एष मन्त्रः सायणेन संहिताभाष्ये पञ्चधा व्याख्यातः ; यास्केन च स्वमते आख्यानमते चेति द्विधा व्याख्यातः (१२. ४. ६, ७.)। आदित्यादीना मप्यर्था नैरुक्तमते विभिन्ना एव (२. ४. १ ; ११. २. ४.)।

† स्वर्ग्या। 'तस्मै हितम्'-इति (पा० ५. १. ५.)।

क्तोक्तः । 'पौरुषेयार्थविरुद्धं विधिवाक्यं दुरुक्तम्, तेन प्रेरितो दुरुक्तोक्तः । अथवा स्मृतिषु अब्राह्मणत्वेन प्रतिपादितो यो ऽस्ति, सोऽय मब्राह्मणोक्तः । तद्यथा,—

"अब्राह्मणास्तु षट् प्रोक्ता इति शातातपोऽब्रवीत् ।
आद्यस्तु राजभृत्यः स्याद् द्वितीयः क्रयविक्रयी ॥
तृतीयो बहुयाज्याख्यश्चतुर्थोऽश्रौतयाजकः ।
पञ्चमो ग्रामयाजी च षष्ठो ब्रह्मबन्धुः स्मृतः ॥"-इति * ।

यद्यपि याजनाध्यापनप्रतिग्रहा ब्राह्मणस्य जीवनहेतुत्वेन विहितत्वाद् † अनिषिद्धाः, तथापि यावता जीवनं निष्पद्यते, तावदेव याजनं शास्त्रेणाङ्गीकृतम् ; यस्तु सत्यपि जीवने धनाधिक्यवाञ्छया याजनशीलः, सोऽत्र बहुयाजी विवक्षितः । यः पुमान् श्रौतकर्मणि विरक्तः, अनादरेण स्वयं श्रौतं नानुतिष्ठति, अन्यानपि नानुष्ठापयति, किन्तु स्मार्तकं परः सन्ननुतिष्ठत्यनुष्ठापयति च, सोऽय मश्रौतयाजकः । ग्रामे नगरे च योग्या अयोग्याश्च यावन्तः सन्ति, धनाभिलाषेण तावतां सर्वेषां याजको ग्रामनगरयाजी । यः पुमान् प्रातः सूर्योदयात्प्राक् सन्ध्यां नोपास्ते, सायं चास्तमयात्प्राक् नोपास्ते, सोऽयं ब्रह्मबन्धुः । एते षडब्राह्मणत्वे स्मृतिषूक्ताः । दुष्टान्यपशब्दरूपाणि वचनानि दुरुक्तानि, तैरभिशस्तो दुरुक्तोक्तः । 'अब्राह्मणोक्तः' वा 'दुरुक्तोक्तः' वा यद्यपि 'यजनं', 'अथ' अपि

---

* "अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववादिना । आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी । तृतीयो बहुयाज्यः स्याच्चतुर्थो ग्रामयाजकः । पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च । अनागतां तु यः पूर्वां सादित्यां चैव पश्चिमाम् । नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः"—इति पाठः आ० त० धृत ।

† "षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका । याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" —मनु० सं० १०. ७६ ।

'एषा' आहवनीये हुता मथिता अग्न्याहुतिः 'देवान्' प्राप्नोत्येव । ततो यजमानस्य पापसंसर्गो 'न' भवति ॥

वेदनं प्रशंसति—"गच्छत्यस्याहुतिर्देवान् नास्याहुतिः पाप्मना संसृज्यते य एवं वेद"-इति । उक्तार्थवेदिता यद्यपि यत्किञ्चित् कर्म विकलमनुतिष्ठति, तथापि तत्सर्वं सकलं भवति ॥

न्यूनाधिकमन्त्राभ्रमव्युदासाय विहितानामृचां सङ्ख्यां दर्शयति—"ता एतास्त्रयोदशान्वाह रूपसमृद्धाः"-इति । रात्रीभीतां नैमित्तिकत्वात् (१२१पृ० ७पं०) परित्यागेनेतरास्त्रयोदशसङ्ख्याकाः* । ताश्च मथ्यमानस्य जायमानस्य प्रक्षिप्यमाणस्याहवनीयेन संगम्यमानस्य च प्रतिपादनेनानुकूलेनैव रूपेण समृद्धाः । तामेतां समृद्धिं प्रशंसति—"एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदति" इति । आद्यन्तयोः ऋचोः आवृत्तिविधिम्, आवृत्तानां मन्त्राणां प्रशंसां वेदनप्रशंसाम्, आवृत्तिप्रशंसां च दर्शयति—"तासां त्रिः प्रथमामन्वाह, त्रिरुत्तमां, ताः सप्तदश सम्पद्यन्ते, सप्तदशो वै प्रजापतिर्द्वादश मासाः पञ्चर्तवस्तावान्संवत्सरः, संवत्सरः प्रजापतिः, प्राजापत्या एता आभिरेवाभी राध्नोति य एवं वेद, त्रिः प्रथमां त्रिरुत्तमामन्वाह यज्ञस्यैव तद् बर्सौ नह्यति स्थेम्ने बलायाविस्रंसाय"-इति । पूर्ववद् व्याख्येयम् (१०६ पृ०) ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां तृतीयाध्याये
पञ्चमः खण्डः ॥ ५ (१६) ॥

---

* एतास्त्रयोदश नैमित्तिकेतरमन्थनहेतवः अनुक्रमेणैवैकस्मिन्नाम्नाताः (३. ५. ११.)। चतुर्था-स्य नैमित्तिकसहिताः शाकल्येन द्वाविंशतिः ऋचो विहिताः ।

॥ अथ षष्ठः खण्डः ॥

समिधाग्निं दुवस्यताप्यायस्व समेतु त इत्याज्यभागयोः पुरोनुवाक्ये भवत आतिथ्यवत्यौ रूपसमृद्धे एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदति सैषाग्नेय्यतिथिमती न सौम्यातिथिमत्यस्ति यत्सौम्यातिथिमती स्याच्छश्वत्सा स्यादित्येतत्त्वेवैषातिथिमती यदापीनवती यदा वा अतिथिं परिवेविषत्यापीन इव वै स तर्हि भवति तयोर्जुषाणेनैव यजतीदं विष्णुर्विचक्रमे तदस्य प्रियमभि पाथो अश्यामिति वैष्णव्यौ त्रिपदामनूच्य चतुष्पदया यजति सप्त पदानि भवन्ति शिरो वा एतद्यज्ञस्य यदातिथ्यं सप्त वै शीर्षन् प्राणाः शीर्षन्नेव तत्प्राणान् दधाति होतारं चित्ररथमध्वरस्य प्र प्रायमग्निर्भरतस्य शृण्व इति स्विष्टकृतः संयाज्ये भवत आतिथ्यवत्यौ रूपसमृद्धे एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदति त्रिष्टुभौ भवतः सेन्द्रियत्वायेळान्तम् भवतीळान्तेन वा एतेन देवा अराध्नुवन्यदातिथ्यं तस्मादिळान्तमेव कर्त्तव्यम् प्रयाजानेवात्र यजन्ति नानुयाजान् प्राणा वै प्रयाजानुयाजास्ते य इमे शीर्षन् प्राणास्ते प्रया-

जा येऽवाञ्चस्तेऽनुयाजाः स योऽत्रानुयाजान्यजेद्यथेमान् प्राणानालुप्य शीर्षन्धित्सेत्तादृक्तदतिरिक्तं तत् स मु वा इमे प्राणा विद्धे ये चेमे ये चेमे तद्यदेवात्र प्रयाजान्यजन्ति नानुयाजांस्तत्र स काम उपाप्तो योऽनुयाजेषु योऽनुयाजेषु ॥ ६ (१७) ॥

॥ इत्यैतरेयब्राह्मणे प्रथमपञ्चिकायां तृतीयोऽध्यायः ॥३॥

आतिथ्येष्टिमध्ये कर्तव्य मग्निमन्थनमुक्त्वा तदिष्टिशेषं विधत्ते—"समिधाग्निं दुवस्यताप्यायस्व समेतु त इत्याज्यभागयोः पुरोनुवाक्ये भवत आतिथ्यवत्यौ रूपसमृद्धे; एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदति"-इति। "समिधाग्निम्"-इति (मं ८. ४४. १.) प्रथमाज्यभागस्य पुरोनुवाक्या। "आप्यायस्व समेतु ते"-इति (मं १. ९१. १६.) द्वितीयस्य। प्रथममन्त्रस्य द्वितीयपादे 'घृतैर्बोधयतातिथिम्'-इति श्रूयमाणत्वात् 'आतिथ्यवत्यौ'। तदेतदाक्षिपति—"सैषाग्नेय्यतिथिमती, न सौम्यातिथिमत्यस्ति, यत्सौम्यातिथिमती स्याच्छन्दस्ता स्यात्"-इति। सौम्या तु अतिथिशब्दोपेता नास्ति; आप्यायस्वेत्यस्यामृचि अतिथिशब्दाश्रवणात्। यदि सौम्यातिथिशब्दोपेता 'स्यात्', तदानीं 'शम्यत्' अवयव 'सा' सौम्या पुरोनुवाक्या भवेत्, न त्वसावतिथिमती, तस्मादातिथ्यवत्याविति द्विवचनमयुक्तमित्यर्थः। अत्रेदं समाधत्ते—"एतत्त्वेवैषातिथिमती यदापीनवती"-इति। 'तु' शब्दः आक्षेपनिवारणार्थः। आपीनमभिवृद्धिः, तद्वाचकस्य 'आप्यायस्व'-इतिशब्दस्य विद्यमानत्वादियं

सौम्यापीनवती; यदापीनवत्त्व मस्ति, 'एतत् एव' एतेनापीनवत्त्वेन एव 'एषा' सौम्या 'अतिथिमती' सम्पद्यते; आपीनत्वस्यातिथ्युपलक्षकत्वात् *। तदेवोपलक्षकत्वं विशदयति— "यदा वा अतिथिं परिवेविषत्यापीन इव वै स तर्हि भवति"-इति। तम् 'अतिथिं' गृहस्वामी 'यदा' एव 'परिवेविषति' परिवेषणेन पात्रे भोज्यप्रक्षेपेण भोजयति, 'तर्हि' तस्मिन् भोजनोत्तरकाले 'सः' अतिथिः 'आपीनः इव' उदरपूर्त्या तृप्तिं प्राप्त इव 'भवति' एव; तस्मात्तृप्तिवाचक आप्यायस्वेतिशब्दोऽतिथिलक्षकः, अतो द्विवचनं पुरोऽनुवाक्यात्वं च युक्तम् ॥

आज्यभागयोर्याज्यां विधत्ते— "तयोर्जुषाणेनैव यजति"-इति। प्रकृतावाम्नातौ "जुषाणोऽग्निराज्यस्य वेतु"-इति, "जुषाणः सोम आज्यस्य हविषो वेतु" इति च। तेनैव † मन्त्रेण यजेत। अग्निर्वृत्राणीत्यादिके प्रकृतिगते (४४ पृ०) पुरोनुवाक्ये चोदकप्राप्ते अपोह्य, यथा समिधाग्निमित्यादिके विहिते (१२२ पृ०) तद्वद्याज्यान्तरप्रसक्तिं वारयितुं विधिः ॥

प्रधानस्य हविषो याज्यानुवाक्ये विधत्ते— "इदं विष्णुर्विचक्रमे, तदस्य प्रियमभि पाथो अश्यामिति वैष्णव्यौ"-इति। याज्यानुवाक्ये कुर्यादिति शेषः ‡। तयोर्विभागं विधत्ते— "त्रिपदामनूच्य चतुष्पदया यजति"-इति। "इदं विष्णुः"-इति (सं० १.२२.१७.) त्रिपदा, तां पुरोनुवाक्यारूपेणानुब्रूयात्;

---

* अतएवाह आश्वलायनः—'आर्थ्यं, अतिथिमती,— समिधाग्निं दुवस्यताप्यायस्व समेतु त इति'—इति श्रौ० ४. ५. ३।

† 'जुषाणः'—इतिपदयुक्तमन्त्रद्वयेनेति भावः। तौ मन्त्रौ तै० ब्रा० ३. ५. ६. आम्नातौ

‡ आश्व० श्रौ० ४, ५, ३। ११४ पृ० ४ पं०।

"तदस्य प्रियम्"-इति (सं० १.१५४.५.) चतुष्पदा, तया 'यजेत' याज्यारूपेण तां पठेत्। ऋग्द्वयगतां पादसङ्ख्यां प्रशंसति—"सप्त पदानि भवन्ति ; शिरो वा एतद्यज्ञस्य यदातिथ्यं, सप्त वै शीर्षन् प्राणाः शीर्षन्नेव तत्प्राणान् दधाति"-इति। आतिथ्येष्टेर्यज्ञशिरोरूपत्वाच्छिरसि छिद्रवर्त्तिनां प्राणानां सप्तत्वादत्र पादसङ्ख्यया यज्ञस्य शिरसि सप्त प्राणाः स्थापिता भवन्ति ॥

संयाज्ये विधत्ते—"होतारं चित्ररथ मध्वरस्य, प्र प्राय मग्निर्भरतस्य शृण्व इति स्विष्टकृतः संयाज्ये भवत आतिथ्यवत्यौ रूपसमृद्धे ; एतद्वै यज्ञस्य समृद्धं, यद्रूपसमृद्धं, यत्कर्म्म क्रियमाण मृगभिवदति"-इति। "होतारम्"-इति (सं० १०.१.५.) पुरोनुवाक्या, "प्र प्रायम्"-इति (सं० ७.८.४.) याज्या। प्रथमाया ऋचः चतुर्थपादे 'श्रिया त्व१ग्नि मतिथिं जनानाम्'-इति-श्रूयमाणत्वादातिथ्यवत्त्वम् ; द्वितीयस्या अपि चतुर्थपादे 'द्युतानो दैव्यो अतिथिः'-इति। मन्त्रद्वयगतं छन्दः प्रशंसति—"त्रिष्टुभौ भवतः सेन्द्रियत्वाय"-इति। "इन्द्रियं वै त्रिष्टुप्"-इतिश्रुत्यन्तरात् * त्रिष्टुभ इन्द्रियहेतुत्वम् ॥

अत्र इडाभक्षणादूर्ध्वभावि कर्त्तव्य मपि चोदकेन प्राप्तम्, तदेतद् वारयति—"इळान्तं भवतीळान्तेन वा एतेन देवा अराध्नुवन्यदातिथ्यं ; तस्मादिळान्त मेव कर्त्तव्यम्"-इति। पुरोडाशसम्बन्धि यदेतदिडाभागभक्षणम्, तदन्त मेवातिथ्येष्टिरूपं कर्म्म भवेत् ; तावतैव सर्वार्थसिद्धेः। द्विविध मिडाभक्षणम्,—अनुयाजयागात् पूर्व मुत्तरकालीनं च। तयोः पूर्वकालीन मन्तत्वेन दर्शयितु मनुयाजान् निषेधति—"प्रयाजानेवात्र यजन्ति, नानु-

---

* तै० सं० २.४.११.२ ; ३.२.८.३ ; तै० ब्रा० १.७.८.२. (४६ पृ०)।

याजान्”-इति । अनुयाजानां यजने दोषं प्रकटयति—“प्राणा वै प्रयाजानुयाजास्ते य इमे शीर्षन् प्राणास्ते प्रयाजा ये ऽवाञ्चस्ते ऽनुयाजाः; स यो ऽत्रानुयाजान्यजेद्यथेमान् प्राणानालुप्य शीर्षन् धित्सेत्, तादृक् तत्”-इति । प्र-शब्दसाम्यात् प्रयाजानां प्राणत्वम्, तदनुवर्त्तिसाम्यादनुयाजाना मपि प्राणत्वम् । तथासति ‘ते य इमे शीर्षन् प्राणाः’ शिरस्यवस्थिताः श्वासादिकारिणः प्राणाः ये केचित् सन्ति, ‘ते’ प्रयाजरूपाः प्रकृष्टत्वसाम्यात् । उत्तमाङ्गवर्त्तित्वेन प्राणानां प्रकृष्टत्वम्; प्रयाजानां च प्रथमानुष्ठानत्वेन प्रकृष्टत्वम् । ‘ये’ तु ‘अवाञ्चः’ नाभेरधस्ताद्वर्तमाना अपानवाय्वादयः, ‘ते’ अनुयाजरूपाः; निकृष्टत्वसाम्यात्। अपानवाय्वादीनां मध्याङ्गवर्त्तित्वेन निकृष्टत्वम्; अनुयाजानां च पश्चाद्भावित्वेन निकृष्टत्वम् । एवं सति ‘यः’ पुमान् ‘अत्र’ आतिथ्येष्टौ ‘अनुयाजान् यजेद्,’— लोके कश्चित् ‘यथा’ ‘इमान्’ अर्वाग्देशवर्तिनोऽपानवाय्वादीन् ‘आलुप्य’ छित्त्वा ‘शीर्षन् धित्सेत्’ शिरसि स्थापयितु मिच्छेत्, तथैव ‘सः’ पुमान् ‘तत्’ कर्तु मिच्छेत् । अधोदेशवर्त्तिप्राणस्थानीयानुयाजानां यच्छिरःस्थानीयातिथ्यकर्मण्यनुष्ठान मयुक्तम् । तथा पुच्छादिप्रजास्थानीयाना मनुयाजानां शिरःस्थानीयेऽनुष्ठान मयुक्त मित्यपि द्रष्टव्यम् * ॥

दोषान्तर माह—“अतिरिक्तं तस्य नु वा इमे प्राणा विद्धे ये चेमे ये चेमे”-इति । ‘ये चेमे’ शिरसि योग्याः प्राणाः, येऽप्यमी नीचदेशे स्थिताः प्राणाः, ते सर्वे ‘सनु विद्धे’ सम्भूयैकत्र शिरसि

---

* ‘प्राणा वै प्रयाजा अपाना अनुयाजा इति ब्राह्मणम्’-इति निरु० ८. २. ७ । ‘प्राणा वै प्रयाजाः अपाना अनुयाजास्तस्मात् प्रयाजाः प्राञ्चो हूयन्ते तद्धि प्राणरूपम् प्रत्यञ्चोऽनुयाजास्तदपानरूपम्’-इति शत० ब्रा० ११. २. ७. २७ ।

प्रतिष्ठेरन् । ‘तत्’’ च ‘‘प्रतिरिक्तं’’ योग्यस्थानीयादधिकं शिरोरूपमातिथ्यं कर्म । चक्षुरादीनामेव प्राणानां योग्यस्थानम् ; न त्वधोदेशवर्त्तिनामपानादीनां तत्रावकाशोऽस्तीत्यर्थः ॥

नन्वनुयाजानामनुष्ठानाभावे कर्माङ्गसाकल्यलक्षणः फलविशेषो न प्राप्येतेत्याशङ्क्याह— “तद्यदेवात्र प्रयाजान्यजन्ति नानुयाजांस्तत्र स काम उपाप्तो यो ऽनुयाजेषु यो ऽनुयाजेषु”- इति । ‘तत्’ तस्मिन्नातिथ्यकर्मणि यदि ‘प्रयाजान्’ एव ‘यजन्ति’, ‘न’ तु ‘अनुयाजान्’, ‘अनुयाजेषु’ ‘यः’ ‘कामः’ फलविशेषः, ‘सः’ सर्वोऽपि ‘तत्र’ कर्मणि प्राप्तो भवति । यथा लोके कश्चिदान्दोलिकादिभारं वहत्सु बहुषु मध्ये कस्यचिदशक्तौ सत्यामवशिष्टा एव वहन्ति, तद्वदित्यर्थः । द्विरभ्यासोऽध्यायसमाप्त्यर्थः * ॥

अत्र मीमांसा । दशमाध्यायस्य सप्तमपादे (जै॰ सू॰ २८, २९. अधि॰ १२.) चिन्तितम्—

“प्रायणीयातिथ्ययोः किं विकल्पः शंय्वन्तता ।
अनियतेर्विकल्पः स्यान्निषेधपरिसंख्ययोः ॥
शंय्वन्तत्ववाक्याच्च नियतेर्विधिमात्रतः ।
नित्यानुवादो ‘न’ वाक्यं दोषबाहुल्यमन्यथा ॥

---

* ‘शिरो वै यज्ञस्यातिथ्यम्०——० नवकपालः पुरोडाशो भवति०——० अग्निं मन्थति०——० अग्नये मथ्यमानायानुब्रूहीति०——० अग्निमभिजुहोति०——० तदिडान्तं भवति०——० नानुयाजान् यजन्ति’-इति शत॰ ब्रा॰ ३. ४. १. १—२६ । ‘यदुभौ विमुच्यातिथ्यं गृह्णीयाद्०——० शिरो वा एतद्यज्ञस्य यदातिथ्यं नवकपालः पुरोडाशो भवति०——० अग्निं मन्थति०——० यथायजुरेवैतत्’-इति तै॰ सं॰ ६. २. १. २ ; १. २. १० । ‘अथातिथ्येडान्ता’-इत्यादि आश्व॰ श्रौ॰ ४. ५. १—७ । ‘आतिथ्याम्’-इत्यादि, ‘इडान्तं भवति नैवं प्रसमिद्धानि इडान्त्यापतय इति’-इत्यन्तम् कात्या॰ ८. १. १—१८ । ‘अथातिथ्यायाकर्म प्रक्रमते’-इत्युपक्रम्य ‘इडान्ता संतिष्ठते धारयति नैव माज्य माज्यम्’-इति यावत् आप॰ श्रौ॰ १०. ३०, २१ ।

ज्योतिष्टोमे श्रूयते—“शंयुवन्ता प्रायणीया सन्तिष्ठते; न पत्नीः संयाजयन्ति,-इति, (शत० ब्रा० ३.२.३.२३.), “इडान्तातिथ्या सन्तिष्ठते; नानुयाजान् यजन्ति”-इति च (शत० ब्रा० ३. ४. १. २. ६. *)। प्रकृतौ यदा होता “तच्छंयोः” इति (तै० ब्रा० ३.५.११.१.) जपति †, तदानीं अध्वर्युः परिधीनग्नौ प्रक्षिपति ‡। तदाह कल्पसूत्रकारः—“अनूच्यमाने शंयुवाके आहवनीये परिधीन् प्रहरति”-इति (१२.६.७.)। ततो हविःशेषेषु भक्षितेषु पत्नीः संयाजयन्तीति क्रमः। पत्नीसंयाजाना मुपरि फलीकरण-प्रायश्चित्तहोम-कपालोद्वासनैरिष्टिः समाप्यते। एवं स्थिते विकृतिरूपायाः प्रायणीयेष्टेः शंयुवाकान्तत्वम्,—आतिथ्येष्टेरिड़ाभक्षणान्तत्वं च विकल्पितं स्यात्। कुतः? निषेधवाक्याभ्यां प्रकारद्वयप्रतीतेः। तथाहि,—शंयुवन्तत्वेड़ान्तत्वविधिनैवोपरितनपत्नीसंयाजानुयाजनिषेधे पुनर्निषेधवचनं परिसंख्यार्थम्। पत्नीसंयाजानुयाजव्यतिरिक्तं नास्ति निषेधपरिसंख्या। तेन प्रकृतिवद्यथाप्राप्तं कपालोद्वासनान्तत्व मनयोरिष्ट्योः प्रतीयते; विधिवाक्येन शंय्विड़ान्तत्वम्। तेन व्रीहियववद्विकल्पः? इति प्राप्ते ब्रूमः;—विधिमात्रस्यात्र प्रवृत्तेः शंयुवन्तत्व मिड़ान्तत्वं च तयोः प्रति नियतम्, पत्नीसंयाजाद्यभावस्त्वर्थसिद्धः; ततो नञ्पदयुक्त मुपरितनं प्रतिषेधवाक्यं नित्यानुवादः §; अन्यथा बहवो दोषाः

---

* आप० श्रौ० १०.२१ ११.१४; ११.१३.१५। आश्व० श्रौ० ४.३.२; ५.१। कात्या० श्रौ० ७.५.२२—२७; ८.१.१८।

† शंयुवाकमन्त्रव्याख्या तु तै० सं० २.६.१०. द्रष्टव्या।

‡ ‘परिधीन् परिदधाति०—०गन्धर्व इति (वा० सं० २.३.)’ इति कात्या० श्रौ० ३.८.१।

§ ‘नित्यप्राप्त मनुवदति। यथा नान्तरिक्षे न दिवि अग्निश्चेतव्य इति’—इति शबरः।

प्रसज्येयम् । विकल्पे तावदष्टौ दोषाः प्रसिद्धाः *, परिसंख्यायां च त्रयो दोषाः †; विधिपरिसंख्याभ्यां वाक्यभेदोऽपरो दोषः ‡। ततः शंय्विडान्तत्वं नियतम्”-इति ॥

तत्रैवान्यच्चिन्तितम् (जै० सू० ४०—४२. अधि० १२.)—

“तत्रैव शंय्विडे पूर्वेऽपरे वा स्वेच्छयाथवा ।
परे एवाथवा पूर्वे एवाद्यो द्विविधः श्रुतेः ॥
निषेधस्यार्थवत्त्वाय परे एवानुवादगौ ।
पूर्वैकवाक्यतायाति पूर्वे एवाविरोधतः ॥

प्रायणीयातिथ्ययोः निर्णीते शंय्विडे, पुनः सन्दिह्येते;— प्रकृतौ द्विविधे शंय्विडे,— पत्नीसंयाजेभ्यः पुरस्तादुपरिष्टाच्च; विकृतौ चात्र चोदकप्राप्ते । तत्र द्विविधश्रुतेरर्थे चोदकेनातिदिष्टे सति विशेषनियामकाभावादिच्छया स्वीकार्ये;—इत्येकः पक्षः । यदि प्रायणीया पूर्वशंय्वन्ता, आतिथ्या च पूर्वेडान्ता स्यात्, तदानीमन्तत्वविधिनैव ताभ्यां शंय्विडाभ्यां पूर्वप्राप्तानां पत्नीसंयाजानामनुयाजानां च वारितत्वात् निषेधो व्यर्थः स्यात्; परयोः शंय्विडयोरन्तत्वे तु ताभ्यां शंय्विडाभ्यां पूर्वप्राप्तानां तेषामनिवारणात्

---

* विकल्पश्च द्विविधः । व्यवस्थितः ऐच्छिकश्च । तत्र इच्छाविकल्पेऽष्टौ दोषाः । 'प्रमाणत्वाप्रमाणत्वपरित्यागप्रकल्पना । प्रत्युज्जीवनहानिभ्यां प्रत्येकमष्टदोषता'-इति । 'व्रीहिभिर्यजेत', 'यवैर्यजेत'-इति चैतदुदाहरणम् । कात्यायनसूत्रे तद्व्याख्यायां तत्पद्धतौ चैष विचारः कृतः (श्रौ० १. ४. १४--१९.)। मीमांसायां द्वादशाध्यायीयतृतीयपादे तु विकल्पविचारा बहव उपदिष्टाः; तत्र 'एकार्थास्तु विकल्पेरन्, समुच्चये ह्यावृत्तिः स्यात् प्रधानस्य'-इति कृतं गुणविकल्पलक्षणम् (१२. ३. १०.)।

† 'विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते'-इति, 'श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात् । प्राप्तस्य बाध इत्येवं परिसंख्या त्रिदूषणा'-इति च, एतदुदाहरणादीनि च मीमांसार्थसङ्ग्रहे द्रष्टव्यानि ।

‡ 'य एव हि श्रुतस्यार्थस्योत्सर्गे दोषः, स एवाश्रुतकल्पनायाम्'-इत्याहाच प्रवरः ।

तद्विभागत्वाय पार्श्वतो निवेशः । तस्मादन्तरे एव ग्रंथिवृडे ग्राह्ये [illegible] इति द्वितीयः पक्षः । निषेधोऽयं नित्यानुवाद इत्युक्तम् (१४७ पृ०), स च पूर्वयोः ग्रंयिवृडयोरन्तत्वेऽपि एकवाक्यतामापद्यानुवादत्वेनोपदिश्यते; असञ्जातविरोधिन्यौ हि पूर्वे; तस्मात् ते एव ग्राह्ये इति राद्धान्तः ॥ ६ ॥

इति श्रीमत्सायणार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां तृतीयाध्याये
षष्ठः खण्डः ॥ ६ (१७) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायाः तृतीयोऽध्यायः ॥

॥ अथ चतुर्थाध्यायः ॥

(तत्र)

॥ प्रथमः खण्डः ॥

॥ ॐ ॥ यज्ञो वै देवेभ्य उदक्रामन् न वो ऽहमन्नं भविष्यामीति नेति देवा अब्रुवन्नन्न मेव नो भविष्यसीति तं देवा विमेथिरे स हैभ्यो विहृतो न प्रबभूव ते होचुर्देवा न वै न इत्थं विहृतो ऽन्नम्भविष्यति हन्तेमं यज्ञं सम्भरामेति तथेति तं सञ्जभ्रुस्तं सम्भृत्योचुरश्विनाविमम् भिषज्यत मित्यश्विनौ वै देवानां भिषजावश्विनावध्वर्यू तस्मादध्वर्यू घर्मं सम्भरतस्तं सम्भृत्याहतुर्ब्रह्मन् प्रवर्ग्येण प्रचरिष्यामो होतरभिष्टुहीति ॥ १ (१८) ॥

सोमप्रवाहिका अग्निमन्थनीया ऋचस्तथा ।
आतिथ्यास्तद्विशेषाश्च तृतीयाध्याय ईरिताः ॥

अथ प्रवर्ग्यादयो वक्तव्याः । तदर्थं मादावाख्यायिका माह— "यज्ञो वै देवेभ्य उदक्रामन्न वो ऽहमन्नं भविष्यामीति नेति देवा अब्रुवन्नन्न मेव नो भविष्यसीति, तं देवा विमेथिरे, स हैभ्यो विहृतो न प्रबभूव ते होचुर्देवा न वै न इत्थं विहृतो ऽलम् भवि-

ष्यति, हन्तेमं यज्ञं सम्भरामेति तथेति तं समभरन्"—इति। यज्ञशब्देनात्र प्रवर्ग्यो विवक्षितः। तदभिमानी देवः केनापि निमित्तेनापरक्तो ऽन्येभ्यो 'देवेभ्यः' उत्क्रान्तवान्। हे देवाः! युष्माकमन्नं 'अन्नं न भविष्यामि' इत्येवमुत्क्रमणकाले प्रोक्तवान्। ततो 'देवाः' तदुत्क्रमणं 'नेति' प्रतिषिध्य सर्वथा त्वमस्माकमन्नं भवेति प्रार्थितवन्तः। प्रवर्ग्याख्ये कर्मणि यद्धविस्तद्देवानामन्नं, तदभिमानी च पुरुषो देवैः प्रार्थितं तदन्नत्वं नाङ्गीचकार। 'तम्' अनङ्गीकुर्वाणं प्रवर्ग्यपुरुषं 'देवाः' 'विमेथिरे' ताडनभर्त्सनादिभिर्हिंसितवन्तः। स च प्रवर्ग्यो देवैर्विशेषेण बाधितः 'एभ्यः' देवेभ्यो 'न प्रबभूव' प्रभुर्नाभूत्, अन्नत्वेनावस्थातुं न शक्त इत्यर्थः। ततो 'देवाः' परस्परमेवं विचारितवन्तः। एवं 'विहतः' विशेषेण बाधितः प्रवर्ग्यो 'नः' अस्माकमन्नं नैव भविष्यतीति सम्पूर्णमन्नं न भविष्यति। हन्तेमं प्रवर्ग्याख्यं यज्ञं 'सम्भराम' उचितैः साधनैः सम्यक् पोषयाम इति। सम्भृतिहेतुदर्शननिमित्तजन्यहर्षद्योतनार्थो 'हन्त' शब्दः। 'तथेति' परस्परमङ्गीकृत्य 'तं' प्रवर्ग्यं 'समभरन्' साधनसम्पादनेन सम्यक् पोषितवन्तः॥

अथ सम्भृतानां साधनानां सम्पादनं विधत्ते—"तं सम्भृत्योचुरश्विनाविदं भिषज्यतमित्यश्विनौ वै देवानां भिषजावश्विनावध्वर्यू, तस्मादध्वर्यू घर्मं सम्भरतः" इति। देवाः प्रवर्ग्यकर्मोपयुक्तं महावीरादि सम्भारं 'सम्भृत्य' स्वकीयावश्विनौ, एवमूचुः। हे अश्विनौ! 'इदं' प्रवर्ग्यपुरुषदेहं अस्माभिः हिंसितं युवां 'भिषज्यतम्' औषधैः एतस्य समाधानं कुरुतमिति। 'देवानां' मध्ये 'भिषजावश्विनौ', तस्मात् तत्प्रार्थनं युक्तम्। किञ्च देवानां यज्ञकर्मण्यश्विनौ 'अध्वर्यू'। अतएवाद्यापि कस्यचिद्यजमानस्य

ब्राह्मणे पठ्यते—“अश्विनोर्बाहुभ्या मित्याह, अश्विनौ हि देवाना मध्वर्यू आस्ताम्”-इति *। अतोऽपि कारणादश्विनोर्यज्ञसमाधानकार्यं युक्तम्। तस्मात्कारणादध्वर्यू उभाभ्या मश्विभ्यां यज्ञशरीरं चिकित्सितम्। तस्मादिदानी मप्यध्वर्यू ‘घर्म्मं’ सम्भरतः’ प्रवर्ग्यसाधनं सम्पादयेताम्। तदेतत्तैत्तिरीयाः “देवा वै सत्र मासत”-इत्यस्मिन्ननुवाके (तै० आ० ५. १.) प्रवर्ग्यविषय मुपाख्यानं प्रपञ्चयन्ति। तस्मिन्नाख्याने यज्ञस्य प्रवर्ग्यरूपं शिरो धनुषः कोट्या छिन्न मित्युक्त्वा पश्चादेतदाम्नायते—“तेनापशीर्ष्णा यज्ञेन यजमानाः। नाशिषोऽवारुन्धत; न सुवर्गं लोक मभ्यजयन्। ते देवा अश्विना वब्रुवन्। भिषजौ वै स्थः। इदं यज्ञस्य शिरः प्रतिधत्त मिति। तावब्रूतां वरं वृणावहै। ग्रह एव नावत्रापि गृह्यता मिति। ताभ्या मेत माश्विन मगृह्णन्। तावेतद् यज्ञस्य शिरः प्रत्यधत्ताम्। यत्प्रवर्ग्यः। तेन सशीर्ष्णा यज्ञेन यजमानाः। अवाशिषोऽरुन्धत। अभि सुवर्गं लोक मजयन्। यत्प्रवर्ग्यं प्रवृणक्ति। यज्ञस्यैव तच्छिरः प्रतिदधाति” इति (तै० आ० ५.१.५—७.)।

प्रवर्ग्यसाधनानि सम्पादितवतोस्तयोरनुज्ञापनमन्त्रं प्रैषमन्त्रं च विधत्ते—“तं सम्भृत्याहतुर्ब्रह्मन् प्रवर्ग्येण प्रचरिष्यामो होतरभिष्टुहीति”-इति। ‘तं’ प्रवर्ग्यकर्म्मोपयुक्तं साधनसमूहं ‘सम्भृत्य’ सम्पाद्य चतुर्णा मध्वर्यूणां मध्ये अध्वर्युः प्रतिप्रस्थाता चेत्येतावुभाध्वर्यू ब्रह्माणं होतारं च प्रत्येवं ब्रूयाताम्। हे ब्रह्मन्! वय मृत्विजः सर्वे प्रवर्ग्याख्येन कर्म्मणा ‘प्रचरिष्यामः’ अनुष्ठास्यामः। सोऽय

---

* अश्विनोर्बाहुभ्या मिति मन्त्रस्तैत्तिरीयाम्नाये संहितायां (१. ३. १. १.), तथा ब्राह्मण मपि तत्रैवाये (२. ६. ४. १); ब्राह्मणग्रन्थेऽपि बहुत्र (३. २. २. १, ९. १.), आरण्यकेऽपि च (५. २. ५.)।

मनुज्ञापन मन्त्रः (तै० आ० ४. ४. १.) । हे 'होतः !' त्वम् 'अभिष्टुहि' प्रवर्ग्यस्तुतिरूपाः सर्वा ऋचः पठ । सोऽयं प्रैषमन्त्रः (तै० आ० ४, ४. २) । 'इति'-शब्दो मन्त्रद्वयसमाप्त्यर्थः ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां चतुर्थाध्याये
प्रथमः खण्डः ॥ १ (१८) ॥

॥ अथ द्वितीयः खण्डः ॥

ब्रह्म जज्ञानं प्रथमं पुरस्तादिति प्रतिपद्यते॑ ब्रह्म वै बृहस्पति॑र्ब्रह्मणैवैनं तद्भिषज्यती॑यम् पित्रे राष्ट्र्येत्यग्र इति॑ वाग्वै राष्ट्री॑ वाच॑मेवास्मिंस्तद्दधाति॑ महान्मही॑ अस्तभायद्विजात इति॑ ब्राह्मणस्पत्या ब्रह्म वै बृहस्पति॑र्ब्रह्मणैवैनं तद्भिषज्यत्य॑भि त्यं देवं सवितार॑मोण्योरिति॑ सावित्री॑ प्राणो वै सविता॑ प्राण मेवास्मिंस्तद्दधाति॑ संसीदस्व महाँ असीत्ये॑वैनं समसादयन्न॑ञ्जन्ति यं प्रथयन्तो न विप्रा इत्य॑ज्यमानायाभिरू॑पा यद्यज्ञेऽभिरूपं तत्समृद्ध॑ पतङ्गमक्त मसुरस्य मायया॑ यो नः सनुत्यो अभिदास॑दग्ने भवा

नो अग्ने सुमना उपेताविति द्वे अभिरूपे यद्यज्ञेऽभिरूपं तत्समृद्धं 'कृणुष्व पाजः प्रसितिं न पृथ्वी'मिति पञ्च राक्षोघ्न्यो रक्षसामपहत्यै 'परि त्वा गिर्वणो गिर' 'अधि द्वयोरदधा उक्थ्यं वचः' 'शुक्रं ते अन्यद्यजतं ते अन्यद्' 'अपश्यं गोपामनिपद्यमानमि'ति चतस्र एकपातिन्यस्ता एकविंशतिर्भवन्त्येकविंशो वाऽयं पुरुषो दश हस्त्या अङ्गुलयो दश पाद्या आत्मैकविंशस्तमिममात्मानमेकविंशं संस्कुरुते ॥२(१९)

होतुरभिष्टवार्थास्वृक्षु प्रथमामृचं विधत्ते— "ब्रह्म जज्ञानं प्रथमं पुरस्तादिति प्रतिपद्यते; ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैनं तद्भिषज्यति"-इति। 'प्रतिपद्यते' तेन मन्त्रेण होताभिष्टवं प्रारभते इत्यर्थः। अस्मिन्मन्त्रे ब्रह्मशब्देन देवानां मध्ये ब्राह्मणजातिरूपो बृहस्पतिरुच्यते; तस्मादनेन मन्त्रेणोपक्रमे सति 'ब्रह्मणैव' ब्राह्मणजात्यैव 'एनं' प्रवर्ग्यं 'तद्' 'भिषज्यति' चिकित्सते ॥

द्वितीयामृचं विधत्ते —"इयं पित्रे राष्ट्र्येत्यग्र इति, वाग्वै राष्ट्री, वाचमेवास्मिंस्तद्दधाति"-इति। अस्मिन्मन्त्रे तृतीयान्तो राष्ट्रीशब्दो वाचं ब्रूते, 'तत्' तेन मन्त्रपाठेन 'अस्मिन्' प्रवर्ग्ये 'वाचमेव' सम्पादयति ॥

तृतीयामृचं विधत्ते—"महान्मही अस्तभायद्विजात इति ब्राह्मणस्पत्या, ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैनं तद्भिषज्यति"-इति। अस्य मन्त्रस्य चतुर्थपादे बृहस्पतिर्देवतेति श्रूयमाणत्वात्, बृहस्पतेश्च ब्रह्मणस्पतित्वादियमृक् 'ब्राह्मणस्पत्या' ॥

चतुर्थी मृचं विधत्ते—"अभि त्यं देवं सवितारमोण्योरिति सावित्रीं; प्राणो वै सविता प्राण मेवास्मिंस्तद्दधाति"-इति। सवितारमितिश्रुतत्वादियमृक् 'सावित्री'; पठनीयेति शेषः। प्राणस्य देहेन्द्रियप्रेरकत्वात् सवितृत्वम्। 'तत्' तेन मन्त्रेण 'अस्मिन्' प्रवर्ग्ये 'प्राण मेव' सम्पादयति ॥

ता एताश्चतस्रः शाखान्तरगता आश्वलायनेन पठिता द्रष्टव्याः (श्रौ० ४.६.३.१—४.) ॥

पञ्चमी मृचं विधत्ते—"संसीदस्व महाँ असीतीवैनं समसादयन्"-इति। अनेन (सं० १. ३६. ८.) मन्त्रेण 'एनं' प्रवर्ग्याख्यं महावीरं खरशब्दाभिधेये सन्नापनस्थाने 'समसादयन्' स्थापयेयुरित्यर्थः * ॥

षष्ठी मृचं विधत्ते—"अञ्जन्ति यं प्रथयन्तो न विप्रा इत्यज्यमानायाभिरूपा; यद्यज्ञेऽभिरूपं तत्समृद्धम्"-इति। अस्मिन्मन्त्रे (सं० ५. ४३. ७.) अञ्जन्तीतिपदस्य श्रुतत्वादाज्येन 'अज्यमानाय' महावीराख्याय श्रूयमाणत्वात् सेयमृक् 'अभिरूपा' भवति † ॥

सप्तमी मारभ्य द्वादशीपर्यन्ताः षडृचो विधत्ते—"पतङ्गमक्तमसुरस्य मायया, यो नः सनुत्यो अभिदासदग्ने, भवा नो अग्ने सुमना उपेताविति द्वे द्वे अभिरूपे यद्यज्ञेऽभिरूपं तत्समृद्धम्"-इति। पतङ्गमिति संहितायां समाम्नातयोर्द्वयोः ‡ प्रतीकं (सं० १०. १७७. १, २.)। यो नः सनुत्य इति द्वयोः § प्रतीकं (सं० ६. ५. ४, ५.)। भवा नो अग्न इति द्वयोः || (सं० ३. १८. १, २.)।

---

* 'संसीदस्व महाँ असीति संसाद्यमानं'-इति कल्पः (आश्व० श्रौ० ४. ६. ३.)।

† 'अञ्जन्ति यं प्रथयन्तो न विप्रा इत्यज्यमानं'-इति कल्पः (४. ६. ३.)।

‡, §, || 'पतङ्ग०—० उपेताविति षड्भिः'-इति कल्पः (४. ६. ३.)।

एतासां सर्वासा मभिष्टूयमानार्थप्रतिपादकत्वादभिरूपत्वम् । तथाचैतास्वृक्षु बुद्धिमता योजनीयम् ॥

त्रयोदशी मारभ्य सप्तदशीपर्यन्ताः पञ्चर्चो विधत्ते—"कृणुष्व पाजः प्रसितिं न पृथ्वी मिति पञ्च राक्षोघ्नो रक्षसा मपहत्यै"-इति (सं० ४.४.१—५.) ॥

अष्टादशी मारभ्यैकविंश्यन्तास्चतस्र ऋचो विधत्ते—"परि त्वा गिर्वणो गिर,ऽधि हर्योरदधा उक्थ्यं वचः, शुक्रं ते अन्यद्यजतं ते अन्यद्, अपश्यं गोपा मनिपद्यमान मिति चतस्र एकपातिन्यः"-इति । एकस्य मन्त्रस्य पातः प्रतीकम्, एकपातः, सोऽयं यासु ऋक्षु, ता 'एकपातिन्यः' । "परि त्वा गिर्वणः"-इति (सं० १.१०.१२.) यत् प्रतीकम्, तत् संहितायां क्रमेणाम्नातानां चतसृणां प्रतीक मित्याशङ्केत ; 'चतस्रः'-इति ब्राह्मणेऽभिधानात् । एवम् "अधि हर्योः" (सं० १.८३.२.), "शुक्रं ते" (सं० ६.५८.१.), "अपश्य गोपाम्" (सं० १.१६४.३१ ; १०.१७७.३.)-इति ष्वपि शङ्कोदियात्, एतद्व्यावृत्त्यर्थम् 'एकपातिन्यः'-इत्युच्यते । एकैकस्य ऋचः प्रतीकान्येतानि मिलित्वा 'चतस्रः' इति तात्पर्यार्थः ॥

संख्यान्तरभ्रमव्युदासायोक्तमन्त्रगतां संख्यां प्रशंसति—"ता एकविंशतिर्भवन्ति"-इति । तां संख्यां प्रशंसति—"एकविंशोऽयं पुरुषो दश हस्त्या अङ्गुलयो दश पाद्या आत्मैकविंशस्त मिम मात्मान मेकविंशं संस्कुरुते"-इति । 'अयं पुरुषः' मनुष्यदेहो जीवनोपेतः, एकविंशतिसंख्याना मवयवानां समूहरूपत्वात् 'एकविंशः'-इत्युच्यते । 'दश हस्त्याः'-इत्यादिना तदेव स्पष्टीक्रियते । आत्मशब्देन मध्यदेहो जीवात्मा वा

अभिधीयते। तैर्मन्त्रैः 'आत्मानम्' एव संख्यासामान्यात् 'संस्कुरुते' ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां चतुर्थाध्याये
द्वितीयः खण्डः ॥ ३ (१९) ॥

॥ अथ तृतीयः खण्डः ॥

स्रक्के द्रप्सस्य धमतः समस्वरन्निति नव पावमान्यो नव वै प्राणाः प्राणानेवास्मिंस्तद्दधात्ययं वेनश्चोदयत्पृश्निगर्भा इत्ययं वै वेनोऽस्माद्वा ऊर्ध्वा अन्ये प्राणा वेनन्त्यवाञ्चोऽन्ये तस्माद्वेनः प्राणो वा अयं सन्नाभिरिति तस्मान्नाभिस्तन्नाभेर्नाभित्वम् प्राणमेवास्मिंस्तद्दधाति पवित्रं ते विततं ब्रह्मणस्पते तपोष्पवित्रं विततं दिवस्पदे वियत्पवित्रं धिषणा अतन्वतेति पूतवन्तः प्राणास्त इमेऽवाञ्चो रेतस्यो मूत्र्यः पुरीष्य इत्येतानेवास्मिंस्तद्दधाति ॥ ३ (२०) ॥

अथैकसूक्तगताः काश्चिदृचो विधत्ते— "स्रक्के द्रप्सस्य धमतः समस्वरन्निति नव पावमान्यो नव वै प्राणाः प्राणानेवास्मिंस्तद्दधाति"-इति। अस्मिन् स्रक्के द्रप्सस्येतिसूक्ते (मं० ९. ७३.)

पवमानदेवताका ऋचो नवसंख्याकाः; अतः संख्यासाम्यात् पाठेन 'अस्मिन्' प्रवर्ग्याभिमानिनि पुरुषे नवच्छिद्रवर्त्तिनः प्राणान्' स्थापयति ॥

अथैकां ऋचं विधत्ते—"अयं वेनश्चोदयत् पृश्निगर्भा इति"-इति। एतन्मन्त्रगतस्य वेनशब्दस्य नाभिपरत्व मभिप्रेत्य प्रशंसति—"अयं वै वेनोऽस्माद्वा ऊर्ध्वा अन्ये प्राणा वेनन्त्यवाञ्चोऽन्ये; तस्माद्वेनः प्राणो वा अयं सन्नाभेरिति तस्मान्नाभिस्तन्नाभेर्नाभित्वम् प्राणमेवास्मिंस्तद्दधाति"-इति। शरीरमध्येऽवस्थितं नाभिं हस्तेनाभिनीय प्रदर्शयन् 'अयं वै वेनः'--इत्युच्यते। तस्य नाभेर्वेनत्वं कथम्? इति चेत्, उच्यते;—'अस्मात्' नाभेः 'ऊर्ध्वाः' 'अन्ये प्राणाः' चक्षुरादयः केचित् प्राणविशेषाः 'वेनन्ति' चरन्ति, तथा नाभेः 'अवाञ्चः' अपानवाय्वादयः केचिद 'वेनन्ति' चरन्ति। 'तस्माद्' वेनन्त्यस्मादवधिभूतान्नाभेरितिव्युत्पत्त्या वेनशब्दवाच्यो 'नाभिः'। नाभिशब्दवाच्यत्वं कथम्? इति चेत्, तदुच्यते;—'अयं' नाभिः प्राणाधारत्वेन स्वयं प्राणरूपः 'सन्' इतरानूर्द्ध्ववर्त्तिनोऽधोवर्त्तिनश्च प्राणानुद्दिश्य प्रत्येकं 'नाभेः' नाभैषीरितीत्थं वदन्निव मर्यादारूपत्वेनावस्थितः। 'तस्माद्' अयं देहमध्यवर्त्ती 'नाभिः' भवति। मैव भीतिं कुर्वित्यभिप्रेत्य मर्यादात्वेनावस्थानमेव 'नाभेः' नाभिशब्दप्रवृत्तिनिमित्तम्। तस्मादयंवेनइति-मन्त्रपाठेन 'प्राण मेव' 'अस्मिन्' प्रवर्ग्ये स्थापयति ॥

अथैकत्र समाम्नात मृग्द्वयम्, अन्यत्र समाम्नाता मेकां ऋचं विधाय सह प्रशंसति—"पवित्रं ते विततं ब्रह्मणस्पते, तपोष्पवित्रं विततं दिवस्पदे, वियत्पवित्रं धिषणा अतन्वतेति पूतवन्तः; प्राणास्त इमे ऽवाञ्चो रेतस्यो मूत्र्यः पुरीष्य इत्येतानेवास्मि-

हरन्याति''-इति (सं० ९.८३.१,२.)। अत्र "वियत्पवित्रम्"-इत्येषा शाखान्तरगता सूत्रकारेण पठिता (आश्व० श्रौ० ४. ६. ३.)। त्रिष्वप्येतेषु मन्त्रेषु शुद्धिवाचिनः पवित्रशब्दस्य विद्यमानत्वादेते 'पूतवन्तः' यज्ञपुरुषस्य प्राणस्थानीयाः। पूर्व मुदाहृताः (१४७ पृ० नव) मन्त्रविशेषा यज्ञपुरुषस्य नाभेरूर्ध्वभाविप्राणस्थानीयाः। पवित्रं ते विततमित्याद्यास्त्रयो मन्त्रा ये सन्ति, 'ते इमे' नाभेः 'अवाञ्चः' अधोदेशप्राणस्थानीयाः। तेषु रेतसे स्थित एकः प्राणः *, मूत्राय स्थितो ऽपरः प्राणः। तयोरुभयोर्गोलकद्वारस्यैकत्वेऽपि स्वरूपेणेन्द्रियभेदात् पृथङ् निर्देशः। द्वारान्तरसञ्चारी पुरीषाय स्थितस्तृतीयः प्राणः। 'इति' उक्तान् 'एतानेव' त्रीन् प्राणान् मन्त्रत्रयपाठेन 'अस्मिन्' प्रवर्ग्ये स्थापयति ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां चतुर्थाध्याये
तृतीयः खण्डः ॥ ३ (२०) ॥

॥ अथ चतुर्थः खण्डः ॥

गणानां त्वा गणपतिं हवामह इति ब्राह्मणस्पत्यं ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैनं तद्भिषज्यति प्रथश्च यस्य सप्रथश्च नामेति घर्मतन्वः सतनुमेवैनं तत्

---

* (रेतसः) 'तथा स्थितम्'-इति पा० ५. १. ५ ।

सरूपं करोति रथन्तर माजभारा वसिष्ठः भरद्वाजो बृहदाचक्रे अग्नेरिति बृहद्रथन्तरवन्त मेवैनं तत्करोत्यपश्यं त्वा मनसा चेकितान मिति प्रजावान् प्राजापत्यः प्रजा मेवास्मिंस्तद्दधाति काराधद्वोवाश्विना वा मिति नव विच्छन्दसस्तदेतद्यज्ञस्यान्त्यं विक्षुद्र मिव वा अन्त्यं मणीय इव च स्थवीय इव च तस्मादेता विच्छन्दसो भवन्त्येताभिर्हाश्विनोः कक्षीवान् प्रियं धामोपागच्छत् स परमं लोक मजयदुपाश्विनोः प्रियं धाम गच्छति जयति परमं लोकं य एवं वेद भात्यग्निरुषसा मनीक मिति सूक्तं पीपिवांस मश्विना घर्म मच्छेत्यभिरूपं यद्यज्ञे ऽभिरूपं तत्समृद्धं तदु त्रैष्टुभं वीर्यं त्रिष्टुब् वीर्यं मेवास्मिंस्तद्दधाति ग्रावाणेव तदिदर्थं जरेथे इति सूक्त मक्षी इव कर्णाविव नासेवेत्यङ्गसमाख्या य मेवास्मिंस्तदिन्द्रियाणि दधाति तदु त्रैष्टुभं वीर्यं वै त्रिष्टुब् वीर्यं मेवास्मिंस्तद्दधातीळे द्यावापृथिवी पूर्वचित्तय इति सूक्त मग्निं घर्मं सुरुचं यामन्निष्टय इत्यभिरूपं यद्यज्ञे ऽभिरूपं तत्समृद्धं तदु जागतं जागता वै पशवः पशूनेवास्मिंस्तद्दधाति याभिरमु मावतं याभिरमु मावत मित्येतावतो हात्राश्विनौ कामान् ददृशतु-

तानेवास्मिंस्तद्दधाति तैरेवैनं तत् समर्धयत्यरूरुचदुषसः पृश्निरग्रिय इति रुचितवती रुच मेवास्मिंस्तद्दधाति द्युभिरक्तुभिः परि पात मस्मानित्युत्तमया परिदधात्यरिष्टेभिरश्विना सौभगेभिस्तन्नो मित्रो वरुणो मामहन्ता मदितिः सिन्धुः पृथिवी उत द्यौरित्येतैरेवैनं तत् कामैः समर्धयतीति नु पूर्वं पटलम् ॥ ४ (२१) ॥

अथ सूक्तविशेषा विधातव्याः ; तत्रैकोनविंशत्यृचं सूक्तं विधत्ते—"गणानां त्वा गणपतिं हवामह इति ब्राह्मणस्पत्यम्, ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैनं तद्भिषज्यति"-इति । तस्मिन् सूक्ते (सं० २. २३.) प्रथमाया ऋचः उत्तरार्धे 'ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत'—इति श्रूयमाणत्वादिदं सूक्तं ब्रह्मणस्पतिदेवताकम्* । 'ब्रह्म वै'-इत्यादिकं पूर्ववद् व्याख्येयम् (१४४ पृ० १२ पं०) ॥

तृचात्मकं सूक्तान्तरं विधत्ते—"प्रथश्च यस्य सप्रथश्च नामेति घर्मतन्वः सतनु मेवैनं तत् सरूपं करोति"-इति । अस्मिन् सूक्ते (सं १०.१८.) पठिताः प्रथश्चेत्याद्यास्तिस्र ऋचो (१—३) 'घर्मतन्वः' प्रवर्ग्यस्य शरीरस्थानीयाः । 'तत्' मन्त्रपाठेन 'एनं' प्रवर्ग्यं 'सतनु' शरीरोपेतं 'करोति' । सतनु मित्यस्यैव व्याख्यानं 'सरूपम्' इति । यद्वा, तस्मिन् शरीरे शोभनरूपसहितं प्रवर्ग्यं करोति । अस्मिन् सूक्ते प्रथमद्वितीययोः ऋचोर्यौ चतुर्थौ पादौ, ताव-

---

* इयं ऋक्—"गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥"-इति ।

सूक्तं प्रशंसति—“रथन्तर माजभारा वसिष्ठः, भरद्वाजो बृहदाचक्रे अग्नेरिति; बृहद्रथन्तरवन्त मेवैनं तत्करोति”-इति। सामद्वयवाचिनोः रथन्तरशब्दबृहच्छब्दयोरत्र श्रूयमाणत्वात्तत्पाठेन प्रवर्ग्यं सामद्वयोपेतं करोति * ॥

तृचात्मकं सूक्तान्तरं विधत्ते—“अपश्यं त्वा मनसा चेकितान मिति प्रजावान् प्राजापत्यः; प्रजा मेवास्मिंस्तद्दधाति”-इति। एतत्-सूक्तगतानां तिसृणा मृचां (सं० १०. १८३. १—३) पृथग्विनियोग माश्वलायन आह—“अपश्यं त्वेत्येतस्याद्यया यजमान मीक्षते, द्वितीयया पत्नीं, तृतीययाऽऽत्मानम्”-इति (आ० ४.६.३.)। अस्य च सूक्तस्य ऋषिः ‘प्रजावान्’-इतीरतन्नामकः। स च प्रजापतेः पुत्रः। तदीयपाठेन ‘प्रजां’ सम्पादयति ॥

सूक्तान्तरे नवसङ्ख्या ऋचो विधत्ते—“काराधद्धोत्राश्विना वा मिति नव विच्छन्दसस्तदेतद्यज्ञस्यान्तरस्यं विच्छिद्र मिव वा अन्तस्य अणीय इव च स्थवीय इव च तस्मादेता विच्छन्दसो भवन्ति”-इति। काराधदित्यस्मिन् सूक्ते विद्यमाना ऋचो नवसङ्ख्याकाः (सं० १.१२०.)। ताश्च विविधेन छन्दसा युक्ताः। तच्च विविधत्व मनुक्रमणिकाया मुक्तम्—“आद्या गायत्री, द्वितीया ककुप्, तृतीया-चतुर्थ्यौ काविराण्नष्टरूप्यौ, पञ्चमी तनुशिरा †,

---

* तत्र सामद्वयं सामगाना मारण्यके २. १. २१; १. १. २७। तयोर्योन्यृचौ तु छ० आ० ३. १. ५. १, २। तयोर्विधायकवचनानि च ता० ब्रा० ७. ६. ६, ५।

† ‘प्रथमं छन्दस्त्रिपदा गायत्री’-इति (१. ६.), ‘मध्यमेन ककुप्’-इति (३. २.), ‘नवकयोर्मध्यं आगतः काविराट्’-इति (४.५.), ‘नव वैराजयोर्दशैर्नष्टरूपी’-इति (४.६.), ‘एकादशिनोः पञ्चः षट्कस्तनुशिरा’-इति (३. ३.) च का० छ० प०।

[illegible]ऋग् *, विष्टारबृहती, कृतिः, विराट् †, तिस्रो गायत्र्यः ‡"-इति । यद्यप्येतद् द्वादशर्चं सूक्तम्, तथापि षडेवर्चोऽत्रापेक्षिता इति नवेत्युक्तम् । 'तदेतत्' सूक्तम्, प्रवर्ग्याख्यस्य 'यज्ञस्य' 'अन्तस्थम्' उदरगतावयवस्वरूपम् । लोकेऽपि 'अन्तस्थं' शरीरगतमध्यस्थावयवजातं, 'विक्षुद्र मिव वै' विविधत्वेन तारतम्येन स्वल्प मेव भवति । तद्यथा,—किञ्चिन्मांसनाड्यादिकम् 'अणीय इव च' अत्यन्तं सूक्ष्म मेव भवति ; अन्यच्च मांसनाड्यादिकं 'स्थवीय इव च' अत्यन्तं स्थूल मेव भवति । यस्मादुदरगत मवयवजात मीदृशम्, 'तस्मात्' तत्स्थानीया 'एताः' ऋचो 'विच्छन्दसो भवन्ति' । उत्तमलोकप्राप्तिहेतुत्वेन ता ऋचः प्रशंसति—"एताभिर्वा अश्विनोः कक्षीवान् प्रियं धामोपागच्छत्, स परमं लोक मजयद्"-इति । 'कक्षीवान्' इत्येतन्नामकः कश्चिदृषिः । स च कारायधदिति- 'एतैरताभिः' ऋग्भिर्जयं कृत्वा 'अश्विनोः' यत् 'प्रियं' 'धाम' स्थानं तत्प्राप्नोत् । ततस्ताभ्या मनुगृहीतः ततोऽप्युत्तमं लोकं जितवान् । एतद्-वेदनं प्रशंसति—"उपाश्विनोः प्रियं धाम गच्छति, जयति परमं लोकं य एवं वेद" इति ॥

पञ्चमं सूक्तान्तरं विधत्ते—"आ भात्यग्निरुषसा मनीक मिति सूक्तम्"-इति (सं० ५. ७६. १—५.) । अभिष्टवार्थं पठेदिति सर्वत्र द्रष्टव्यम् । प्रथमाया ऋचश्चतुर्थपादं पठित्वा

---

* षष्ठी ऋक् यद्यपि पादलक्षणेनाक् न भवति, तथाप्यक्षरसङ्ख्यायोगादित्यर्थः ।

† 'षट्त्रिंशन्मध्ये दशकौ विष्टारबृहती'-इति (४. ५.), 'जगत्यावष्टकाय कृतिः'-इति (४. ३.), 'दशकास्त्रयो विराडेकादशका वा'-इति (८. ७.) च आ० छ० प० ।

‡ दशम्याद्यास्तिस्रो गायत्र्यः ; परं नेह विनियोज्याः ।

तन्मुखेन सूक्तं प्रशंसति—"पीपिवांस मश्विना घर्म्म मच्छेत्यभिरूपं, यद्यज्ञे ऽभिरूपं तत्समृद्धम्"-इति। हे अश्विनौ! 'पीपिवांसम्' अभिप्रवृद्धं 'घर्म्मम् अच्छ' प्रवर्ग्य मभिलक्ष्येत्यत्र अस्मिन् पादेऽवगम्यते। एतत् सूक्तं प्रवर्ग्यस्यानुरूपम्। सूक्तगतं छन्द प्रशंसति— "तदु त्रैष्टुभं वीर्यं वै त्रिष्टुब् वीर्य मेवास्मिंस्तद्दधाति"-इति। 'तदु' तच्च सूक्तम्॥

अष्टर्चं सूक्तान्तरं विधत्ते—"ग्रावाणेव तदिदर्थं जरेथे इति सूक्तमक्षी इव कर्णाविव नासिकेत्यङ्गसमाख्याय मेवास्मिंस्तदिन्द्रियाणि दधाति"-इति (सं० २. ३९. १— ८.)। तस्य सूक्तस्य पञ्चम्या मृचि द्वितीयपाद एव माम्नातः—"अक्षी इव चक्षुषा यात मर्वाक्" इति। षष्ठ्या मृच्युत्तरार्द्ध मेव माम्नातम्—"नासेव नस्तन्वो रक्षितारा कर्णाविव सुश्रुता भूत मस्मे"-इति। एवं च सति 'अङ्गसमाख्याय मेव' अक्षिकर्णनासादिरूपाण्यङ्गानि पुनः पुनः कथयन्नेव 'अस्मिन्' घर्म्मे 'इन्द्रियाणि' स्थापयति। सूक्तगतं छन्दः प्रशंसति—"तदु त्रैष्टुभं वीर्यं वै त्रिष्टुब् वीर्य मेवास्मिंस्तद्दधाति"-इति॥

पञ्चविंशत्यृचं सूक्तान्तरं विधत्ते—"ईळे द्यावापृथिवी पूर्वचित्तय इति सूक्तम्" (सं०१.११२.१—२५.) इति। प्रथमाया ऋचो द्वितीयपाद मुदाहृत्य तद्द्वारा सूक्तं प्रशंसति—"अग्निं घर्म्मं सुरुचं यामन्निष्टय इत्यभिरूपं यद्यज्ञेऽभिरूपं तत्समृद्धम्"-इति। अग्नि मित्यादिके द्वितीयपादे 'सुरुचं घर्म्मम्'-इति शोभनदीप्तियुक्तः प्रवर्ग्यः पठितः; तस्मादिदं सूक्त मनुरूपम्। तत्सूक्तगतं छन्दः प्रशंसति—"तदु जागतं जागता वै पशवः पशूनेवास्मिंस्तद्दधाति"-इति। पुरा कदाचित् सोम माहर्त्तुं द्युलोके गता

जगती ; सोमं हर्तुं अशक्ता सती पशून् दीक्षां च आहृतवती ; तस्मात् 'पशवः' 'जागताः'। एतच्च कद्रूश्चेत्यनुवाके तैत्तिरीयैः समाम्नातम्—"सा पशुभिश्च दीक्षया चागच्छत् ; तस्माज्जागती छन्दसां पशव्यतमा"-इति (सं० ६. १. ६. २.)। अतस्तदीयपाठेन पशून् सम्पादयति। सूक्तगतास्वृक्षु सर्वासु विद्यमान मर्थं मुपजीव्य सूक्तं प्रशंसति—"याभिरमु मावतं याभिरमु मावत मित्येतावतो ह्येवाश्विनौ कामान् ददृशतुस्तानेवास्मिंस्तद्दधाति ; तैरेवैनं तत्समर्द्धयति"-इति। अस्य सूक्तस्य प्रथमायाम् ऋचि द्वितीयार्द्ध मेव माम्नातम्—"याभिर्भरे कारमंशाय जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतम्" इति। तस्यायमर्थः—हे अश्विनौ ! युवां 'अंशाय' तन्नाम्नः पुरुषस्योपकाराय 'भरे' युद्धे 'कारं' विजयं कृत्वा 'याभिः' 'ऊतिभिः' पालनैः अंशनामकं तं पुरुषं 'जिन्वथः' प्रीणयथः, 'ताभिरू षु' तादृशीभिरेवोतिभिः पालनैः 'आगतम्' इह कर्मणि समागच्छत मिति। द्वितीयस्या ऋचि द्वितीयार्द्ध मेव माम्नातम्—"याभिर्धियोऽवथः कर्मन्निष्टये ताभिरू षु ऊतिभिरश्विना गतम्" इति। तस्यायमर्थः—हे अश्विनौ ! 'इष्टये' अभीष्टसिद्ध्यर्थं क्रियमाणेऽनुष्ठीयमाने, लौकिके वैदिके वा सर्वस्मिन् 'कर्मणि' 'याभिरूतिभिः' 'धियः' प्राणिनां बुद्धीः 'अवथः' रक्षथः, 'ताभिः' एवोतिभिः आगच्छत मिति। एवं सर्वास्वप्यृक्षु अर्थोऽनुसन्धेयः। त मर्थं सर्वं सामान्यवाचिना सर्वनामशब्देन परामृश्य श्रुतिर्याभिरित्येतेन वाक्येन सङ्गृह्णाति। 'याभिः' 'ऊतिभिः' 'अमुम्' ईदृशम् 'आवतं' युवां रक्षितवन्ताविति। सर्वेषा मृगर्थानां सङ्ग्राहिकां वीप्सा मभिप्रेत्य "याभिरमु मावतम्"-इति द्विः पठ्यते। तास्वृक्षु यावन्तः कामाः

श्रूयन्ते, तावन्तः कामाः इह कर्मणि 'अश्विनौ' 'ददृशतुः' कटाक्षेणानुगृह्णीतवन्तौ। तत्सूक्तपाठेन तानेव सर्वान् कामान् अस्मिन् प्रवर्ग्ये यजमाने वा सम्पादति। ते च कामाः समृद्धाः सम्पद्यन्ते।

अन्यां काञ्चिदृचं विधत्ते—"अरूरुचदुषसः पृश्निरग्रिय इति रुचितवती; रुच मेयास्मिंस्तद्दधाति"-इति (सं० ८. ८२. २.)। अस्या ऋचि अरूरुचदिति श्रुतत्वात् रुचितम्, अभीष्टकान्तिर्वा अस्या मस्तीत्यसौ 'रुचितवती'; सा पठनीया। तस्याः पूर्वोक्तसूक्ते* स्थानविशेष आश्वलायनेन दर्शितः—"प्रागुत्तमायाः† अरूरुचदुषसः पृश्निरग्रिय इत्यावपेतोत्तरेणार्द्धर्चेन पत्नी मीक्षेत"-इति (श्रौ० ४.६.२.)। तत्सूक्तपाठेन यजमाने कान्तिं सम्पादयति।

सूक्तस्यान्तिमयर्चाभिष्टवेन पूर्वभागस्य समापनं विधत्ते—"द्युभिरक्तुभिः परि पात मस्मानित्युत्तमया परिदधाति"-इति। तस्या ऋचो ऽवशिष्टं पादत्रयं सन्धाय कृत्स्नं मन्त्रतात्पर्यं दर्शयति—"अरिष्टेभिरश्विना सौभगेभिः, तन्नो मित्रो वरुणो मामहन्ता मदितिः सिन्धुः पृथिवी उत द्यौरित्येतैरेवैनं तत्कामैः समर्द्धयति" इति। तस्या ऋचोऽयमर्थः—हे अश्विनौ! 'द्युभिः' दीप्तिभिः, द्युलोकोचितभोगैर्वा, 'अक्तुभिः' अञ्जनसाधनद्रव्यैः आज्यतैलादिभिः, 'अरिष्टेभिः' हिंसापरिहारैः 'सौभगेभिः' सर्वभोगसम्पत्तिलक्षणैः सौभाग्यैश्च अस्मान् 'पातं' रक्षतम्। 'तत्' तथासत्यनन्तरं 'नः' अस्मान् मित्रावरुणादितिसमुद्रपृथिवीद्युदेवताः सर्वा अपि 'मामहन्ताम्' अतिशयेन पूजयन्त्विति।

---

* 'तस्याः' अरूरुचदित्यस्याः, 'पूर्वोक्तसूक्ते' ईळेद्यावेत्यस्मिन् (१५४ पृ०)।

† 'उत्तमायाः' पञ्चविंशतितमायाः अन्तिमायाः 'प्राक्' पूर्वम्; चतुर्विंशतितमायाः ऊर्ध्वमिति यावत्। 'द्युभिरक्तुभिः'-इत्यन्तं सूक्तं ईळेद्यावेत्यनुक्रान्तम्।

तन्मन्त्रपाठेन 'एनं' यजमानम् 'एतैरेव कामैः' द्युभिरक्तुभिरित्यादिशब्दोक्तैः फलैः समृद्धं करोति। अभिष्टवस्य * पूर्वभाग मुपसंहरति— "इति नु पूर्वं पटलम्"-इति। 'ब्रह्मजज्ञानम्'-इत्यारभ्य (१४३ पृ०) 'पृथिवी उत द्यौः'-इत्यन्तेनोक्तप्रकारेण अभिष्टवस्य पूर्वो भागो वर्णितः †। अथ भागद्वयकल्पन मेकैकस्मिन् भागे प्रथमोत्तमयोः ऋचोरावृत्त्यर्थम्। अतएवोक्तम्—

"आद्यान्त्यत्रित्वसिद्ध्यर्थं पटलद्वितयं कृतम्।
अन्यथाभिष्टवस्यैक्यात् त्रित्वं तत्रैव वै भवेत्"-इति ‡॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां चतुर्थाध्याये
चतुर्थः खण्डः ॥ ४ (२१) ॥

---

* 'अभिष्टवनं नाम धर्मस्य सम्यगभिधानरूपम्। यतः "धर्मं समभिष्टुहि"-इति सम्प्रैषादवगतम्। तत्र यत् क्रियान्तर संक्रमणादि [illegible], तदपि यथाक्रमं कर्तव्य मेव'-इति आश्वलायनवृत्तौ नारायणः। तदभिष्टवनं च [illegible] होत्रा [illegible] यथा [illegible] कार्यं भवति (आश्व० श्रौ० ४. ६. २)। [illegible]'-इति च तत्रैव [illegible] (४. ६. ३)।

† आश्वलायनोऽप्याह—'इति नु पूर्वं पटलम्'-इति ४. ६. ३।

‡ [illegible] ५. ७; ६. ५।

॥ अथ पञ्चमः खण्डः ॥

अथोत्तर मुपह्वये सुदुघां धेनु मेतां हिङ्कृण्वती वसुपत्नी वसूना मभि त्वा देव सवितः सं मी वत्सन्न मातृभिः सं वत्स इव मातृभिर्यस्ते स्तनः शशयो यो मयोभूर्गौरमीमेदनु वत्सं मिषन्तं नमसेदुप सीदत सञ्जानाना उप सीदन्नभिज्ञु दशभिर्विवस्वतो दुहन्ति सप्तैकां समिद्धो अग्निरश्विना समिद्धो अग्निर्वृषणारतिर्दिवस्तदु प्रयक्षतम मस्य कर्मात्मन्वन्नभो दुह्यते घृतं पय उत्तिष्ठ ब्रह्मणस्पते ऽधुक्षत् पिप्युषी मिषं मुप द्रव पयसा गोधुगोष मा सुते सिञ्चत श्रियं मा नून मश्विनोर्ऋषिः सं मु त्यं महतीरप इत्येकविंशतिरभिरूपा यद्यज्ञे ऽभिरूपं तत्समृद्ध मु दु ष्य देवः सविता हिरण्ययेत्यनूत्तिष्ठति प्रैतु ब्रह्मणस्पतिरित्यनुप्रैति गन्धर्व इत्था पद मस्य रक्षतीति खर मवेक्षते नाके सुपर्ण मुपयत्पतन्त मित्युपविशति तप्तो वां घर्मो नक्षति स्वहोतोभा पिबत मश्विनेति पूर्वाह्णे यजत्यग्ने वीहीत्यनुवषट्करोति स्विष्टकृद्भाजनं यदुस्रिया स्वाहुतं घृतं पयो ऽस्य पिबत मश्विनेत्यपराह्णे यजत्यग्ने वीहीत्यनुवषट्करोति स्विष्टकृद्भाजनं त्रयाणां ह वै हविषां

स्विष्टकृतेन समवद्यन्ति सोमस्य [illegible] स यदनुवषट् करोत्यग्नेरेव स्विष्टकृतो ऽनन्तरित्यै विश्वा आशा दक्षिणसादिति ब्रह्मा जपति स्वाहाकृतः शुचिर्देवेषु घर्मः समुद्रादूर्मिमुदियर्त्ति वेनो द्रप्सः समुद्र मभि यज्जिगाति सखे सखाय मभ्याववृत्स्वोर्ध्व ऊ षु ण ऊतय ऊर्ध्वो नः पाह्यंहसस्तं घे मित्था नमस्विन इत्यभिरूपा यद्यज्ञे ऽभिरूपं तत्समृद्धं पावक शोचे तव हि क्षयं परीति भक्ष माकाङ्क्षते हुतं हविर्मधुहविरिन्द्रतमे ऽग्नावश्याम ते देव घर्म मधुमतः पितुमतो वाजवतो ऽङ्गिरस्वतो नमस्ते अस्तु मा मा हिंसीरिति घर्मस्य भक्षयति श्येनो न योनिं सदनं धियाकृत मा यस्मिन्त्सप्त वासवा इति संसाद्यमानायान्वाह हविर्हविष्मो महि सद्म दैव्य मिति यदहरुत्सादयिष्यन्तो भवन्ति सूयवसाद्भगवती हि भूया इत्युत्तमया परिदधाति तदेतद्देवमिथुनं यद् घर्मः स यो घर्मस्तच्छिश्नं यौ शफौ तौ शफौ योपयमनी ते * श्रोणिकपाले यत्पयस्तद्रेतस्तदिद मग्नौ देवयोन्यां प्रजननं रेतः सिच्यते ऽग्निर्वै देवयोनिः सो ऽग्नेर्देवयोन्या आहुतिभ्यः सम्भवत्यृङ्मयो

---

* 'योनयमनी पीते' ग ।

यजुर्मयः साममयो वेदमयो ब्रह्ममयो ऽमृतमयः सम्भूय देवता अप्येति य एवं वेद यश्चैवं विद्वानेतेन यज्ञक्रतुना यजते ॥ ५ (२२) ॥

पटलान्तरं प्रतिजानीते—"अथोत्तरम्" इति *। पटल मुच्यत इति शेषः। पटलशब्दः समूहवाची "समूहे पटलं न ना"—इत्यभिधानकारैरुक्तत्वात् (अम० ३.३.२००.)। उत्तरभागस्थो मन्त्रसमूहः कथ्यत इत्यर्थः ॥

तत्रैकविंशतिसङ्ख्याका ऋचः तत्तत्प्रतीकग्रहणेन विधत्ते—"उपह्वये सुदुघां धेनुमेतां ; हिङ्कृण्वती वसुपत्नी वसूनाम् ; अभि त्वा देव सवितः ; सं सीं वत्सं मातृभिः ; सं वत्स इव मातृभिः ; यस्ते स्तनः शशयो यो मयोभूः ; गौरमीमेदनु वत्सं मिषन्तं, नमसेदुप सीदत ; सञ्जानाना उप सीदन्नभिज्ञु ; आ दशभिर्विवस्वतो ; दुहन्ति सप्तैकां ; समिद्धो अग्निरश्विना ; समिद्धो अग्निर्वृषणा रतिर्दिवम् ; तदु प्रयक्षतमस्य कर्म ; आत्मन्वन् नभो दुह्यते घृतं पयः ; उत्तिष्ठ ब्रह्मणस्पते ; अधुक्षत् पिप्युषीमिषम् ; उप द्रव पयसा गोधुगोषम् ; आ सुते सिञ्चत श्रियम् ; आ नूनमश्विनोरृषिः ; समु त्ये महतीरप इत्येकविंशतिरभिरूपाः ; यद्यज्ञेऽभिरूपं, तत्समृद्धम्"-इति। विहितास्वृक्षु ;—'उप ह्वये'-इति (सं० १.१६४.२६.) प्रथमा, 'हिङ्कृण्वती'-इति (सं० १.१६४.२७.) द्वितीया, 'अभि त्वा' इति (सं० १.२४.३.) तृतीया, 'सं सीं वत्सम्'-इति (सं०

---

* आश्वलायनीयपाठे सैवाह 'अथोत्तरम्'-इति। अत्रापि [illegible] प्रयोजनीयम् ; अपिच 'अथाभिप्लव (४. ७. ३.)'-इत्यधिकम्।

९.१०४.२.) चतुर्थी, '[illegible]'-इति ([illegible]) पञ्चमी, 'यस्ते स्तन:'-इति (सं०१.१६४.४९.) षष्ठी, 'गौरमीमेत्'-इति (सं० १. १६४. २८.) सप्तमी, 'नमसेत्'-इति (सं०९.११.६.) अष्टमी, 'सञ्जानाना:'-इति (सं०१.७२.५.) नवमी, 'आ दशभि:'-इति (सं०८.७२.८.) दशमी, 'दुहन्ति सप्तैकाम्'-इति (सं० ८.७२.७.) एकादशी ; 'समिद्धो अग्निरश्विना'-इति द्वादशी, 'समिद्धो अग्निर्वृषणा रतिर्दिव:'-इति त्रयोदशी, एतदुभयं शाखान्तरगत माश्वलायनेन पठितम् (श्री० ४. ७. ४.) ; 'तदु प्रयक्षतमम्'-इति (सं० १. ६२. ६.) चतुर्दशी, 'आत्मन्वन्'-इति (सं०९.७४.४.) पञ्चदशी ; 'उत्तिष्ठ' इति (सं० १. ४०. १.) षोडशी, तस्या विनियोग माश्वलायन आह—"उत्तिष्ठ ब्रह्मणस्पत इत्येता मुत्थामतिष्ठते"-इति (श्री० ४. ७. ४.) ; 'अधुक्षत्' इति (सं० ८. ७२. १६.) सप्तदशी, तद्विनियोग माह—'दुग्धायाम् अधुक्षत्'-इति (श्री० ४. [illegible]) ; 'उप द्रव' इत्यष्टादशी, तद्विनियोगं चाह—"पाल्यमानाम् उप द्रव"-इति ; सेयं शाखान्तरगता आश्वलायनेन पठिता (श्री०४.७.४.) ; 'आ सुते'-इति (सं०८.७२.१२.) एकोनविंशी, 'आ नूनम्'-इति (सं०८.९.७.) विंशी ; अनयोर्व्यत्ययेन प्रयोग माह—'आसिच्यमान आ नूनमश्विनोर्ऋषिरिति गर्मे, आ सुते सिञ्चत श्रिय मित्याज्ये'-इति (श्री० ४. ७. ४.) ; 'स मु [illegible]' इति (सं० ८. ७. २२.) एकविंशी, तद्विनियोगं चाह—"सन्नयो: स मु त्ये"-इति (श्री० ४. ७. ४.) । सेय मृचां संगति: घर्मदुघो धेनोर्दोहनस्यानुरूपा ; नास्वृचु दोहनोचितानां दृश्यमानत्वात् ॥

अथ मन्त्राणां प्रतीकानि क्रमेणादाय तद्विनियोगं दर्शयति—"उदु ष्य देवः सविता हिरण्ययेत्यनूत्तिष्ठति ; प्रैतु ब्रह्मणस्पतिरित्यनुप्रैति ; गन्धर्व इत्था पदमस्य रक्षतीति* खर मवेक्षते ; नाके सुपर्ण मुप यत्पतन्तमित्युपविशति† ; नमो वां घर्मो नक्षति स्वहोतोभा पिबत मश्विनेति पूर्वाह्णे यजति"-इति । महावीर मादायोत्तिष्ठत्सु अन्येषु ‡ होता 'उदु ष्य देवः'-इत्यनेन (सं० ६. ७१.४.) मन्त्रेण ताननूत्तिष्ठेत् ; तेषु गच्छत्सु 'प्रैतु ब्रह्मणस्पतिः'-इति (सं० १. ४०. ३.) मन्त्रेणानुगच्छेत् । 'खरः' प्रवृञ्जनस्थानम् । 'नमो वाम्'-इत्येषा शाखान्तरगतत्वात् सूत्रकारेण पठिता (४. ७. ४.), 'उभा पिबतम्'-इति स्वशाखागता (सं० १. ४६. १५.) ; ताभ्या मुभाभ्यां 'पूर्वाह्णे यजति' तदुभयं याज्यारूपेण पाठेन पठेत् । प्रवर्ग्यस्य कालद्वये ऽप्यनुष्ठेयत्वात् पूर्वाह्ण इति विशेष्यते ।

विनियोगसहितं मन्त्रान्तरं विधत्ते— "अग्ने वीहीत्यनुवषट्करोति स्विष्टकृद्भाजनम्"-इति । पूर्वोक्तयोर्याज्ययोः पाठान्ते वौषडिति यदुच्चारणं सोऽयं प्रथमो वषट्कारः ; तत ऊर्ध्व मग्ने वीहीत्युच्चार्य वौषडिति यत्पठनं सोऽय मनुवषट्कारः । एतं मन्त्रं होता पठेत् । हे 'अग्ने !' 'वीहि' खाद, भक्षयेत्यर्थः † । घर्मस्य यजेत्यध्वर्युणा प्रेषितो होता पूर्वोक्तं याज्याद्वयं सवषट्कारं यदा पठति, तदानी मध्वर्युरश्विना घर्म्मं पात मिति मन्त्रेण जुहोति पुनरपि अग्ने वीहीति होता पठिते सत्यध्वर्युः स्वाहेन्द्रावडिति जुहोति । तदेतत्सर्व मापस्तम्ब आह—"आश्राव्यप्रत्याश्राविते सम्प्रे

---

* सं० ९. ८३. ४ । † सं० १०. १२३. ६ ।

‡ तथैव सूत्रकारस्य विधानात् (आश्व० श्रौ० ४. ७. ४.) ।

ध्यति घर्मस्य यजेति; अश्विना घर्मं पात मिति वषट्कृते जुहोति; स्वाहेन्द्रावडित्यनुवषट्कृतः"-इति (श्रौ० १५.१०.११.) । यदि-तदनुवषट्कारेण यजनम्, तदेतत् 'स्विष्टकृद्याजनं' स्विष्टकृत्स्थानीय मित्यर्थः ॥

यथा पूर्वाह्णे याज्यापाठः, तथा अपराह्णकालानुष्ठानेऽपि विधत्ते —"यदुस्रिया स्वाहुतं घृतं पयोऽस्य पिबत मश्विनेत्यपराह्णे यजत्यग्ने वीहीत्यनुवषट् करोति स्विष्टकृद्याजनम्"–इति । 'यदुस्रिया स्वाहुतम्'-इत्येषा शाखान्तरगतत्वादाश्वलायनेन पठिता (श्रौ० ४. ७. ४.) ; 'अस्य पिबतम्'-इति स्वशाखागता (सं० ८. ५. १४.) । अन्यत् सर्वं पूर्ववत् (१६२ पृ०) । अत्र मुख्यस्विष्टकृद्वर्जितत्वात् तल्लोप माशङ्क्य परिहरति—"त्रयाणां ह वै हविषां स्विष्टकृते न समवद्यन्ति; सोमस्य, घर्मस्य, वाजिनस्येति; स यदनुवषट् करोत्यग्नेरेव स्विष्टकृतो ऽनन्तरित्यै"-इति । सोमो वल्लीरसः, घर्मः प्रवर्ग्यहविः, वाजिन मामिक्षानुनिष्पादि नीरम्; एतेषां स्विष्टकृदर्थ मवदानं न कुर्युः । न चैतावता तल्लोपः, 'सः' होता 'अनुवषट् करोति' इति 'यद्' अस्ति, तदेतत् स्विष्टकृन्नामकस्य 'अग्नेः' 'अनन्तरित्यै' अन्तरायो लोपः, तन्निवृत्त्यर्थं भवति ॥

अथ ब्रह्मणः शाखान्तरप्रसिद्धेन मन्त्रेण जपं विधत्ते—"विश्वा आशा दक्षिणसादिति ब्रह्मा जपति"--इति । इय मृगाश्वलायनेन पठिता (४. ७. ४.) ।

प्रासङ्गिकं ब्रह्मजपं विधाय होमादूर्ध्वं होत्रा पठनीया ऋचः सप्त विधत्ते—"स्वाहाकृतः शुचिर्देवेषु घर्मः ; समुद्रादूर्मि मुदियर्ति वेनो ; द्रप्सः समुद्र मभि यज्जिगाति ; सखे सखाय मभ्या ववृत्स्व ; ऊर्ध्व ऊ षु ण ऊतये ; ऊर्ध्वो नः पाह्यंहसः ; तं घे मित्था नम-

स्विन इत्यभिरूपा ; यद्यज्ञे ऽभिरूपं तत् समृद्धम्”-इति। ‘स्वाहाकृत:’-इत्येषा प्रथमा। सा च शाखान्तरगतत्वादाश्वलायनेन पठिता (४,७,४,)। ‘समुद्रादूर्मि:’-इति (सं० १,१२२,२,) द्वितीया, ‘द्रप्स: समुद्रम्’-इति (सं० १०,१२३,८,) तृतीया, ‘सखे सखायम्’-इति (सं० ४,१,३,) चतुर्थी, ‘ऊर्ध्व ऊ षु ण:’-इति (सं० १,३६,१३,) पञ्चमी, ‘ऊर्ध्वो न: पाहि’-इति (सं० १,३६,१४,) षष्ठी, ‘तं घे मित्था’-इति (सं० ८,६९,१७,) सप्तमी। घर्मप्रकाशकत्वादेता: ‘अभिरूपा:’।

होतुरेकयज्यां प्रवर्ग्यहवि:शेषभक्षणप्रतीक्षां विधत्ते—“पावक शोचे तव हि क्षयं परीति भक्ष माकाङ्क्षेत”-इति। समन्त्रकं भक्षणं विधत्ते — “हुतं हविर्मधु हविरिन्द्रतमेऽग्नावश्याम ते देव घर्म मधुमत: पितुमतो वाजवतोऽङ्गिरस्वतो नमस्ते अस्तु मा मा हिंसीरिति”-इति। अतिशयेनाय ऐश्वर्यवानिन्द्रतम: ; तादृशेऽग्नौ प्रवर्ग्याख्यं ‘हवि:’ ‘हुतं’, तच्च ‘मधु’ माधुर्योपेतं, हे ‘घर्म देव’ प्रवर्ग्यरूपदेव ! ‘ते’ त्वदीयं हवि:शेषम् ‘अश्याम’ भक्षयेम। कीदृशस्य ते ? ‘मधुमत:’ माधुर्योपेतस्य, ‘पितुमत:’ अन्नवत: अन्नसाधनस्य, ‘वाजवत:’ गतिमत: स्वर्गप्राप्तिसाधनस्य, ‘अङ्गिरस्वत:’ अङ्गिरोभिर्महर्षिभि: अनुष्ठानकाले भक्षितत्वेन तद्युक्तस्य, ईदृशाय ‘ते’ तुभ्यं ‘नमोऽस्तु’। ‘मा’ मां भक्षयन्तं ‘मा हिंसी:’। ‘इति’ अनेन मन्त्रेण घर्मस्य शेषं भक्षयेत्। अयं मन्त्रोऽन्येषामपि भक्षयितॄणां साधारण:। अतएव तैत्तिरीयैरप्याम्नात: (आर० ४,१०,११, *) ॥

---

* तत्रैव पञ्चमप्रपाठके एतन्मन्त्रस्य व्याख्यानमपि सार्थवादम् (८, ४०—४५ ।

अथ होतुर्मन्त्रद्वयं विधत्ते—"श्येनो न योनिं सदनं धिया कृत मा यस्मिन्त्सप्त वासवा इति संसाद्यमानायान्वाह"-इति । 'श्येनो न योनिम्'-इति (सं० ९.७१.६.) पूर्वा, 'आ यस्मिन्त्सप्त'-इत्यपरा ; सेयं शाखान्तरगतत्वादाश्वलायनेन पठिता (श्रौ० ४.७.४.) यदा प्रवर्ग्यपात्राणि संसाद्यन्ते, तदा होता मन्त्रद्वयमिद मनुब्रूयात् ।

बहुषु दिनेषु पूर्वाह्णापराह्णयोः प्रवर्ग्याख्यं कर्म्मानुष्ठीयते, तत्रोत्तमदिने अपराह्णकालीने प्रवर्ग्याख्ये काचिदृच मधिकां विधत्ते—"हविर्हविष्मो महि सद्म दैव्य मिति यदहरुत्सादयिष्यन्तो भवन्ति"-इति । 'यदहः' यस्मिन्नहनि 'उत्सादयिष्यन्तः' प्रवर्ग्य मुद्वासयितु मुद्युक्ताः 'भवन्ति', तस्मिन्नहनि 'हविर्हविष्मः'-इत्येताम् (सं० ९.८३,५.) ऋच मधिका मुपोत्तमरूपा मावपेत ॥

अथ कयाचिदृचा अभिष्टवस्य समाप्तिं विधत्ते—"सूयवसाद्भगवती हि भूया इत्युत्तमया परिदधाति"-इति (सं० १.१६४.४०.)। अन्तिमात्प्राचीनेषु प्रवर्ग्येषु पूर्वोक्ता मधिका मप्रक्षिप्यैवानया परिदध्यात् । अन्तिमे तु तां प्रक्षिप्य पश्चादनया परिदध्यात् । तदाहाश्वलायनः --"सूयवसाद्भगवती हि भूया इति परिदध्यात्, उत्तमे प्रागुत्तमाया हविर्हविष्मो महि सद्म दैव्य मित्यावपेत"-इति (श्रौ० ४.७.४,५.) ।

अथ पूर्वोक्तस्य प्रवर्ग्यकर्म्मणः प्रशंसार्थं मिथुनव्यापाराकारेण रूपकं दर्शयति—"तदेतद्देवमिथुनं यद्घर्म्मः ; स यो घर्म्मस्तच्छिश्नं, यौ शफौ तौ शफौ, योपयमनी ते श्रोणिकपाले, यत्पयस्तद्रेतस्तदिद मग्नौ देवयोन्यां प्रजनने रेतः सिच्यते; ऽग्निर्वै देवयोनिः; सो ऽग्नेर्देवयोन्या आहुतिभ्यः सम्भवति"-इति । 'यद्घर्म्मः'

प्रवर्ग्याख्यं यत्कर्मास्ति, 'तदेतद्देवमिथुनं' देवसम्बन्धि मिथुनव्यापारः। तत्कथमिति चेत्, उच्यते—'स यो घर्मः' प्रवर्ग्याख्यहविराश्रयभूतो महावीराख्यो मृण्मयपात्रविशेषो योऽसावस्ति *, 'तच्छिश्नं' प्रजननेन्द्रियरूपम्। तस्य महावीरस्य हस्ताभ्यां ग्रहीतुमशक्यत्वात् तद्ग्रहणसमर्थौदुम्बरकाष्ठनिर्मितौ 'शफौ' शफनामानौ विद्येते, 'तौ' प्रजननेन्द्रियस्य पार्श्ववर्त्तिनौ शफाविव सन्दृश्येते च; उदुम्बरकाष्ठाभ्यां शफनामकाभ्यां महावीरस्य मध्यमभागे धृतत्वात्। तस्याधस्तादाधारार्थमुदुम्बरकाष्ठनिर्मिता 'उपयमनी'-शब्दवाच्या दर्वी 'या' विद्यते, सेयं शरीरसम्बन्धिनीति 'श्रोणिकपाले' श्रोणिद्वयमध्यगतमस्थिद्वयम्। उपयमन्या एकत्वेऽप्यधस्तान्महावीरस्य कदाचिद्दक्षिणभागे कदाचिद्वामभागे तद्धारणात् कपालद्वयरूपत्वम्। महावीरगते तप्ते आज्ये प्रक्षेप्तव्यं 'यत्पयः', 'तद्रेतः' स्वरूपम्। 'तदिदं' रेतोरूपमाज्यमिश्रं पयः 'अग्नौ' देवयोनिरूपे 'प्रजनने' उत्पत्तिस्थाने 'रेतः सिच्यते' रेतोरूपेण प्रक्षिप्यते। अग्नेर्देवयोनित्वप्रसिद्ध्यर्थो 'वै' शब्दः। अग्नेः कर्म्मण्यनुष्ठाय देवरूपेण जायमानत्वात् सा प्रसिद्धिर्द्रष्टव्या। सैव

---

* तत्र घृतं पयःप्रक्षेपादिना प्रणीयते 'घर्मः' स्वार्थविशेषः; स एव प्रदीपः प्रवृञ्जनमुच्यते; तादृशप्रवृञ्जनोपलक्षितस्याख्य कर्मणः समाख्या प्रवर्ग्य इति; तत्र च घर्मपाकाय सन्निर्मितः कटाहविशेष एव महावीरः। गौण्या तु वृत्त्या घर्मः, प्रवर्ग्यः, महावीरः—इति त्रीण्येव पदानि समानार्थानीति विवेकः। 'यदा मृद्वराहविहतवल्मीकवपादिसम्भारैः सम्भ्रियमाणत्वदशापन्नो भवति, तदा प्रजापतिरित्येवास्य नाम; सर्वात्मना सम्भृतत्वदशापन्नस्य सम्राडिति नाम; प्रवृञ्जनदशापन्नस्य घर्म इति नाम; उद्वासनदशापन्नस्य महावीर इति नाम; एताभिर्दशाभिरवस्थावत् यत् स्वरूपम्, तेन रूपेणादित्य इति नाम; स प्रवर्ग्य एवैतानि नामान्यश्नुत'—इति तै० आर० सा० भा० ५.११.१। तथा शत० ब्रा० १४.१.१.१०.११। एवमादिकं तु सर्वं स्वतन्त्रं बोध्यम्।

[illegible] योऽग्नेरित्यादिना प्रतीक्षियते । 'सः' यजमानो [illegible] योनिरूपादग्नेरुत्थिताभ्यः 'आहुतिभ्यः' देवतारूपः 'सम्भवति' उत्पद्यते ।

उक्तार्थवेदनं तद्वेदनपूर्वकमनुष्ठानं च प्रशंसति—"ऋङ्मयो यजुर्मयः साममयो वेदमयो ब्रह्ममयोऽमृतमयः सम्भूय देवता अप्येति य एवं वेद ; यश्चैवं विद्वानेतेन यज्ञक्रतुना यजते"–इति । वेदशब्देनाथर्ववेदः, सर्ववेदसमष्टियुक्तिर्नोच्यते । ब्रह्मशब्देन हिरण्यगर्भः । अमृतशब्देन परमात्मा । ता एकैकदेवताः सर्वाः 'सम्भूय' एकीकृत्य समष्टिरूपम् 'अप्येति' प्राप्नोति । वेदनमात्रेण शनैः ; तत्प्राप्तिवेदकपूर्वकानुष्ठानेन तु सहसेति विशेषो द्रष्टव्यः * ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां चतुर्थाध्याये
पञ्चमः खण्डः ॥ ५ (२२) ॥

॥ अथ षष्ठः खण्डः ॥

देवासुरा वा एषु लोकेषु समयतन्त ते वा असुरा इमानेव लोकान् पुरोऽकुर्वत यथौजीयांसो बलीयांस एवं ते वा अयस्मयीमेवेमामकुर्वत रजतामन्तरिक्षं

---

* 'अल्पप्रयाससाध्येन वेदनेन'–इत्यादि पूर्वोक्तं (४ पृ०) संस्मृत्यैवेदमुक्तम् ।

हरिणीं दिवं ते तथेमाँल्लोकान्* पुरोऽकुर्वत ते देवा अब्रुवन् पुरो वा इमे ऽसुरा इमाँल्लोकानक्रत पुर इमाँल्लोकान् प्रति करवामहा इति तथेति ते सद एवास्याः प्रत्यकुर्वताग्नीध्र मन्तरिक्षाद्धविर्धाने दिवस्तथेमाँल्लोकान् पुरः प्रत्यकुर्वत ते देवा अब्रुवन्नुपसद उपायामोपसदा वै महापुरं जयन्तीति तथेति ते या मेव प्रथमा मुपसद मुपायंस्तयैवैनानस्माल्लोकादनुदन्त यां द्वितीयां तयान्तरिक्षाद्यां तृतीयां तया दिवस्तांस्तेभ्यो लोकेभ्यो नुदन्त ते वा एभ्यो लोकेभ्यो नुत्ता असुरा ऋतूनश्रयन्त ते देवा अब्रुवन्नुपसद एवोपायामेति तथेति त इमास्तिस्रः सतीरुपसदो द्विर्द्विरेकैका मुपायंस्ताः षट् समपद्यन्त षड् वा ऋतवस्तान् वा ऋतुभ्यो नुदन्त ते वा ऋतुभ्यो नुत्ता असुरा मासानश्रयन्त ते देवा अब्रुवन्नुपसद एवोपायामेति तथेति त इमाः षट् सतीरुपसदो द्विर्द्विरेकैका मुपायंस्ता द्वादश समपद्यन्त द्वादश वै मासास्तान् वै मासेभ्यो नुदन्त ते वै मासेभ्यो नुत्ता

---

* 'तथेमान्लोकान्' ख, टी० ख, 'तथेमांल्लोकान्' ग, घ, 'तथेमांल्लोकान्' ङ, 'तथेमाँल्लोकान्' टी० क । 'तथेमांन्लोकान्' टी० ग । एवमिह खण्डे सर्वत्रैव पदान्तस्य नस्य लि सन्धौ (पा० ८. ४. ६०) लिपिकरप्रमादजाः पाठाः ।

असुरा अर्धमासानश्रयन्त ते देवा अब्रुवन्नुपसद एवोपायामेति तथेति त इमा द्वादश सतीरुपसदो द्विर्द्विरेकैका मुपायंस्ताश्चतुर्विंशतिः समपद्यन्त चतुर्विंशतिर्वा अर्धमासास्तान्वा अर्धमासेभ्यो ऽनुदन्त ते वा अर्धमासेभ्यो नुत्ता असुरा अहोरात्रे अश्रयन्त ते देवा अब्रुवन्नुपसदावेवोपायामेति तथेति ते या मेव पूर्वाह्ण उपसद मुपायंस्तयैवैनानह्नो ऽनुदन्त या मपराह्णे तया रात्रेस्तांस्तथोभाभ्या मह्नोरात्राभ्या मन्तरायंस्तस्मात्पूर्वाह्ण एव पूर्वयोपसदा प्रचरितव्य मपराह्णे ऽपरया तावन्त मेव तद्द्विषते लोकं परिशिनष्टि ॥ ६ (२३) ॥

प्रवर्ग्याख्यं कर्म * परिसमाप्य, उपसदाख्यं कर्म वक्तु माख्यायिका माह—"देवासुरा वा एषु लोकेषु समयतन्त; ते वा असुरा इमानेव लोकान् पुरो ऽकुर्वत, यथौजीयांसो बलीयांस एवं ते वा अयस्मयी मेवेमा मकुर्वत, रजता मन्तरिक्षं, हरिणीं दिवं; ते तथेमांल्लोकान् पुरो ऽकुर्वत, ते देवा अब्रुवन् पुरो वा इमे ऽसुरा इमाँ-

---

* तथा चेमानि प्रवर्ग्यकर्माणि ;—शान्तिपाठः, महावीरनिर्माणम्, तत्संस्काराः, प्रैषाः, महावीरस्थापनम्, तदभिमन्त्रणम्, अभिमन्त्रितस्य तस्यावेक्षणम्, महावीरस्थे तप्ते आज्ये पयःप्रक्षेपरूपं प्रवृञ्जनम्, तथा प्रणीतस्य घर्म्मस्याहवनीये यागः, तच्छेषेणाग्निहोत्रहोमः, तत्रैव दध्यादिद्रव्यपूरणरूप मुद्वासनम्, विविधनैमित्तिकधर्म्मप्रायश्चित्तानि, धर्म्मभक्षणम्, मार्जनञ्चेति । तै० आर० ४, ५प्र० । कात्या० श्रौ० २६ अ० ।

लोकानक्रत, पुर इमांल्लोकान् प्रतिकरवामहा इति, तथेति ; ते सद एवास्याः प्रत्यकुर्वताग्नीध्र मन्तरिक्षाद्धविर्धाने दिवस्तथेमांल्लोकान् पुरः प्रत्यकुर्वत"-इति । देवाश्चासुराश्च लोकत्रयविषये 'समयतन्त' परस्परं युद्धं कृतवन्तः । तदानीम् 'असुराः' 'इमानेव' भूरादीन् त्रीन् 'लोकान्' 'पुरोऽकुर्वत' प्राकारवेष्टितानि नगराणि कृतवन्तः ; 'यथा' लोके महान्तो राजानः, अभ्यधिकेन ओजसा शरीरशक्त्या सम्पन्नाः, अभ्यधिकेन सैन्यरूपेण बलेन च सम्पन्नाः, प्रौढानि दुर्गाणि कुर्वन्ति, एव मेते कृतवन्तः ; तत्र 'इमाम्' भूमिम् 'अयस्मयीं' लोहप्राकारयुक्ताम् 'अकुर्वत' ; 'अन्तरिक्षं' लोकं च रजतप्राकारवेष्टितां पुरी मकुर्वत ; द्युलोकं 'हरिणीं' हिरण्मयीं सुवर्णप्राकारवेष्टितां पुरी मकुर्वत । 'तथा' उक्तनगरनिर्माणकृतस्योपसंहारः । त मिम मर्थं सर्वं तैत्तिरीयाः संक्षिप्यामनन्ति—"तेषा मसुराणां तिस्रः पुर आसन्नयस्मय्यवमाथ रजताथ हरिणी"-इति (सं० ६. २. ३. १.) । ततः 'ते देवाः' विचारयन्तः परस्पर मिदम् 'अब्रुवन्'—'असुराः' इमे' भूरादीन् 'इमान् लोकान्' 'पुरो वै' स्वकीयनगराण्येव कृतवन्तः ; अतो वय मपि 'इमान्' भूरादीन् 'लोकान्' पुरः अस्मदीयनगराणि 'प्रतिकरवामहै' असुराणां प्रतिकूलानि सम्पादयामः । 'इति' एवं विचारं परस्पर मङ्गीकृत्य त्रिषु लोकेष्वसुराः क्वचिद् देशविशेषे यथा स्वकीयानि नगराणि कृतवन्तः, तथा देवाः 'अस्याः' पृथिव्याः सकाशात् 'सद एव' 'प्रत्यकुर्वत' सौमिकवेद्यां प्राचीनवंशात्पूर्वभावि सदोनामकमण्डप मेवासुरप्रतिकूल मकुर्वत ; अन्तरिक्षलोकादाग्नीध्रनामकं धिष्ण्य मकुर्वत * ; द्युलोकाद्धविर्धान-

---

* धिष्ण्य मिति सिकतोपकीर्णानां पुरीषस्थलानां नामधेयम् । तत्र 'आग्नीध्रीयं पूर्वम्,

नामके द्वे शकटे * अकुर्वत । 'ते तथा'-इत्यादिवाक्यार्थस्तु [illegible] असुरनिर्मितपुरत्रयप्रतिकूलं सदः-आग्नीध्र-हविर्धानरूपत्रयं [illegible] [illegible] वन्तः । असुरैर्लोकत्रये प्रोक्तासु तिसृषु दुर्गरूपासु पुरीषु निविष्टवन्तः [illegible] तासु देवाश्च स्वरक्षार्थं सदःप्रभृतीनि त्रीणि दुर्गाणि [illegible] विजयं प्राप्ताः ॥

तं विजयं † दर्शयति—"ते देवा अब्रुवन्नुपसद उपायामोपसदा वै महापुरं जयन्तीति तथेति ; ते यामेव प्रथमामुपसदमुपायंस्तयैवैनानस्माल्लोकादनुदन्त ; यां द्वितीयां तयान्तरिक्षाद्यां तृतीयां तया दिवस्तांस्त्रयेभ्यो लोकेभ्यो ऽनुदन्त"-इति । विजयार्थिनः 'ते देवाः' परस्परमिदम् 'अब्रुवन्',—उपसदाख्यान् होमान् 'उपायाम' अनुतिष्ठाम । लोकेषु 'उपसदा वै' परकीयदुर्गसमीपावस्थानेन दुर्गावरोधरूपेणैव महत्या सेनया दुर्गवेष्टनेन, सर्वे राजानो महतीं दुर्गरूपां पुरं 'जयन्ति' । अतो वयमप्युपसदनहेतुभूतान् होमान् करवाम । 'इति' विचार्य तिस्र उपसदो हुत्वा लोकत्रयनिर्मिताभ्यो दुर्गरूपाभ्यः पुरीभ्यः असुरान् निःसारितवन्तः । तत्र "या ते अग्ने ऽयाशया तनूः"-इत्यनेन (वा० सं० ५. ८. १.) मन्त्रेण साध्या उपसत् प्रथमदिने ऽनुष्ठितत्वात् प्रथमा ; "या ते अग्ने रजःशया

---

* * * ; षट् सदसि ;—प्रत्यङ्मुखद्वारमपरेण होतुः, दक्षिणपूर्वेणौदुम्बरीं मैत्रावरुणस्य, होतृधिष्ण्यादुत्तरेण चतुरः समान्तरान् ब्राह्मणाच्छंसि-पोतृ-नेष्ट्रच्छावाकानाम् ; आग्नीध्रादक्षिणं सम्प्रति वेद्यन्ते हविर्धानमुखे मार्जालीयम्'—इति (कात्या० श्रौ० ८.६. १६—२२.) अष्टौ धिष्ण्यानि विहितानि । तत्र लिङ्गे ऽग्निप्रणयनानन्तरं आग्नीध्रीय-धिष्ण्ये एव प्रथम मग्निप्रणयम्, ततो होतृधिष्ण्यादौ (कात्या० श्रौ० ६. १०.१४.)।

* सोमरूपहविर्धारके द्वे शकटे हविर्धाने इत्युच्येते। तदीयस्थानात् हविर्धानसंज्ञा तयोर्मण्डपे भवतः।

† 'विजयप्रकारं' म।

तनूः"-इत्यनेन (वा० सं० ५.८.२.) मन्त्रेण साध्या द्वितीयदिनेऽनुष्ठितत्वाद् द्वितीया ; "या ते अग्ने हरःशया"-इति (वा० सं० ५. ८. ३) मन्त्रेण साध्या तृतीयदिनेऽनुष्ठेयत्वात् तृतीया * । युद्धेन ताः पुरीर्जेतुमशक्ता देवाः उपसद्भिर्जितवन्तः । तथाच शाखान्तरे श्रूयते—"ता देवा जेतुं नाशक्नुवन्, ता उपसदैवाजिगीषन्"-इति (सं० ६. २. ३. १.) ।

लोकत्रयान्निःसारिताश्चासुराः यदा वसन्ताद्यृतुदेवान् शरणं प्राप्ताः, तदा तदानी मेवैकैकस्मिन् दिने द्विर्द्विरनुष्ठेयाभिः षड्भिस्तान् असुरान् वसन्ताद्यृतुदेवताभ्यो निःसारितवन्तः । तमिम मर्थं दर्शयति—"ते वा एभ्यो लोकेभ्यो नुत्ता असुरा ऋतूनश्रयन्त, ते देवा अब्रुवन्नुपसद एवोपायामेति तथेति, त इमास्तिस्रः सतीरुपसदो द्विर्द्विरेकैका मुपायंस्ताः षट् समपद्यन्त, षड् वा ऋतवस्तान् वा ऋतुभ्यो ऽनुदन्त"-इति । ततो मासान् शरणं प्राप्यावस्थितानामसुराणां षट्दिनेष्वनुष्ठिताभिरावृत्ताभिर्द्वादशोपसद्भिर्निःसरण कृतम्, तदिदं दर्शयति—"ते वा ऋतुभ्यो नुत्ता असुरा मासानश्रयन्त, ते देवा अब्रुवन्नुपसद एवोपायामेति तथेति, त इमाः षट् सतीरुपसदो द्विर्द्विरेकैका मुपायंस्ता द्वादश समपद्यन्त, द्वादश वै मासास्तान् वै मासेभ्यो ऽनुदन्त"-इति । मन्त्रत्रयेण दिनत्रये ऽनुष्ठेयास्तिस्रः ; पुनरप्यावृत्त्यान्यस्मिन् दिनत्रये ऽनुष्ठिताः षट् भवन्ति ; एकैकस्मिन् दिने द्विरनुष्ठितत्वात् द्वादश सम्पद्यते ।

---

* तैत्तिरीयसंहितायान्त्वेवं पाठः—"या ते अग्ने ऽयाशया रजाशया हराशया तनूर्वर्षिष्ठा गह्वरेष्ठोऽग्रं वचो अपावधीं त्वेषं वचो अपावधीं स्वाहा"-इति १. २. ११, २। 'अत्र या ते अग्ने ऽयाशया रजाशया हराशया तनूर्वर्षिष्ठा गह्वरेष्ठेत्येतादृश आम्नातः ; तत्रायाशया-शयादिपदत्रयेण त्रयो मन्त्रा भवन्ति'-इत्यादि च तत्र सायणः ।

अनेनैव न्यायेन द्वादशस्य द्विरनुष्ठितस्य चतुर्विंशतिसंख्यत्वसिद्धेरर्धमासदेवताभ्यो निःसारितवन्त इत्येतद्दर्शयति—"ते वै मासेभ्यो नुत्ता असुरा अर्धमासानश्रयन्त, ते देवा अब्रुवन्नुपसद एवोपायामेति तथेति, त इमा द्वादश सतीरुपसदो द्विर्द्विरेकैका मुपायंस्ताश्चतुर्विंशतिः समपद्यन्त, चतुर्विंशतिर्वा अर्धमासास्तान्वा अर्धमासेभ्यो ऽनुदन्त"-इति । ततोऽहोरात्रदेवी शरणं गतानामसुराणां कालविशेषद्वयानुष्ठानेन निःसारणं दर्शयति—"ते वा अर्धमासेभ्यो नुत्ता असुरा अहोरात्रे अश्रयन्त, ते देवा अब्रुवन्नुपसदावेवोपायामेति तथेति, ते या मेव पूर्वाह्ण उपसद मुपायंस्तयैवैनानह्नो ऽनुदन्त, या मपराह्णे तया रात्रेस्तांस्तथोभाभ्या महोरात्राभ्या मन्तरायन्"-इति । 'अन्तरायन्' अन्तरितान् कृतवन्तो निःसारितवन्त इत्यर्थः । एकैकस्मिन्दिने एकैकस्या उपसदो द्विरनुष्ठानाय कालद्वयविशेषं विधत्ते— "तस्मात् सुपूर्वाह्ण एव पूर्वयोपसदा प्रचरितव्यं स्वपराह्णे ऽपरया तावन्त मेव तद् द्विषते लोकं परिशिनष्टि"-इति । यस्मात् पूर्वाह्णापराह्णौ कालविशेषावहोरात्राभ्यां शत्रूणां निःसारणहेतू, 'तस्मात्' तस्मिन्नेव कालद्वये ऽनुष्ठातव्यम् । एवं सति यावानहोरात्रयोः सन्धिकालः, 'तावन्त मेव' 'द्विषते' द्वेषिणे 'लोकं' स्थानविशेषं 'परिशिनष्टि',—तस्मात् कालात् निःसारितत्वेन सन्ध्याकाल एव असुराणां परिशिष्यते ॥

अत्र एकैकस्मिन्दिने द्विर्द्विरनुष्ठेया उपसदो ज्योतिष्टोमे त्रिषु दिनेष्वनुष्ठेयाः ; अग्निचयने षट्सु दिनेषु ; अहीनसत्रयोर्द्वादशदिनेषु । तथाच तैत्तिरीयैराम्नातम्—"तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य यज्ञस्य सवीर्यत्वाय"-इति (सं० ६. २. ५. १.) । तथा "षडुपसदोऽग्नेश्चित्यस्य भवन्ति"-इति च

श्रुत्यन्तरं द्रष्टव्यम् । आश्वलायनस्त्वेव माह—“एकाहानां त्रिकः, षड् वा, अहीनानां द्वादश, चतुर्विंशतिः संवत्सर इति [illegible] -इति (४.८.१२—१६.) । गवामयनाख्ये संवत्सर [illegible]

अथ मीमांसा । पञ्चमाध्यायस्य तृतीयपादे (जै० ५. ३ ; अधि० २.) चिन्तितम्—

“आवृत्तिरुपसत्स्वेषा समस्तैकैकशोऽथवा ।
त्रिरध्यायं पठेत्यादाविव स्यात्समुदायगा ॥
प्रथमामध्यमान्त्येतिप्रकृतक्रमसिद्धये ।
एकैकस्य त्रिरभ्यासे षट् सङ्ख्यापि प्रसिध्यति ॥

अग्नेश्चयने श्रूयते—“षडुपसदः” इति । तत्र चोदकप्राप्तानां तिसृणा मुपसदां पूर्वन्यायेनावृत्त्या षट् सङ्ख्या सम्पादनीया ; सा चावृत्तिर्दण्डकलितवत् समुदायस्य युक्ता । यथा दण्डेन भूप्रदेशं सम्मिमानः पुरुषः आमूलाग्रं कृत्स्नं दण्डं पुनःपुनः पातयति ; न तु दण्डस्य प्रत्यवयवं पृथगावृत्तिं करोति । यथा वा त्रिवारं रुद्राध्यायं जपतीत्यत्र कृत्स्न एवाध्याय आवर्त्तते ; न त्वध्यायैकदेशः एकैकोऽनुवाकः पृथगेव त्रिः पठ्यते । तथा तिसृणा मुपसदां समुदाय आवर्त्तनीयः ? इति चेत्, मैवम् ; प्राकृतक्रमबाधप्रसङ्गात् । प्रकृतौ हि दीक्षानन्तरभाविदिने होतव्या प्रथमोपसत्, तत ऊर्द्ध्वंदिने द्वितीया, ततोऽप्यूर्द्ध्वं दिने तृतीया ; ता एताः सकृदनुष्ठाय पुनरुपरितनदिनेऽनुष्ठीयमानायां प्रथमात्व मपैति, चतुर्थीत्व मायाति । तस्मात् प्राकृतक्रमसिद्धये प्रथमां दिनद्वयेऽभ्यस्य ततो द्वितीयां द्विरभ्यसेदित्येवं स्वस्थानविवृद्ध्या तासा मावृत्तिः कार्या । न

---

* एव मेवाख्यायिकापूर्वक मुपसद्विधानं शतपथेऽपि ३. ४. ४. १—२०। तथा तैत्तिरीयकेऽपि सं० ६. २. ३. ४।

वाध्यायदृष्टान्तो युक्तः; अनुवाकसमुदायस्यैवाध्यायत्वादध्यायस्यैव चावृत्तिविधानात्। न त्विह समुदायस्योपसत्त्वम्; तस्मात् प्रत्येक मुपसदावर्त्तनीया ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां चतुर्थाध्याये
षष्ठः खण्डः ॥ ६ (२२) ॥

॥ अथ सप्तमः खण्डः ॥

जितयो वै नामैता यदुपसदो ऽसपत्नां वा एताभिर्देवा विजितिं व्यजयन्तासपत्नां विजितिं विजयते य एवं वेद यां देवा एषु लोकेषु या ऋतुषु यां मासेषु या मर्धमासेषु या महोरात्रयोर्विजितिं व्यजयन्त तां विजितिं विजयते य एवं वेद ते देवा अबिभयुरस्माकं विप्रेमाण मन्विदम् असुरा आभविष्यन्तीति ते व्युत्क्रम्यामन्त्रयन्ताग्निर्वसुभिरुदक्रामदिन्द्रो रुद्रैर्वरुण आदित्यैर्बृहस्पतिर्विश्वैर्देवैस्ते तथा व्युत्क्रम्यामन्त्रयन्त ते ऽब्रुवन् हन्त य एव न इमाः प्रियतमास्तन्वस्ता अस्य वरुणस्य राज्ञो गृहे सन्निदधा-

महै ताभिरेव नः स न सङ्गच्छातै यो न एतदतिक्रामाद्य आलुलोभयिषादिति तथेति ते वरुणस्य राज्ञो गृहे तनूः सन्न्यदधत ते यद्वरुणस्य राज्ञो गृहे तनूः सन्न्यदधत तत्तानूनप्त्रमभवत्तत्तानूनप्त्रस्य तानूनप्त्रत्वं तस्मादाहुर्न सतानूनप्त्रिणे द्रोग्धव्य मिति तस्माद्विद मसुरा नान्वाभवन्ति ॥ ८ (२४) ॥

अथोपसदः प्रशंसति—"जितयो वै नामैता यदुपसदोऽसपत्नां वा एताभिर्देवा विजितिमजयन्त"-इति। 'उपसदः' याः सन्ति, 'एताः' 'जितयो वै नाम' जयहेतुत्वात् जितय इत्येवं नाम प्रतिपद्यते। जयहेतुत्व मेवासपत्नां विजित्यादिना स्पष्टीक्रियते। 'देवाः' 'एताभिः' उपसद्भिः 'असपत्नां' वैरिवर्जितां 'विजितिं' विशिष्टं जयं 'अजयन्त' विशेषेण प्राप्तवन्तः। वेदनं प्रशंसति—"असपत्नां विजितिं विजयते य एवं वेद" इति। सामान्याकारेण वेदनं प्रशस्य पुनः पूर्वोक्तार्थवादानुक्रमेण विशेषाकारेण प्रशंसति—"यां देवा एषु लोकेषु, या ऋतुषु, यां मासेषु, या सर्वमासेषु, यामहोरात्रयोर्विजितिं व्यजयन्त, तां विजितिं विजयते य एवं वेद"-इति।

अथ तानूनप्त्रस्य नाम निर्वक्तु माख्यायिका माह—"ते देवा अबिभयुरस्माकं विप्रेमाण मन्विद मसुरा आभविष्यन्तीति; ते व्युत्क्रम्यामन्त्रयन्ताग्निर्वसुभिरुदक्रामदिन्द्रो रुद्रैर्वरुण आदित्यैर्बृहस्पतिर्विश्वैर्देवैः"-इति। असुरैः सह युद्धार्थं मुद्यताः 'देवाः' स्वसेनाया मध्ये परस्पर मेकैकस्य सेनानीत्वलक्षणं ज्येष्ठत्व मभ्युप-

गच्छन्तः परस्परविरोधिनो भूत्वावस्थाय 'अबिभयुः' मनसि भीतिं प्राप्ताः। केनाभिप्रायेणेति तदुच्यते—'अस्माकं विप्रेमाणम्' परस्परप्रेमराहित्यमनुवीक्ष्य असुरा इदमस्मदीयं राज्यम् 'आभविष्यन्ति' सर्वतः प्राप्स्यन्तीति। ततस्ते देवा व्युत्क्रम्य परस्परविभागेन तस्माद्देशादपसृत्य स्वसम्बन्धिभिर्मन्त्रिभिः सह 'अमन्त्रयन्त' पर्यालोचनं कृतवन्तः। ततस्तत्र 'अग्निः' देवो 'वसुभिः' अष्टभिर्मन्त्रिभिः सहितः पृथक् 'उदक्रामत्'। एवम् 'इन्द्रः' 'रुद्रैः' सह, 'वरुणः' 'आदित्यैः' सह, 'बृहस्पतिः' 'विश्वैर्देवैः' सह पृथगुदक्रामन्। अत्र चतुर्विधैव विभाग उक्तः; शाखान्तरे तु पञ्चधा। तथा चाम्नायते—"देवासुराः संयत्ता आसन्, ते देवा मिथो विप्रिया आसन्, तेऽन्योऽन्यस्मै ज्यैष्ठ्यायातिष्ठमानाः पञ्चधा व्यक्रामन्नग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वैर्देवैः" इति (तै० सं० ६. २. २. १.) * ॥

एवं परस्परं भिन्नत्वावस्थितानां देवसमूहानां पर्यालोचनपूर्वकं कार्यं दर्शयति—"ते तथा व्युत्क्रम्यामन्त्रयन्त, तेऽब्रुवन् हन्त या एव न इमाः प्रियतमास्तन्वस्ता अस्य वरुणस्य राज्ञो गृहे संनिदधामहै; ताभिरेव नः स न संगच्छातै, यो न एतदतिक्रामाद्य आलुलोभयिषादिति तथेति, ते वरुणस्य राज्ञो गृहे तनूः संन्यदधत"-इति। स्वकार्यहानिनिमित्तदुःखपरिहारोपायदर्शननिमित्तहर्षद्योतनार्थो 'हन्त'शब्दः। अस्माकमत्यन्तं प्रिया याः पुत्रकलत्रादिरूपाः 'तन्वः' सन्ति, 'ताः' सर्वाः 'अस्य वरुणस्य राज्ञो गृहे संनिदधामहै' न्यासरूपेण स्थापयामः। तथा सति 'नः' अस्माकं मध्ये 'यः' कोऽपि 'एतदतिक्रामात्' उल्लङ्-

---

* शतपथे तु मूल एव त्रिविधः शाखान्तरसंवादः 'एक आह,'—इति ३. ४. २. १।

येत्, उभयत्र च 'आलुलोभयिषात्' स्वपुत्रकलत्रादीनेव लोभयितु मिच्छेत्, गुप्तमनुष्यमुखेनानेतु मिच्छेत्, 'नः' अस्माकं मध्ये 'सः' तादृशः पुरुषः 'ताभिरेव' 'न सङ्गच्छातै' पुत्रकलत्रादिभिः न सङ्गच्छताम्। इत्येतं समयं सर्वेऽप्यङ्गीकृत्य वरुणगृहे स्वपुत्रादिशरीराणि स्थापितवन्तः। परस्पराविरोधे सति वय मेवासुराणा मिदं लोकत्रयं साधयाम इति विचार्येमं समयं कृतवन्तः। सोऽयं शाखान्तरे स्पष्ट माम्नायते—"तेऽमन्यन्तासुरेभ्यो वा इदं भ्रातृव्येभ्यो रध्यामो यन्मिथो विप्रियाः स्मो या न इमाः प्रियास्तनुवस्ताः समवद्यामहै। ताभ्यः स निर्ऋच्छाद्यो नः प्रथमोऽन्योऽन्यस्मै द्रुह्यादिति" इति (सं० ६, २, २, १.)॥

इदानीं निर्वचनं दर्शयति—"ते यद्वरुणस्य राज्ञो गृहे तनूः सन्न्यदधत, तत्तानूनप्त्र मभवत्तत्तानूनप्त्रस्य तानूनप्त्रत्वम्" इति। यस्माद्वरुणगृहे पुत्रादितनूरवस्थाप्य, परस्परसख्याय शपथरूप माज्यस्पर्शनं कृतवन्त इति शेषः। तस्मादिद माज्यस्पर्शनरूपं तानूनप्त्रं कर्म अभवत्*। इदं च कर्माऽऽपस्तम्बेन विस्पष्ट मभिहितम्—"आतिथ्याया ध्रौवात् स्रुचि चमसे वा तानूनप्त्रं समवद्यति। चतुरवत्तं पञ्चावत्तं वा। आपतये त्वा गृह्णामी-त्येतैः प्रतिमन्त्रम्। अनाधृष्ट मसीति यजमानसप्तदशा ऋत्विज-

---

* [illegible] ऋत्विजो यजमानश्च मिथो द्रोहशङ्कया [illegible] एकमत्याः यज्ञकार्यं समापयितुं घृतस्पर्शनपूर्वकं समयं [illegible] शपथकरणं तदेव 'तानूनप्त्रं' कर्म; यस्मादेतौ [illegible] यथा [illegible] प्रतिज्ञाम कृत्वा [illegible] स्वीकार इति।

"अध्वर्युं प्रतिप्रस्थातारं नेष्टार मुन्नेतार मित्यध्वर्यून्।
ब्रह्माणं ब्राह्मणाच्छंसिन माग्नीध्रं पोतार मिति ब्रह्माणः।
होतारं मैत्रावरुण मच्छावाकं ग्रावस्तुत मिति होतॄन्।
उद्गातारं प्रस्तोतारं प्रतिहर्तारं सुब्रह्मण्य मित्युद्गातॄन्।
सदस्यं सप्तदशं कौषीतकिनः समामनन्ति"—इति आप० श्रौ० १०.१.९,१०।

स्तानूनप्त्रं समवमृशन्ति । अनु मे दीक्षा मिति यजमानः"-इति (श्रौ० ११. १. १—३.) । तनूनां पुत्रादिशरीराणां नप्त्रं नपतन मतिशयितं निमित्तीकृत्य क्रियमाणत्वात् अस्य कर्म्मणः तानूनप्त्रं नाम सम्पन्नम् ॥

प्रसङ्गाल्लोकव्यवहारे कञ्चिद्धर्म्मं दर्शयति- "तस्मादाहुर्न सतानूनप्त्रिणे द्रोग्धव्य मिति"-इति । यस्माद्देवाः परस्परद्रोहपरिहाराय शपथं कृतवन्तः, 'तस्माद्' ब्रह्मवादिन एवम् 'आहुः'— 'सतानूनप्त्रिणे' सह शपथकारिणे 'न द्रोग्धव्यम्' । 'इति' शब्दस्तदुक्तिसमाप्त्यर्थः । देवसम्बन्धिशपथविशिष्टत्वाच्चिरा तानूनप्त्रशब्देन शपथसात मुपलक्ष्यते । तद्धि सह क्रियमाणं तानूनप्त्रं यस्यास्ति सोऽयं सतानूनप्त्री ॥

प्रासङ्गिकं परिसमाप्य प्रकृत मनुसर[illegible]तस्मादिद मसुरा नान्वाभवन्ति" इति । 'तस्माद्' तस्मादेव[illegible]कारणाद्देवानां परस्परद्रोहरूपात् 'असुराः' 'इदं' लोकत्रयं 'नान्वाभवन्ति' नैव समन्तात् प्राप्नुवन्ति ॥

यद्यप्येतत्तानूनप्त्रं कर्म्म उपसद्भ्यः पूर्वं मनुष्ठेयम् *, तथाप्युपसदनुक्रमिकप्रसङ्गेन बुद्धिस्थत्वादत्राभिहितम् ॥ ७ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां चतुर्थाध्याये
सप्तमः खण्डः ॥ ७ (२४) ॥

---

* अतएव कात्यायनेन 'उत्तानं भाति'-इति (८. १. १८.) शालिनं समाप्य, श्रौत-

॥ अथ अष्टमः खण्डः ॥

शिरो वा एतद्यज्ञस्य यदातिथ्यं ग्रीवा उपसदः समानबर्हिषी भवतः समानं हि शिरोग्रीवं मिथुं वा एतां देवाः समस्कुर्वत यदुपसदस्तस्या अग्निरनीक मासीत् सोमः शल्यो विष्णुस्तेजनं वरुणः पर्णानि ता माज्यधन्वानो व्यसृजंस्तया पुरो भिन्दन्त आयंस्तस्मादेता आज्यहविषो भवन्ति चतुरो ऽग्रे स्तनान् व्रत मुपेत्युपसत्सु चतुस्सन्धिर्ह्येषुरनीकं शल्य-स्तेजनं पर्णानि त्रीन् स्तनान् व्रत मुपेत्युपसत्सु त्रिषन्धिर्ह्येषुर[illegible] शल्यस्तेजनं द्वौ स्तनौ व्रत मुपेत्युपसत्सु द्विषन्धिर्ह्येषुः शल्यश्च ह्येव तेजनं चैकं स्तनं व्रत मुपेत्युपसत्स्वेका ह्येवेषु रित्याख्यायत एकधा वीर्यं क्रियते परोवरीयांसो वा इमे लोका अर्वागंहीयांसः परस्तादर्वाचीरुपसद उपैत्येषा मेव लोकाना मभिजित्यै उपसदाय मीढुष इमां मे अग्ने समिध मिमा मुपसदं वनेरिति तिस्रस्तिस्रः सामिधेन्यो रूपसमृद्धा एतद्वै यज्ञस्य समृद्धं यद् रूप-

---

प्रहृत्य च निधाय, आज्यधन्वं तानूनप्त्रं पीत्वा, निह्नवादि सुब्रह्मण्याह्वानं च कृत्वाऽथ सूत्र तम्—'प्रवर्ग्योपसद्भ्यां चरन्ति'—इति (८. २. १५.)। 'अतः सुब्रह्मण्याह्वानादूर्ध्वं प्रवर्ग्योपसदौ भवतः। पूर्वं प्रवर्ग्यं, तत उपसदिति। उपसदिता [illegible]'—इति च टीका। [illegible] (१०. ३१. १५, १६ ; ११. १ १—१५ ; २. १—१५)।

समृद्धं यत्कर्म क्रियमाण मृगभिवदति जघ्नवतीर्याज्यानुवाक्याः कुर्यादग्निर्वृत्राणि जङ्घनद् य उग्र इव शर्यहा त्वं सोमासि सत्पतिर्गयस्फानो अमीवहेदं विष्णुर्विचक्रमे त्रीणि पदा विचक्रम इत्येता विपर्यस्ताभिरपराह्णे यजति घ्नन्तो वा एताभिर्देवाः पुरो भिन्दन्त आयन्यदुपसदः सच्छन्दसः कर्त्तव्या न विच्छन्दसो यद्विच्छन्दसः कुर्याद् ग्रीवासु तद् गण्डं दध्यादीश्वरो ग्लावो जनितोस्तस्मात् सच्छन्दस एव कर्त्तव्या न विच्छन्दसस्तदु ह स्माहोपाविर्जानश्रुतेय उपसदां किल वै तद् ब्राह्मणे यस्मादप्यश्लीलस्य श्रोत्रियस्य मुखं व्येव ज्ञायते तृप्र मिव[illegible]भतीवेत्याज्यहविषो ह्युपसदो ग्रीवासु मुख मध्याहितं तस्माद्ध स्म तदाह ॥ ८ (२५) ॥

अथातिथ्यकर्मण्यास्तीर्णस्यैव बर्हिष उपसत्स्वनुवृत्तिं विधत्ते —"शिरो वा एतद्यज्ञस्य यदातिथ्यं, ग्रीवा उपसदः, समानबर्हिषी भवतः; समानं हि शिरोग्रीवम्"-इति। आतिथ्यकर्मणो यज्ञशिरोरूपत्वादुपसदां च ग्रीवारूपत्वात्, तयोरवयवयोर्मध्ये लोके विच्छेदादर्शनादत्राप्यविच्छेदायातिथ्योपसत्कर्मणोः 'समानबर्हिषी' एकैकबर्हिषा युक्ते कर्त्तव्ये। आतिथ्यकर्मण्यास्तीर्णं बर्हिर्नाग्नौ प्रहृतम्; इडान्तत्वेन तत्र कर्मसमापनात्।

तथापस्तम्बेनोक्तम्—"इडान्ता सन्तिष्ठते ; धारयति ध्रौवमाज्यम्"-इति (१०. ३१. १५, १६.) । शाखान्तरे च बर्हिषोरनुवृत्तिराम्नाता—"यदातिथ्यायां बर्हिस्तदुपसदां तदग्नीषोमीयस्य"-इति ।

अथोपसत्सु द्रव्यदेवताविधानार्थं प्रस्तौति—"इषुं वा एतां देवाः समस्कुर्वत ; यदुपसदस्तस्या अग्निरनीकमासीत्, सोमः शल्यो, विष्णुस्तेजनं, वरुणः पर्णानि, तामाज्यधन्वानो व्यसृजंस्तया पुरो भिन्दन्त आयन्" इति । 'यदुपसदः' या उपसद्देवता अग्न्यादिकाः सन्ति, 'एताम्' अग्न्यादिरूपाम् 'इषुं वै' बाणमेव 'देवाः' 'समस्कुर्वत' संस्कृतवन्तः, अग्न्यादीन् बाणावयवरूपेण संयोजितवन्त इत्यर्थः । योऽयम् 'अग्निः', सोऽयं तस्या इषोः 'अनीकं' मुखम् 'आसीत्' ; फलयुक्ताद्बाणमूलाद्दूरवर्ती भागो मुखम्, तस्योपरि वर्त्तमानो लोहविशेषः 'शल्यम्' ; तस्य लोहस्य तीक्ष्णमग्रं 'तेजनम्' ; 'पर्णानि' बाणमूले स्थापितानि पक्षिणां पत्राणि । शल्यादिरूपेण सोमविष्णुवरुणा योजिताः । वरुणोऽत्र प्रशंसार्थमेवोपादीयते, न तु देवतात्वेन ; तदीययोर्याज्यानुवाक्ययोरनभिधास्यमानत्वात् । अतएव शाखान्तरे वरुणं परित्यज्याग्न्यादय आम्नायन्ते—"त इषुं समस्कुर्वताग्निमनीकꣳ सोमꣳ शल्यं विष्णुं तेजनम्"-इति (तै० सं० ६.२.३.१.) । 'ताम्' एतामिषुं देवाः 'आज्यधन्वानः' सन्तो विसृष्टवन्तः, 'तया' विसृष्टयेष्वा तेषामसुराणां 'पुरो भिन्दन्तः' विदारयन्तः 'आयन्' आगच्छन् ॥

इदानीं द्रव्यदेवतां विधत्ते—"तस्मादेता आज्यहविषो भवन्ति"-इति । यस्मादग्न्यादयो बाणरूपाः, आज्यं च धनुःस्वरूपं तस्मादाज्यहविष्का एता अग्न्यादिदेवता उपसत्सु भवेयुः ॥

उपसदङ्गभूतं व्रतोपायनं विधत्ते—"चतुरो ऽग्रे स्तनान् व्रत मुपैत्युपसत्सु, चतुस्सन्धिर्ह्यिपुरनीकं शल्यस्तेजनं, पर्णानि"—इति । 'उपसत्सु' अनुष्ठीयमानासु 'अग्रे' प्रथमदिने सायङ्काले चतुरः स्तनान् व्रत मुपैति व्रतशब्देनात्र पयःपान मुच्यते,—गोव-[illegible] स्तनेषु यावत्पयस्तावत् । पूर्वोक्तस्य बाणस्य चतुःसन्धित्वादनी-[illegible]वयवचतुष्टयोपेतत्वात् स्तनानां चतुःसङ्ख्या युक्ता । अनेनैव [illegible]रेण द्वितीयोपसद्दिने प्रातःसायङ्कालयोः, तृतीयदिनस्य प्रातःकाले चैकैकन्यूनां स्तनसङ्ख्यां विधत्ते—"त्रीन् स्तनान् व्रत-मुपेत्युपसत्सु, त्रिषन्धिर्ह्यिपुरनीकं शल्यस्तेजनं; द्वौ स्तनौ व्रत मुपेत्युपसत्सु, द्विषन्धिर्ह्यिषुः शल्यञ्च ह्येव तेजनं; चैकं स्तनं व्रत मुपेत्युपसत्स्वेका ह्येवेषुरित्याख्यायत एकया वीर्यं क्रियते"—इति । एतासां स्तनसङ्ख्याना मुक्ताः कालविशेषा आपस्तम्बेनोदाहृताः "चतुरः सायं दुग्ध्वा त्रीन् प्रातर्द्वौ साय मेक मुत्तमे"—इति (११, २, १८.) । यथोक्तं सङ्ख्याविशेषं प्रशंसति—"परोवरीयांसो वा इमे लोकाः अर्वागंहीयांसः परस्तादर्वाचीरुपसद उपैत्येषा मेव लोकाना मभिजित्यै"—इति । 'इमे' पृथिव्यन्तरिक्षद्युसप्तलोकाः* 'वरीयांसः' परस्तादूर्ध्वभागे निवसन्तः अत्यन्तं विस्तृताः, 'अर्वाक्' अधोभागे 'अंहीयांसः' अतिशयेनाणुवत्सङ्कुचिताः ; सत्य-लोकादणुः द्युलोकः, तस्मादप्यण्वन्तरिक्षलोकः, तस्मादप्यणुः भूलोकः† । एवं सत्युपसदोऽपि 'परस्तात्' ऊर्ध्वलोकस्थानीयात् प्रथमदिनादारभ्य तत्तद्दिनान्तरदिनेषु स्तनसङ्ख्याह्रासेन 'अर्वा-

---

*, † पौराणिकमतेनैतौ लेखौ सायणस्य ; वस्तुतस्त्रय एव लोकाः, [illegible]कानाम-[illegible]मण्डलात् पृथिव्या अतिदूरत्वं च श्रुतेस्तात्पर्य मिति दिक् ।

त्रीणीति अनुतिष्ठतीति यदस्ति, तत् 'एषा मेव लोकानाम्' अभिजयाय भवति ॥

अथ पूर्वाह्णापराह्णयोर्व्यवस्थिताः सामिधेनीर्विधत्ते—"उपसद्याय मीळ्हुष* इमां मे अग्ने समिध मिमा मुपसदं वनेरिति तिस्रस्तिस्रः सामिधेन्यो रूपसमृद्धा एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाण मृगभिवदति"-इति। 'उपसद्याय'-इत्याद्या आम्नाताः 'तिस्रः' ऋचः (सं० ७.१५.१—३.) पूर्वाह्णे सामिधेन्यः। 'इमां मे अग्ने'-इत्यादिका आम्नाताः 'तिस्रः' ऋचः (सं० २. ६. १—३.) अपराह्णे सामिधेन्यः। मन्त्रान्तरग्रहणाव्युदासेन 'वै'-शब्दार्थः कार्त्स्न्यार्थपाठः। "उपसद्याय उपसदं वनेः"-इति उपशब्दयोगेन रूपसमृद्धिः † ॥

याज्यानुवाक्या विधत्ते—"जघ्निवतीर्याज्यानुवाक्याः कुर्याद्"-इति। हन्ति-धात्वर्थयुक्ताः 'जघ्निवतीः' तथाविधा ऋचः उदाहरति—"अग्निर्वृत्राणि जङ्घनद्; य उग्र इव शर्यहा; त्वं सोमासि सत्पति; गयस्फानो अमीवहा; इदं विष्णुर्विचक्रमे; त्रीणि पदा विचक्रम इत्येताः"-इति। 'अग्निर्वृत्राणि'-इति (सं० ६.१६.३४.) पुरोनुवाक्या, 'य उग्र इव'-इति (सं० ६. १६. ३९.) याज्या; 'त्वं सोमासि'-इति (सं० १.९१.५.) पुरोनुवाक्या, 'गयस्फानः'-इति (सं० १.९१.१२.) याज्या; 'इदं विष्णुः'-इति (सं० १.१२.१७.) पुरोनुवाक्या, 'त्रीणि पदा'-इति (सं० १.१२.१८.) याज्या। 'एताः'

---

* 'ळ्हकारता मेति स एव चास्य ढकारः सन्नूष्मणा सम्पृयुक्तो'-इति ऋक्प्राति०।

† 'इमं मे अग्ने समिधम्'-इति प्रतीकवानन्यपरोऽपि मन्त्रः (सं० १०. ७०. १.), परं '[illegible] वनेः'—इत्यंशस्य उपसदद्रूपसमृद्धिहेतुभूतस्य तथाविधस्याभावात् तस्य ग्रहण मनुचितमिति भावः।

चाग्न्यादिदेवानां क्रमेण द्रष्टव्याः । पूर्वाह्णे पुरोनुवाक्या उक्ताः, तासा मपराह्णे याज्यात्वम्; तथा तत्रत्यानां याज्याना मपराह्णे पुरोनुवाक्यात्वं च विधत्ते—"विपर्यस्ताभिरपराह्णे यजति"-इति ॥

यथोक्तयाज्यानुवाक्यायुक्ता उपसदः प्रशंसति—"घ्नन्तो वा एताभिर्देवाः पुरो भिन्दन्त आयन्यदुपसदः"-इति । या उक्तमन्त्रोपेताः 'उपसदः' सन्ति, 'एताभिर्देवाः' असुराणां तिस्रः 'पुरः' विदारयन्तः असुरांश्च हिंसन्त आगताः । उदाहृतासु याज्यानुवाक्यासु सर्वासु यदेकविधं छन्दो दृश्यते, न तु विलक्षणम्; तदन्वयव्यतिरेकाभ्यां विशदयति—"सच्छन्दसः कर्त्तव्या न विच्छन्दसः" -इति । समानं छन्दो यासां ताः 'सच्छन्दसः'; विलक्षणं छन्दो यासां ताः 'विच्छन्दसः' । वैलक्षण्ये बाध माह—"यद्विच्छन्दसः कुर्याद् ग्रीवासु तद् गण्डं दध्यादीश्वरो ग्लावो जनितोः"-इति । विलक्षणच्छन्दसा मनुष्ठाने ग्रीवास्थानीयासूपसत्सु, गण्डमालाख्यरोगस्थानीयं दोषं 'दध्यात्' उत्पादयेत् । तथा सति होता यजमानस्य ग्लानिविशेषान् 'जनितोः' उत्पादयितुम् 'ईश्वरः' समर्थो भवेत् । अ-स्वपक्षे बाध मुक्त्वा स्वपक्ष मुपसंहरति—"तस्मात् सच्छन्दस एव कर्त्तव्याः, न विच्छन्दसः" इति ।

उपसदा माज्यहविष्कत्वं प्रशंसति—"तदु ह स्माहोपाविर्जानश्रुतेय उपसदां किल वै तद् ब्राह्मणे यस्मादप्यश्लीलस्य श्रोत्रियस्य मुखं व्येव ज्ञायते तृप्त मिव रेभतीवेत्याज्यहविषो ह्युपसदो ग्रीवासु मुख मध्याहितं तस्माद्ध स्म तदाह"-इति । 'तदु ह' तस्मिन्नेवोक्तार्थे कश्चिद्वृत्तान्त उच्यते इति शेषः । 'उपाविः' नामकः कश्चिदृषिः, स तु 'जानश्रुतेयः' जनश्रुतायाः स्त्रियो ऽपत्यं पुमान्, 'उपसदां किल वै' उपसन्नामकानां कर्म्मणा मेव विधायके 'ब्राह्मणे', 'तद्'

वाक्यम् ‘आह स्म’। किं माहेति तदुच्यते,—‘यस्मात्’ कारणात् ‘अश्लीलस्य’ अपि कुरूपस्य ‘श्रोत्रियस्य’ वेदशास्त्रविदः ‘मुखं’ ‘तृप्तमिव’ दैन्यहीनतया तृप्तियुक्तमिव ‘रेभतीव’ वेदशास्त्रपाठोपेतत्वाच्छंसमिव ‘वि एव भायते’ विशेषेणावश्यं प्रतीयते। ‘इति’ एतदृषेर्वचनम्। तस्य वचनस्याभिप्राय उच्यते—ग्रीवास्थानीयाः ‘उपसदः’ आज्यहविष्काः, अतएव शोभनाः ; लोकेऽपि शोभमानायां ग्रीवायां ‘अध्याहितम्’ आश्रितं ‘मुखं’ श्रोत्रियसम्बन्धि तृप्त्याद्युपेतं दृश्यते ; ‘तस्मात्’ कारणात्, शोभनग्रीवाहितमुखसाम्य माज्यहविष्कत्वमित्यभिप्रेत्य स ऋषिः तद्वाक्यम् ‘आह’ ॥

अथ मीमांसा। चतुर्थाध्यायस्य द्वितीयपादे (जै०सू०२९,३ अधि० १४.) चिन्तितम्—

“यदातिथ्याबर्हिरेतदुपसत्स्वतिदेशनम्।
साधारण्यविधिर्वाद्यस्तदीयस्योपसंहृतेः॥
बर्हिःश्रुत्यैकताभानान्नातिदेशस्य लक्षणा।
आतिथ्ययोपसद्भिश्च बर्हिरेतत्प्रयुज्यते॥

ज्योतिष्टोमे श्रूयते—“यदातिथ्यायां बर्हिस्तदुपसदां तदग्नीषोमीयस्य च”-इति। क्रीतं सोमं शकटे अवस्थाप्य प्राचीनवंशं प्रत्यानयनेऽभिमुखो या मिष्टिं निर्वपति, सेयमातिथ्या। ततः ऊर्ध्वं त्रिषु दिनेषु अनुष्ठीयमाना उपसदः। औपवसथ्ये दिनेऽनुष्ठेय सोऽग्नीषोमीयः। तत्रातिथ्येष्टौ विहितं यद् बर्हिः, तद्यदि तस्य इष्टेः [illegible]योपसत्सु विधीयेत, तदानी मातिथ्याविधान मनर्थकं स्यात्;—यदि तत्रोपयुक्त मितरत्र विधीयते, विनियुक्त-विनियोगरूपो विरोधः स्यात्; तस्मादातिथ्याबर्हिषो ये धर्मा आश्ववालत्वादयः, ते धर्मा उपसत्सूपसंक्रियन्त इत्यतिदेशपरं वाक्यं

मिति प्राप्ते, ब्रूमः ;—बर्हिःशब्दस्य धर्मातिदेशपरत्वे लक्षणा प्रसज्येत, श्रुत्या तु बर्हिष आतिथ्योपसदग्नीषोमीयेषु एकत्वं प्रतिभाति ; अतः साधारण्य मत्र विधेयम् । आतिथ्यार्थं यद्बर्हिरुपादीयते, तत् न केवल मातिथ्यार्थं, किन्तूपसदर्थ मग्नीषोमीयार्थं चोपादेय मिति विधिवाक्यस्यार्थः । तस्मादातिथ्योपसदग्नीषोमीयास्त्रयोऽप्यस्य बर्हिषः प्रयोजकाः” इति ॥

द्वादशाध्यायस्य प्रथमपादे (जै०सू०४२ ४३ अधि० १९.) चिन्तितम्—

“आतिथ्यादिगते बर्हिष्युक्षणादि पृथङ् न वा ।
आद्यो ऽतन्त्रप्रसङ्गत्वान्न प्रसङ्गोऽनिवारणात् ॥

“यदातिथ्यायां बर्हिस्तदुपसदां तदग्नीषोमीयस्य” इति श्रुतम् । तत्र बर्हिस्त्रयाणां साधारण्य मिति चतुर्थे निरूपितम् (जै०सू०४.२.३०.अधि०१४.) । तस्मिन् साधारण्ये बर्हिषि प्रोक्षणादिसंस्काराः प्रतिकर्म्म पृथगनुष्ठेयाः । कुतः ? तन्त्रप्रसङ्गयोरुभयोरसम्भवात् । न तावत् तन्त्र मस्ति, दर्शगतयागत्रयवदेककालीनत्वाभावात् ; नापि प्रसङ्गः, एकस्य तन्त्रमध्ये ऽन्ययोरपठितत्वादिति प्राप्ते, ब्रूमः; —बर्हिष एकत्वात् सकृत्प्रोक्षणादिभिः संस्कारे पुनः प्रोक्षणाद्यपेक्षा नास्ति । ते च प्रोक्षणादयः प्राथम्यादातिथ्यायां कार्याः, तत उपसत्स्वग्नीषोमीये च प्रसङ्गसिद्धिर्न वारयितुं शक्यते”-इति ॥ ८ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां चतुर्थाध्याये
अष्टमः खण्डः ॥ ८ (२५) ॥

॥ अथ नवमः खण्डः ॥

देववर्म वा एतद्यत् प्रयाजाश्चानुयाजाश्चाप्रयाजमननुयाजं भवतीच्चै संशित्या अप्रतिशराय सकृदतिक्रम्याश्रावयति यज्ञस्याभिक्रान्त्या अनपक्रमाय तदाहुः क्रूरमिव वा एतत् सोमस्य राज्ञोऽन्ते चरन्ति यदस्य घृतेनान्ते चरन्ति घृतेन हि वज्रेणेन्द्रो वृत्रमहंस्तद्यदंशुरंशुष्टे देव सोमाप्यायता* मिन्द्रायैकधनविद आ तुभ्य मिन्द्रः प्यायता मा त्व मिन्द्राय प्यायस्वाप्याययास्मान्सखीन् सन्न्या† मेधया स्वस्ति ते देव सोम सुत्या मुदृच मशीयेति राजान माप्याययन्ति यदेवास्य तत् क्रूर मिवान्ते चरन्ति तदेवास्यैतेनाप्याययन्त्यथो एनं वर्द्धयन्त्येव द्यावापृथिव्योर्वा एष गर्भो यत्सोमो राजा तद्यदेष्टा राय एष्टा वामानि प्रेषे भगाय ऋत मृतवादिभ्यो नमो दिवे नमः पृथिव्या इति प्रस्तरे निह्नवते द्यावापृथिवीभ्या मेव तन्नमस्कुर्वन्त्यथो एनं वर्द्धयन्त्येव वर्द्धयन्त्येव ॥ ९ (२६) ॥

॥ इत्यैतरेयब्राह्मणे प्रथमपञ्चिकायां चतुर्थोऽध्यायः ॥४॥

---

* 'सोम आप्यायता' क।

† 'सन्न्या'-इति ते० सं०, वा सं० पाठः।

अथोपसत्सु प्रयाजानुयाजांश्च निषेधति—"देववर्म वा एतद्यत्प्रयाजाश्चानुयाजाश्चाप्रयाज मननुयाजं भवतीष्वै संशित्या अप्रतिशराय" इति । ये प्रयाजा ये चानुयाजाः सन्ति, तदुभयं देवानां 'वर्म' कवचस्थानीयम् । अतएव शाखान्तरे समामनन्ति—"यत्प्रयाजानूयाजा इज्यन्ते, वर्मैव तद्यज्ञाय क्रियते, वर्म यजमानाय भ्रातृव्याभिभूत्यै"-इति (तै॰ सं॰ २. ६. १. ५.) । एवं सत्युपसदाख्यं कर्म प्रयाजानूयाजरहितं कर्त्तव्यम्; कवचस्यानुपयुक्तत्वात् । परकीयप्रहाराद्रक्षार्थं हि कवचं सम्पाद्यते, नात्र प्रहारः सम्भवति; पूर्वोक्ताया इषोस्तीक्ष्णत्वेन सकृत्प्रयोगादेव मारितेषु शत्रुषु प्रहर्तॄणामभावात् । एवं सति यदि कवचं सम्पाद्यते, तदानीं स्वकीयाया इषोरतीक्ष्णत्वं शङ्क्येत, स्वस्य च शत्रुभिः सम्पादिता प्रतिहिंसा शङ्क्येत; तच्चायुक्तम् । तस्मात् 'इष्वै संशित्यै' स्वकीयस्य बाणस्य सम्यक् तीक्ष्णत्वार्थम् 'अप्रतिशराय' स्वेषु शत्रुकर्तृकप्रतिहिंसायाः शङ्कापरिहारार्थं च प्रयाजानुयाजवर्जनं युक्तम् । तथा चाश्वलायन आह—"स्विष्टकृदादि लुप्यते, प्रयाजा आज्यभागौ च"-इति (श्रौ॰ ४.८.८.) । स्विष्टकृदादिष्वन्तर्भावादनुयाजलोपो युक्त एव

अथाग्नीषोमविष्णुरूपाणां देवानां [illegible]त्वनाश्रवणार्थं सुक्तवस्माद्देशादाहवनीयस्य दक्षिणदेशं प्रत्यसकृदतिक्रमणं प्राप्तम्, तद्वारयितुमाह—"सकृदतिक्रम्याश्रावयति, यज्ञस्याभिक्रान्त्या अनपक्रमाय"-इति । वेद्याहवनीययोर्मध्ये सकृदेवातिक्रम्य दक्षिणदिश्यवस्थितेषु बहुषु यागेषु प्रत्येकमाश्रावणं कुर्यात् । एवं प्रत्युपसद्यज्ञस्य सर्वत्र आक्रमणं भवति, स्थैर्यं भवति । अन्यथा पुनःपुनरुत्तरस्यां दिशि गमने, लब्धावसरः सन् यज्ञोऽप्यपक्रामेत् ।

तस्मात्सकृदेवातिक्रमणं युक्तम्। तदाहापस्तम्बः—"ध्रौवादष्टौ जुह्वां गृह्णाति, चतुरुपभृति। घृतवति शब्दे जुहूपभृतावादाय दक्षिणा सकृदतिक्रान्त उपांशुयाजवत्प्रचरति"-इति (श्रौ० ११.३.९,१०.)॥

अथ समन्त्रकं सोमाप्यायनं विधातुं प्रस्तौति—"तदाहुः क्रूर मिव वा एतत्सोमस्य राज्ञोऽन्ते चरन्ति; यदस्य घृतेनान्ते चरन्ति; घृतेन हि वज्रेणेन्द्रो वृत्र मह्नन्"-इति। 'तत्' तत्र ब्रह्मवादिनः एवम् 'आहुः'—'सोमस्य राज्ञः' 'अन्ते' समीपे 'घृतेन' द्रव्येण तानूनप्त्रमन्त्रकं कर्म 'चरन्ति' अनुतिष्ठन्तीति 'यद्' अस्ति, तत् 'एतत्' सोमस्य राज्ञः समीपे 'क्रूर मिव वै' उग्र मिव कर्म्म 'चरन्ति'; 'हि' यस्मात्कारणात् घृतरूपेण 'वज्रेण' 'इन्द्रः' 'वृत्र' हतवान्, तस्मात् घृतकर्म्म क्रूरम्। तच्छाखान्तरे विस्पष्ट माम्नातम्—"घृतं वै देवा वज्रं कृत्वा सोम मघ्नन्नन्तिक मिव खलु वा अस्यैतच्चरन्ति यत्तानूनप्त्रेण प्रचरन्ति"-इति (तै० सं० ६. २. २. ४.)।

तस्य क्रूरकर्मणः परिहाराय विधत्ते—"तद्यदंशुरंशुष्टे देव सोमाप्यायता मिन्द्रायैकधनविद आ तुभ्य मिन्द्रः प्यायता मा त्व मिन्द्राय प्याय[illegible]प्याययास्मान्त्सखीन् सन्या मेधया स्वस्ति ते देव सोम सुत्या सु[illegible]मशीयेति राजान माप्याययन्ति; यदेवास्य तत् क्रूर मिवान्ते चरन्ति, तदेवास्यैतेनाप्याययन्त्यथो एनं वर्द्धयन्त्येव" इति। 'यद्' यस्मात्कारणात् सोमस्य राज्ञः समीपे घृतसाधनकं तानूनप्त्रं कर्म क्रूरम्, 'तत्' तस्मात् कारणात्, क्रौर्यपरिहाराय 'अंशुरंशुः'-इति मन्त्रेण* सोमं राजान माप्याययेयुः।

---

* तैत्तिरीयसंहितायां रूपोऽयं मन्त्रः श्रूयते (१.२.११.१.), परं तत्र [illegible]

अनेन प्रोक्षणेन आप्यायनम्। एवं सति 'यत्' क्रूरम् आचरन्ति, 'तत्' सर्वम् 'एतेन' प्रोक्षणेन 'आप्याययन्ति' शमयन्ति ; अपिच 'एनं' सोमं 'वर्द्धयन्त्येव'। मन्त्रस्याय मर्थः—हे 'सोम ! देव !' इन्द्रार्थं 'ते' त्वदीयः 'अंशुः' त्वदवयवः 'आप्यायताम्' वर्धताम्। कीदृशायेन्द्राय ? 'एकधनविदे' सोमरूपं यदेकं धनं तदेव विन्दते वेति एकधनवित्, तस्मै एकधनविदे, 'तुभ्य' त्वदर्थम् 'इन्द्रः' वर्धताम्, इन्द्रार्थं च 'त्वं' वर्धस्व। 'सखीन् अस्मान्' 'सन्या' धनेन, 'मेधया' यज्ञप्रतिपादकग्रन्थधारणशक्त्या च 'आप्यायय' वर्धय। हे 'सोम ! देव !' 'ते' 'स्वस्ति' क्षेमोऽस्तु। यस्यां क्रियायां सोमः 'सूयते' अभिषूयते सा सुत्या। 'उत्' उत्तमा समाप्तिविषया ऋक् यस्यां सुत्यायां सेयम् 'उदृक्'। तां 'सुत्याम् उदृचम्' 'अशीय' प्राप्नुयाम् ; विघ्न मन्तरेण समाप्तिपर्यन्त मनुतिष्ठेय मिति (वा० सं० ५,७,१,)। श्रौतः 'इति'-शब्दो मन्त्रसमाप्त्यर्थः ॥

समन्त्रकं निह्नवं विधत्ते—"द्यावापृथिव्योर्वा एष गर्भो यत् सोमो राजा, तद्यदेष्टा राय एष्टा वामानि प्रेषे भगाय ऋतमृतवादिभ्यो नमो दिवे नमः पृथिव्या इति प्रस्तरे निह्नवते ; द्यावापृथिवीभ्या मेव तन्नमस्कुर्वन्त्यथो एने वर्धयन्त्येव वर्धयन्त्येव"-इति। यः 'सोमो राजा एषः' 'द्यावापृथिव्योः' एव 'गर्भः' ; 'यद्' यस्मादेवं 'तत्' तस्मात् गर्भरक्षार्थं 'प्रस्तरे' एतन्नामके दर्भमुष्टौ 'निह्नवते' सम्प्रणयन्ति, नमस्कारोपचारं कुर्युरित्यर्थः। तदेतत् द्यावापृथिवीभ्या मित्यादिना स्पष्टीक्रियते। अपिच 'एने' द्यावापृथिव्यौ

विभिन्नाः—'अꣳशुरꣳशुष्टे', 'ऽप्यायय सखीन्', 'सुत्या मशीय'—इति। "आशिष मेवैता माशास्ते"—इति च तद्ब्राह्मणम् (तै०सं०६.२.२.)। वाजसनेयिनाञ्च 'सुत्या मशीय'—इत्येव।

'वर्धयन्त्येव' उक्ताङ्गयुक्तं कुर्वन्त्येव ॥ निह्नवप्रकार आपस्तम्बेन दर्शितः—"अथ निह्नुवते—दक्षिणे वेद्यन्ते प्रस्तरं निधाय दक्षिणान् पाणीनुत्तानान् कृत्वा सव्यान् नीच एष्टा रायः प्रेषे भगायेति"-इति (श्रौ०११.१.१२.)। अस्मादभ्युदय मिच्छतीतिएष्टा प्रस्तरः सोमो वा। देहीति पद मध्याहर्त्तव्यम्। हे 'एष्टः!' 'इषे' अन्नार्थं 'भगाय' सौभाग्यार्थं च 'रायः' धनानि 'प्र'देहि। यद्वा 'एष्टा'-इति प्रथमान्तम्; तदानीं 'प्र'ददात्वित्यध्याहारः। किञ्च, 'एष्टा' 'वामानि' अन्यानपि कामान् प्रददातु। 'ऋतवादिभ्यः' सत्यवादिभ्यो देवेभ्यः, ऋत्विग्यजमानेभ्यो वा 'ऋतं' सत्यं वदामीति शेषः। तदेव सत्यवचनं स्पष्ट मुच्यते—'दिवे' द्युलोकदेवतायै 'नमः' अस्तु, 'पृथिव्यै' भूलोकदेवतायै 'नमः' अस्त्विति (वा० सं०५.७.२. *)। अन्तः 'इति'-शब्दो मन्त्रसमाप्त्यर्थः ॥ वर्धयन्त्येवेत्यभ्यासोऽध्यायसमाप्त्यर्थः ॥

अत्र मीमांसा। दशमाध्यायस्य सप्तमे पादे (जै० सू० ४३,४६, अधि० १४.) चिन्तितम्—

"उपसत्सु निषिद्धेभ्यः शिष्टं सर्वं समाचरेत्।
यावदुक्तोऽथवाद्यस्तु चोदकस्याविचारणात्॥
स्रौवाघारं पुनःश्रुत्या शिष्टस्य परिसङ्ख्यया।
अपूर्वार्थत्वतो वाऽन्त्यो ऽनुवादः प्रतिषेधगीः॥

ज्योतिष्टोमे विहितासूपसत्सु पठ्यते—"अप्रयाजास्ता अननुयाजाः"-इति (कात्या० श्रौ० ६.१०.२२,२३.†)। तत्र निषिद्धान्

---

* एष च मन्त्रः श्रूयते तैत्तिरीयसंहितायामपि (१.२.११.२.), परं न तत्र 'एष्टा वामानि'-इति; तथा वाजसनेयिनाञ्च। "द्यावापृथिवीभ्यामेव नमस्कृत्यास्मिन् लोके प्रतितिष्ठन्ति"-इति च तद्ब्राह्मणम् (तै० सं० ६. २. २.)।

† इह त्वपि 'अप्रयाज मननुयाजम्'-इति (१८८ पृ०)।

प्रयाजानुयाजान् वर्जयित्वा अवशिष्टं चोदकप्राप्त मङ्गजातं सर्व माचरणीय मिति प्राप्ते, ब्रूमः;—प्रकृतौ विहित एव स्रौवाघारः पुनरिह विधीयते, स च चोदकप्राप्त मन्यत् सर्वं मङ्गजातं परिचष्टे; अन्यथा पुनर्विधानवैयर्थ्यात् । ननु पुनर्विधानं प्रतिप्रसवार्थम्;—अतएव श्रुतिरत्र स्रौवाघार मभावशङ्कानिराकरणपूर्वकं विदधाति—"नान्या माहुतिं पुरस्ताज्जुहुयाद्यदन्या माहुतिं पुरस्ताज्जुहुयादन्यन्मुखं कुर्यात् स्रुवेणाघार माघारयति"-इति *। अयमर्थः—स्रौवाघारः सर्वत्र यज्ञस्य मुखम्, तथा सति, यदि कश्चिदत्र उपसत्प्रयोगादौ स्रौवाघार महुत्वा, तस्य स्थाने काञ्चिदन्या माहुतिं जुहुयात्, तदा मुखव्यत्यासेन प्रत्यवायं प्राप्नुयात्; तस्मात् स्रौवाघार आदौ कर्त्तव्य इति ? न एतद् युक्तम्; चोदकप्राप्तस्याघारस्याकस्मादभावशङ्काया अयुक्तत्वात् । तस्मात्परिसङ्ख्यार्थ एव पुनर्विधिः । आहुत्यन्तरनिन्दा तु तच्छेषभूतोऽर्थवादः । यदि परिसङ्ख्या, सापि त्रिदोषेत्युच्येत ; तर्हि ब्रह्ममेधीयवदपूर्वकर्म्मासु †,—प्रयाजादिनिषेधो नित्यानुवादः ; सर्वथा यावदुक्त मत्रानुष्ठेयम्"-इति ‡ ॥ ९ ॥

---

* 'स्रुवेणाघार माघारयति यज्ञस्य प्रज्ञात्यै'-इति तै० सं० २. २. ३. ३।

† जै० मी० द० १० अ० ७ पा० २४—३२ सू०, ४ अधि०।

‡ उपसद्दिष्टेरङ्गभूतानि तानूनप्त्रादीनि कर्म्माणि शतपथब्राह्मणे तृतीयकाण्डस्य चतुर्थाध्याये विहितानि ; तैत्तिरीयके सं० १ का० २ प्र० ११ अनुवाके, ६ का० २ प्र० २—६ अनुवाकेषु च, तथा कल्पसूत्रेषु च,—आश्वलायनश्रौते 'संश्रितासा माज्य तानूनप्त्रम्'-इत्यादीनि 'नमः पृथिव्या इति'-इत्यन्तानि (४. ५. ३—८.); आपस्तम्बश्रौते 'आतिथ्याया ध्रौवात् स्रुचि समसि श्रा तानूनप्त्रं समवद्यति'-इत्यादि ११ प्र० १ ख० १—१२ सू० ; कात्यायनश्रौते च 'तानूनप्त्र मितत'-इति-(८. १. २४.)-सूत्रस्याद्यना-सूत्राणि द्रष्टव्यानि। अत्रैव च श्रुतौ 'अथ सौकर्याय उपसदः प्रतीन उत्थी'-इत्यादिना

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां चतुर्थाध्याये
नवमः खण्डः ॥ ९ (२६) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायाः चतुर्थोऽध्यायः ॥

उपसदिष्टिप्रयोगः समन्ताद् वर्णितः। यथातिथ्येष्टौ प्रकृतिवत् कुशमयः प्रस्तरो भवति ; उपसदिष्टौ तु आश्ववालः प्रस्तरः (तै० सं० ६.२.१ ; कात्या० सू० ८,१.१३.)। 'आश्ववालाः काशाख्या दर्भविशेषाः'—इति तर्कितं सायणेनेति ॥

॥ अथ पञ्चमाध्यायः ॥

(तत्र)

॥ प्रथमः खण्डः ॥

॥ ॐ ॥ सोमो वै राजा गन्धर्वेष्वासी॑त्तं देवाश्च ऋषयश्चाभ्यध्यायन्॑ कथ मय मस्मान्त्सोमो राजा गच्छेदिति॑ सा वागब्रवीत् स्त्रीकामा वै गन्धर्वा॑ मयैव स्त्रिया भूतया पणध्व मिति॑ नेति देवा अब्रुवन्॑ कथं वयं त्वदृते स्यामेति॑ साब्रवीत् क्रीणीतैव॑ यर्हि वाव वो मयार्थो भविता॑ तर्ह्येव वो ऽहं पुनरागन्तास्मीति तथेति॑ तया महानग्न्या* भूतया॑ सोमं राजान मक्रीणं॑स्ता मनुकृति मस्कन्नां॑ वत्सतरी माजन्ति सोमक्रयणीं॑ तया सोमं राजानं क्रीणन्ति॑ तां पुनर्निष्क्रीणीयात्॑पुनर्हि सा तानागच्छ॑त्तस्मादुपांशु वाचा चरितव्यं॑ सोमे राजनि क्रीते॑ गन्धर्वेषु हि तर्हि वाग् भवति॑ साम्नावेव प्रणीयमाने पुनरागच्छति॑ ॥ १ (२७) ॥

---

* 'महाणग्न्या' ख, ग।

अभिष्टवोपसत्सामून्नाप्यायननिह्नवाः ।
कथिता धर्म्मसम्भारा व्रतोपायन मेव च ॥

अथ सोमक्रयाद्या वक्तव्याः; तत्र क्रयं वक्तु माख्यायिका माह —"सोमो वै राजा गन्धर्वेष्वासीत्; तं देवाश्च ऋषयश्चाभ्यध्यायन्, —कथ मय मस्मान्सोमो राजा गच्छेदिति? सा वागब्रवीत्,— स्त्रीकामा वै गन्धर्वाः, मयैव स्त्रिया भूतया पणध्व मिति; नेति देवा अब्रुवन्,—कथं वयं त्वदृते स्यामेति? साब्रवीत्,—क्रीणीतैव; यर्हि वाव वो मयार्थो भविता, तर्ह्येव वो ऽहं पुनरागन्तास्मीति; तथेति; तया महानग्न्या भूतया सोमं राजान मक्रीणन्"-इति। स्वानभ्राजेत्यादिनामधारिणो गन्धर्वाः द्युलोके सोमस्य रक्षकाः। तच्च शाखान्तरे मन्त्रव्याख्यानब्राह्मणे श्रूयते —"स्वान भ्राजेत्याह, एते वा अमुष्मिंल्लोके सोम मरक्षन्"-इति (तै० सं० ६. १. १०. ५.)*। अथवा विश्वावसुप्रभृतयः सोमस्यापहर्त्तारो गन्धर्वाः। तदपि तत्रैव श्रुतम्। "तꣳ सोम माह्रियमाणं गन्धर्वो विश्वावसुः पर्यमुष्णात्; स तिस्रो रात्रीः परिमुषितो ऽवसत्" इति (तै० सं० ६.१.६.५.)। तेषु 'गन्धर्वेषु' यः 'सोम आसीत्', 'तं' सोमं मित्रादयो 'देवाः' वसिष्ठादयः 'ऋषयश्च' केन प्रकारेण सोमोऽस्मान् प्राप्नुयादिति विचारितवन्तः। तदानीं गन्धर्वहृदयाभिज्ञा, 'वाग्' देवी देवान् 'अब्रवीत्' —'गन्धर्वाः' सर्वेऽपि स्त्रीलम्पटाः, अहं च स्त्री भूत्वा तिष्ठामि, अतो 'मया पणध्व' सोममूल्यत्वेन तां गन्धर्वाणा मग्रे कुरुतेति। ततो 'देवाः' अनङ्गीकृत्य 'त्वदृते' त्वां वाचं विना 'वयं कथं स्याम'

---

* 'स्वान भ्राज'-इति मन्त्रस्तु तैत्तिरीयसंहितायामाम्नातः (१. २. ७.)।

गन्धर्वपराधीनत्वे सति कर्मणामप्रवृत्तेः केन प्रकारेण वयं जीवाम ? इति वाचम् 'अब्रुवन्'। ततो वाक् देवान् 'अब्रवीत्' सन्देहं मा कुरुत, अवश्यं मया मूल्येन 'क्रीणीत', यदैव 'मया' युष्माकं प्रयोजनं भविष्यति, तदैवाहं पुनरपि युष्मान् प्राप्स्यामीति। ततो देवा अङ्गीकृत्य 'तया' वाचा 'सोम मक्रीणन्'। कीदृश्या? 'महानग्न्या' महती चासौ नग्नी च महानग्नी, तया। रूपसम्पत्तिविवक्षया महत्त्व मुच्यते, बाल्यविवक्षया नग्नत्वम्। 'भूतया' तदानी मेव कुमारीरूपेण निष्पन्नया। तदेतच्छाखान्तरे स्पष्ट माम्नातम्— "ते देवा अब्रुवन्, स्त्रीकामा वै गन्धर्वाः स्त्रिया निष्क्रीणामेति; ते वाचं स्त्रिय मेकहायनीं कृत्वा तया निरक्रीणन्"-इति (तै० सं० ६. १. ६. ५.) ॥

इदानीं सोमक्रयं विधत्ते—"ता मनुकृति मस्कन्नां वत्सतरी माजन्ति सोमक्रयणीं, तया सोमं राजानं क्रीणन्ति"-इति। 'ता मनुकृति' तां स्त्रीरूपां वाचम्, अनुक्रियमाणां निष्पन्नां तत्सदृशी मित्यर्थः। 'अस्कन्नां' वीर्यस्कन्दनरहिताम् अप्राप्तयौवनाम्, 'वत्सतरीम्' अतिशयेन बालां, सोमक्रयसाधनभूतां काञ्चिद्गाम् 'आजन्ति' सम्पादयेयुरित्यर्थः। 'तया' सादृश्या गवा 'सोमं राजानं' 'क्रीणन्ति' क्रीणीयुः; तां गां मूल्यरूपेण दत्त्वा सोमं स्वीकुर्युः। मूल्यत्वेन सोमविक्रयणे दत्ताया गोः तस्याः पुनर्मूल्यान्तरदानेन स्वीकरणं विधत्ते—"तां पुनर्निष्क्रीणीयात्पुनर्हि सा तानागच्छत्"-इति। यस्मादियं वाक् गन्धर्वेभ्यो निष्क्रम्य पुनस्तान् देवान् प्राप्नोत्, तस्मात् सोमक्रयण्याः पुनरादानं युक्तम् ॥

वाचो वृत्तान्तः शाखान्तरे स्पष्ट माम्नातः—"सा रोहिद्रूपं कृत्वा गन्धर्वेभ्यो ऽपक्रम्यातिष्ठत्तद्रोहितो जन्म ; ते देवा अब्रुवन्नप

युष्मदस्मीवास्मानुपावर्त्तते विक्रयामहा इति; ब्रह्मगन्धर्वा अवदन्नगायन् देवाः ; सा देवान् गायत उपावर्त्तत ; तस्माद्गायन्तꣳ स्त्रियः कामयन्ते”-इति (तै० सं० ६. १. ६. ५, ६.) ॥

मन्त्राणां मन्द्रध्वनिं विधत्ते—“तस्मादुपांशु वाचा चरितव्यं, सोमे राजनि क्रीते गन्धर्वेषु हि तर्हि वाग्भवति, साग्नावेव प्रणीयमाने पुनरागच्छति”-इति । सोमक्रयादूर्द्ध्वकाले मूल्यरूपा ‘वाग्’ देवी ‘गन्धर्वेषु’ तिष्ठति, ‘पुनः’ अपि ‘अग्नौ प्रणीयमाने देवान्’ ‘आगच्छति’ ; यस्मादेवं ‘तस्मात्’ सोमक्रयादूर्द्ध्वं अग्निप्रणयनात् प्राक् ‘वाचा उपांशु चरितव्यम्’ यथा परैर्ध्वनिर्न श्रूयते, तथा मन्त्रपाठादिकं कर्त्तव्य मित्यर्थः ॥

अत्र मीमांसा । द्वादशाध्यायस्य चतुर्थपादे (जै०सू०४,५. अधि० ३.) चिन्तितम्—

“क्रयणेषु विकल्पः स्यात् साहित्यं.वाग्रिमो यतः ।
कार्य्यैक्य मानतैर्लाभाद्दशोक्तेश्च समुच्चयः ॥

“अजया क्रीणाति, हिरण्येन क्रीणाति, वाससा क्रीणाति”-इत्यादीनि बहूनि सोमक्रयसाधनद्रव्याण्याम्नातानि (तै० सं० ६.१.६—१०.) । तेषां कार्य्यैक्याद् विकल्प इति चेत्, मैवम् ;—बहुभिर्द्रव्यैः विक्रेतुरानतेः सौलभ्याद्, “दशभिः क्रीणाति”-इति-सङ्ख्योक्तेश्च * समुच्चयः”-इति ॥

इति श्रीमत्सायणाचार्य्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां पञ्चमाध्याये
प्रथमः खण्डः ॥ १ (२७) ॥

---

* तथाहि ‘एकहायन्या (सोमक्रयण्या) क्रीणाति’ अजया क्रीणाति’, ‘हिरण्येन

॥ अथ द्वितीयः खण्डः ॥

अग्नये प्रणीयमानायानुब्रूहीत्याहाध्वर्युः॑ प्र दे॒वं दे॒व्या धि॒या भर॑ता जा॒तवे॑दसं हव्या नो वक्षदानुषगिति॑ गायत्रीं ब्राह्मणस्यानुब्रूयाद् गायत्रो वै ब्राह्मण॑स्तेजो वै ब्रह्मवर्चसं गायत्री॑ तेजसैवैनं तद् ब्रह्मवर्चसेन समर्द्धयती॑मं महे विदथ्याय शूष मिति॑ त्रिष्टुभं राजन्यस्यानुब्रूयात्॑ त्रैष्टुभो वै राजन्य॑ ओजो वा इन्द्रियं वीर्यं त्रिष्टुबोजसैवैनं तदिन्द्रियेण वीर्येण समर्द्धयति॑ शश्वत्कृत्व ईड्याय प्रजभ्रुरिति॑ स्वानामेवैनं तच्छ्रैष्ठ्यं गमयति शृणोतु नो दम्येभिरनीकैः॑ शृणोत्वग्निर्दिव्यैरजस्र इत्य॑जस्रं हास्मिन्नजस्रो दीदाय य एवं वे॑दाय मिह प्रथमो धायि धातृभिरिति॑ जगतीं वैश्यस्यानुब्रूयाज्जा॑गतो वै वैश्यो॑

क्रीणाति', धेन्वा (सवत्सया) क्रीणाति', 'ऋषभेण क्रीणाति', 'अनडुहा क्रीणाति', 'मिथुनाभ्यां क्रीणाति', 'वाससा क्रीणाति'–इति च दश सोमक्रयसाधनानि द्रव्याण्याम्नातानि (तै० सं० ६. १. ६—१०.)। 'मिथुनाभ्या मिति वत्सतरो वत्सतरी च' आप० श्रौ० १०. २५. १५। 'धेनोः सवत्साया विवक्षितत्वाद् दशद्रव्यसम्पत्तिः'–इति तै० सं० ६. १. १०. सा० भा०। दशभिः (क्रीणाति) चतुर्भिः, एकया, तिसृभिः, चतुर्विंशत्या, त्रिंशता, शतेन, द्वाभ्याम् (शताभ्याम्), सहस्रेणेति विधानवैविध्यात् (आप० श्रौ० १०. २६.) यद्यपि द्रव्याणां दशाधिकतापि प्रतीयेत, परं न हि कश्चिदपि एतेभ्यो दशद्रव्येभ्योऽन्यदस्ति किञ्चित् क्रयसाधनम्। तथा सहस्रदक्षिणस्य यागस्य त्रिंशता सोमक्रयं विधाय प्रोक्तम् 'सप्तविंशतिर्गा हिरण्यं छागो वास इति त्रिंशत्'–इति (आप० श्रौ० १० . २६. ७. ६)। सर्वत्र चाद्या सोमक्रयणी (आरुण्यादिलक्षणा एकहायनी गौः) प्राप्नोति॥

आगताः पशवः पशुभिरेवैनं तत्समर्द्धयति वनेषु चित्रं विभुं विशेविश इत्यभिरूपा यद्यज्ञे ऽभिरूपं तत् समृद्ध मय् मु ष्य प्र देवयुरित्यनुष्टुभि वाचं विसृजते वाग्वा अनुष्टुब् वाच्येव तद्वाचं विसृजते ऽय मु ष्य इति यदाहाय मु स्यागमं या पुरा गन्धर्वेष्ववात्स मित्येव तद्वाक् प्रब्रूते ऽय मग्निरुरुष्यतीत्ययं वा अग्निरुरुष्यत्यमृतादिव जन्मन इत्यमृतत्व मेवास्मिंस्तद्दधाति सहसश्चित्सहीयान् देवो जीवातवे कृत इति देवो ह्येष एतज्जीवातवे कृतो यदग्निरिळायास्त्वा पदे वयं नाभा पृथिव्या अधीत्येतद्वा इळायास्पदं यदुत्तरवेदीनाभिर्जातवेदो निधीमहीति निधास्यन्तो ह्येनं भवन्त्यग्ने हव्याय वोळ्हव इति हव्यं हि वक्ष्यन् भवत्यग्ने विश्वेभिः स्वनीक देवैरूर्णावन्तं प्रथमः सीद योनि मिति विश्वैरेवैनं तद्देवैः सहासादयति कुलायिनं घृतवन्तं सवित्र इति कुलाय मिव ह्येतद्यज्ञे क्रियते यत् पैतुदारवाः परिधयो गुग्गुलूर्णास्तुकाः सुगन्धितेजनानीति यज्ञं नय यजमानाय साध्विति यज्ञ मेव तदृजुधा प्रतिष्ठापयति सीद होतः स्व उ लोके चिकित्वानित्यग्निर्वै देवानां होता तस्यैष स्वो लोको यदुत्तरवेदीनाभिः

सादया यज्ञं सुकृतस्य योनाविति यजमानो वै
यज्ञो यजमानायैवैता माशिष माशास्ते देवावीर्देवान्
हविषा यजास्यग्ने बृहद्यजमाने वयो धा इति प्राणो
वै वयः प्राण मेव तद्यजमाने दधाति नि होता
होतृषदने विदान इत्यग्निर्वै देवानां होता तस्यैतद्धोतृषदनं
यदुत्तरवेदीनाभिस्त्वेषो दीदिवाँ असदत्
सुदक्ष इत्यासन्नो हि स तर्हि भवत्यदब्धव्रतप्रमतिर्वसिष्ठ
इत्यग्निर्वै देवानां वसिष्ठः सहस्रम्भरः
शुचिजिह्वो अग्निरित्येषा ह वा अस्य सहस्रम्भरता
यदेन मेकं सन्तं बहुधा विहरन्ति प्र ह वै साहस्रं
पोष माप्नोति य एवं वेद त्वं दूतस्त्व मु नः परस्पा
इत्युत्तमया परिदधाति त्वं वस्य आ वृषभ प्रणेता
अग्ने तोकस्य नस्तने तनूना मप्रयुच्छन् दीद्यद् बोधि
गोपा इत्यग्निर्वै देवानां गोपा अग्नि मेव तत्सर्वतो
गोप्तारं परिदत्त आत्मने च यजमानाय च यत्रैवं
विद्वानेतया परिदधात्यथो संवत्सरीणा मेवैतां
स्वस्तिं कुरुते ता एता अष्टावन्वाह रूपसमृद्धा
एतद्वै यज्ञस्य समृद्धं यद् रूपसमृद्धं यत्कर्म क्रियमाण
मृगभिवदति तासां त्रिः प्रथमा मन्वाह त्रिरुत्तमां
ता द्वादश सम्पद्यन्ते द्वादश वै मासाः संवत्सरः

संवत्सरः प्रजापतिः प्रजापत्यायतनाभिरेवाभी राध्नोति य एवं वेद त्रिः प्रथमां त्रिरुत्तमामन्वाह यज्ञस्यैव तद् बर्सौ नह्यति स्थेम्ने बलायाविस्रंसाय ॥ २ (२८) ॥

सोमक्रय मभिधाय अग्निप्रणयनीया ऋचो विधातु मादौ प्रैषमन्त्रं विधत्ते—“अग्नये प्रणीयमानायानुब्रूहीत्याहाध्वर्युः”-इति । प्राचीनवंशगते आहवनीये ऽवस्थितस्याग्नेः सौमिक्या मुत्तरवेद्यां नयनं यदस्ति, तदेतदग्निप्रणयनम् *, तत् कुर्वन् ‘अध्वर्युः’ ‘अग्नये प्रणीयमानायानुब्रूहि’-‘इति’ प्रैषमन्त्रं होतार मुद्दिश्य पठेत् † ॥

तत्र होत्रनुवक्तव्यास्वष्टासु ऋक्षु प्रथमा मृचं विधत्ते—“प्र दे देव्या धिया भरता जातवेदसं हव्या नो वक्षदानुषगिति (सं० १०.१७६.२.) गायत्रीं ब्राह्मणस्यानुब्रूयाद्”-इति । हे ऋत्विजः ! ‘जातवेदसं’ देवं ‘देव्या’ तद्रूपप्रकाशिकया तद्भावनायुक्तया ‘धिया’ ‘प्रभरत’ प्रकर्षेणोत्तरवेदिं प्रति हरत, नयत । अयं च जातवेदाः ‘आनुषक्’ उत्तरवेद्या मनुषक्तः सन् ‘नः हव्या’ अस्मदीयानि हवींषि ‘वक्षत्’ देवान् प्रति वहतु ‘इति’ ऋगेषा गायत्रीच्छन्दस्का

---

* ‘उक्तम् (२. १७.) अग्निप्रणयनम्’-इति (१. १. ७.), ‘पश्वर्थं ह्यग्निप्रणयनम्; तस्य च सः सुत्यानिमित्तम्’-इति (१२. ४. १३.), ‘सदोहविर्धानाग्नीध्रीयाग्नीषोमप्रणयनपत्नीवतीग्रहणानि पश्वर्थानि भवन्ति, सुत्यार्थान्येके’-इति (१२. ४ १५.), इत्याद्यापस्तम्बीयसूत्राणि पर्यालोच्यानि । ‘अथ प्रवर्ग्यं मुद्वास्य पशुबन्धवदग्निं प्रणयति’-इत्यादि आप० श्रौ० ११. ५. ६ ।

† तथाहि कल्पसूत्रम्—‘पश्चाद् दार्शपौर्णमासिकाया वेदेरुपविश्य प्रेषितो ऽग्निप्रणयनीयाः प्रतिपद्यते’-इति आश्व० श्रौ० २. १७. २ ।

तां 'ब्राह्मणस्य' यजमानस्य होता अनुब्रूयात् । तदेतत्प्रशंसति—"गायत्रो वै ब्राह्मणस्तेजो वै ब्रह्मवर्चसं गायत्री तेजसैवैनं तद् ब्रह्मवर्चसेन समर्द्धयति"-इति । ब्राह्मणस्य प्रजापतिमुखजन्यत्वसाम्येन गायत्रीसम्बन्धः (१९ पृ० ५ पं०) । 'तेजो वै'-इत्यादिकं पूर्ववद् व्याख्येयम् (४९ पृ०) ॥

क्षत्रियस्य यजमानस्य यागेऽन्या मृचं विधत्ते—"इमं महे विदथ्याय शूष मिति (सं०३. ५४. १.) त्रिष्टुभं राजन्यस्यानुब्रूयात्"-इति । तदेतत् प्रशंसति—"त्रैष्टुभो वै राजन्य ओजो वा इन्द्रियं वीर्यं त्रिष्टुबोजसैवैनं तदिन्द्रियेण वीर्येण समर्द्धयति"-इति । त्रिष्टुप् राजन्ययोः प्रजापतिबाहुजन्यत्वेन सम्बन्धः । एतदपि गायत्री-ब्राह्मणयोरिव सप्तमकाण्डे तैत्तिरीयैराम्नातम्—"उरसो बाहुभ्यां पञ्चदशं निरमिमीत, त मिन्द्रो देवतान्वसृज्यत, त्रिष्टुप् छन्दो, बृहत्साम, राजन्यो मनुष्याणाम्"-इति (सं०७.१.१.४.) । 'ओजो वै'-इत्यादिकं पूर्ववद् व्याख्येयम् (५२ पृ०) । तस्या ऋचो द्वितीयपादं पठति—"शश्वत्कृत्व ईड्याय प्रजभ्रुरिति"-इति । उक्तस्य पादद्वयस्याय मर्थः—'शूषं' सुखहेतुम् 'इमम्' अग्निम् 'महे विदथ्याय' महते वेदनाय लाभाय, तत्सिद्ध्यर्थं 'शश्वत्कृत्वः' बहुकृत्वः 'ईड्याय' प्रजाभिः स्तुत्याय राजन्याय यागसिद्ध्यर्थं 'प्रजभ्रुः' प्रकर्षेण हृतवन्तः, उत्तरवेद्यां नीतवन्त इति । यतः 'इति'-शब्दो द्वितीयपादस्य समाप्त्यर्थः । तत्पादपठनेन ज्ञातीनां मध्ये यजमानस्य श्रैष्ठ्यं दर्शयति—"स्वाना मेवैनं तच्छ्रैष्ठ्यं गमयति"-इति । तस्या ऋच उत्तरार्द्धं पठति—"शृणोतु नो दम्येभिरनीकैः शृणोत्वग्निर्दिव्यैरजस्र इति"-इति । 'दम्येभिः' परकीयसेनां दमयितुं मर्हैः 'अनीकैः' स्वकीयैः सैन्यैः

सह अयं प्रणीयमानः 'अग्निः' 'नः' अस्मान् 'शृणोतु' एते यजमानाः सम्यगनुतिष्ठन्तीत्येवं स्वकीयदूतमुखादवगच्छतु। यद्वा दमो गृहं, तद्वद्भिर्दम्यैः, गृहरक्षणार्थमवस्थापितैरित्यर्थः। किञ्चायमग्निः 'दिव्यैः' देवलोकयोग्यैर्भोगैः सह 'अजस्रः' निरन्तरम् अस्मद्गृहे वर्त्तमानः, अस्मदीयां स्तुतिं 'शृणोतु'-इति। [illegible] 'इति' शब्दः [illegible]समाप्त्यर्थः। उक्तं वेदनं प्रशंसति—"अजस्रं हास्मिन्नग्निर्दीदाय य एवं वेद"-इति। वेदितुर्जरा[illegible]माभिप्रायस्तस्य 'अस्मिन्' एतदीये गृहे 'अजस्रः' नैरन्तर्येण वर्त्तमानोऽग्निः 'दीदाय' दीप्यते॥

वैश्यस्य यजमानस्यान्यां ऋचं विधत्ते—"आ यमिह प्रथमो धायि धातृभिरिति (सं० ४.७.१.) जगतीं वैश्यस्यानुब्रूयात्" इति। तदेतत्प्रशंसति—"जागतो वै वैश्यो जागताः पशवः पशुभिरेवैनं तत् समर्द्धयति"-इति। प्रजापतिमध्यात्सृष्टत्वसाम्येन जगतीसम्बन्धात् यदपि शाखान्तरे समाम्नातम्—"मध्यतः सप्तदशं निरमिमीत, तं विश्वेदेवा देवता अन्वसृज्यन्त, जागतीच्छन्दो, वैरूपं साम, वैश्यो मनुष्याणाम्"-इति (तै० सं० ७. १. १. [illegible])। 'जागताः'-इत्यादिकं पूर्ववद् व्याख्येयम् (पृ० [illegible])। चतुष्पाद मनुष्य[illegible] प्रभृतिः "[illegible]" विशो [illegible]; यथ्यो[illegible]ऽभिरूपं तत्समृद्धम्"-इति। अत [illegible] विट्[illegible] वैश्यं [illegible]॥

इत्थं जातिभेदेन [illegible] साधारणभूतां द्वितीयामृचं विधत्ते—"अग्ने [illegible] मुष्टिभि (सं० १०. १०६. २) [illegible]"-इति। [illegible] क्रयणकाले यद्वाच उपांशुत्वं विहितम् (१९८ पृ०), तस्मिन्

काले विसर्गं विधत्ते—अनुष्टुभीति । 'अय सु ष्य' इत्येतस्यामृचि उपांशुरूपां 'वाचं' विसृजेत् । तदेतत्प्रशंसति—"वाग्वा अनुष्टुब् वाच्येव तद्वाचं विसृजते"–इति । 'अय सु ष्य' इत्यस्या अनुष्टुप्छन्दस्कत्वात् अनुष्टुभो वाग्रूपत्वस्य सर्वश्रुतिप्रसिद्धत्वादनुष्टुब्रूपायां 'वाचि एव' उपांशुध्वनिरूपं 'वाचं' तन्मन्त्रपाठेन 'विसृजते'*। एतन्मन्त्रगतप्रथमपादस्य पूर्वभागमनूद्य व्याचष्टे—"अय सु ष्य इति यदाहायं सु स्यागमं या पुरा गन्धर्वेष्ववात्समित्येव तद्वाक् प्रब्रूते" इति । ब्राह्मणगतः 'अयं' शब्दोऽत्र स्त्रीलिङ्गत्वेन परिणेयः; तच्छब्दपर्यायस्य त्यच्छब्दस्य टाबन्तस्याकारान्तः 'स्याः' इति रूपं भवति । एवं सत्ययं सु ष्य इति मन्त्रो 'यदाह' तत्र 'वाक्' देवतेत्थं 'ब्रूते' । कथमिति तदुच्यते—'पुरा गन्धर्वेषु' याऽहं 'सा' 'अवात्सं' स्थितास्मि, 'स्यागमं' सेयमेवागमम्, इदानीमागतास्मीति । अतो वाग्देवताया एव मुच्यमानत्वात् तत्रैवर्चि वाग्विसर्गोऽभियुक्त इत्यर्थः ॥

तृतीयामृचं विधत्ते—"अयमग्निरुरुष्यतीत्ययं वा अग्निरुरुष्यत्यमृतादिव जन्मन इत्यमृतत्वमेवास्मिंस्तद्दधाति" इति । 'अनुब्रूयात्' इति, अनुक्तस्थलेष्वनुवर्तते । एतत्पदप्रसिद्धं 'वै'-शब्देन दर्शयति—अयमिति (सं॰ १०.१७६.४.) ; 'अयं' प्रणीयमानः 'अग्निः' यजमानम् 'उरुष्यति' कर्मनिष्पादनेन रक्षतीत्येतत् प्रसिद्धम् । द्वितीयपादमनूद्य तात्पर्यं दर्शयति—अमृतादिति । 'अमृतात्' मरणरहिताद् देवतारूपात् 'जन्मन' यथा रक्षा सम्पद्यते;

---

* [illegible] वाचं विसृजत [illegible] ।

न हि मरणराहित्यादधिका रक्षा क्वचिदस्ति, तदियमग्निकर्तृका रक्षेत्यर्थः। 'तत्' तेन मन्त्रपाठेन 'अमृतत्वमेव' देवत्वमेव 'अस्मिन्' यजमाने सम्पादयति। द्वितीयार्द्धमनुवदति—"सहसश्चित्सहीयान् देवो जीवातवे कृत इति; देवो ह्येष एतज्जीवातवे कृतो यदग्निः"-इति। 'देवः' अग्निः 'जीवातवे' अस्माकं जीवनौषधाय 'सहसश्चित्' प्रबलादपि पुरुषात् 'सहीयान्' अतिशयेन प्रबलीकृतो निष्पादित इत्युत्तरार्द्धस्यार्थः। तमिममर्थं विस्पष्टयति—देवो ह्येष इति। योऽग्निरस्ति, 'एषः देवः' एतेनोत्तरार्द्धपाठेन जीवनौषधाय सम्पादितो भवति ॥

चतुर्थ्या ऋचः पूर्वार्द्धं पठति—"इळायास्त्वा पदे वयं नाभा पृथिव्या अधीति"-इति (सं० ३.२९.४.)। 'पृथिव्याः नाभा' भूमिस्थानात् प्रागुत्तरवेद्यां नाभिस्थानीये विष्णौ। हे अग्ने! त्वां निधीमहीति वक्ष्यमाणपादेन सम्बन्धः। नाभिमेव विशिनष्टि—'इळायाः पदे' इति। इळाशब्दो गोवाची; इळाख्यां प्रकृत्य 'गौर्वा अस्यै शरीरम्'-इति श्रुतत्वात्। "इळे ऽन्ते सरस्वति" इति वाङ्नामसु श्रुतत्वात्*। तस्याः पदं घृतनिष्पीडनेन प्रशस्तम्; "सा यत्र यत्र न्यक्रामत् ततो घृतमपीड्यत"-इति (तै०सं०२.६.७.१.†) श्रुतेः। तत्पदरूपत्वविशिष्टेयमुत्तरवेदिनाभिः

---

* निघण्टौ पृथिवी वाङ्नामसु गोनामसु आम्नात इडा पदं (१.१.१५; ११.२; २.७. १२; [illegible])। निरुक्ते (८.२.१०.) 'तिस्रो देव्यः'=भारतीडासरस्वत्यः। 'इळा यूथस्य माता' इत्यस्य (ऋ०सं०५.४१.१९.) भाष्ये "'इळा' भूमिः, 'यूथस्य' गोसमूहस्य 'माता' निर्मात्री। यद्वा 'इळा' गोरूपधरा मनोः पुत्रीत्याहुः। यद्वा 'यूथस्य' मरुद्गणस्य निर्मात्री 'इळा' माध्यमिका वाक्"-इत्याह सायणः। मनोः पुत्रीतीतिहासिकविवरणन्तु वाजसनेयितैत्तिरीयसंहिताख्यानमवलोक्य (शत० ब्रा० १.८.१.७—११; तै० सं० २.६.७.१.)।

† 'घृतपदीत्याह यदेवास्यै पदा घृतमपीड्यत, तस्मादेवमाह'-इति च तै० सं० २.

प्रक्षस्यते । यद्वा, सोमक्रयण्या गोः पदपांसुरस्यां नाभौ प्रक्षिप्यत इति तत्पदरूपत्वम्। नाभेः पदरूपत्वं विशदयति—“एतद्वा इळायास्पदं यदुत्तरवेदीनाभिः”-इति । तृतीयं पादमनूद्य व्याचष्टे—“जातवेदो निधीमहीति निधास्यन्तो ह्येनं भवन्ति”-इति । ‘एनम्’ अग्निं वेदिनाभौ ‘निधास्यन्तः’ स्थापयितुमुद्युक्ता भवन्ति ऋत्विजः ; तस्मात् ‘निधीमहि’-‘इति’ उपपन्नम् । चतुर्थपादमनूद्य व्याचष्टे—“अग्ने हव्याय वोळ्हव इति हव्यं हि वक्ष्यन् भवति”-इति । हे ‘अग्ने !’ हविर्वोढुं त्वां निधीमहीति पूर्वेणान्वयः । ‘हव्यं’ ‘वक्ष्यन्’ वोढुमुद्युक्तो भवन् अग्निः ; तस्मात् ‘वोढव इति’ एतदुचितम् ॥

पञ्चम्या ऋचः पूर्वार्द्धं पठति—“अग्ने विश्वेभिः स्वनीक देवैरूर्णावन्तं प्रथमः सीद योनिमिति (सं० ६.१५.१५.) विश्वैरेवैनं तद्देवैः सहासादयति”-इति । ‘स्वनीक’ शोभनसैन्योपेत ! हे ‘अग्ने !’ ‘विश्वेभिः’ सर्वैः ‘देवैः’ सह ‘प्रथमः’ मुख्यः सन् ‘ऊर्णावन्तम्’ ऊर्णायुक्तमुत्तरवेदिनाभिस्थानं ‘सीद’ प्राप्नुहि । [illegible] नोक्तार्थसिद्धिः [illegible] -विश्वैरेवैनं तादात । तृतीयचतुर्थपादौ क्रमेणानूद्य व्याचष्टे—“कुलायिनं घृतवन्तं सवित्र इति कुलायमिव ह्येतद्यज्ञे क्रियते, यत्पैतुदारवाः परिधयो गुग्गुलूर्णास्तुकाः सुगन्धितेजनानीति यज्ञं नय यजमानाय साध्विति यज्ञमेव तदृजुधा प्रतिष्ठापयति”-इति । कुलायो नीड़ः पक्ष्यादिनिवासस्थानसदृशं तत्स्थानीयम्, यज्ञो घृतवान् तं ‘घृतवन्तं’ यज्ञं ‘सवितः’ प्रेरकायानुष्ठात्रे यजमानाय तदुपकारार्थं ‘साधु नय’ सत्यं निष्पा-

---

६.२.४ । ‘यद्वैनाभ्यै [illegible] पदे समतिष्ठत, तस्मादाह घृतपदीति’ -इति शत० ब्रा० १.८.१.२६ । ‘हवींषीळा देवी घृतपदी जुषन्त’ इति च ऋ० सं० १०.७०.८ ; अथ० सं० ७.२७,१ ।

दय । यत् कुलायित्वं तृतीयपादेऽभिहितम्, तत् 'कुलाय मिव' इत्यादिना स्पष्टीक्रियते । पितुदारुः खदिरवृक्ष इत्येके, देवदारुवृक्ष इत्यन्ये; तत्सम्बन्धिनः 'पैतुदारवाः' 'परिधयः' अस्या मुत्तरवेद्यां स्थाप्यन्ते । गुग्गुलु प्रसिद्धं धूपसाधनम् । ऊर्णास्तुकाः अविसम्बन्धिरोमविशेषाः । सुगन्धितेजनं तृणविशेषः; यस्य मूलानि घर्म्मकाले पानीयमध्ये स्थाप्यन्ते । एते उत्तरवेद्यां स्थापिताः सम्भाराः * । यथा कुलायः काष्ठतृणादिभिर्निष्पाद्यते तद्वदत्र यज्ञे परिधिकाष्ठादिसद्भावात् कुलायित्वम् । 'यज्ञं नय०---०इति' चतुर्थपादे यद्यदुक्तम्, तेन यज्ञ मेव 'तत्' 'ऋजुधा' ऋजुप्रकारेण प्रतिष्ठितं करोति ॥

षष्ठ्या ऋचः प्रथमं पादं पठित्वा व्याचष्टे---"सीद होतः स्व उ लोके चिकित्वानित्यग्निर्वै देवानां होता तस्यैष स्वो लोको यदुत्तरवेदीनाभिः" इति (सं० ३, २९, ८,)। हे 'होतः' होमनिष्पादकाग्ने ! 'चिकित्वान्' विज्ञानवान् त्वं 'स्व उ लोके' स्वकीये एव स्थाने, उत्तरवेदिनाभिरूपे 'सीद' उपविश । अग्नेर्देवहोतृत्वात् उत्तरवेदिना[illegible] प्रथमपादार्थः उपपन्नः । द्वितीयं पादं मनूद्य तत्रत्यस्य यज्ञशब्दस्य यजमानपरत्वं दर्शयति---"सादया यज्ञं सुकृतस्य योनाविति यजमानो वै यज्ञो यजमानायैवैता माशिष माशास्ते" इति । 'यज्ञं' यष्टारं 'सुकृतस्य योनौ' पुण्यकर्म्मणां स्थाने 'सादय' हे अग्ने ! स्थापय । इज्यते इति व्युत्पत्त्या यज्ञशब्दः सर्वत्र यागवाची, इह तु यजतीति व्युत्पत्त्या यष्टार माचष्टे; अतस्तदर्थ मेवाशीः प्रार्थिता भवति । उत्तरार्द्धं मनूद्य तत्रत्यस्य नमः-शब्दस्य प्राणवाचित्वं

---

* इमाः पर्याग्निसम्भारास्तैत्तिरीयसंहितायां न साख्यायिकाः समाम्नाताः (६,२,८,)।

दर्शयति—"देवावीर्देवान् हविषा यजास्यग्ने बृहद्यजमाने वयो धा इति; प्राणो वै वयः, प्राण मेव तद्यजमाने दधाति"-इति । देवान् वेति कामयत इति 'देवावीः' देवप्रियः । हे 'अग्ने!' त्वं देवप्रियत्वात् 'देवान् हविषा' 'यजासि' पूजयसि । 'यजमाने' 'वयः' प्राणं 'बृहत्' अधिकं यथा भवति तथा 'धाः' धेहि स्थापय । अत्र 'वयः'-शब्देन प्राण उपलक्ष्यते; बाल्यादिवयोविशेषहेतोरायुषो निमित्तत्वात् । "यावदस्मिन् शरीरे प्राणो वसति, तावदायुः"-इति श्रुतेः * । तस्मादुत्तरार्द्धपाठेन प्राण मेव यजमाने स्थापयतीति ॥

सप्तम्या ऋचः प्रथमपाद मनूद्य व्याचष्टे—"नि होता होतृषदने विदान इति (सं०२.८.१.); अग्निर्वै देवानां होता, तस्यैतद्धोतृषदनं यदुत्तरवेदीनाभिः"-इति । 'होता' होमनिष्पादकः 'अग्निः'; तादृशस्य स्वस्य होतुः सदने योग्यस्थाने उत्तरवेदिनाभिरूपे 'विदानः' क्रियमाणं कर्म्म विचारयन्, असददिति वक्ष्यमाणेनान्वयः । 'अग्निर्वै'-इत्यादिव्याख्यानं विस्पष्टम् । द्वितीयं पाद मनूद्यासददिति पदं व्याचष्टे—"त्वेषो दीदिवाँ असदत् सुदक्ष इत्यासन्नो हि स तर्हि भवति" इति । कीदृशोऽग्निः? 'त्वेषः' स्वयं दीप्यमानः, 'दीदिवान्' अन्येषामपि दीपकः, 'सुदक्षः' सुष्ठु कुशलः । तादृशोऽग्निः 'आसन्नः' वेदिता भवति । 'स तर्हि' तस्मिन् प्रणयनकाले सोऽग्निः, तस्मादुत्तरवेदिनाभेः 'आसन्नः', तस्मात् 'असदत्' इत्युचितम् । तृतीयपाद मनूद्य वसिष्ठशब्दार्थं दर्शयति—"अदब्धव्रतप्रमतिर्वसिष्ठ इत्यग्निर्वै देवानां वसिष्ठः"-इति । अदब्धे हिंसारहिते व्रते कर्म्मणि प्रकृष्टा मतिर्यस्याग्नेः सोऽयम् 'अदब्धव्रतप्रमतिः', 'वसिष्ठः' अतिशयेन निवासहेतुः । हविर्वहनेन देवानां

---

* 'प्राणा हि भूताना मायुः'—इत्यादि तै० आर० ८. ३. ।

स्वस्वस्थाने निवासहेतुत्वाद् अग्नेर्वसिष्ठत्वम् । चतुर्थं पाद मनूद्य व्याचष्टे—"सहस्रम्भरः शुचिजिह्वो अग्निरित्येषा ह वा अस्य सहस्रम्भरता, यदेन मेकं सन्तं बहुधा विहरन्ति"-इति । अयम् 'अग्निः' बहुषु धिष्ण्येषु विहृतः सन्, अनेकस्वरूपभरणात् 'सहस्रम्भरः'। मन्त्रपूतहविःस्वीकारेण 'शुचिजिह्वः'; शुचिः शुद्धा जिह्वा यस्यासौ शुचिजिह्वः। स्वरूपेणैक मेव सन्तं अग्नि मृत्विजो बहुधा विहरन्तीति यदस्ति, एषैवास्य 'सहस्रम्भरता'। वेदनं प्रशंसति—"प्र ह वै साहस्रं पोष माप्नोति य एवं वेद"-इति । अत्र सहस्रसङ्ख्योपेतं 'पोषं' गोसुवर्णादिपुष्टिं वेदिता प्राप्नोति ॥

अष्टमी मृचं विधत्ते—"त्वं दूतस्त्वमु नः परस्पा इत्युत्तमया परिदधाति"-इति (सं० २. ९. २.)। त्वं दूत इत्यनयाऽन्तिमया अग्निप्रणयनीया ऋचः समापयेत् [*]। हे अग्ने ! 'त्वं दूतः' असि "अग्निर्देवानां दूत आसीत्" इतिश्रुतेः [†]। 'त्वम्' एव 'नः' अस्माकं 'परस्पाः' अतिशयेन पालयितासि । अवशिष्टं पादत्रयं पठति—"त्वं वस्य आ वृषभ प्रणेता, अग्ने तोकस्य नस्तने तनूना मप्रयुच्छन् दीद्यद् बोधि गोपा इति"-इति । हे 'वृषभ' श्रेष्ठाग्ने ! 'त्वम्' 'आ' समन्तात् 'वस्यः' निवासहेतुः, 'प्रणेता' बहुषु कर्मसु प्रेरकः, 'नः' अस्माकं 'तोकस्य' अपत्यस्य 'तनूनां' शरीराणां च 'तने' विस्तारे 'अप्रयुच्छन्' प्रमाद मकुर्वन् 'दीद्यत्' प्रकाशयन् 'गोपाः' रक्षकः

---

[*] अपि चात्र 'परिदध्यात्'-इति, एतस्यैव व्याख्यानं समापयेदिति । 'सर्वासामन्तमां परिधानीयेति विज्ञायते'-इति (आश्व० २. १६. ८.) कल्पसूत्रात् ।

[†] तैत्तिरीयब्राह्मणे (३.५.२) प्रयाजानां—इत्याद्या याः सामिधेन्य ऋचः समाम्नाताः ; तत्र 'अग्निं दूतं वृणीमहे' (ऋ० सं० १. १२. १.)-इत्येकादशी ; तस्या एव व्याख्यानपरं ब्राह्मण माम्नातं तैत्तिरीयसंहितायाम् (२.५.८.५.) 'अग्निर्देवानां दूत आसीदुशना काव्योऽसुराणाम्'-इत्यादि ।

सन् 'बोधि' बुध्यस्व, सर्वदा चित्तेऽनुसन्धत्स्वेत्यर्थः। उक्तार्थां ऋचं प्रशंसति—"अग्निर्वै देवानां गोपा, अग्नि मेव तत् सर्वतो गोप्तारं परिदत्त ; आत्मने च यजमानाय च यत्रैवं विद्वानेतया परिदधात्यथो संवत्सरीणा मेवैतां स्वस्तिं कुरुते"-इति। 'यत्र' यस्मिन् कर्मणि 'एवम्' उक्तमन्त्रमहिमानं 'विद्वान्', 'एतया' अन्तिमया समापयति, स होता अग्नेर्देवरक्षकत्व मभिप्रेत्य आत्मार्थं यजमानार्थं चाग्नि मेव 'सर्वतो' रक्षकं 'परिदत्ते' स्वीकरोति। किञ्च 'संवत्सरीणा मेव' अस्मिन् संवत्सरे निरन्तर मेव 'एतां' 'स्वस्ति' क्षेमं कुरुते।

न्यूनाधिकसङ्ख्याभ्रमं व्युदसितुमाह—"ता एता अष्टावन्वाह रूपसमृद्धा एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं, यत्कर्म क्रियमाणमृगभिवदति"-इति। प्रणीयमानस्याग्नेः प्रकाशकत्वादेतासां रूपसमृद्धिः *।

आद्यन्तयोर्ऋचोरावृत्तिं विधत्ते—"तासां त्रिः प्रथमामन्वाह त्रिरुत्तमां, ता द्वादश सम्पद्यन्ते, द्वादश वै मासाः संवत्सरः, संवत्सरः प्रजापतिः, प्राजापत्यायतनाभिरेवाभी राध्नोति य एवं वेद; त्रिः प्रथमां त्रिरुत्तमामन्वाह यज्ञस्यैव तद् बर्सौ नह्यति, स्थेम्ने बलायाविस्रंसाय"-इति। पूर्ववद् व्याख्येयम् (१०६ पृ०) ॥२॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां पञ्चमाध्याये
द्वितीयः खण्डः ॥ २ (२८) ॥

---

* एतासा मष्टाना मृचां पाठक्रमो [illegible] । आश्वलायन २.१७.२—१

यज्ञस्यैव तद् वर्मो नह्यति क्षेम्ने बलायाविस्रंसाय ॥ ३ (२९) ॥

अथ हविर्धानप्रवर्त्तनीया ऋचो विधातु मादौ प्रैषं विधत्ते —"हविर्द्धानाभ्यां प्रोह्यमाणाभ्या मनुब्रूहीत्याहाध्वर्युः" इति। हविः सोमरूपं धत्तो धारयत इति हविर्द्धाने, द्वे शकटे। तयोः स्वरूप मापस्तम्बो दर्शयति—"प्रयुक्तापूर्वे शकटे नद्धयुगे प्रतिहतशम्ये प्रक्षाल्य तयोः प्रथमग्रथितान् ग्रन्थीन् विस्रस्य नवान् प्रग्रातान् कृत्वाग्रेण प्राग्वंश मभितः पृष्ठ्या मध्यवनयन् परिश्रिते सच्छदिषी अवस्थापयति" इति (११. ६. ३.)। तयोर्हविर्धानयोः प्राचीनवंशस्य पुरोभाग मुपक्रम्योत्तरदेशपर्यन्तं नयनं प्रवर्त्तनम्। तदपि स एवाह —"प्राची प्रेत मध्वर मितुरद्गृह्णन्तः प्रवर्त्तयन्ति"-इति (११. ६. ११)। तत्प्रवर्त्तनकाले अध्वर्युः होतारं प्रति "हविर्द्धानाभ्याम्"-इत्यादि प्रैषमन्त्रं प्रब्रूयात् ॥

होता वचनीयाना मृचां मध्ये प्रथमा मृचं विधत्ते—"युजे वां ब्रह्म पूर्व्यं नमोभिरित्यन्वाह (सं० १०. १३. १); ब्रह्मणा वा एते देवा अयुञ्जत यद्धविर्धाने, ब्रह्मणैवैने एतद् युङ्क्ते, न वै ब्रह्मण्वद्रिष्यति"-इति। हे 'हविर्द्धाने!' 'वां' युवां 'ब्रह्मयुजे' ब्रह्मणा युनज्मीत्येवं मन्त्रे यदुक्त मेतत्पाठेन ब्राह्मणमुखेनैव हविर्धाने युक्ते भवतः; पूर्वं देवैस्तथाकृतत्वात्। 'एतद्' उक्तं ब्रह्मण्वत्' ब्राह्मणोपेतं कर्म नैव विनश्यति; तस्माद् युक्तो ऽयं न्त्रः ॥

द्वितीयाद्यास्तिस्र ऋचो विधत्ते—"प्रेतां यज्ञस्य शम्भुवेति ० २.४१.१९—२१.) तृचं द्यावापृथिवीय मन्वाह"-इति।

मध्यमाया मृचि 'द्यावा नः पृथिवी इमम्'-इति श्रूयमाणत्वादयं तृचो द्यावापृथिवीयः। अस्य तृचस्य हविर्धानप्रतिपादकत्वाभावाद् वैय्यधिकरण्य मित्याक्षिप्य समाधत्ते— "तदाहुर्यद्धविर्धानाभ्यां प्रोह्यमाणाभ्या मनु वाचाहाथ कस्मात्तृचं द्यावापृथिवीय मन्वाहेति ? द्यावापृथिवी वै देवानां हविर्धाने आस्तां, ते उ एवाद्यापि हविर्धाने, ते हीद मन्तरेण सर्वं हविर्यदिदं किञ्च ; तस्मात् तृचं द्यावापृथिवीय मन्वाह"-इति। यद्यप्यत्र हविर्धानयोरनुकूलया वाचा प्रैष माह, तथापि द्यावापृथिवीयस्तृचो न व्यधिकरणः; पुरा द्यावापृथिव्योरेव हविर्धानत्वात् 'अद्यापि' द्यावापृथिव्यावेव 'हविर्धाने'। तत्कथ मिति चेत्, उच्यते—यस्माल्लोके यत्किञ्चिद्धविरस्ति, तदिदं सर्वं 'ते अन्तरेण' द्यावापृथिव्योः मध्ये वर्त्तते। 'तस्मात्' द्यावापृथिव्योर्हविर्धानत्वात्, तदीयस्य तृचस्यानुवचनं युक्तम् ॥

पञ्चमी मृचं विधत्ते—"यमे इव यतमाने यदैत मिति (सं० १०.१३.२.) ; यमे इव ह्येते यतमने प्रबाहुगितः"-इति। यमशब्द एकस्या मातुरुदरे सहोत्पन्नस्य शरीरद्वयस्य वाचकम्। 'यमे इव' यथा लोके तादृश्यौ द्वे कन्यके सह वर्तेते, तथेमे शकटे 'यतमाने' जगदुपकारार्थं प्रयत्नं कुर्वती ; यस्मात् कारणात् 'एतम्' आगतवती। 'इति' एतस्य पदस्यार्थः प्रसिद्ध इति 'हि' शब्दो द्योतयति। युगपदुत्पन्नकन्यकाद्वयवदेव 'एते' 'प्रबाहुक्' परस्परसादृश्येन सहैव वर्तमाने 'इतः' प्रचरतः ; तदेतल्लोके प्रसिद्ध मेव दृश्यते। द्वितीयपाद मनूद्य व्याचष्टे—"प्र वां भरन्मानुषा देवयन्त इति देवयन्तो ह्येने मानुषाः प्रभरन्ति"-इति। यच्छब्दस्य पूर्वपादेऽभिहितत्वात् तच्छब्दोऽस्मिन् पादेऽध्याहर्तव्यः। यस्मात् प्राणुप-

कारार्थं प्रयतमाने स्थिते, तत्कालकारणात् 'देवयन्तः' यष्टव्यत्वेन देवानिच्छन्तः 'मानुषाः' ऋत्विग्-यजमानाः, हे हविर्धाने ! 'वां' युवां 'प्रभरन्' प्रकर्षेण सम्पादयन्ति । एतत्पदार्थस्य याज्ञिकप्रसिद्धिद्योतनार्थो 'हि'-शब्दः । द्वितीयार्धं मनूद्य व्याचष्टे—“आसीदतं स्व मु लोकं विदाने, स्वासस्थे भवत मिन्दवे न इति; सोमो वै राजेन्दुः, सोमायैवैने एतद्राज्ञ आसदे ऽचीक्लृपत्”-इति । हे हविर्धाने ! उभे युवां प्रवर्त्तमाने सति 'स्व मु लोकं' स्वकीय मेव स्थानं 'विदाने' ज्ञातवती 'आसीदतं' तत्र स्थितिं प्राप्नुतम् । 'नः' अस्मदीयाय 'इन्दवे' सोमाय 'स्वासस्थे' सु शोभने आसने स्थितिं प्राप्ते 'भवतम्' । अत्रेन्दुशब्देन 'सोमो राजा' उच्यते । अत एव तत्पाठेन सोमराजार्थम् 'आसदे' आसादनायावस्थानाय 'अचीक्लृपत्' कल्पितवान् भवति ॥

षष्ठी मृचं विधत्ते—“अधि द्वयोरदधा उक्थ्यं वच इति (सं०१.८३.३.); द्वयोर्ह्येतत् तृतीयं छदिरधि निधीयत उक्थ्यं वच इति यदाह यज्ञियं वै कर्मोक्थ्यं वचो यज्ञ मेवैतेन समर्धयति”-इति । हविर्धानाख्ययोः शकटयोरुपरि सोमस्यावस्थानाय गृहाकारेण परितो वेष्टन मुपर्याच्छादनं यत् क्रियते, तदेतदाच्छादनं 'छदिः'-शब्दवाच्यम् । तादृशे द्वे छदिषी द्वयोर्हविर्धानयोरवस्थाप्य, तयोश्छदिषो रुपरि तृतीयं छदिः हविर्धानयोरुन्दा[illegible]तयोरवस्थाप्यते । तदेतत् तैत्तिरीया आमनन्ति—“दण्डो वा औपरस्तृतीयस्य हविर्धानस्य वषट्कारेणाक्ष मच्छिनद्यत् तृतीयं छदिर्हविर्धानयोरुदाह्रियते तृतीयस्य हविर्धानस्यावरुद्ध्यै”-इति (सं० ६. २. ९. ४.) । तदेतत् तृतीयच्छदिरवस्थापन मेतदृक्प्रथमपादे प्रस्तूयते—यद् 'द्वयोः' छदिषोः 'अध्यदधाः' उपरि

तृतीयं छदिर्निधीयते ; तदिदम् 'उक्थ्यं वचः' उक्थ्य[illegible] यज्ञियं कर्म्म, तद्योग्यं वचो मन्त्रपाठः। तद्रूप मिदं छदिरिति छदिषः प्रशंसा। अस्मिन् पादे पूर्वभागस्यार्थो याज्ञिकप्रसिद्ध मित्यभिप्रेत्य 'हि'-शब्दयुक्तेन वाक्येन व्याचष्टे—द्वयोरिति। उत्तरभागं व्याचष्टे—उक्थ्यं वच इति। 'उक्थ्यं वचः'-इति यत् पदद्वयं मन्त्रो ब्रूते, तेन पदद्वयेन शस्त्रपाठाख्यं यज्ञसम्बन्धि कर्मोच्यते; तस्मादेतेन मन्त्रपाठेन यज्ञ मेव समृद्धं करोति। द्वितीयतृतीयपादौ पठति—"यतस्रुचा मिथुना या सपर्यतः, असंयत्तो * व्रते ते क्षेति पुष्यतीति ; यदेवादः पूर्वं यत्तवत् † पद माह तदेवैतेन शान्त्या शमयति"-इति। यदा तृतीयं छदिर्निधीयते, तदानीं ये हविर्धाने स्तः, 'ते' उभे, 'यतस्रुचा' नियतस्रुग्युक्ते हुतहोमे हुतसोमे, 'मिथुना' मिथुनवत् परस्परयुक्ते, 'सपर्यतः' पूजिते भवतः। अय मर्थः—द्वयोरुपरि तृतीये छदिषि व्यवस्थापिते सति, विवाहहोमादूर्द्ध्वं परस्परसंयुक्तौ मिथुनरूपौ स्त्रीपुरुषौ यथा पूज्येते, तथा हविर्धाने हविषा पूजिते भवत इति। सम्पूर्वो यतिधातुः सङ्ग्रामे वर्त्तते, तेन शौर्यगुणो लक्ष्यते। संयतः क्रूरः, असंयतः शान्तः। अत्रेन्द्रसम्बोधन मध्याहर्त्तव्यम्। हे इन्द्र! शान्तोऽध्वर्युः 'ते व्रते' त्वदीये कर्म्मणि 'क्षेति' निवसति, 'पुष्यति' तच्च कर्म्म पुष्टं करोति। एतस्य तृतीयपादस्य तात्पर्यं दर्शयति—यदेवाद इति। यत्तवत्पदवाच्यः तृतीयः पादः। अत्र व्रतपदात् 'पूर्वं' 'यदेवादः' यदिदं 'यत्तवत्पदं' यत्तशब्दोपेतं 'अयत्त'-इति

---

*, † मदृष्टेषु सर्वेष्वेव हस्तलिखितमूलपुस्तकेषु टीकापुस्तकेषु च 'असंयत्तः'-इत्येव पाठः ; परं संहितापुस्तकदर्शनात् भाष्याक्षरार्थानुभवाच्च 'असंयतः'-इत्येव पाठो युक्ततरो लभ्यते। 'यत्तवत्', 'यतवत्'-इति पाठभेदश्च एतदनुगतो विचार्य एव।

[illegible], तेन शुक्रवाचिना यत् वीर्यं द्योतितम्, तदेव वीर्यं 'संयतः पुष्यति'-इतिपदद्वयेन प्रतीतया 'शान्त्या' होता 'शमयति'। चतुर्थपाद मनूद्य व्याचष्टे—"भद्रा शक्तिर्यजमानाय सुन्वत इत्याशिष माशास्ते"-इति। 'सुन्वते' सोमाभिषवं कुर्वते यजमानाय 'भद्रा' कल्याणरूपा 'शक्तिः' भवतु इति शेषः। अनेन पादेन प्रार्थनीयं प्रार्थयते॥

सप्तमी मृचं विधत्ते—"विश्वा रूपाणि प्रति मुञ्चते कविरिति (सं ५. ८१. २.) विश्वरूपा मन्वाह"-इति। 'कविः' मेधावी, मन्त्रप्रतिपाद्यो देवः 'सविता', 'विश्वा रूपाणि' शुक्लकृष्णादीनि बहूनि रूपाणि आभरणत्वेन 'प्रतिमुञ्चते' स्वशरीरे स्थापयति। अत्र रूपशब्दस्य विश्वशब्दस्य च विद्यमानत्वादियमृग्विश्वरूपशब्दाभिधेया। तस्या अनुवचने होतुः किञ्चिदितिकर्त्तव्यता माह—"स रराट्या मीक्षमाणोऽनुब्रूयात्; विश्व मिव हि रूपं रराट्याः शुक्ल मिव च कृष्ण मिव च"-इति। हविर्धानमण्डपस्य चिकीर्षितस्य प्राच्यां द्वारि बन्धनीया दर्भमाला 'रराटी'; द्वितीयार्थे सप्तमी; तां दर्भमालां पश्यन् 'अनुब्रूयात्'। अस्या ऋचो रराट्यनुरूपत्वं दर्शयति—विश्व मिवेति। दर्भमालाया अत्यन्तशुष्कास्तृणविशेषाः शुक्ला दृश्यन्ते, अशुष्कास्तु कृष्णाः। अतो 'विश्व मिव' बहुविध मिव दर्भमालायाः स्वरूपम्। तेन "विश्वा रूपाणि"-इत्ययं मन्त्रोऽनुकूलः। होतुरेतद्वेदनं प्रशंसति—"विश्वं रूप मवरुन्ध, आत्मने च यजमानाय च यत्रैवं विद्वानेतां रराट्या मीक्षमाणो ऽन्वाह"-इति। विश्वं रूपं प्रजापश्वादिविविधवस्तुस्वरूपम्॥

अष्टम्या अनुवचनसमाप्तिं विधत्ते—"परि त्वा गिर्वणो गिर

इत्युत्तमया परिदधाति"-इति (सं० १.१०.१२.) । परिधानस्य कालं विधत्ते—"स यदेव हविर्धाने सम्परिश्रिते मन्येताथ परिदध्यादनग्नम्भावुका ह होतुश्च यजमानस्य च भार्या भवन्ति; यत्रैवं विद्वानेतया हविर्धानयोः सम्परिश्रितयोः परिदधाति"-इति । यस्मिन्नेव काले प्रवर्त्तिते द्वे शकटे 'सम्परिश्रिते' स्वस्थानेऽवस्थाप्य सम्यगाच्छादिते इति 'सः' होता 'मन्येत' । 'तत्' तदानीं समापयेत् । होतुरेतद्वेदनं प्रशंसति—अनग्नमिति । 'अनग्नम्भावुकाः' आच्छादनबाहुल्यसम्पत्त्या नग्नत्वरहिताः । 'हविर्धानयोः' परिश्रयणकालं ज्ञात्वा परिदध्यादित्युक्तम् । स कालः कथं ज्ञायत इत्याशङ्क्याह—"यजुषा वा एते सम्परिश्रियेते यद्धविर्धाने, यजुषैवैने एतत्परिश्रयन्ति ; तौ यदैवाध्वर्युश्च प्रतिप्रस्थाता चोभयतो मेथ्यौ निहन्यातामथ परिदध्यादत्र हि ते सम्परिश्रिते भवतः"-इति । 'यद् हविर्धाने' शकटे विद्येते, 'एते' 'यजुषा वै' यजुर्मन्त्रेणैव (तै० सं० १. २. १३. ३.) सम्परिश्रिते भवतः । तदेव कथमिति तदुच्यते— अध्वर्यवः 'एने' हविर्धाने 'यजुषैव परिश्रयन्ति' इत्येतत्प्रसिद्धमिति शेषः । तदेतदापस्तम्बो दर्शयति—"विष्णोः पृष्ठमसीति (तै० सं० ६.२.९.) तेषु मध्यमं छदिरध्यूहति त्र्यरत्निविस्तारं नवायामम्"-इति (११. ८. १.) । परिधानस्य कालं विधत्ते— तौ यदैवेति । 'अध्वर्युः' दक्षिणस्य हविर्धानस्य 'मेथीम्' ईषाग्रभागावस्थापनकाष्ठं स्थापयति । तदेतच्छाखान्तरे श्रूयते—"दिवो वा विष्णवुत वा पृथिव्या इत्याशीर्पदयर्चा (तै० सं० १. २. १३. २.) दक्षिणस्य हविर्धानस्य मेथीं निहन्ति"-इति (तै० सं० ६.२.९.३.) । उत्तरस्य तु 'प्रतिप्रस्थाता' करोति । तदेतदुभयमापस्तम्बो दर्शयति—"दिवो वा विष्ण-

मित्यध्वर्युर्दक्षिणस्य हविर्धानस्य दक्षिणं कर्णातर्दमनु मेथीं* निहन्ति; तस्या मौषां निनह्यति"-इति, "एवमुत्तरस्य प्रतिप्रस्थाता विष्णोर्नुकमित्युत्तरं कर्णातर्दमनु"-इति च (११. ७. ३,४.)। प्रतिप्रस्थाता विष्णोर्नुकमित्युक्त्वा (तै०सं०१.२.१३. ३.) अस्य हविर्धानस्य 'उत्तरं कर्णातर्दम्' अपि तस्मिन् मेथीनिहननकाले परिदध्यादिति। यद्यप्ययं कालः परिश्रयणकालात् प्राचीनः, तथापि तत्समीपवर्त्तित्वात् पूर्वविधिना सह नात्यन्तं विरोध इत्येतद्दर्शयति—अत्र हि ते इति। 'अत्र' मेथीनिहननदेशे तत्समीपवर्त्तिनि काले परिश्रयणं क्रियते॥

ऋक्सङ्ख्यादिकं दर्शयति—"ता एता अष्टावन्वाह रूपसमृद्धा, एतद्वै यज्ञस्य समृद्धं, यद्रूपसमृद्धं, यत्कर्म क्रियमाणमृगभिवदति; तासां त्रिः प्रथमामन्वाह त्रिरुत्तमां; ता द्वादश सम्पद्यन्ते, द्वादश वै मासाः संवत्सरः, संवत्सरः प्रजापतिः, प्रजापत्यायतनाभिरेवाभी राध्नोति य एवं वेद; त्रिः प्रथमां त्रिरुत्तमामन्वाह यज्ञस्यैव तद् बर्सौ नह्यति, स्थेम्ने बलायाविस्रंसाय"-इति। पूर्ववद् व्याख्येयम् (१०६ पृ०)†॥३(२)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां पञ्चमाध्याये
तृतीयः खण्डः॥३(२९)॥

---

* 'कर्णातर्दः कीलम्। तदनु तत्समीपे। मेथी मवष्टम्भनस्तम्भम्'-इति वृत्तिः।

† 'शिरो वा हविर्धानम्'-इत्यादि शत० ब्रा० ३.५,३। तैत्तिरीयकेऽपि तथैव विहितम्(६.२.९—११.)। एतदीयमन्त्रा अपि तत्रैव श्रुताः (१.२.१३.)। 'हविर्धानि प्रवर्त्तयन्ति'-इत्यादि आश्व० श्रौ० ४.९.१—९। 'प्रोक्ष्य बर्हिः'-इत्यादि आप० श्रौ० ११.६—८। 'अग्निं प्रणीय सदोहविर्धानाग्नीध्रहोतृधिष्ण्यान् यथोक्तम्'-इत्यादि च कात्या० श्रौ० ९.१०.१४।

॥ अथ चतुर्थः खण्डः ॥

अग्नीषोमाभ्यां प्रणीयमानाभ्या मनुब्रूहीत्याहाध्वर्युः सावीर्हि देव प्रथमाय पित्र इति सावित्री मन्वाह तदाहुर्यदग्नीषोमाभ्यां प्रणीयमानाभ्या मनु वाचाहाथ कस्मात्सावित्री मन्वाहेति सविता वै प्रसवाना मीशे सवितृप्रसूता एवैनौ तत्प्रणयन्ति तस्मात्सावित्री मन्वाह प्रैतु ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यामन्वाह तदाहुर्यदग्नीषोमाभ्यां प्रणीयमानाभ्या मनु वाचाहाथ कस्माद् ब्राह्मणस्पत्या मन्वाहेति ब्रह्म वै बृहस्पतिर्ब्रह्मैवाभ्या मेतत्पुरोगव मकर्ण वै ब्रह्मण्वद्रिष्यति प्र देव्येतु सूनृतेति ससूनृत मेव तद्यज्ञं करोति तस्माद् ब्राह्मणस्पत्या मन्वाह होता देवो अमर्त्य इति तृच माग्नेयं गायत्र मन्वाह सोमे राजनि प्रणीयमाने सोमं वै राजानं प्रणीयमान मन्तरेणैव सदो हविर्धानान्यसुरा रक्षांस्यजिघांसंस्त मग्निर्माययात्यनयत् पुरस्तादेति मायये ति मायया हि स त मत्यनयत् तस्मादस्याग्निं पुरस्ताद्धरन्त्युप त्वाग्ने दिवे दिव उप प्रियं पनिप्नत मिति तिस्रश्चैकां चान्वाहेश्वरौ ह वा एतौ संयन्तौ यजमानं हिंसितोर्यश्चासौ पूर्व उद्धृतो भवति य

मु चैन मपरं प्रणयन्ति॑ तद्यत्तिस्रश्चैकां चान्वाह॑ सञ्ज्ञानानावेवैनौ तत्सङ्गमयति॑ प्रतिष्ठाया मेवैनौ तत्प्रतिष्ठापयत्या॑त्मनश्च यजमानस्य चाहिंसाया॑ अग्ने जुषस्व प्रति हर्य तद्वच इत्या॑हुत्यां हूयमानाया मन्वाहा॑ग्नय एव तज्जुष्टि माहुतिं गमयति॑ सोमो जिगाति गातुविदिति॑ तृचं सौम्यं॑ गायत्र मन्वाह॑ सोमे राजनि प्रणीयमाने॑ स्वयैवैनं तद्देवतया॑ स्वेनच्छन्दसा समर्द्धयति॑ सोमः सधस्थ मासददित्या॑सत्स्यन् हि स तर्हि भवति॑ तदतिक्रम्यैवानुब्रूयात्पृ॑ष्ठत इवाग्नीध्रं॑ कृत्वा॑ त मस्य राजा वरुणस्त मश्विनेति॑ वैष्णवी मन्वाह॑ क्रतुं सचन्त मारुतस्य वेधसः॑ दाधार दक्ष मुत्तम महर्विदं॑ व्रजं च विष्णुः सखिवाँ अपोर्णुत इति॑ विष्णुर्वै देवानां द्वारपः॑ स एवास्मा एतद् द्वारं विवृणोत्य॑न्तस्य प्रागा अदितिर्भवासीति॑ प्रपाद्यमाने ऽन्वाह॑ श्येनो न योनिं सदनं धिया कृत मित्या॑सन्ने हिरण्यय मासदं देव एषतीति॑ हिरण्मय मिव ह वा॑ एष एतद्देवेभ्यश्छदयति॑ यत्कृष्णाजिनं॑ तस्मादेता मन्वाहा॑स्तभ्नाद् द्या मसुरो विश्ववेदा इति॑ वारुण्या परिदधाति॑ वरुणदेवत्यो वा॑ एष तावद्यावदुपनद्धो॑ याव-

त्वयि श्रितानि प्रपद्यते स्वयैवैनं तद्देवतया स्वेनच्छन्दसा समर्धयति तं यद्युप वा धावेयुरभयं वेच्छेरन्नेवा वन्दस्व वरुणं बृहन्त मित्येतया परिदध्याद्यावद्ध्यो ह्यभय मिच्छति यावद्ध्यो ह्यभयं ध्यायति तावद्भ्यो ह्यभयं भवति यश्चैवं विद्वानेतया परिदधाति तस्मादेवं विद्वानेतयैव परिदध्यात् ता एताः सप्तदशान्वाह रूपसमृद्धा एतद्वै यज्ञस्य समृद्धं यद् रूपसमृद्धं यत्कर्म क्रियमाण मृगभिवदति तासां त्रिः प्रथमा मन्वाह त्रिरुत्तमां ता एकविंशतिः सम्पद्यन्त एकविंशो वै प्रजापतिर्द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंश उत्तमा प्रतिष्ठा तद् दैवं क्षत्रं सा श्रीस्तदाधिपत्यं तद् ब्रध्नस्य विष्टपं तत्प्रजापतेरायतनं तत् स्वाराज्य मश्नोत्येत मेवैताभिरेकविंशत्यैकविंशत्या ॥ ४ (३०) ॥

॥ इत्यैतरेयब्राह्मणे प्रथमपञ्चिकायां पञ्चमोऽध्यायः ॥५॥

अथाग्नीषोमप्रणयनीया ऋचो विधातु मादौ प्रैषमन्त्रं विधत्ते —"अग्नीषोमाभ्यां प्रणीयमानाभ्या मनुब्रूहीत्याहाध्वर्युः" इति । योऽयमग्निः प्राचीनवंशाख्यायाः शालाया मुखे द्वारभागे पूर्वस्मिन्नाहवनीयरूपेणावतिष्ठते, तस्माच्छालामुखीयादग्नेः सकाशात् कियानप्याग्नीध्रे धिष्ण्ये नेतव्यः । सोमश्च पूर्वं शालामुखीयसमीपे

ऽवस्थितः ; तेनाग्निना सहानीतः सन् पुनरपि हविर्धानमण्डपे नेतव्यः ; तदिद मग्नीषोमप्रणयनम् ; तदर्थं होतारं प्रत्यध्वर्युः प्रैषमन्त्रं ब्रूयात् । तदेतत् सर्व मापस्तम्ब आह—"शालामुखीये प्रणयनीय मिध्म मादीप्य सिकताभिरुपयम्याग्नीषोमाभ्यां प्रणीयमानाभ्या मनुब्रूहीति सम्प्रेष्यति"-इति (११.१७.२.), "अग्निप्रथमाः सोमप्रथमा वा प्राञ्चो ऽभिप्रव्रजन्त्याग्नीध्रीये ऽग्निं प्रतिष्ठाप्य"-इति (२. ४.), स च "सोमो जिगाति गातुविदित्यपरया द्वारा * हविर्धानं राजानं प्रपादयति"-इति (८.) च ॥

अग्नीषोमप्रणयनीयास्वृक्षु प्रथमा मृचं विधत्ते—"सावीर्हि देव प्रथमाय पित्र इति सावित्री मन्वाहेति"-इति । सेयं शाखान्तरगतत्वात् सूत्रकारेण पठिता † (आश्व०श्रौ०४.१०.१.) । तस्यास्तृतीयपादे 'अस्मभ्यं सवितः'-इतिश्रुतत्वादियं सावित्री । अत्र वैयधिकरण्य माशङ्क्य समाधत्ते—"तदाहुर्यदग्नीषोमाभ्यां प्रणीयमानाभ्या मनु वाचाहाथ कस्मात्सावित्री मन्वाहेति ? सविता वै प्रसवाना मीशे सवितृप्रसूता एवैनौ तत्प्रणयन्ति ; तस्मात्सावित्री मन्वाह"-इति । पूर्ववद् (१२० पृ०) व्याख्येयम् ॥

द्वितीयां विधत्ते—"प्रैतु ब्रह्मणस्पतिरिति ब्राह्मणस्पत्या मन्वाह"-इति (सं० १.४०.३.) । अत्रापि वैयधिकरण्य माशङ्क्य समाधत्ते—"तदाहुर्यदग्नीषोमाभ्यां प्रणीयमानाभ्या मनु वाचाहाथ कस्माद् ब्राह्मणस्पत्या मन्वाहेति ? ब्रह्म वै बृहस्पतिर्ब्रह्मैवाभ्या मेतत्पुरोगव मकर्ण वै ब्रह्मण्वद्रिष्यति"-इति । 'पुरोगवं'

---

* 'उभयतोद्वारं हविर्धानं भवति'-इति शत० ब्रा० ३. ५. ३. ७ ।

† तद्यथा—"सावीर्हि देव प्रथमाय पित्रे वर्ष्माण मस्मै वरिमाण मस्मै ।
अथास्मभ्यं सवितः सर्वताता दिवे दिव आसुव भूरिपश्वः"-इति ।

ब्राह्मण मेव पुरोगन्तारम् 'अकः' करोति। ब्राह्मणोपेतस्य कर्मणो विनाशाभावात्तद् युक्तम्। द्वितीयपाद मुपजीव्य* ता मृचं प्रशंसति —'प्र देव्येतु सूनृतेति स-सूनृत मेव तद्यज्ञं करोति ; तस्माद् ब्राह्मणस्पत्या मन्वाह'-इति। 'सूनृता' प्रियवचनरूपा वाग् देवी 'प्रैतु' ब्रह्मणा सह पुरो गच्छतु, 'इति' द्वितीयपादे श्रूयते ; तत्पाठेन 'यज्ञं' 'स-सूनृत मेव' प्रियवचनयुक्त मेव 'करोति' ॥

तृतीयाद्यास्तिस्र ऋचो विधत्ते—"होता देवो अमर्त्य इति (सं० ३. २७. ७.) तृच माग्नेयं गायत्र मन्वाह"-इति। जुहोत्यस्मिन्नग्नाविति 'होता' अग्निः। अतो होतृशब्दश्रवणादिद माग्नेयम्। आग्नेयस्य सोमप्रणयनानुकूल्यं दर्शयति—"सोमे राजनि प्रणीयमाने सोमं वै राजानं प्रणीयमान मन्तरेणैव सदोहविर्धानान्यसुरा रक्षांस्यजिघांसंस्त मग्निर्माययात्यनयत्"-इति। यदिदं सदोनामकं मण्डपं, शकटद्वयं च, तानि 'अन्तरेण' तेषां मध्ये 'असुराः' च 'रक्षांसि' च नीयमानं 'सोमं' हन्तु मैच्छन्। 'तं' भीतं सोमम् 'अग्निः' स्वकीयया 'मायया' तानसुरान्, तानि रक्षांसि च अतिक्रम्य नीतवान्। तस्मात् सोमप्रणयनेऽप्याग्नेयस्य योग्यत्व मस्ति। असुराणां रक्षसां चावान्तरजातिभेदो द्रष्टव्यः। प्रथमायाः† ऋचो द्वितीय पाद मनूद्य व्याचष्टे—"पुरस्तादेति माययेति ; मायया हि स त मत्यनयत् ; तस्मादस्याग्निं पुरस्ताद्धरन्ति"-इति। मायया सहितोऽग्निः पुरस्ताद्गच्छतीति द्वितीयपादे श्रूयते। यस्मात् 'सः' अग्निः 'मायया' शक्त्या भीतिस्थानम् अतिलङ्घ्य 'तं' सोमम् 'अनयत्', 'तस्माद् उ' तस्मादेव कारणात्

---

* 'मनुजीव्य' ख।

† यदुक्तं 'तृतीयाद्यास्तिस्र ऋचः'-इति (७ पं०) तत्र या प्रथमा, तस्या इति भावः।

‘अस्य’ सोमस्य ‘पुरस्तात्’ आग्नीध्रपर्यन्तम् ‘अग्निम्’ ऋत्विजो ‘हरन्ति’ ॥

षष्ठी मारभ्य चतस्र ऋचो विधत्ते—“उप त्वाग्ने दिवे दिव उप प्रियं पनिप्नत मिति तिस्रश्चैकां चान्वाह”-इति । “उप त्वाग्ने” इत्यादिकाः क्रमेणाम्नातास्तिस्रः (सं० १. १. ७–९.), “उप प्रियम्”-इत्येका (सं० ९.६७.२९.) । उक्तस्य तृचस्य, उक्तायाश्चैकस्याः, अनुवचन मुपपादयति —“ईश्वरौ ह वा एतौ संयन्तौ यजमानं हिंसितोर्यश्चासौ पूर्व उद्धृतो भवति, य मु चैन मपरं प्रणयन्ति ; तद्यत्तिस्रश्चैकां चान्वाह सञ्ज्ञानानावेवैनौ तत्सङ्गमयति ; प्रतिष्ठाया मेवैनौ तत्प्रतिष्ठापयत्यात्मनश्च यजमानस्य चाहिंसायै”-इति । ‘यश्चासौ’ अग्निः ‘पूर्व उद्धृतः’ पूर्वभावी सन्, उत्तरवेद्या मानीय स्थापितः, ‘य मु’ य मपि ‘अपरम्’ अग्नि मिदानी माग्नीध्रधिष्ण्यं प्रति ‘प्रणयन्ति’ ; ‘एतौ’ उभावग्नी ‘संयन्तौ’ ममैवाहुतिरित्येवं सङ्ग्रामं कुर्वन्तौ ‘यजमानं हिंसितोः ईश्वरौ’ हिंसितुं समर्थौ । तथा सति, यदि ‘तिस्रश्चैकां’ चानुब्रूयात्, तदानीम् एतौ द्वावप्यग्नी ‘सञ्ज्ञानानौ एव’ परस्परैकमत्ययुक्ताविव कृत्वा ‘सङ्गमयति’ अन्योन्यं संयोजयति । तिसृष्वृक्षु ‘नमो भरन्त एमसि’ इति पूर्वोद्धृतस्याग्नेर्नमस्कारः श्रूयते ; एकस्या मृचि ‘अगन्म बिभ्रतो नमः’ इति प्रणीयमानस्याग्नेर्नमस्कारः श्रुतः । तेन तुष्टौ परस्परं द्वेषं परित्यज्यतः । ‘तत्’ तथासत्येतावुभावग्नी ‘प्रतिष्ठाया मेव’ उत्तरवेद्या मग्नीध्रलक्षणस्वस्वोचितस्थाने एव ‘प्रतिष्ठापयति’ ; तच्च होतुः ‘आत्मनश्च’ ‘यजमानस्य च’ हिंसापरिहाराय भवति ॥

दशमी मृचं विधत्ते—“अग्ने जुषस्व प्रति हर्य तद्वच इति

(सं० १. १४४. ७.) आहुत्यां हूयमानाया मन्वाहाग्निमेव तज्जुष्टि माहुतिं गमयति”-इति। आहुतिस्तु यजुर्वेदविहिता—“नयवत्यर्चाग्नीध्रे जुहोति*, सुवर्गस्य लोकस्याभिजित्यै”-इति (तै०सं०६.६.१.१.)”-इति। सा चापस्तम्बेन स्पष्टीकृता—“आग्नीध्रीयेऽग्निं प्रतिष्ठाप्याग्ने नयेत्यर्द्ध माज्यशेषस्य जुहोति”-इति (११.१७.४.)। तदाहुतिकाले होता ‘अग्ने जुषस्व’-इत्येता मनुब्रूयात्। ता मेतां प्रशंसति—अन्वय इति। ‘जुषस्व’-इति मन्त्रे अभिधानाद् ‘आहुतिम्’ अग्नेः प्रियं सम्पादयति॥

एकादशी मारभ्य तिस्र ऋचो विधत्ते—“सोमो जिगाति गातुविदिति (सं०३.६२.२—५.)। तृचं सौम्यं गायत्र मन्वाह, सोमे राजनि प्रणीयमाने स्वयैवैनं तद्देवतया स्वेनच्छन्दसा समर्द्धयति”-इति मन्त्रे सोमदेवताया एव प्रतिपाद्यत्वात् सोमात्मकस्येयं स्वकीयदेवता; गायत्र्या सोमस्य द्युलोकादाहृतत्वात्† छन्दोऽपि स्वकीयम्। अस्य तृचस्यान्तिमं पाद मादाय व्याचष्टे—“सोमः सधस्थ मासददित्यासत्स्यन् हि स तर्हि भवति”-इति। अयं ‘सोमः’ ‘सधस्थं’ हविर्धानाभ्यां सहावस्थानप्रदेशं प्राप्य ‘आसदत्’ आसन्नोऽभूत्। यस्मात् ‘सः’ सोमः ‘तर्हि’ तत्पाठकाले ‘आसत्स्यन् भवति’ हविर्धानदेशस्यासन्नतां करिष्यन्वर्त्तते, तस्मात् सधस्थ मासददिति युक्तम्। अस्य तृचस्यानुवचनदेशं विधत्ते—“सदतिक्रम्यैवानुब्रूयात् पृष्ठत इवाग्नीध्रं कृत्वा”-इति। पूर्वोक्ताया माहुत्या मध्वर्युणा हूयमानायां होता तृच मुपक्रम्यानुब्रुवाणो

---

* ‘अग्ने नय सुपथेति नयवती’–इति तत्र सायणः। सा च ऋक् ऋ० सं० १. ८९. १; तै० सं० १. ४. ४३. १; वा० सं० ५. ३६; ७. ४३; ४०. १६।

† ‘तृतीयस्या मितो दिवि सोम आसीत्, तं गायत्र्याहरत्’–इति तै० ब्रा० १.२.१.१।

गच्छन् 'तत्' आग्नीध्रस्थानम् 'अतिक्रम्येव' 'आग्नीध्रं पृष्ठतः इव कृत्वा' तं पादम् 'अनुब्रूयात्'। अतिक्रम्येत्यस्यैव पृष्ठतः कृत्वेति व्याख्यानम् ॥

चतुर्दशीमृचं विधत्ते—"तमस्य राजा वरुणस्तमश्विनेति (सं० १. १५६. ४.) वैष्णवीमन्वाह"-इति। 'व्रजं च विष्णुः'-इति चतुर्थपादे श्रुतत्वात्। अवशिष्टं पादत्रयं पठति *—"क्रतुं सचन्त मारुतस्य वेधसः, दाधार दक्ष मुत्तम महर्विदं, व्रजं च विष्णुः सखिवाँ अपोर्णुत इति"-इति। अस्या ऋचोऽयमर्थः—'अस्य' सोमस्य उपनह्यस्य 'राजा' स्वामी 'वरुणः', 'तम्' 'क्रतुं' यागं 'सचत'—इत्यध्याहारः। 'अश्विना' उभावश्विनौ देवौ, 'मारुतः' वायुः, 'वेधाः' ब्रह्मा च 'क्रतुं' 'सचन्त' समवयन्ति। "मारुतस्य वेधसः"-इति प्रथमार्थे षष्ठी। 'विष्णुः' देवो 'दक्षं' देवानां मध्ये कुशलम्, अतएव 'उत्तमम् अहर्विदं' सुत्यादिनाभिज्ञं सोमं 'दाधार' प्रणयनकाले धृतवान्। तथा 'विष्णुः' 'सखिवान्' सोमरूपेण सख्या युक्ततया तद्वान्, 'व्रजं' सोमस्थानं हविर्धानम् 'अपोर्णुते' अपगताच्छादनं करोति। सोमस्य प्रवेशाय द्वारं विवृणोतीत्यर्थः। विष्णुः दाधार 'अपोर्णुते' चेति। समुच्चयार्थश्चकारः। उक्तमन्त्रतात्पर्यं विस्पष्टयति—"विष्णुर्वै देवानां द्वारपः; स एवास्मा एतद् द्वारं विवृणोति"-इति ॥

पञ्चदशी मृचं विधत्ते—"अन्तश्च प्रागा अदितिर्भवासीति (सं० ८. ४८. २.) प्रपाद्यमानेऽन्वाह"-इति। सोमे हविर्धानं प्राप्यमाणे सति एता मृच मनुब्रूयात् ॥

---

* अन्यत्र संहितायां न श्रुतेति समग्रैवेह पठिता। एवं सर्वत्र।

षोडशीमृचं विधत्ते—"श्येनो न योनिं सदनं धिया कृत मित्यासन्ने"-इति (सं० ९. ७१. ६.)। 'आसन्ने' हविर्धान प्रति सोमे समीपवर्त्तिनि सति एता मृच मनुब्रूयात्। 'न'कार उपमार्थः। यथा 'श्येनः' पक्षी, तत्र तत्र सञ्चारं कृत्वा 'योनिं' स्वस्थानं प्राप्नोति, तथा 'धिया' यजमानर्त्विग्-बुद्ध्या 'कृतं' सम्पादितं हविर्धानं प्रति सोमः 'एषति'-इति वक्ष्यमाणेन सम्बन्धः। द्वितीयं पाद मनुवदति—"हिरण्यय मासदं देव एषतीति"-इति। 'हिरण्ययं' सुवर्णसदृशं कृष्णाजिनम् 'आसदम्' उपवेशनयोग्यम्, सोमो 'देवः' 'एषति' प्राप्नोति। 'इष गतौ'-इति धातुः*। हिरण्ययशब्दं व्याचष्टे—"हिरण्मय मिव ह वा एष एतद् देवेभ्यश्छदयति यत् कृष्णाजिनम्"-इति। हविर्धानस्य शकटस्योपरि सोमस्थापनार्थं कृष्णाजिन मास्तृणन्ति। तथाच आपस्तम्ब आह—"दक्षिणस्य हविर्धानस्य नीडे पूर्ववत् कृष्णाजिनास्तरणं राज्ञश्चासादनम्"-इति (११.१७.१०.)। 'यदेतत् कृष्णाजिनम्' अस्ति, तत् 'हिरण्मय मिव ह वै' सुवर्णनिर्मितासन मिव 'देवेभ्यः' देवार्थम् 'एषः' अध्वर्युः 'छदयति' आस्तृणाति। तस्मान्मन्त्रे 'हिरण्यय मित्युपपन्नम्। एतन्मन्त्रविधि मुपसंहरति—"तस्मादेता मन्वाह"-इति। यस्मादासन्नदेशस्यानुकूलेय मृक्, तस्मात् 'एताम्' ऋचम् अनुब्रूयात् ॥

सप्तदश्या समापनं विधत्ते—"अस्तभ्नाद् द्या मसुरो विश्ववेदा इति (सं० ८.४२.१.) वारुण्या परिदधाति"-इति। चतुर्थपादे 'वरुणस्य व्रतानि'-इतिश्रवणादियं वारुणी। तस्याः सोमसम्बन्धं दर्शयति—"वरुणदेवत्यो वा एष तावद्यावदुपनद्धो याव-

---

* दिवादिः (२१)। छन्दसि विकरणव्यत्ययः (पा० ३. १. ८५.)।

त्यरिष्वितानि प्रपद्यते ; स्वयैवैनं तद् देवतया स्वेनच्छन्दसा समर्धयति"-इति । पूर्ववद् (१०५ पृ०) व्याख्येयम् ॥

अथात्र नैमित्तिकं ऋगन्तरं विधत्ते—"तं यद्युप वा धावेयुरभयं वेच्छेरन्नेवा वन्दस्व वरुणं बृहन्त मित्येतया परिदध्याद्"-इति । 'तं' यजमान मितरे बन्धवो जीवनार्थिनो 'यदि उप वा धावेयुः' प्राप्नुयुः ; अथवा वैरिभ्यो भीताः 'अभयं' यजमानसमीपे यदि 'इच्छेरन्' तदानीम् "एवा वन्दस्व"-इति (सं० ८.४२.२.) 'एतया परिदध्याद्' । होतुरेतद्वेदनप्रशंसापूर्वक मेतद्विधि मुपसंहरति—"यावद्भ्यो ह्यभय मिच्छति, यावद्भ्यो ह्यभयं ध्यायति ; तावद्भ्यो ह्यभयं भवति, यत्रैवं विद्वानेतया परिदधाति ; तस्मादेवं विद्वानेतयैव परिदध्यात्"-इति । 'यत्र' यागे यथोक्तार्थं 'विद्वान्' होता 'एतया' परिदध्यात्, तत्र यजमानो 'यावद्भ्यः' बन्धुभ्यो क्षुद्रोगपरिहाररूपम् 'अभय मिच्छति', अथवा वैरिभीतिपरिहाररूपम् 'अभयं ध्यायति', 'तावद्भ्यः' सर्वेभ्यः, तादृशम् 'अभयं भवति' । 'तस्माद्' "एवा वन्दस्व"-इत्यनयैव 'परिदध्यात्' ॥

मन्त्रसङ्ख्यादि दर्शयति—"ता एताः सप्तदशान्वाह रूपसमृद्धाः; एतद्वै यज्ञस्य समृद्धं, यद्रूपसमृद्धं; यत्कर्म क्रियमाण मृगभिवदति; तासां त्रिः प्रथमा मन्वाह, त्रिरुत्तमां, ता एकविंशतिः सम्पद्यन्ते; एकविंशो वै प्रजापतिर्द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः"-इति । उक्तसङ्ख्याप्रशंसार्थ मेकविंशतिसङ्ख्यापूरणे आदित्ये बहून् गुणान् दर्शयति—"उत्तमा प्रतिष्ठा, तद् दैवं क्षत्रं, सा श्री, स्तदाधिपत्यं, तद् ब्रध्नस्य विष्टपं, तत्प्रजापतेरायतनं तत् स्वाराज्यम्"-इति । योय मादित्यः, असौ 'उत्तमा प्रतिष्ठा'; तल्लोकानां सर्वेषामवस्थानात् । 'तद्' आदित्यस्वरूप मेव

दैवं क्षत्र" दैवसम्बन्धिनी क्षत्रजातिः; "आदित्यो वै दैवं क्षत्रम्" -इत्यन्यत्राभिधानात् (७. ४. २.)। 'सा श्रीः' आदित्यप्राप्तिरेव भोग्यवस्तुसम्पत्तिः। 'तद्' आदित्यमण्डलम् 'आधिपत्यं' स्वामित्वप्रापकम्; "आदित्य एषां भूतानामधिपतिः"-इतिश्रवणात्। 'तद्' मण्डलं 'ब्रध्नस्य' आदित्यस्य 'विष्टपं' स्थानभूतम्। 'तत्' एव मण्डलं 'प्रजापतेः' अपि 'आयतनं' स्थानम्; आदित्यमण्डले प्रजापत्युपासनस्याभिधानात्। 'तत्' एव मण्डलं 'स्वाराज्यम्' पारतन्त्राभावात्॥

उपसंहरति— "ऋग्भिरेत मेवैताभिरेकविंशत्यैकविंशत्या"-इति। एकविंशतिसङ्ख्याभिः 'एताभिः' ऋग्भिः 'एतं' यजमानं समृद्धं करोति 'एव' *॥ अभ्यासोऽध्यायसमाप्त्यर्थः॥ ४॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां पञ्चमाध्याये
चतुर्थः खण्डः॥ ४ (३०)॥

---

* 'अग्नीषोमौ प्रणयन्त्'-इत्यादीनीह कल्पसूत्राणि (आश्व०४.१०.१—१३.)। 'आग्नेयः'-इत्युपक्रम्य 'अग्नीषोमाभ्यां प्रणीयमानाभ्यामनुब्रूहीति सम्प्रेष्यति'-इत्यादीनि आपस्तम्बसूत्राणि (११.१७.१—१०.)। तैत्तिरीयसंहितायां तन्मन्त्राणि (१.३.४; ६.३.२.)। कात्यायनेन तु 'अग्नये प्रक्रियमाणायानुवाचयति। सोमाय प्रणीयमानाय वा'-इति विकल्प उक्तम् (८. ७. ३, ४)। 'प्रैषं ब्रूयात्, उभयोर्विकल्पेन श्रवणात्। शाखान्तरे त्वग्नीषोमाभ्यां प्रणीयमानाभ्यामित्यर्थविधः प्रैष उक्तोऽस्ति'-इति च तत्र टीका (या० दे०)। तच्च श्रवणमनुभूयते शतपथे—'अथाहाग्नये प्रक्रियमाणायानुब्रूहि, सोमाय प्रणीयमानायेति वाग्नये प्रक्रियमाणायानुब्रूहीति त्वेव ब्रूयात्'-इति (३. ९. ६. ९.)॥

त्यरिश्रितानि प्रपद्यते ; स्वयैवैनं तद् देवतया स्वेनच्छन्दसा समर्धयति"-इति । पूर्ववद् (१०५ पृ०) व्याख्येयम् ॥

अथात्र नैमित्तिक ऋगन्तरं विधत्ते---"तं यद्युप वा धावेयुरभयं वेच्छेरन्नेवा वन्दस्व वरुणं बृहन्त मित्येतया परिदध्याद्"-इति । 'तं' यजमान मितरे बन्धवो जीवनार्थिनो 'यदि उप वा धावेयुः' प्राप्नुयुः ; अथवा वैरिभ्यो भीताः 'अभयं' यजमानसमीपे यदि 'इच्छेरन्' तदानीम् "एवा वन्दस्व"-इति (सं० ८.४२.२.) 'एतया परिदध्याद्' । होतुरेतद्वेदनप्रशंसापूर्वक मेतद्विधि मुपसंहरति---"यावद्भ्यो ह्यभय मिच्छति, यावद्भ्यो ह्यभयं ध्यायति ; तावद्भ्यो ह्यभयं भवति, यत्रैवं विद्वानेतया परिदधाति ; तस्मादेवं विद्वानेतयैव परिदध्यात्"-इति । 'यत्र' यागे यथोक्तार्थं 'विद्वान्' होता 'एतया' परिदध्यात्, तत्र यजमानो 'यावद्भ्यः' बन्धुभ्यो क्षुद्रोगपरिहाररूपम् 'अभय मिच्छति', अथवा वैरिभीतिपरिहाररूपम् 'अभयं ध्यायति', 'तावद्भ्यः' सर्वेभ्यः, तादृशम् 'अभयं भवति' । 'तस्माद्' "एवा वन्दस्व"-इत्यनयैव 'परिदध्यात्' ॥

मन्त्रसङ्ख्यादि दर्शयति---"ता एताः सप्तदशान्वाह रूपसमृद्धाः; एतद्वै यज्ञस्य समृद्धं, यद्रूपसमृद्धं; यत्कर्म क्रियमाणमृगभिवदति; तासां त्रिः प्रथमा मन्वाह, त्रिरुत्तमां, ता एकविंशतिः सम्पद्यन्ते; एकविंशो वै प्रजापतिर्द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः"-इति । उक्तसङ्ख्याप्रशंसार्थ मेकविंशतिसङ्ख्यापूरणे आदित्ये बहून् गुणान् दर्शयति---"उत्तमा प्रतिष्ठा, तद् दैवं क्षत्रं, सा श्री, तदाधिपत्यं, तद् ब्रध्नस्य विष्टपं, तत्प्रजापतेरायतनं तत् स्वाराज्यम्"-इति । योय मादित्यः, असौ 'उत्तमा प्रतिष्ठा'; तल्लोकानां स्थैर्येणावस्थानात् । 'तद्' आदित्यस्वरूप मेव

देवं क्षत्रं" देवसम्बन्धिनी क्षत्रजातिः; "आदित्यो वै देवं क्षत्रम्"-इत्यन्यत्राभिधानात् (७. ४. २.)। 'सा श्रीः' आदित्यप्राप्तिरेव भोग्यवस्तुसम्पत्तिः। 'तद्' आदित्यमण्डलम् 'आधिपत्यं' स्वामित्वप्रापकम्; "आदित्य एषां भूताना मधिपतिः"-इतिश्रवणात्। 'तद्' मण्डलं 'ब्रध्नस्य' आदित्यस्य 'विष्टपं' स्थानभूतम्। 'तत्' एव मण्डलं 'प्रजापतेः' अपि 'आयतनं' स्थानम्; आदित्यमण्डले प्रजापत्युपासनस्याभिधानात्। 'तत्' एव मण्डलं 'स्वाराज्यम्' पारतन्त्र्याभावात्॥

उपसंहरति— "ऋध्नोतित मेवैताभिरेकविंशत्यैकविंशत्या"-इति। एकविंशतिसङ्ख्याभिः 'एताभिः' ऋग्भिः 'एनं' यजमानं समृद्धं करोति 'एव' * ॥ अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां पञ्चमाध्याये
चतुर्थः खण्डः ॥ ४ (२०) ॥

---

* 'अग्नीषोमौ प्रणयत'–इत्यादीनीह कल्पसूत्राणि (आश्व०४.१०.१–१३.); 'आ गात्राः'-इत्युपक्रम्य 'अग्नीषोमाभ्यां प्रणीयमानाभ्यामनुब्रूहि। अग्नीषोमौ प्रणय' इत्यादीनि चापस्तम्बसूत्राणि (११.१७.१—१०.)। तैत्तिरीयसंहितायां तन्मूलानि (१.३.४ ; ६.३.२.)। कात्यायनेन तु 'अग्नये प्रक्रियमाणायानुवाच्यति। सोमाय प्रणीयमानाय वा'- इति विकल्पमुक्तम् (८. ७. ३, ४.)। 'प्रैषं ब्रूयात्, उभयोर्विकल्पेन श्रवणात्। शाखान्तरे त्वग्नीषोमाभ्यां प्रणीयमानाभ्यामिति मिलितविधिः प्रैष उक्तोऽस्ति'-इति च तत्र टीका (भा० ३०)। तच्च वचनमनुभूयते शतपथे--'अथाहाग्नये प्रक्रियमाणायानुब्रूहि, सोमाय प्रणीयमानायेति वाग्नये प्रणीयमानायानुब्रूहीति त्वेव ब्रूयात्'-इति (३. २. ६. ९.)॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायाः पञ्चमोऽध्यायः ॥

अग्निर्वै षट्(१) । स्वर्गं वै पञ्च(२) । प्राच्यां वै षट्(३) । यज्ञो वै नव(४) । सोमो वै चत्वारि(५) ॥१*॥

अग्निर्वै, प्रयाजवद्, गणानां त्वा, दश ॥१†॥

॥ इति प्रथमपञ्चिका समाप्ता ॥

---

* 'अग्निर्वै'–इत्यादीनि पञ्चाना मध्यायानां प्रतीकज्ञापनपूर्वक-खण्डसङ्ख्याबोधकानि वाक्यानि । तदेतत् खण्डसङ्ख्यानम् अध्यायेषु खण्डानां निक्षेपप्रक्षेपनिबन्धनन्यूनाधिक्यवारणाय पूर्वाचार्यैः प्रोक्त मधीयते चाद्यापि स्वाध्यायवत् । अथैकदेशार्थः खण्डशब्दः पुन्नपुंसकलिङ्ग इति (अम०को०१.३.१६.) 'प्रथमः खण्डः', 'द्वितीयः खण्डः'–इत्यादिप्रयोगाः, 'चत्वारि' खण्डानि इत्येवमादयः प्रयोगाश्च, निरवद्या एवेति व्यक्त मेव ।

† एतच्च खण्डदशकसङ्ख्यानं वाक्यम् । 'अग्निर्वै'–इत्यादीनि दशकप्रतीकानि, खण्डानां प्रक्षेपनिक्षेपदोषतो रक्षणाय कोषाना मुपरि कोषरूपाणीति भ्रम् ॥

॥ ऐतरेयब्राह्मणम् ॥

॥ अथ द्वितीयपञ्चिका ॥

(तत्र)

॥ प्रथमाध्यायस्य प्रथमः खण्डः ॥

॥ ॐ ॥ यज्ञेन वै देवा ऊर्ध्वाः स्वर्गं लोक मायंस्ते ऽबिभयुरिमन्नो दृष्ट्वा मनुष्याश्च ऋषयश्चानुप्रज्ञास्यन्तीति तं वै यूपेनैवायोपयंस्तं यद्यूपेनैवायोपयंस्तद्यूपस्य यूपत्वं त मवाचीनाग्रं निमित्योर्ध्वा उदायंस्ततो वै मनुष्याश्च ऋषयश्च देवानां यज्ञवास्त्वभ्यायन् यज्ञस्य किञ्चिदेषिष्यामः* प्रज्ञात्या इति ते वै यूप मेवाविन्दन्नवाचीनाग्रं निमितं ते विदुरनेन वै देवा यज्ञ मयूयुपन्निति त मुत्खायोर्ध्वं न्यमिन्वंस्ततो वै ते प्र यज्ञ मजानन् प्र स्वर्गं लोकं तद्यद्यूप ऊर्ध्वो निमीयते यज्ञस्य प्रज्ञात्यै स्वर्गस्य लोकस्यानुख्यात्यै वज्रो वा एष यद्यूपः सोऽष्टाश्रिः

---

* 'किञ्चिदेशिष्यामः' ङ, टी० घ।

कर्त्तव्यो ऽष्टाश्रिर्वै वज्रस्तं तं प्रहरति द्विषते भ्रातृव्याय वधं यो ऽस्य स्तृत्यस्तस्मै स्तर्तवै वज्रो वै यूपः स एष द्विषतो वध उद्यतस्तिष्ठति तस्माद्धाप्येतर्हि यो द्वेष्टि तस्याप्रियं भवत्यमुष्यायं यूपो ऽमुष्यायं यूप इति दृष्ट्वा खादिरं यूपं कुर्वीत स्वर्गकामः खादिरेणैव वै यूपेन देवाः स्वर्गं लोकमजयंस्तथैवैतद्यजमानः खादिरेण यूपेन स्वर्गं लोकं जयति बैल्वं यूपं कुर्वीतान्नाद्यकामः पुष्टिकामः समां समां वै बिल्वो गृभीतस्तदन्नाद्यस्य रूपमामूलाच्छाखाभिरनुचितस्तत्पुष्टेः पुष्यति प्रजां च पशूंश्च[*] य एवं विद्वान् बैल्वं यूपं कुरुते यदेव बैल्वां३[†] बिल्वं ज्योतिरिति वा आचक्षते ज्योतिः स्वेषु भवति श्रेष्ठः स्वानां भवति य एवं वेद पालाशं यूपं कुर्वीत तेजस्कामो ब्रह्मवर्चसकामस्तेजो वै ब्रह्मवर्चसं वनस्पतीनां पलाशस्तेजस्वी ब्रह्मवर्चसी भवति य एवं विद्वान् पालाशं यूपं कुरुते यदेव पालाशां३[‡] सर्वेषां वा एष वनस्पतीनां योनिर्यत्पलाशस्तस्मात्पलाशस्यैव पलाशेनाचक्षते ऽमुष्य पलाशममुष्य पलाशमिति सर्वेषां हास्य वनस्पतीनां काम उपाप्तो भवति य एवं वेद ॥ १ ॥

---

[*] 'पशूँश्च' क, घ।

[†], [‡] 'बैल्वाँ३', 'पालाशाँ३' क।

राजक्रयब्राह्मणमुक्तमादौ, वह्नेः प्रणीतिप्रतिपादिकाश्च ।
तथा हविर्धानविवर्त्तनार्था, अग्नेश्च सोमस्य च या ऋचः स्युः * ॥

अथ षष्ठाध्याये ऽग्नीषोमीयपशुर्वक्तव्यः । तत्रादौ यूपं वक्तुमाख्यायिकामाह—"यज्ञेन वै देवा ऊर्ध्वाः स्वर्गं लोकमायंस्तेऽबिभयुरिमं नो दृष्ट्वा मनुष्याश्च ऋषयश्चानु प्रज्ञास्यन्तीति ; तं वै यूपेनैवायोपयंस्तं यद्यूपेनैवायोपयंस्तद्यूपस्य यूपत्वं ; तमवाचीनाग्रं निमित्योर्ध्वा उदायंस्ततो वै मनुष्याश्च ऋषयश्च देवानां यज्ञवास्त्वभ्यायन्, यज्ञस्य किञ्चिदेषिष्यामः प्रज्ञात्या इति ; ते वै यूपमेवाविन्दन्नवाचीनाग्रं निमितं ; ते विदुरनेन वै देवा यज्ञमयूयुपन्निति : तमुत्खायोर्ध्वं न्यमिन्वंस्ततो वै ते प्र यज्ञमजानन् प्र स्वर्गं लोकम्"-इति । पुरा कदाचिद् 'देवाः' ज्योतिष्टोमं यज्ञमनुष्ठाय तत्फलभूतं 'स्वर्गं' प्राप्ताः । तत्र चावस्थाय भीतिं प्राप्ताः । केनाभिप्रायेणेति ? स उच्यते— ये 'मनुष्याः' वर्णाश्रमधर्मप्रवृत्ताः, ये च 'ऋषयः' तपसि प्रवृत्ताः, ते सर्वेऽपि अस्मदीयम् 'इमं' यज्ञं 'दृष्ट्वा' स्वयमप्यनुष्ठाय स्वर्गं समागत्यास्मान् 'प्रज्ञास्यन्ति',—ततोऽस्मत्समा भविष्यन्ति । ततस्ते देवा भीता मनुष्याणामृषीणां च व्यामोहाय 'तम्' एव स्वकीयं यज्ञं यूपस्तम्भेनैव 'अयोपयन्' मिश्रितवन्तः ; अन्यथानुष्ठानरूपं भ्रममुत्पादितवन्त इत्यर्थः । यस्मात्कारणाद् 'यूपेनैव' 'तं' यज्ञम् 'अयोपयन्' अन्यथा कृतवन्तः, तस्माद्योपनसाधनत्वाद्यूपनामसम्पन्नम् । केन क्रमेण

---

* अथ पूर्वाध्यायार्थसंग्रह उच्यते राजक्रयेतिश्लोकेन । तथाच पञ्चमेऽध्याये ये चत्वारः खण्डाः श्रुताः, तत्र क्रमेण सोमक्रयार्थाख्यायिकाकथनपूर्वको वाग्विसर्गः, अग्निप्रणयनीया ऋचः, हविर्धानप्रोह्यमाणीया ऋचः, अग्नीषोमप्रणयनीया ऋच इति चत्वारोऽर्था विहिता इति निश्चयम् ।

व्यामोहितवन्त इति? उच्यते—'तं यूपं' पूर्वम् ऊर्द्ध्वाग्रं सन्त मिदानीम् 'अवाचीनाग्रम्' अधोमुखं 'निमित्य' निखाय ऊर्द्ध्वाभिमुखा उद्गताः। तदानीं 'मनुष्या ऋषयश्च' 'देवानां' 'यज्ञवास्तु' यज्ञभूमि मागत्य 'यज्ञस्य' सम्बन्धि चिह्नं यत्किञ्चिदवगमिष्यामः, तच्च देवानुष्ठितस्य 'प्रज्ञात्यै' सम्पद्यते;—इत्यभिप्रेत्य यज्ञभूमिं सर्वतः परीक्ष्य यज्ञचिह्न मिद मिति 'यूप मेव' 'अविन्दन्' अलभन्त। कीदृशं यूपम्? 'अवाचीनाग्रं' निमितम्' अधोमुखत्वेन निखातम्। ततः 'ते' मनुष्या ऋषयश्चैवं 'विदुः'। कथ मिति? तदुच्यते—'अनेन' एवाधोमुखेन यूपेन 'देवाः' असङ्क्रमाय स्वकीयं 'यज्ञं' मिश्रितवन्तः 'इति'। ततः 'तम्' अधोमुखं निखातं यूपम् 'उत्खाय' पुनरूर्द्ध्वाभिमुखं 'न्यमिन्वन्' निखातवन्तः। ततो यथाशास्त्र मवस्थितेन यूपेन 'ते' मनुष्या ऋषयश्च देवैरनुष्ठितं 'यज्ञं' 'प्र' ज्ञाय 'स्वर्गं लोकं प्राजानन्'। तं यज्ञ मनुष्ठाय स्वर्गं गता इत्यर्थः। सोऽय मर्थः शाखान्तरे सङ्गृहीतः—"यज्ञेन वै देवाः सुवर्गं लोक मायन्; ते ऽमन्यन्त मनुष्या नोऽन्वाभविष्यन्तीति; ते यूपेन योपयित्वा सुवर्गं लोक मायन्; त मृषयो यूपेनैवानुप्रजानन्; तद् यूपस्य यूपत्वम्"-इति (तै० सं० ६. ३. ४. ७.)॥

इदानीं यूपनिखननं विधत्ते—"तद्यद्यूप ऊर्द्ध्वो निमीयते, य[illegible]स्य प्रज्ञात्यै,—स्वर्गस्य लोकस्यानुख्यात्यै" इति। 'निमीयते' निखातव्य इत्यर्थः॥

तस्य यूपस्य तक्षणेनाष्टाश्रित्वं विधीयते—"वज्रो वा एष यद् यूपः; सोऽष्टाश्रिः कर्त्तव्यो ऽष्टाश्रिर्वै वज्रस्तं तं प्रहरति;—द्विषते भ्रातृव्याय वधं यो ऽस्य स्तृत्यस्तस्मै स्तर्तवै"-इति। यूपस्य वज्रांशत्वेन वज्रत्वम्। तच्च शाखान्तरे श्रूयते—"इन्द्रो वृत्राय

वज्रं प्राहरत्; स त्रेधा व्यभवत्,—स्फ्यस्तृतीयम्, रथस्तृतीयं, यूपस्तृतीयम्"-इति* (तै०सं०५.२.६.२.)। लोके वज्रस्याष्टकोणत्वात् तद्रूपस्य यूपस्य अष्टाश्रित्वं कुर्यात्। 'द्विषते भ्रातृव्याय वधं' द्वेषं कुर्वतः शत्रोर्वधहेतुं 'तं वज्रं', 'तं' यूपं च, पुरुषः 'प्रहरति' प्रहारार्थं प्रयुङ्क्ते। अतो वज्रवत्प्रहरणसामर्थ्याद्रूपस्याष्टाश्रित्वं युक्तम्। 'यः' शत्रुः 'अस्य' यजमानस्य 'स्तृत्यः' हिंस्यो भवति, 'तस्मै स्तर्तवै' तस्य शत्रोर्हिंसार्थं मिद मष्टाश्रित्वम्। अष्टाश्रित्वसिद्धये यूपस्य यदष्टत्व मुक्तम्, तदेव शत्रोरप्रियहेतुत्वेनोपपादयति—"वज्रो वै यूपः, स एष द्विषतो वध उद्यतस्तिष्ठति; तस्माद्धाप्येतर्हि यो द्वेष्टि, तस्याप्रियं भवत्यमुष्यायं यूपोऽमुष्यायं यूप इति दृष्ट्वा"-इति। यो 'यूपः' अस्ति, 'सः' एव शत्रोः 'वधे' निमित्तभूते सति, स्वयम् 'उद्यतस्तिष्ठति' उद्योगवानवतिष्ठते; अतो वज्रत्वम्। यस्मादेवं पुरासीत्, 'तस्मात्' इदानी मपि 'यः' शत्रुर्यजमानं 'द्वेष्टि', 'तस्य' शत्रोः विरोधियजमानानां यूपस्य दर्शनेन महद् 'अप्रियं भवति',—'अमुष्य' विरोधिनो 'यूपः' इति निश्चये सत्यप्रियम्; न तु यूपमात्रदर्शनेन॥

अथ कामनाविशेषेण यूपस्य प्रकृतिभूता वृक्षविशेषा वक्तव्याः; तत्रादौ खादिरत्वं विधत्ते—"खादिरं यूपं कुर्वीत स्वर्गकामः; खादिरेणैव वै यूपेन देवाः स्वर्गं लोक मजयन्तथैवैतद्यजमानः खादिरेण यूपेन स्वर्गं लोकं जयति"-इति। फलद्वयार्थं बिल्व-

---

* वाजसनेयिभिस्तु चतुर्धाकरण माम्नातम्। तथाहि "इन्द्रो ह यद् वृत्राय वज्रं प्रजहार। स प्रहृतश्चतुर्धाभवत् ०---० तस्मा द्वाभ्यां ब्राह्मणा यज्ञे चरन्ति, द्वाभ्यां राजन्यबन्धवः संग्रामे;—यूपेन च स्फ्येन च ब्राह्मणाः, रथेन च शरेण च राजन्यबन्धवः"-इति शत० ब्रा० १, २, ४, २।

वृक्षं विधत्ते—"बैल्वं यूपं कुर्वीतान्नाद्यकामः पुष्टिकामः समां समां वै बिल्वो गृभीतस्तदन्नाद्यस्य रूप मामूलाच्छाखाभिरनुचितस्तत् पुष्टेः"-इति । 'समां समां' तस्मिंस्तस्मिन् संवत्सरे बिल्ववृक्षो 'गृभीतः' फलैः गृहीतः ; 'तत्' च फलग्रहण मदनयोग्यस्यान्नस्य 'रूपम्' बिल्वफलानि भुञ्जानैर्भक्ष्यन्ते । मूल मारभ्य 'शाखाभिः' अनुक्रमेणोपचितो बिल्ववृक्षः ; तच्चोपचयनं 'पुष्टेः' स्वरूपम्, तस्मात् फलद्वयं युक्तम् । अनयोर्वेदनं प्रशंसति—"पुष्यति प्रजां च पशूंश्च य एवं विद्वान् बैल्वं यूपं कुरुते"-इति । लोकप्रसिद्धया बिल्वस्य प्रशस्ततां द्रढयति—"यदेव बैल्वा३ बिल्व ज्योतिरिति वा आचक्षते"-इति । अत्र किं पद मध्याहृत्य योजनीयम् । हे अध्वर्यो ! किमत्र 'बैल्वं' यूपं कृतवानसि ? तत्सम्यग्भवता कृतम् ; बिल्ववृक्षस्वरूपं हि वृक्षमध्ये 'श्रीवृक्ष'नामकत्वेन लक्ष्मीस्वरूपत्वात् पूज्यत्वेन 'ज्योतिः' भवति । प्लुतिस्तु प्रशंसाद्योतकध्वन्यभिनयार्था *। 'यदेव' यस्मादेव कारणात् ब्रह्मवादिन एवम् 'आचक्षते', तस्माद् बैल्वो यूपोऽतिप्रशस्त इत्यर्थः । एतद्वेदनं प्रशंसति—"ज्योतिः स्वेषु भवति, श्रेष्ठः स्वानां भवति य एवं वेद"-इति । 'स्वेषु' ज्ञातिषु 'ज्योतिः' तेजस्वी ; 'श्रेष्ठः' श्रुतवृत्तसम्पन्नः । पुनः फलद्वयाय वृक्षान्तरं विधत्ते—"पालाशं यूपं कुर्वीत ; तेजस्कामो ब्रह्मवर्चसकामस्तेजो वै ब्रह्मवर्चसं वनस्पतीनां पलाशः"-इति । 'तेजः' शरीरकान्तिः, 'ब्रह्मवर्चसं' श्रुताध्ययनसम्पत्तिः । पुष्पाणा मतिरिक्तत्वेन पलाशस्य तेजस्त्वम्, परब्रह्मत्वश्रवणाद् ब्रह्मवर्चसत्वम् । तथाच शाखान्तरे श्रूयते—"देवा वै ब्रह्मन्नवदन्त, तत्पर्ण उपाशृणोत्"-इति (तै०सं०३.५.७.२.) ।

---

* 'अनुदात्तं प्रश्नान्ताभिपूजितयोः'-इति पा० ८. २. १०० ।

एवमादि * । अध्वर्योरितद्वेदनं प्रशंसति—"तेजस्वी ब्रह्मवर्चसी भवति य एवं विद्वान् पालाशं यूपं कुरुते"-इति । बिल्वात्पलाशं प्रशंसति—"यद्वेव पालाशा३ सर्वेषां वा एष वनस्पतीनां योनिर्यत्पलाशस्तस्मात्पलाशस्यैव पलाशेनाचक्षते,—ऽमुष्य पलाश ममुष्य पलाश मिति"-इति । हे अध्वर्यो ! किं पालाशं यूपं ज्ञातवानसि ? तत् सम्यक् ज्ञात मिति प्रशंसार्था श्रुतिः । किञ्च पलाशः सर्ववनस्पतीनां कारणभूतः ; तस्माद्योनित्वात्पलाशाख्यस्यैव वृक्षस्य सम्बन्धिना पलाशशब्देन सर्ववृक्षाणां पत्रम् 'आचक्षते' व्यवहरन्ति ;—'अमुष्य' न्यग्रोधस्य 'पलाशं' पत्रम्, 'अमुष्य' चूतवृक्षस्य 'पलाशं' पत्रम् । एवं सर्ववृक्षसङ्ग्रहार्था वीप्सा । पलाशशब्दः पुंलिङ्गो वृक्षविशेषवाची, नपुंसकलिङ्गः पत्रवाची । "पलाशे किंशुकः पर्णः"-"पत्रं पलाशं छदनं दलं पर्णं छदः पुमान्"—इत्यभिधानकारैरुक्तत्वात् (अम० २. ४. २८, १४.) । यस्मात् श्रुतिप्रयोगः, यस्माच्च सर्ववृक्षयोनित्वम्, तस्मात् पलाशयूपः प्रशस्त इत्यर्थः † । वेदनं प्रशंसति—"सर्वेषां हास्य वनस्पतीनां काम उपाप्तो भवति य एवं वेद ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां प्रथमाध्याये
प्रथमः खण्डः ॥ १ ॥

---

* एतस्मिन्मन्त्रे विसमर्थं स्पष्टतरम्—"देवानां ब्रह्मवादं वदतां यत् । उपाशृणोः सुश्रवा वै श्रुतोऽसि । ततो मा माविशतु ब्रह्मवर्चसम् । तत् सम्भरंऽस्तदवरुन्धीय साक्षात्"—इति तै० आ० १.२.१.६ । एष सान्याधाने पर्णाहरणाय विनियुज्यते । तथाहि—"गायत्रिया क्रियमाणस्य 'यत्ते पर्णं समपतत् ०—०', 'देवानां ब्रह्मवादं ०— ०'—इत्येताभ्यां पर्णम् (आहरति)"—इति आप० ५. २. ४ ।

† 'यूप्या वृक्षाः पलाशखदिरबिल्वरौहीतकाः'—इत्यादि आप० ७.१.१५,१६ ।

॥ अथ द्वितीयः खण्डः ॥

अञ्ज्मो* यूप मनुब्रूहीत्याहाध्वर्युरञ्जन्ति त्वा मध्वरे देवयन्त इत्यन्वाहाध्वरे ह्येनं देवयन्तोऽञ्जन्ति वनस्पत मधुना दैव्येनेत्येतद्वै मधु दैव्यं यदाज्यं यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थ इति यदि च तिष्ठासि यदि च शयासै द्रविण मेवास्मासु धत्तादित्येव तदाहोच्छ्रयस्व वनस्पत इत्युच्छ्रीयमाणायाभिरूपा यद्यज्ञे ऽभिरूपं तत्समृद्धं वर्ष्मन् पृथिव्या अधीत्येतद्वै वर्ष्म पृथिव्यै यत्र यूप मुन्मिन्वन्ति सुमिती मीयमानो वर्चो धा यज्ञवाहस इत्याशिष माशास्ते समिद्धस्य श्रयमाणः पुरस्तादिति समिद्धस्य ह्येष एतत्पुरस्ताच्छ्रयते ब्रह्मवन्वानो अजरं सुवीर मित्याशिष मेवाशास्त आरे अस्मदमतिं बाधमान इत्यशनाया वै पाप्मान मतिस्ता मेव तदाराग्नुदते यज्ञाच्च यजमानाच्चोच्छ्रयस्व महते सौभगायेत्याशिष मेवाशास्त ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सवितेति यद्वै देवानां नेति तदेषा मो३ मिति तिष्ठ देव इव सवितेत्येव तदाहोर्ध्वो वाजस्य सनितेति वाजसनि मेवैनं तद्धनसां

---

* 'ऐञ्ज्मो' क, ग। 'अञ्ज्मो' ङ।

सनोति। यदञ्जिभिर्वाघद्भिर्विह्वयामह इति। छन्दांसि वा अञ्जयो वाघतस्तैरेतद्देवान्यजमाना विह्वयन्ते। मम यज्ञ मागच्छत मम यज्ञ मिति। यदि ह वा अपि बह्व इव यजन्ते। ऽथ हास्य देवा यज्ञ मेव गच्छन्ति। यत्रैवं विद्वानेता मन्वाहोर्द्धो नः पाह्यंहसो नि केतुना। विश्वं समत्रिणं दहेति। रक्षांसि वै पाप्मात्रिणो। रक्षांसि पाप्मानं दहेत्येव तदाह। कृधी न ऊर्द्धाञ्चरथाय जीवस इति यदाह। कृधी न ऊर्द्धाञ्चरथाय जीवस इत्येव तदाह। यदि ह वा अपिनीत इव यजमानो भवति। परि हैवैनं तत्संवत्सराय ददाति। विदा देवेषु नो दुव इत्याशिष मेवाशास्ते। जातो जायते सुदिनत्वे अह्ना मिति। जातो ह्येष एतज्जायते। समर्य आ विदथे वर्द्धमान इति। वर्द्धयन्त्येवैनं तत्। पुनन्ति धीरा अपसो मनीषेति। पुनन्त्येवैनं तद्। देवया विप्र उदियर्ति वाच मिति। देवेभ्य एवैनं तन्निवेदयति। युवा सुवासाः परिवीत आगादित्युत्तमया परिदधाति। प्राणो वै युवा सुवासाः। सोऽयं शरीरैः परिवृतः। स उ श्रेयान् भवति जायमान इति। श्रेयाञ्छ्रेयान् ह्येष एतद् भवति जायमानस्तं धीरासः कवय उन्नयन्ति। स्वाध्यो मनसा देवयन्त इति।

ये वा अनूचानास्ते कवयस्त एवैनं तदुन्नयन्ति ता एताः सप्तान्वाह रूपसमृद्धा एतद्वै यज्ञस्य समृद्धं यद् रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदति तासां त्रिः प्रथमा मन्वाह त्रिरुत्तमां ता एकादश सम्पद्यन्त एकादशाक्षरा वै त्रिष्टुप् त्रिष्टुबिन्द्रस्य वज्र इन्द्रायतनाभिरेवाभी राध्नोति य एवं वेद त्रिः प्रथमां त्रिरुत्तमा मन्वाह यज्ञस्यैव तद् बर्सौ नह्यति स्थेम्ने बलायाविस्रंसाय ॥ २ ॥

यूपं विधाय तस्याञ्जनादिमन्त्रान् विधातु मादौ प्रैषं विधत्ते —"अञ्ज्मो यूप मनुब्रूहीत्याहाध्वर्युः"-इति । 'यूप मञ्ज्मः' यूपस्य घृतेनाञ्जनं कुर्मः । हे होतः! तदनुरूपा ऋचं 'ब्रूहीति' एवम् 'अध्वर्युः' प्रैषं ब्रूयात् । स च प्रैषो विकल्पेनापस्तम्बेन दर्शितः— "यूपायाज्यमानायानुब्रूहीति सम्प्रेष्यत्यज्यमानायानुब्रूह्यञ्ज्मो यूप मनुब्रूहीति वा"-इति (श्रौ०७.१०.१.) । एव मध्वर्युणा प्रेषितो होता अञ्जनकाले वक्ष्यमाणा ऋचोऽनुब्रूयात् । अञ्जनं त्वापस्तम्बेन दर्शितम्—"अथैन मसंस्कृतेनाज्येन यजमानोऽग्रतः शकलेनानक्ति ऐन्द्र मसीति चषाल मक्त्वा, सुपिप्पलाभ्यस्त्वौषधीभ्य इति प्रतिमुच्य, देवस्त्वा सविता मध्वानक्तीति स्रुवेण सन्तत मविच्छिन्नदशनिष्ठा मश्रि मनक्ति"-इति (७. १०. २, ३.) ॥

एतस्मिन्नञ्जनकालेऽनुवचनीया मृचं विधत्ते—"अञ्जन्ति त्वा मध्वरे देवयन्त इत्यन्वाहाध्वरे ह्येनं देवयन्तोऽञ्जन्ति"-इति (सं०३. ८.१.)। हे यूप ! 'त्वां' 'देवयन्तः' देवान् पूजयितु मिच्छन्तः

ऋत्विजः 'अंजन्ति' असंस्कृतेन घृतेनार्द्रं कुर्वन्ति । एतत्पादार्थस्य याज्ञिकप्रसिद्धिं दर्शयति—अध्वरे ह्येन मिति । द्वितीयपाद मनूद्य व्याचष्टे—"वनस्पते मधुना दैव्येनेत्येतद्वै मधु दैव्यं यदाज्यम्"-इति । हे 'वनस्पते' यूप ! मन्त्रेण देवयोग्येनाज्येन, त्वा मञ्जन्तीति पूर्वत्रान्वयः । द्वितीयार्धं मनूद्य व्याचष्टे—"यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थ इति ; यदि च तिष्ठासि, यदि च शयासै, द्रविण मेवास्मासु धत्तादित्येव तदाह"-इति । हे यूप ! त्वं यदूर्ध्वः सन् 'तिष्ठाः' अवटे स्थितो ऽभवः । 'यद्वा' जगन्मातुः 'अस्याः' पृथिव्याः 'उपस्थे' उपरि 'क्षयः' निवासः ते शयनं स्यात् । सर्वथापि 'इह' कर्मणि 'द्रविणा' धनानि अस्मदपेक्षितानि 'धत्तात्' सम्पादयतु । अय मुत्तरार्द्धस्यार्थो यदि चेत्यादिना स्पष्टीकृतः ॥

द्वितीयामृचं विधत्ते—"उच्छ्रयस्व वनस्पत इति (मं० ३.८.३.) उच्छ्रीयमाणायाभिरूपा ; यद्यज्ञे ऽभिरूपं तत्समृद्धम्"-इति । हे 'वनस्पते' ! त्वम् 'उच्छ्रयस्व' शयनं परित्यज्योत्थितो भव । उच्छ्रयस्वेत्युक्तत्वात् 'उच्छ्रीयमाणाय' यूपायेयमृक् 'अभिरूपा' । तदेतदुच्छ्रयण मापस्तम्बेन दर्शितम्—"यूपायोच्छ्रीयमाणायानुब्रूहीति सम्प्रेष्यत्युच्छ्रीयमाणायानुब्रूहीति वा हिवत् स्वभागान्तरितं पृणेतुरुच्छ्रयति" इति (७. १०. ६, ७.) । अस्या ऋचो द्वितीयपाद मनूद्य व्याचष्टे—"वर्ष्मन् पृथिव्या अधीत्येतद्वै वर्ष्म पृथिव्यै यत्र यूप मुन्मिन्वन्ति"-इति । 'पृथिव्याः' सम्बन्धिनि 'वर्ष्मन्' शरीरवत्प्रधानभूते अस्मिन् देशे 'अधि' उपरि, उच्छ्रयस्वेति पूर्वत्रान्वयः । ऋत्विजो 'यत्र' वेदि-तत्पूर्वदेशयोरन्तराले 'यूपम्' 'उन्मिन्वन्ति' ऊर्ध्वतया निखनन्ति, सोऽयं देशः 'पृथिव्या वर्ष्म'-

इति । मन्त्रे तृतीयं पाद मनूद्य व्याचष्टे—"सुमिती मीयमानो वर्चोधा यज्ञवाहस इत्याशिष माशास्ते"-इति । 'सुमिती' सुमित्या शोभनेन प्रक्षेपेण स्थापनेन 'मीयमानः' स्थाप्यमानः, 'यज्ञवाहसे' यज्ञनिर्वाहकाय यजमानाय 'वर्चोधाः' वर्चसां दीप्तीनां धाता सम्पादयिता ; तेन यूपो विशिष्यते । 'वर्चोधाः'-इत्येतदाशीःप्रार्थना ॥

तृतीया ऋचं विधत्ते—"समिद्धस्य श्रयमाणः पुरस्तादिति"-इति (सं० ३. ८. २.) । अन्वाहेत्यनुवर्त्तते । अयं यूपः 'समिद्धस्य' प्रदीप्तस्याहवनीयस्य 'पुरस्तात्' पूर्वस्यां दिशि 'श्रयमाणः' आश्रित्य वर्त्तमानः । एतत्पदार्थस्य याज्ञिकप्रसिद्धिं दर्शयति—"समिद्धस्य ह्येष एतत्पुरस्ताच्छ्रयते"-इति । अर्द्धं मन्त्रवेदि, अर्द्धं बहिर्वेदि, यूप स्थापनात् आहवनीयपूर्वदिगाश्रयणम् । द्वितीयमनूद्य व्याचष्टे—"ब्रह्म वन्वानो अजरं सुवीर मित्याशिष मेवाशास्ते"-इति । 'अजरम्' अविनाशं, 'सुवीरं' कल्याणपुत्रादिसमृद्धिकारणम्, 'ब्रह्म' परिवृढ मिदं कर्म 'वन्वानः' सम्भज्यमानो यूपः । अजरादिशब्दैः एतस्मिन् पादे प्रार्थनं शंसति । तृतीयपाद मनूद्य व्याचष्टे—"आरे अस्मदमतिं बाधमान इत्यशनाया वै पाप्माऽमतिस्ता मेव तदारानुदते यज्ञाच्च यजमानाच्च"-इति । 'अमतिः' बुद्धिभ्रंशः, 'ताम्' 'अस्मद्' यजमानर्त्विग्भ्यः 'आरे' दूरं यथा भवति तथा 'बाधमानः' यूपः । एतत्पादगतेनामतिशब्देन क्षुधा वा पापं वाभिधीयते ; तयोः बुद्धिभ्रंशहेतुत्वात् । अस्मदित्यनेन यज्ञो यजमानश्च विवक्षितः । ताभ्यां दुर्बुद्धिः दूरे निराक्रियते । चतुर्थपाद मनूद्य व्याचष्टे—"उच्छ्रयस्व महते सौभगायेत्याशिष मेवाशास्ते"-इति । हे वनस्पते ! यजमानस्याधिकसौभाग्यसिद्ध्यर्थं सुच्छ्रितो भव । अस्मिन् पादे आशीर्विस्पष्टा ॥

चतुर्थीमृचं विधत्ते —"ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सवितेति"-इति (सं० ४.६.१.)। हे यूप! 'नः' अस्माकम् 'ऊतये' रक्षणाय 'ऊर्ध्वः' ऊर्ध्वाकार एव 'सुतिष्ठ' स्थितिं कुरु। तत्र दृष्टान्तः— 'सविता देवो न' सूर्यो देव इव;— स यथास्मद्रक्षणायोर्ध्वस्तिष्ठति, तद्वत् त्वमपीत्यर्थः। एतन्मूलाङ्गगतस्य 'न'-शब्दस्य निषेधार्थत्वं परित्यज्याङ्गीकारवाचित्वात्तेनात्र उपमार्थो विवक्षित इत्येतद्दर्शयति —"यद्वै देवानां नेति तदेषां ओ३मिति; तिष्ठ देव इव सवितेत्येव तदाह"-इति। 'देवानां' देवप्रतिपादकमन्त्राणां, वर्णव्यत्ययेन वा वेदानां, सम्बन्धि 'नेति' 'यत्' पदमस्ति, 'तदेषां' वेदानां सम्बन्धिनि प्रयोगे 'ॐ'-इत्येतस्मिन्नर्थे वर्तते। तथा सत्यङ्गीकार्यस्यार्थस्य विवक्षितत्वादत्रोपमार्थे विवक्षिते सति 'तिष्ठ देव इव' इत्यादिवाक्यार्थो लभ्यते। तृतीयपादमनूद्य व्याचष्टे—"ऊर्ध्वो वाजस्य सनितेति; वाजसनिमेवैनं तद्धनसां सनोति"-इति। अयं यूपः 'ऊर्ध्वः' सन् 'वाजस्य' अन्नस्य 'सनिता' दाता, 'तत्' तेन पादपाठेन 'एनं' यूपं 'वाजसनिमेव' 'सनोति' करोतीत्यर्थः। एतस्योपलक्षणत्वात् 'धनसां' सुवर्णादिदातारं च करोति। चतुर्थपादमनूद्य व्याचष्टे—"यदञ्जिभिर्वाघद्भिर्विह्वयामह इति; छन्दांसि वा अञ्जयो वाघतस्तैरेतद् देवान् यजमाना विह्वयन्ते, मम यज्ञमागच्छत, मम यज्ञमिति"-इति। 'यद्' यस्मात्कारणात् 'अञ्जिभिः' क्रत्वभिव्यक्तिकारिभिः वाग्भिः, 'वाघद्भिः' क्रत्वनुष्ठानभारं वहद्भिः ऋत्विग्भिः सहिता यजमानाः 'विह्वयामहे' विशेषेण देवानाह्वयामः। तस्माद् यूप! त्वमूर्ध्वस्तिष्ठेति योज्यम्। अत्र 'अञ्जि'-'वाघत्'-शब्दाभ्यामृत्विग्रूपमापन्नाः छन्दोभिमानिनो देवा उच्यन्ते। एतत्पाद-

पाठेन छन्दोभिर्नानामन्त्रैः ऋत्विग्भिः पठ्यमानैस्तैस्तैर्यजमानदेवान् विशेषेणाह्वयन्ति । भो देवाः ! ममैव यज्ञ मागच्छतेति एकः, एव मन्येऽपि ; सर्वसङ्ग्रहार्थेयं वीप्सा । होतुरेतद्वेदनं प्रशंसति—"यदि ह वा अपि बहव इव यजन्तेऽथ हास्य देवा यज्ञ मेव गच्छन्ति, यत्रैवं विद्वानेता मन्वाह"-इति । 'यद्यपि' एकस्मिन् काले 'बहवः' यजमानाः 'यजन्त इव' यागं कुर्वन्त्येव, तथापि 'अस्य एव' विदुषः अन्नयुक्तस्यैव यजमानस्य यज्ञं प्रति 'देवाः आगच्छन्ति' ॥

पञ्चमी मृचं विधत्ते—"ऊर्ध्वो नः पाह्यंहसो नि केतुना विश्वं समत्रिणं दहेति" इति (सं०१.३६.१४.)। हे यूप ! त्वम् ऊर्ध्वः सन् 'केतुना' प्रज्ञया 'नः' अस्मान् 'अंहसः' पापात् 'निपाहि' नितरां पालय । 'अत्रिणं' भक्षणशील राक्षसादि 'विश्वम्' अपि 'सन्दह' सम्यूहीकृत्य भस्मीकुरु । तस्य पूर्वार्द्धस्य तात्पर्यं दर्शयति—"रक्षांसि वै पाप्मात्रिणो रक्षांसि पाप्मानं दहेत्येव तदाह"-इति । यानि 'रक्षांसि' सन्ति, यश्च 'पाप्मा' विद्यते, तत्सर्वम् 'अत्रिन्'-शब्देन विवक्षितम् । अत उभयदहनं मन्त्रप्रार्थितं भवति । तृतीयपाद मनूद्य व्याचष्टे—"कृधी न ऊर्ध्वाञ्चरथाय जीवस इति यदाह, कृधी न ऊर्ध्वाञ्चरणाय जीवस इत्येव तदाह"-इति । 'च' शब्दः पूर्ववाक्येन समुच्चयार्थः । अपिच हे यूप ! 'रथाय जीवसे' रथारोहणपूर्वकाय जीवनाय । यद्वा 'चरथाय'-इत्येक मेव पदम् ; चरथं चरण माचारस्तस्मै ; जीवनाय च 'नः' अस्मान् 'ऊर्ध्वान्' उच्छ्रितान् 'कृधि' कुरु । 'इति' अनेनपादेन मन्त्रो 'यदाह', 'तत्' तत्र चरणस्य विवक्षितत्वादस्मदुक्त मेवार्थं मन्त्रः 'आह' । चरथायेतिशब्द माश्रित्य तात्पर्यं मभि-

धाय, जीवसे-इतिमन्त्र कामितत्व तद्दर्शयति—“यदि ह वा अपि नीत इव यजमानो भवति, परि हैवैनं तत्संवत्सराय ददाति”-इति । ‘यद्यपि यजमानः’ मृत्युना ‘नीतः इव भवति’; तथापि ‘तत्’ पादपाठेन मृत्युः ‘परि’हृत्य ‘एनं’ ‘संवत्सराय’ आयुःप्रदाय कालात्मने ‘ददाति’। चतुर्थपाद मनूद्य व्याचष्टे—“विदा देवेषु नो दुव इत्याशिष मेवाशास्ते” इति । ‘नः’ अस्मदीयं ‘दुवः’ परिचरणं ‘देवेषु’ ‘विदा’ वेदय, कथयेत्यर्थः । अनेन स्वकर्मणां सफलत्वं प्रार्थयते ॥

षष्ठी मृचं विधत्ते—“जातो जायते सुदिनत्वे अह्ना मिति”-इति (सं० ३.८.५.) । अयं यूपो ‘जातः’ नित्यप्रादुर्भूतोऽपि ‘अह्नां’ दिवसानां मध्ये ‘सुदिनत्वे’ यागयुक्तस्याह्नः सुदिनत्वाय जायते । एत मेवार्थं दर्शयति—“जातो ह्येष एतज्जायते” इति । ‘एतत्’ एतेन पादपाठेन । द्वितीयपाद मनूद्य व्याचष्टे—“समर्य आ विदथे वर्द्धमान इति ; वर्द्धयन्त्येवैनं तत्”-इति । ‘समर्ये’ मनुष्यैर्यजमानादिभिर्युक्ते ‘विदथे’ यज्ञदेशे ‘आ’ समन्तात् ‘वर्द्धमानः’ यूप आस्ते। ‘तत्’ पादपाठेन यूपं ‘वर्द्धयन्त्येव’। तृतीयपाद मनूद्य व्याचष्टे—“पुनन्ति धीरा अपसो मनीषेति ; पुनन्त्येवैनं तद्”-इति । ‘धीराः’ धीमन्तो यजमानादयः ‘अपसः’ कर्मणो निमित्तभूतात् ‘मनीषा’ स्वकीयया मनीषया बुद्ध्या ‘पुनन्ति’ त मिमं यूपं शोधयन्ति । ‘तद्’ तेन तृतीयपादपाठेन । चतुर्थपाद मनूद्य व्याचष्टे—“देवया विप्र उदियर्त्ति वाच मिति ; देवेभ्य एवैनं तन्निवेदयति”-इति । ‘विप्रः’ ब्राह्मणः ऋत्विक्सङ्घः ‘देवया’ देवगामिनीं वाचं यूपस्तुतिं ‘उदियर्त्ति’ उद्गमयति, उच्चारयतीत्यर्थः । ‘तत्’ तेन चतुर्थपादपाठेन ‘एनं’ यूपं ‘देवेभ्यः’ कथयति ॥

सप्तम्या समापनं विधत्ते—"युवा सुवासाः परिवीत आगादिति (सं० ३. ८. ४.) उत्तमया परिदधाति"-इति। उक्तास्वृक्षु येय मन्तिमा, तयानुवचनं समापयेत्। यथा लोके 'सुवासाः' शोभनवस्त्रोपेतो 'युवा' यौवनयुक्तः पुरुषोऽयन आगच्छति, एवमयं यूपः परितो रशनया वेष्टितः 'आगात्' इह कर्म्मण्यायातः। यद्वा, युवशब्देन यूपस्य प्राणरूपत्वं विवक्ष्यते; तामेतां विवक्षां दर्शयति—"प्राणो वै युवा सुवासाः; सोऽयं शरीरैः परिवृतः"-इति। कदाचिदपि जरारहितत्वात्प्राणस्य युवत्वम्। प्राणवेष्टनरूपत्वाच्छरीरावयवानां वस्त्ररूपत्वम्। ईदृशप्राणरूपत्वेन यूपः प्रशस्यते— द्वितीयपाद मनूद्य व्याचष्टे—"स उ श्रेयान् भवति जायमान इति; श्रेयाञ्छ्रेयान् ह्येष एतद् भवति जायमानः"-इति। 'स उ' स एव यूपः जायमानः, कर्म्मणि निष्पाद्यमानः 'श्रेयान्' दिने दिने प्रशस्यतरो भवति। प्रथमतश्छेदनेन प्रशस्तत्वम्, तक्षणेन ततः प्रशस्तत्वम्, अंजनेन ततोऽपीत्येवंविधविवक्षया 'श्रेयान्-श्रेयान्'-इति वीप्सा प्रयुक्ता। उत्तरार्द्ध मनूद्य व्याचष्टे—"तं धीरासः कवय उन्नयन्ति, स्वाध्यो मनसा देवयन्त इति; ये वा अनूचानास्ते कवयस्त एवैनं तदुन्नयन्ति"-इति। 'तं' 'यूपं' धीराः बुद्धिमन्तः 'कवयः' अनूचानादयः 'उन्नयन्ति' स्तूयमानैर्गुणैरुच्छ्रितं कुर्वन्ति। कीदृशाः कवयः? 'स्वाध्यः' सुष्ठु 'आ' समन्तात्, ध्यायतीति स्वाधीः, तस्य बहुवचनम्, सुधिय इत्यर्थः। 'मनसा' स्वकीयेन 'देवयन्तः' देवानाम् मिच्छन्तः। उक्त एवार्थो 'ये वा अनूचानाः'-इत्यादिना स्पष्टीकृतः॥

अत्र प्रथमम् (२४२पृ०) "अञ्ज्मो यूप मनुब्रूहि"-इति प्रेषितो

यथा 'अञ्जन्ति त्वाम्'-इति प्रथमा मन्वाह, तथा 'यूपायोच्छ्रीयमाणायानुब्रूहि'-इति (आप० ७.१०.६.) प्रेषितः, 'उच्छ्रयस्व'-इत्याद्याः ऋचः पश्चानुब्रूयात् ; तथा 'यूपाय परिवीयमाणायानुब्रूहि'-इति (आप० ७.११.४.) प्रेषितः, 'युवा सुवासाः'-इत्येतामनुब्रूयात् ॥

उक्तमन्त्रसङ्ख्यादिकं दर्शयति—"ता एताः सप्तान्वाह रूपसमृद्धा, एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं, यत्कर्म क्रियमाण मृगभिवदति, तासां त्रिः प्रथमा मन्वाह त्रिरुत्तमां, ता एकादश सम्पद्यन्त, एकादशाक्षरा वै त्रिष्टुप्, त्रिष्टुबिन्द्रस्य वज्र इन्द्रायतनाभिरेवाभी राध्नोति य एवं वेद, त्रिः प्रथमां त्रिरुत्तमा मन्वाह ; यज्ञस्यैव तद् बर्सौ नह्यति, स्थेम्ने बलायाविस्रंसाय"-इति । त्रिष्टुभ इन्द्रस्य वज्रत्व मर्थवादान्तरे द्रष्टव्यम् ॥

अथ मीमांसा । द्वादशाध्यायस्य तृतीयपादे (जै० सू० २६—२८. अधि० १६.) चिन्तितम्—

"उद्दिवेत्युच्छ्रयस्वेति विकल्पो वा समुच्चयः ।
विकल्पः स्मारकत्वैक्यात् प्रकारान्यत्वतोऽन्तिमः ॥

यूपस्योच्छ्रयणे करण एष मन्त्रोऽध्वर्युणा पठ्यते *—"उद्दिवꣳ स्तभानान्तरिक्षं पृण पृथिवी मुपरेण दृꣳह"-इति (तै० सं० १.३.६.१.); उच्छ्रीयमाणयूपाय प्रेषितेन होत्रा अयं मन्त्रः पठ्यते †—"उच्छ्रयस्व वनस्पते वर्ष्मन् पृथिव्या अधि"-इति (ऋ० सं० ३.

---

* तथाचाध्वर्युवेदे एवं विहितः—'उद्दिवꣳ स्तभानान्तरिक्षम्पृणेत्याहैषां लोकानां विधृत्यै'-इति तै० सं० ६. ३. ४. । तथापस्तम्बोऽप्याह (७. १०. ७) ।

† तथाचात्र होतृवेदे विहितः—'उच्छ्रयस्व वनस्पत इत्युच्छ्रीयमाणायाभिरूपा'-इति (२४० पृ०) । तथाश्वलायनोऽप्याह (३. १. ८.) ।

८. ३.)। अनयोर्यूपोच्छ्रयणस्मरण मेक मेव कार्यम्। तस्माद् विकल्प इति चेत्, नैवम्;—करणमन्त्र उच्छ्रयणं करोमीत्येव स्मारयति; होमस्तु क्रियमाण मुच्छ्रयण मनुवदन् अध्वर्योः यूपोच्छ्रयणं कर्त्तव्य मित्येवंविधां स्मृतिं जनयति। तत्र स्वार्थस्योच्छ्रयणस्यैकत्वेऽपि कर्त्तव्य मित्यस्य करोमीत्यस्य च स्मृतिप्रकारस्यान्यत्वान्न कार्यैक्यम्; तेन समुच्चयः"-इति ॥

तत्रैवान्यच्चिन्तितम्—

"उच्छ्रयस्व समिध्यस्वेत्यादीनां किं विकल्पना।
समुच्चयो वा कार्यैक्यादाद्योऽनुस्मृतयेऽन्तिमः॥

'उच्छ्रयस्व'-इति (सं० ३. ८. ३.) एका, 'समिद्धस्य श्रयमाणः'-इति (सं० ३. ८. २.) द्वितीया, 'ऊर्ध्व ऊ षु णः'-इति (सं० १. ३६. १३.) तृतीया, 'ऊर्ध्वो नः पाहि'-इति (सं० १. ३६. १४.) चतुर्थी; ता एताः क्रियमाण मनुवदन्त्यो होत्रा पठ्यन्ते *। तासां यूपोच्छ्रयणकर्त्तृतास्मरणस्य कार्यस्यैकत्वात् विकल्प इति चेत्, नैवम्;—प्रथममन्त्रेणोत्पन्नायाः स्मृतेरुत्तरोत्तर मनुस्मृतेः पृथक्प्रयोजनत्वात्। तस्मात् समुच्चयः"-इति ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां प्रथमाध्याये
द्वितीयः खण्डः ॥ २ ॥

---

* तथाचैव विहितत्वात् (२४० पृ०)। आश्वलायनोऽप्याहैव मेव (३. १. ९.)

॥ द्वितीयपञ्चिका । १ । ३ ॥

॥ अथ तृतीयः खण्डः ॥

तिष्ठेद्यूपा३ः अनुप्रहरे३दित्याहुस्तिष्ठेत् पशुकामस्य देवेभ्यो वै पशवोऽन्नाद्यायालम्भाय नातिष्ठन्त तेऽपक्रम्य प्रतिवावदतो तिष्ठन्नास्मानालप्स्यध्वे नास्मानिति ततो वै देवा एतं यूपं वज्रमपश्यंस्तमेभ्य उदश्रयंस्तस्माद्बिभ्यत उपावर्तन्त तमेवाद्याप्युपावृत्तास्ततो वै देवेभ्यः पशवोऽन्नाद्यायालम्भायातिष्ठन्त तिष्ठन्तेऽस्मै पशवोऽन्नाद्यायालम्भाय य एवं वेद यस्य चैवंविदुषो यूपस्तिष्ठत्यनुप्रहरेत्स्वर्गकामस्य तमु ह स्मैतं पूर्वेऽन्वेव प्रहरन्ति यजमानो वै यूपो यजमानः प्रस्तरोऽग्निर्वै देवयोनिः सोऽग्नेर्देवयोन्या आहुतिभ्यः सम्भूय हिरण्यशरीर ऊर्ध्वः स्वर्गं लोकमेष्यतीत्यथ ये तेभ्योऽवर आसंस्त एतं स्वरुमपश्यन् यूपशकलं तं तस्मिन् कालेऽनुप्रहरेत्तत्र स काम उपाप्तो योऽनुप्रहरणे तत्र स काम उपाप्तो यः स्थाने सर्वाभ्यो वा एष देवताभ्य आत्मानमालभते यो दीक्षतेऽग्निः सर्वा देवताः सोमः सर्वा देवताः स यदग्नीषोमीयं पशुमालभते सर्वाभ्य एव तद्देवताभ्यो यजमान आत्मानं निष्क्रीणीते तदाहुर्द्विरूपोऽग्नीषोमीयः

कर्त्तव्यो द्विदेवत्यो हीति तत्तन्नादृत्यं॑ पीव इव कर्त्तव्यः॑ पीवोरूपा वै पशवः॑ कृशित इव खलु वै यजमानो भवति॑ तद्यत्पीवा पशुर्भवति॑ यजमान मेव तत् स्वेन मेधेन समर्धयति॑ तदाहुर्नाग्नीषोमीयस्य पशोरश्नीयात्॑पुरुषस्य वा एषो ऽश्नाति॑ यो ऽग्नीषोमीयस्य पशोरश्नाति॑ यजमानो ह्येतेनात्मानं निष्क्रीणीत इति॑ तत्तन्नादृत्यं॑ वार्त्रघ्नं वा एतद्धवि॑र्यदग्नीषोमीयो-ऽग्नीषोमाभ्यां वा॑ इन्द्रो वृत्र महंस्॑तावेन मब्रूता॑मावाभ्यां वै वृत्र मवधी॑र्वरं ते वृणावहा इति वृणाथामिति॑ तावेत मेव वर मवृणातां॑ श्वः सुत्यायां पशुं॑ स एनयोरेषो ऽच्युतो॑ वरवृतो ह्येनयोस्त॑स्मात्तस्याशितव्यं चैव लीप्सितव्यं च॑ ॥ ३ ॥

यूपाञ्जनादिसम्बद्धा ऋचो विधाय यूपविषयं किञ्चिद्विचार मवतारयति—“तिष्ठेद्यूपा३ः अनुप्रहरे३दित्याहुः”-इति। कर्म्मणि समाप्ते सति पश्चादयं ‘यूपः’ किं स्वस्थाने ‘तिष्ठेत्’, किं वा तं यूपं वह्नौ ‘प्रहरेत्’ ? ‘इति’ एवं विचारं ब्रह्मवादिनः ‘आहुः’ विचारार्थं प्लुतिद्वयम् * ।

तत्र कामनाविशेषेण स्थितिपक्षं स्वीकरोति—“तिष्ठेत् पशुकामस्य”-इति। तदेतदुपपादयितु माख्यायिका माह—“देवेभ्यो वै पशवो ऽन्नाद्यायालम्भाय नातिष्ठन्त; ते ऽपक्रम्य प्रतिवावदतो

---

१ ‘विचार्यमाणानाम्’-इति पा० ८. २. ९७।

तिष्ठन्नास्मानालप्स्यध्वे नास्मानिति ; ततो वै देवा एतं यूपं वज्रमपश्यंस्त मेभ्य उदश्रयंस्तस्माद्बिभ्यत उपावर्तन्त ; त मेवाद्याप्युपावृत्तास्ततो वै देवेभ्यः पशवो ऽन्नाद्यायालम्भायातिष्ठन्त"-इति । पुरा कदाचित् 'देवेभ्यः' देवानाम् 'अन्नाद्याय' पयोदध्यादिभक्षणाय 'आलम्भाय' अग्नीषोमीयवायव्यादिपश्वालम्भनकर्म्मणे च 'पशवः' 'नातिष्ठन्त' नाङ्गीकृतवन्तः । अनङ्गीकृत्य 'ते' पशवो 'देवेभ्यः अपक्रम्य' 'प्रतिवावदतः' प्रत्युत्तरं पुनःपुनर्वदन्तो दूरे 'अतिष्ठन्' । किं तदुत्तर मिति, तदुच्यते—हे देवाः ! यूयं कदाचिदपि 'न अस्मान् आलप्स्यध्वे' अस्मान् पशूनालब्धुं कर्म्मणि विशसितुं समर्था न भविष्यथ । पुनरपि 'नास्मान्'-इति वाक्यावृत्तिरादरार्था। सर्वथैवास्मदीयालम्भो न घटिष्यते * । तत्प्रत्युत्तरं श्रुत्वा देवाः पशुभीतिहेतुम् 'एतं' 'यूपं' वज्ररूपम् 'अपश्यन्' । यूपस्य वज्रत्वश्रुतिः पूर्व मेवोदाहृतम् (२२२पृ०)। 'तं' यूपम् 'एभ्यः' पश्वर्थम् 'उदश्रयन्' ऊर्ध्व मवस्थापयन् । तस्मात् उच्छ्रिताद्यूपाद् 'बिभ्यतः' पशवो देवान् 'उपावर्त्तन्त' । यस्मादेवं पूर्वं वृत्तम्, तस्मादिदानीं अपि यागेषु त मेव यूप मुद्दिश्य पशव उपाकृता दृश्यन्ते । ततो देवानां दध्याद्यन्नाद्याय कर्म्मस्वालम्भाय च पशवोऽङ्गीकृतवन्तः । एतद्वेदनं यूपावस्थानं च प्रशंसति—"तिष्ठन्ते ऽस्मै पशवो ऽन्नाद्यायालम्भाय य एवं वेद, यस्य चैवंविदुषो यूपस्तिष्ठति"-इति । 'यस्य' यजमानस्येत्यर्थः ॥

अथ फलविशेषाय प्रहरणपक्ष मुपादत्ते—"अनुप्रहरेत् स्वर्गकामस्य"-इति । कर्म्मसमाप्ति मनु तं यूप मग्नौ प्रक्षिपेत् । तदेतदुपपादयति—"त मु ह स्मैनं पूर्वे ऽन्वेव प्रहरन्ति"-इति ।

---

* 'घटते' ख ।

'पूर्वे' यजमाना: स्वर्गकामा: कर्मसमाप्तिम् 'अनु' 'त मेतं' यूपं 'प्रहरन्ति' एव । तथैव युक्त्यन्तर माह—"यजमानो वै यूपो, यजमान: प्रस्तरो, ऽग्निर्वै देवयोनि:, सोऽग्नेर्देवयोन्या आहुतिभ्य: सम्भूय हिरण्यशरीर ऊर्ध्व: स्वर्गं लोक मेष्यति"-इति । योऽयं यूपोऽस्ति, यश्च प्रस्तराख्यो दर्भमुष्टि:, तयोर्यजमानवत् कर्म्मणि मुख्यत्वाद्यजमानत्वोपचार: । अग्निश्च देवानां योनि: कारणम् ; अग्निसाध्यकर्म्मणो देवजन्महेतुत्वात् । एवं सति: 'स:' यजमानो 'देवयोन्या:' अग्ने:, तस्मिन् हुताद् यूपादाहुतिभिश्च 'सम्भूय' देवजन्म प्राप्य सुवर्णमयशरीर: ऊर्द्ध्वाभिमुख: 'स्वर्गं लोकं' प्राप्स्यति । तस्मात् स्वर्गकामस्य यूपप्रहरणं युक्तम् ॥

नन्विदानीन्तनै: स्वर्गकामै: क्रतोर्यूपो न प्रक्रियते इत्याशङ्क्य तेषां प्रतिनिधिं दर्शयति----"अथ ये तेभ्यो ऽवर आसंस्त एतं स्वरु मपश्यन् यूपशकलं ; तं तस्मिन् कालेऽनुप्रहरेत् ; तत्र स काम उपाप्तो योऽनुप्रहरणे, तत्र स काम उपाप्तो य: स्थाने"-इति । पूर्वसिद्धेभ्यो ऽनुष्ठातृभ्य ऋषिभ्य: 'अवरे' 'ये' केचिदर्वाचीना इदानीन्तना यजमाना: 'आसन्', 'ते' सर्वे यूपस्य प्रतिनिधित्वेन 'यूपशकल मेतं' स्वरुनामकं स्वल्पं काष्ठखण्डम् 'अपश्यन्' । तस्मादिदानीन्तनो यजमान: 'तस्मिन्' यूपहरणकाले 'तं' 'स्वरुम्' * 'अनुप्रहरेत्' । एतच्च शाखान्तरे श्रूयते—"देवा वै सꣳस्थिते सोमे प्र स्रुचो हरन् प्र यूपं ते ऽमन्यन्त यज्ञवेशसं वा इदं कुर्म्म इति,—ते प्रस्तरꣳ स्रुचां निष्क्रयण मपश्यन्त्स्वरुं यूपस्य सꣳस्थिते सोमे प्रस्तरꣳ हरति जुहोति स्वरु मयज्ञवेशसाय"-इति (तै० सं० ६. ३. ४. ६.) ।

---

* 'अथ यस्मात् स्वरुर्नाम ? एतस्माद्वै'—एषोऽपच्छिद्यते, तस्यैतत् स्व मेवारुर्भवति, तस्मात् स्वरुर्नाम'--इति शत० ब्रा० ३. ७. १. २४ ।

तथा सति यूपप्रहरणे यः कामः उक्तः—'स कामः' 'तत्र' स्वरुप्रहरणे प्राप्तो भवतीति ; यूपप्रतिनिधित्वेन स्वरोः प्रक्षिप्तत्वात् । अथ यूपावस्थाने पशुप्राप्तिलक्षणः काम उक्तः, सोऽपि 'तत्र' प्रक्षेपपक्षे प्राप्तो भवति ; यूपस्य स्वरूपेणावस्थितत्वात् । तदेतत् स्वरुप्रहरण मापस्तम्बेन दर्शितम्—"जुह्वां स्वरु मवधायानूयाजान्ते जुहोति द्यां ते धूमो गच्छतु"-इति (७. २१. ४.) ॥

अथाग्नीषोमीयपश्वालम्भं विधत्ते—"सर्वाभ्यो वा एष देवताभ्य आत्मान मालभते, यो दीक्षते, ऽग्निः सर्वा देवताः, सोमः सर्वा देवताः ; स यदग्नीषोमीयं पशु मालभते, सर्वाभ्य एव तद्देवताभ्यो यजमान आत्मानं निष्क्रीणीते"-इति । 'यः' यजमानो 'दीक्षते' सोमयागे दीक्षां प्राप्नोति, स यजमानः सर्वदेवतार्थम् 'आत्मानम्' पशुत्वेनालब्धु मुपक्रमते । अत्र च योऽग्निर्यश्च सोमः, तावुभौ सर्वदेवतात्मकौ ; अग्नेराहुत्यधिकरणत्वेन, सोमस्य च होमद्रव्यत्वेन च, सर्वोपकारित्वात् । तथासत्यग्नीषोमदेवताकपश्वालम्भनेन सर्वदेवतानां सकाशाद् 'यजमानः' आत्मानं निष्क्रीणीतवान् भवति । तस्मादग्नीषोमीयः पशुरालब्धव्यः । सोऽय मर्थः श्रुत्यन्तरे सङ्गृहीतः—"पुरा खलु वावैष मेधायात्मान मारभ्य चरति, यो दीक्षितो यदग्नीषोमीयं पशु मालभत आत्मनिष्क्रयण मेवास्य सः"-इति (तै० सं० ६. १. ११. ६.) ।

अथ पूर्वोत्तरपक्षाभ्यां पशुशरीरस्य रूपविशेषं निश्चिनोति—"तदाहुर्द्विरूपोऽग्नीषोमीयः कर्त्तव्यो, द्विदेवत्यो हीति ; तत्तन्नादृत्यं ; पीव इव कर्त्तव्यः ; पीवोरूपा वै पशवः, कृशित इव खलु वै यजमानो भवति ; तद्यत्पीवा पशुर्भवति, यजमान मेव तत् स्वेन मेधेन समर्धयति"-इति । 'तत्' तत्राग्नीषोमीयपशौ ब्रह्मवादिनः

पूर्वपक्षम् 'आहुः'— यस्मादस्य पशोरग्निश्च सोमश्चेत्येते द्वे देवते, तस्माद् तदनुसारेण यः पशुः 'द्विरूपः' शुक्लकृष्णादिवर्णद्वयोपेतः 'कर्त्तव्यः' इति । तदेतद्ब्रह्मवादिनो मत मनादरणीयम् । किन्तु 'पीव इव' शरीरपुष्ट्या स्थूल एव पशुः 'कर्त्तव्यः'; लोके हि 'पशवः पीवोरूपा वै' मेदवृद्ध्या वै प्रायेण स्थूलरूपा एव भवन्ति । 'यजमानः' तु यज्ञानुष्ठानदिने 'कृशितः इव' उपवसद्दिनेषु स्वल्पक्षीराहारेण तदानीं कृश एव भवति। 'तत्' तथा सति यद्ययं 'पशुः' स्थूलो भवेत्, तेन पशुस्थौल्येन कृशशरीरं 'यजमान मेव' 'स्वेन मेधेन' स्वकीययज्ञसाधनरूपेण समृद्धं करोति ॥

पुनरपि पूर्वोत्तरपक्षाभ्यां पशुलक्षणस्य हविषः शेषभक्षण मुपपादयितुं पूर्वपक्ष माह—"तदाहुर्नाग्नीषोमीयस्य पशोरश्नीयात्पुरुषस्य वा एषो ऽश्नाति यो ऽग्नीषोमीयस्य पशोरश्नाति, यजमानो ह्येतेनात्मानं निष्क्रीणीत इति"-इति । 'तत्' तत्र पशौ पूर्वपक्षिणः 'आहुः'— 'अग्नीषोमीयस्य पशोः' मांसं 'नाश्नीयात्' ! यस्तद् भक्षयति, असौ 'पुरुषस्य' मांस मेव भक्षयति । यस्माद् 'यजमानः' 'एतेन' पशुना स्वात्मानं 'निष्क्रीणीते', तस्मात् तत्स्वरूपोऽयं पशुः । 'इति'-शब्दः पूर्वपक्षसमाप्त्यर्थः । तं निराकृत्य सिद्धान्त माह—"तत्तन्नादृत्यं ; वार्त्रघ्नं वा एतद्धविर्यदग्नीषोमीयो,ऽग्नीषोमाभ्यां वा इन्द्रो वृत्र महंस्तावेन मब्रूताम्,आवाभ्यां वै वृत्र मवधीर्वरं ते वृणावहा इति । वृणाथा मिति ; तावेत मेव वर मवृणातां,—श्वः सुत्यायां पशुं स एनयोरेषो ऽच्युतो वरवृतो ह्येनयोस्तस्मात्तस्याशितव्यं चैव लीप्सितव्यं च" इति । 'तत्' पूर्वपक्षिभिरुक्त मनादरणीयम् । यः 'अग्नीषोमीयः' पशुरस्ति, 'एतद्वार्त्रघ्नं' वृत्रहत्यानिमित्तं 'हविः' । कथ मेतदिति, तदुच्यते

—'अग्नीषोमाभ्यां' निमित्तभूताभ्याम् 'इन्द्रो वृत्रं हतवान्'। अस्यार्थस्य श्रुत्यन्तरप्रसिद्धिद्योतनार्थो 'वै'-शब्दः। सोऽय मर्थः श्रुत्यन्तरे "त्वष्टा हतपुत्रः"-इत्यनुवाके (तै०सं०२.४.१२.१.) प्रपञ्चितः। वृत्रे हते सतीन्द्रं प्रत्यग्नीषोमावेवम् 'अब्रूताम्'—हे इन्द्र! आवानिमित्तं वृत्रं हतवानसि, अतो वृत्रवधस्य निमित्तभूतौ आवां तव सकाशाद् 'वरं' प्रार्थयावहै। इत्युक्त्वा वरं प्रार्थितवन्तौ,—'श्वः सुत्यायां' परेद्युः सोमाभिषवे प्रसक्ते सति, पूर्वदिने पशुरूपं वरं वृतवन्तौ। 'स एषः' पशुः 'एनयोः' अग्नीषोमयोः 'अश्नुरनः' अवश्यं कर्त्तव्यः ; वरेण वृतत्वात्। 'तस्मात्' एवं प्रशस्तत्वात् 'तस्य' पशोर्मांसम् 'अशितव्यं' चैव' सर्वदा भक्षितव्य मेव। न केवलं भक्षणं, किन्तु 'लीप्सितव्यं च' भक्षणात् पूर्वं सादरेण महता लब्धमेष्टव्य मपि। तावेतौ पूर्वोत्तरपक्षौ शाखान्तरं सङ्गृह्णीते—"तस्मात्तस्य नाश्यं पुरुषनिष्क्रयण इव ह्यथो खल्वाहुरग्नीषोमाभ्यां वा इन्द्रो वृत्र मह्नन्निति ; यदग्नीषोमीयं पशु मालभते, वार्त्रघ्न एवास्य स तस्माद्वाश्यम्"-इति (तै० सं०६.१.११.६.) ॥

अत्र मीमांसा। प्रथमाध्याये चतुर्थपादे (जै० सू० २३. अधि० १२.) चिन्तितम्—

"यजमानः प्रस्तरोऽत्र गुणो वा नाम वा स्तुतिः ?
सामानाधिकरण्येन स्यादेकस्यान्यनामता ॥
गुणो वा यजमानोऽस्तु कार्ये प्रस्तरवर्त्तिते ।
अंगांगित्वाद्यभावेन पूर्ववन्नात्र संस्तुतिः ॥
सर्वभेदादनामत्वं गुणश्चेत्प्रक्रियेत सः ।
यागसाधनताद्वारा प्रधानप्रस्तरस्तुतिः ॥

इद माम्नायते—"यजमानः प्रस्तरः"-इति (२५१पृ०१०पं०),

तत्र यजमानस्य प्रस्तरशब्दो नामधेयम्; यागेनेत्यादाविव सामानाधिकरण्यात्। इत्येकः पक्षः। गुणविधिरित्यपरः। तत्रापि यजमानकार्ये जपादौ प्रस्तरस्य अचेतनस्य सामर्थ्याभावात्, प्रस्तरकार्ये स्रुग्धारणादौ यजमानस्य अशक्तत्वात्, यजमानरूपो गुणोऽभिधीयते*। एवं सति पश्चाच्छ्रुतस्य प्रस्तरशब्दस्य कार्यलक्षकत्वेऽपि प्रथमश्रुतो यजमानशब्दो मुख्यवृत्तिर्भविष्यति। न चात्र पूर्वन्यायेन स्तुतिः सम्भवति; अष्टाकपालद्वादशकपालयोरिवांशांशित्वाभावात्। 'वायुर्वै क्षेपिष्ठा देवता ऊर्जोऽवरुध्यै (तै० सं० २. १. १. १.)"-इतिवत् स्तुतिरिति चेत्, न; प्रस्तरादिधर्मवत् कस्यचिदुत्कर्षस्याप्रतीतेः। तस्मान्नामगुणयोरन्यतरत्वमिति प्राप्ते, ब्रूमः,—गोमहिषयोरिवात्यन्तप्रसिद्धत्वान्न नामधेयत्वं युक्तम्; गुणपक्षे, अग्नौ प्रहरणस्य प्रस्तरविषयत्वात्, यजमाने प्रहृते सति कर्मलोपः स्यात्। तस्मात् प्रस्तरशब्दो यजमानशब्देन स्तूयते। स यथा सिंहो देवदत्त इत्यत्र सिंहगुणेन शौर्यादिनोपेतो देवदत्तः सिंह इत्याख्यायते, तथा यजमानगुणेन यागसाधनत्वेन युक्तः प्रस्तरो यजमानशब्देन स्तूयते। एवं "यजमानो यूपो यजमानः प्रस्तरः"-इत्यादिषु (२५१ पृ०) द्रष्टव्यम्॥

चतुर्थाध्यायस्य द्वितीयपादे (जै० सू० १—७. † अधि० १.) चिन्तितम्—

"स्वरुं कुरुत इत्यत्र स्वरुर्यूपात् पृथक् क्रियाम्।
प्रयोजयेन्न वाद्योऽस्तु विशिष्टस्य विधानतः॥

---

* 'विधीयते' ख, ग, घ।

† तेषाञ्च सूत्राणां द्विर्व्याख्यानमुक्तं शबरस्वामिना। तदाह च तन्त्ररत्नकारः—'व्याख्यानान्तरं तु विस्तरीकृतस्य संक्षेपमाशायं कृतं भाष्यकारेण'—इति।

आद्यस्य यूपशकलस्य स्वरौ तस्य विशेषणे ।
विहिते लाघवं तस्मादनुनिष्पन्न एव सः ॥

अग्नीषोमीये पशौ श्रूयते—"यूपस्य स्वरुं करोति"-इति * । तत्र यूपो यथा छेदनस्य प्रयोजकः, तथा स्वरुः छेदनं प्रयोजयति । कुतः ? करोतीत्यनेन विशिष्टविधिप्रतीतेः । करोतिधातोर्भावना मुख्योऽर्थः । तत्र यूपशब्दोपलक्षितः खादिरादिवृक्षः करणम् ; छेदनादिरितिकर्तव्यता; छिन्नेन द्रव्येण स्वरुरुत्पादनीय इति विशिष्टविधिः । उत्पन्नस्य स्वरोर्विनियोग एव समाम्नातः—"स्वरुणा पशु मनक्ति"-इति (तै० सं० ५.५.७.१ †)। तस्मात् स्वरुः छेदनस्य प्रयोजक इति प्राप्ते, ब्रूमः ; —वक्ष्यमाणस्य यूपस्य यः प्रथमः पतितः शकलः, सः स्वरुरिति स्वरुत्वनाममात्रविधेर्लाघवात् स्वरुर्न छेदनस्य प्रयोजकः, किन्तु यूपप्रयुक्ते छेदने स्वय मनुनिष्पद्यते"-इति ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां प्रथमाध्याये
तृतीयः खण्डः ॥ ३ ॥

---

* शत० ब्रा० ३. ७. १. २४ । कात्या० श्रौ० १. ७. १७ ।

† 'स्वरुं मध्यमाय स्वधितिना पशुं समनक्ति घृतेनाक्तौ पशुं त्रायेथा मिति शिरसि । न वा स्वधितिना स्वरुणैव'-इति आप० श्रौ० ७. १४. ११, १२ ।

॥ अथ चतुर्थः खण्डः ॥

आप्रीभिराप्रीणाति॑ तेजो वै ब्रह्मवर्चसं माप्रिय॑स्तेजसैवैनं तद् ब्रह्मवर्चसेन समर्धयति॑ समिधो यजति॑ प्राणा वै समिधः॑ प्राणा हीदं सर्वं समिन्धते॑ यदिदं किञ्च॑ प्राणानेव तत् प्रीणाति॑ प्राणान् यजमाने दधाति॑ तनूनपातं यजति॑ प्राणो वै तनूनपात्स॑ हि तन्वः पाति॑ प्राणमेव तत्प्रीणाति॑ प्राणं यजमाने दधाति॑ नराशंसं यजति॑ प्रजा वै नरो वाक् शंसः॑ प्रजां चैव तद्वाचं च प्रीणाति॑ प्रजां च वाचं च यजमाने दधातीळो॑ यजत्यन्नं॑ वा इळो॑ ऽन्नमेव तत्प्रीणात्यन्नं यजमाने दधाति॑ बर्हिर्यजति॑ पशवो वै बर्हिः॑ पशूनेव तत्प्रीणाति॑ पशून्यजमाने दधाति॑ दुरो यजति॑ वृष्टिर्वै दुरो॑ वृष्टिमेव तत्प्रीणाति॑ वृष्टिमन्नाद्यं यजमाने दधात्युषासानक्ता यजत्य॑होरात्रे वा उषासानक्ता॑होरात्रे एव तत्प्रीणात्य॑होरात्रयोर्यजमानं दधाति॑ दैव्या होतारा यजति॑ प्राणापानौ वै दैव्या होतारा॑ प्राणापानावेव तत्प्रीणाति॑ प्राणापानौ यजमाने दधाति॑ तिस्रो देवीर्यजति॑ प्राणो वा अपानो व्यानस्तिस्रो देव्यस्ता॑ एव तत् प्रीणाति॑ ता यजमाने दधाति॑ त्वष्टारं यजति॑ वाग्वै

त्वष्टा वाग्घीदं सर्वं ताष्टीव॑ वाच मेव तत्प्रीणाति॑ वाचं यजमाने दधाति॑ वनस्पतिं यजति॑ प्राणो वै वनस्पति॑: प्राण मेव तत्प्रीणाति॑ प्राणं यजमाने दधाति॑ स्वाहाकृतीर्यजति॑ प्रतिष्ठा वै स्वाहाकृतय:॑ प्रतिष्ठाया मेव तद्यज्ञ मन्ततः प्रतिष्ठापयति॑ ताभिर्यथऋष्याप्रीणीयाद्॑यथऋष्याप्रीणाति यजमान मेव तद्बन्धुताया नोत्सृजति॑ ॥ ४ ॥

अग्नीषोमीयं पशुं विधाय तत्रैकादश प्रयाजान् विधत्ते—"आप्रीभिराप्रीणाति" इति। तेषां प्रयाजादीनां याज्याः प्रीतिहेतुत्वादाप्रीशब्देनोच्यन्ते। एतच्च शाखान्तरे श्रुतम्—"आप्रीभिराप्नुवन् तदाप्रीणा माप्रीत्वम्"-इति *। ताभिराप्रीसञ्ज्ञकाभिः प्रयाजादिभिः 'आप्रीणाति' देवताः, सर्वत्र प्रीणयेत्; तत्प्रीत्यर्थं याज्याः पठेदित्यर्थः। ताः प्रशंसति—"तेजो वै ब्रह्मवर्चस माप्रियस्तेजसैवैनं तद् ब्रह्मवर्चसेन समर्द्धयति"-इति। आज्य-

---

* अत एवोक्तं यास्केन—"अथात आप्रियः। आप्रियः कस्मात्? आप्नोतेः, प्रीणातेर्वा; 'आप्रीभिराप्रीणाति'-इति च ब्राह्मणम्"-इति नि० ८. २. १। इत आरभ्य अध्यायान्तं यावदाप्रीविचाराः। 'यज्ञो वै प्रजापतिः०---०स एता आप्रीरपश्यत्, ताभिर्वै स मुखत आत्मान माप्रीणीत ; यदेता आप्रियो भवन्ति'-इत्यादि तै० सं० ४. ७. ८. ३। 'यथाप्रीभिश्चरन्ति ०---०र्यो दीक्षते, तस्य शिरश्चान ११ आत्मा भवति, त एताभिराप्रीभिराप्याययन्ति ; तद्यदाप्याययन्ति, तस्मादाप्रियो नाम। तस्मादाप्रीश्चरन्ति। ते वा एत एकादश प्रयाजा भवन्ति'-इत्यादि च शत० ब्रा० ३. ८. १ ; पुनरश्वमेधप्रकरणे 'तम् (पशुम्) एताभिराप्रीभिराप्रीणात्'-इत्याद्यपि १३. ८. १. ५. ।

द्योतकत्वात्तेजस्त्वम्, शास्त्रीयसंस्कारसाधनत्वात् ब्रह्मवर्चसत्वम्। तेन याज्यापाठेन यजमानस्य तदुभयं समृद्धं भवति ॥

प्रथमं प्रयाजं विधत्ते—"समिधो यजति"-इति। समिन्नामकदेवतात्वात् यागोऽपि समिधइति-शब्देनोच्यते। समिन्नामकयागं कुर्यादित्यर्थः यद्वा, हौत्रप्रकरणत्वात् समिद्देवताविषयां याज्यां पठेदित्यर्थः। तत्प्रकारं बोधायन आह—"यदा जानाति समिद्धः प्रेष्येति तं मैत्रावरुणः प्रेष्यति होता यक्षदग्निं समिधा सुषमिधा समिद्ध मित्यथ होता यजति समिद्धो अद्य मनुषो दुरोणे तावेव मेव व्यतिषङ्ग मुत्तरेण मैत्रावरुणः प्रेष्यति, उत्तरेणोत्तरेण होता यजति"-इति। अस्याय मर्थः—"समिधः प्रेष्य"-इति मन्त्रेणाध्वर्युः मैत्रावरुणं प्रेष्यति। तदानी मयं मैत्रावरुणः प्रैषसूक्तेन "होता यक्षदग्निं समिधा"-इत्यनेन (तै०ब्रा०२,६.२.) प्रथममन्त्रेण होतारं प्रेष्यति। होताप्याप्रीसूक्ते * "समिद्धो अद्य"-इत्येतां (सं० १. १८८. १.) प्रथमयाज्यां पठति। एव मुत्तरत्राध्वर्युः मैत्रावरुणहोतारौ परस्परसन्निधौ स्वस्वमन्त्रयागं कुर्याता मिति तत्र प्रथमा याज्या इति ॥ ॥ अथ समिद्-देवतां प्रशंसति—"प्राणा वै समिधः, प्राणा हीदं सर्वं समिन्धते यदिदं किञ्च; प्राणानेव तत् प्रीणाति, प्राणान् यजमाने दधाति"-इति। 'समिधः' समिन्धनस्य सम्यक्-प्रकाशहेतवः प्रथमप्रयाजदेवताः। प्राणस्वरूपदेवताया एकत्वेऽपि समिध इति बहुवचनं पूजार्थम्। जगति 'यत्किञ्चिदिदं' शरीरजात मस्ति, तत् 'सर्वं' 'प्राणाः' 'समि-न्धते' प्रकाशयन्ति; अतस्तेषां समिद्रूपत्वम्। 'तत्' तेन

---

* समिद्धो अद्य इत्येकादशर्चं नवमं (सं० १. २४. ९=१८८.) सूक्त मागस्त्यम्। प्रैषावगच्छाना मेकादशप्रयाजरूप मिद माप्रीसूक्तम्।

याज्यापाठेन 'प्राणमेव' तोषयति, तत् 'यजमाने' अपि 'प्राणम्' सम्पादयति ॥

अत्र प्रयाजानां क्रमेण,— समिधः, तनूनपात्, नराशंसः, इळः, बर्हिः, दुरः, उषासानक्ता, दैव्याहोतारा, तिस्रोदेव्यः, त्वष्टा, वनस्पतिः, स्वाहाकृतयः,—इत्येता देवताः वसिष्ठशुन-काश्विवध्र्यश्वराजन्यानां नराशंसो द्वितीयः, अन्येषां तनूनपाद्द्वितीयः ॥

तद्देवताविषयां द्वितीयां याज्यां विधत्ते—"तनूनपातं यजति ; प्राणो वै तनूनपात् ; स हि तन्वः पाति, प्राण मेव तत्प्रीणाति,— प्राणं यजमाने दधाति"-इति । अत्राध्वर्युप्रैषप्रकार मापस्तम्ब आह—"समिद्भ्यः प्रेष्येति प्रथमं सम्प्रेष्यति । प्रेष्य प्रेष्येतीतराम्"-इति (श्रौ० ७. १४. ७) । अतो ऽस्माद् द्वितीयपर्याये प्रेष्येति-मन्त्रेणाध्वर्युर्मैत्रावरुणं प्रेषयति । स च मैत्रावरुणः प्रैषसूक्तगतेन "होता यक्षत्तनूनपातम्"-इत्यनेन द्वितीयमन्त्रेण होतारं प्रेषयति । स तु होता आप्रीसूक्तगतां "तनूनपात्"-इत्येतां द्वितीयां याज्यां पठेत् । तनूं शरीरं न पातयतीति तनूनपात् । शरीरे वसति प्राणे न पतति, किन्तु प्राणः शरीराणि चालयति ; अतस्तनून-पाद्देवस्य प्राणरूपत्वम् ॥

द्वितीयप्रयाजयाज्यान्तरं विधत्ते—"नराशंसं यजति ; प्रजा वै नरो, वाक् शंसः, प्रजां चैव तद्वाचं च प्रीणाति,— प्रजां च वाचं च यजमाने दधाति"-इति । अध्वर्युप्रेषितो मैत्रावरुणो "होता यक्षन्नराशꣳसम्"-इति मन्त्रेण होतारं प्रेष्यति । होता "नराशꣳसस्य"-इति याज्यां पठेत् । नरान् मनुष्यान् शंसति वाचा स्तौतीति नराशंसः । तथा सति प्रजाया नरशब्द-

वाच्यत्वान्नाराशंसस्य प्रशंसाहेतुत्वादुभयप्रीतिः; यजमानेऽपि तदुभयसम्पत्तिः ॥ अनयोरुभयोर्मन्त्रयोरधिकारिभेदेन व्यवस्था मापस्तम्ब आह—"नराशंसो द्वितीयः प्रयाजो वसिष्ठशुनकानाम्; तनूनपादितरेषां गोत्राणाम्"-इति ॥

तृतीयां प्रयाजयाज्यां विधत्ते—"इळो यजत्यन्नं वा इळो ऽन्न मेव तत्प्रीणाति,— अन्नं यजमाने दधाति"-इति। "होतायक्षदग्नि मिळ ईळितः"-इति प्रेषितो होता "आ जुह्वानः"-इत्येतां याज्यां पठेत्। इष्यत इति व्युत्पत्त्यान्न मिट्शब्दवाच्यम् ॥

चतुर्थीं विधत्ते— "बर्हिर्यजति; पशवो वै बर्हिः, पशूनेव तत्प्रीणाति,—पशून्यजमाने दधाति"-इति। "होता यक्षद्बर्हिः सुष्टरीम्"-इतिमन्त्रेण प्रेषितो होता "प्राचीनं बर्हिः"-इत्येतां याज्यां पठेत्। बृंहणस्य पोषणस्य हेतुर्बर्हिः; पशवश्च क्षीरादिदानेन तादृशत्वाद्बर्हिःस्वरूपाः ॥

अथ पञ्चमीं विधत्ते—"दुरो यजति; वृष्टिर्वै दुरो, वृष्टि मेव तत् प्रीणाति,—वृष्टि मन्नाद्यं यजमाने दधाति"-इति। "होता यक्षद् दुर ऋष्वा"-इत्यादिना मन्त्रेण प्रेषितो होता "व्यचस्वतीरुर्विया"-इत्येतां याज्यां पठेत्। 'दुरः' द्वारदेवताः; वृष्टिश्च जीवनद्वारा ॥

षष्ठीं विधत्ते—"उषासानक्ता यजत्यहोरात्रे वा उषासानक्ताहोरात्रे एव तत्प्रीणात्यहोरात्रयोर्यजमानं दधाति"-इति। "होता यक्षदुषासानक्ता"-इतिमन्त्रेण प्रेषितो होता "आ सुष्वयन्ति"-इत्यादिकां याज्यां पठेत्। उषः-शब्दस्य नक्त-शब्दस्य चाहोरात्रविषयत्वं लोकप्रसिद्धम् ॥

सप्तमीं विधत्ते—"दैव्या होतारा यजति; प्राणापानौ दैव्या होतारा, प्राणापानावेव तत्प्रीणाति,—प्राणापानौ यजमाने दधाति"-इति । "होता यक्षद् दैव्या होतारा"-इतिमन्त्रेण प्रेषितो होता "दैव्या होतारा प्रथमा"-इति याज्यां पठेत् ॥

अष्टमीं विधत्ते—"तिस्रो देवीर्यजति ; प्राणो वा अपानो व्यानस्तिस्रो देव्यस्ता एव तत्प्रीणाति,—ता यजमाने दधाति"-इति। "होता यक्षत् तिस्रः"-इत्यादिमन्त्रेण प्रेषितो होता "आ नो यज्ञम्"-इति याज्यां पठेत् । इळा-सरस्वती-भारतीति-शब्दैरभिधेया देव्यो यथा तिस्रः, एवं प्राणापानव्याना अपि ; सङ्ख्यासाम्यात् तिस्रो देव्यः ॥

नवमीं विधत्ते—"त्वष्टारं यजति ; वाग्वै त्वष्टा, वाग्घीदं सर्वं ताष्टीव वाच मेव तत्प्रीणाति,—वाचं यजमाने दधाति"-इति । "होता यक्षत् त्वष्टारम्"-इतिमन्त्रेण प्रेषितो होता "य इमे द्यावापृथिवी"-इति याज्यां पठेत् । "तक्षू त्वक्षू तनूकरणे"-इत्यत्र त्वक्षीत्यादिधातोरुत्पन्नः शब्दस्त्वष्टारं देवता माचष्टे । वाचश्च तक्षणहेतुत्वात् त्वष्टृत्वम् । तदेव वाग्घीत्यनेन स्पष्टीक्रियते । यस्मात् 'इदं सर्वं' जगद् 'वाग्' 'ताष्टीव' तक्षतीव ; यथा तक्षणेन काष्ठं प्रौढ मपि सूक्ष्मं भवति, एवं महान्तोऽपि पर्वतादयोऽल्पेनैव शब्देन गृह्यन्ते ; तदेतज्जगत्तक्षण मिव भवति ॥

दशमीं विधत्ते—"वनस्पतिं यजति ; प्राणो वै वनस्पतिः, प्राण मेव तत्प्रीणाति,—प्राणं यजमाने दधाति" इति । "होता यक्षद्वनस्पतिम्"-इत्यादिमन्त्रेण प्रेषितो होता "उपावसृजत्"-इति याज्यां पठेत् । वनस्पतिजन्यफलानां प्राणस्थितिहेतुत्वाद् वनस्पतेः प्राणत्वम् ॥

एकादशीं विधत्ते—"स्वाहाकृतीर्यजति ; प्रतिष्ठा वै स्वाहाकृतयः,—प्रतिष्ठाया मेव तद्यज्ञ मन्ततः प्रतिष्ठापयति"-इति । "होता यक्षदग्निᳫं स्वाहा"-इतिमन्त्रेण प्रेषितो होता "सद्यो जातः"-इति याज्यां पठेत् । स्वाहाकृतीना माहुतिसमाप्तिहेतुत्वात् प्रतिष्ठात्वम् । 'तत्' मन्त्रपाठेनैनं 'यज्ञम्' 'अन्ततः' समाप्य संवत्सरे 'प्रतिष्ठाया मेव' वैकल्यराहित्यरूपायां 'प्रतिष्ठापयति'* ॥

इयतो बहुविधाना माप्रीसूक्ताना माम्नातत्वाद्वैकल्पः स्यादित्याशङ्क्याधिकारिभेदेन व्यवस्थां विधत्ते—"ताभिर्यथऋष्याप्रीणीयाद्यथऋष्याप्रीणाति†,—यजमान मेव तद्बन्धुताया नोत्सृजति"-इति । 'नोत्सृजति' न निःसारयति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां प्रथमाध्याये
चतुर्थः खण्डः ॥ ४ ॥

---

* तैत्तिरीयब्राह्मणे तृतीयकाण्डस्य द्वितीयानुवाके 'होता यक्षदग्निम्'-इत्यादयः एकादशप्रयाजविषया द्वादश मैत्रावरुणप्रैषमन्त्राः, तृतीये 'समिद्धो अद्य मनुषः'-इत्यादयः द्वादश होतुर्याज्याश्च एतद्ब्राह्मणविधिक्रमत एव श्रुताः । माध्यन्दिन्यां च तथा आप्रियः २१. १२—२२, प्रयाजप्रैषमन्त्राश्च २१. २९—४०. द्रष्टव्याः । 'तान्येकादशाप्रीसूक्तानि'-इत्यादि नैरुक्तम्, दुर्गाचार्यकृतं तद्व्याख्यानं चेहालोच्यम् (८, ३. ७.) ।

† 'एकादश प्रयाजाः । तेषां प्रैषाः । प्रथमं प्रैषसूक्त सूक्तं द्वितीये । अध्वर्युप्रेषितो मैत्रावरुणः प्रेष्यति प्रैषैर्होतारम् । होता यजत्याप्रीभिः प्रैषलिङ्गाभिः । समिद्धो अग्निरिति शुनकानां, जुषस्व नः समिध मिति वसिष्ठानां, समिद्धो अद्येति सर्वेषाम् । यथऋषि वा'।

॥ अथ पञ्चमः खण्डः ॥

पर्यग्नये क्रियमाणायानुब्रूहीत्याहाध्वर्युरग्निर्होता नो अध्वर इति' तृच माग्नेयं गायत्र मन्वाह पर्यग्निक्रियमाणे' स्वयैवैनं तद्देवतया स्वेन छन्दसा समर्धयति' वाजी सन् परिणीयत इति' वाजिन मिव ह्येनं सन्तं परिणयन्ति' परि त्रिविष्ट्यध्वरं' यात्यग्नी रथीरिवेत्येष हि रथीरिवाध्वरं परियाति परि वाजपतिः कविरित्येष हि वाजानां पतिरत उपप्रेष्य होतर्हव्या देवेभ्य इत्याहाध्वर्युरजैदग्निरसनद्वाज मिति' मैत्रावरुण उपप्रैषं प्रतिपद्यते' तदाहुर्यदध्वर्युर्होतार मुपप्रेष्यत्यथ कस्मान्मैत्रावरुण उपप्रैषं प्रतिपद्यत इति' मनो वै यज्ञस्य मैत्रावरुणो' वाग्यज्ञस्य

प्राजापत्यं तु जामदग्न्यः सर्वेषाम्'—इति आश्व० श्रौ० ३. २. १—८। अत्र ग्रन्थकृत्स्वपक्षे भगवता शौनकेनैषः श्लोक उक्तः—'कण्वाङ्गिरोऽगस्त्यशुनका विश्वामित्रोऽत्रिरेव च। वसिष्ठः कश्यपो वाध्र्यश्वो जमदग्निरथोत्तमः'—इति। तदेवम्—तत्र दशानां सूक्तानां प्रथमं कण्वानां 'सुसमिद्धो न आवह'—इति (१. १३.)। द्वितीयं तदङ्गिरसामा मङ्गिरसां 'समिद्धो अद्य आवह'—इति (१.१४२.)। तृतीय मगस्त्यानां 'समिद्धो अद्य राजसि' इति (१.१८८.)। चतुर्थं शुनकानां 'समिद्धो अग्निर्निहितः'—इति (२.३.)। पञ्चमं विश्वामित्राणां 'समित्समित्सुमनाः'-इति (३.४.)। षष्ठ मत्रीणां 'सुसमिद्धाय शोचिषे' इति (५.५.)। सप्तमं वसिष्ठानां 'जुषस्व नः समिधम्'—इति (७.२)। अष्टमं कश्यपानां 'समिद्धो विश्वतस्पतिः'-इति (९.५.)। नवमं वाध्र्यश्वानाम् 'इमां मे अग्ने समिधं जुषस्व'-इति (१०.७०.)। शुनकवाध्र्यश्ववर्जितानां भृगूणां दशमं 'समिद्धो अद्य मनुषो दुरोणे'-इति (९. ११०.)। यथाविपक्षं विवेकोऽयम्॥

होता मनसा वा इषिता वाग्वदति यां ह्यन्यमना वाचं वदत्यसुर्या वै सा वागदेवजुष्टा तद्यन्मैत्रावरुण उपप्रैषं प्रतिपद्यते मनसैव तद्वाच मीरयति तन्मनसेरितया वाचा देवेभ्यो हव्यं सम्पादयति ॥ ५ ॥

आप्रियो विधाय पर्यग्निकरणा ऋचो विधातु मादौ प्रैषमन्त्रं विधत्ते—"पर्यग्नये क्रियमाणायानुब्रूहीत्याहाध्वर्युः"-इति। पर्यग्निकरणस्य स्वरूप मापस्तम्बो दर्शयति— "आहवनीयादुल्मुक मादायाग्नीध्रः परि वाजपतिः कविरिति त्रिः प्रदक्षिणं पर्यग्नि करोति पशुम्"-इति (७. १५, २.)। एवं परितः 'क्रियमाणाय अग्नये' योग्या ऋचः, हे मैत्रावरुण! त्वम् 'अनुब्रूहि'। अनेनैव मन्त्रेण 'अध्वर्युः' प्रेषयेत् ॥

मैत्रावरुणेनानुवक्तव्यास्तिस्र ऋचो विधत्ते—"अग्निर्होता नो अध्वर इति (सं० ४.१५.१—३.) तृच माग्नेयं गायत्र मन्वाह, पर्यग्नि क्रियमाणे स्वयैवैनं तद् देवतया स्वेन च्छन्दसा समर्द्धयति"-इति। पशोः परितोऽग्निरित्यस्मिन्नर्थे पर्यग्नीत्युच्यते। तस्मिन् क्रियमाणे तृचं मैत्रावरुणो ब्रूयात्। तदाहाश्वलायनः—"प्रेषितो मैत्रावरुणोऽग्निर्होता न इति तृचं पर्यग्नयेऽन्वाह"-इति (३.२.९.)। तृचस्यादावग्निरित्युक्तत्वादाग्नेयत्वम्; छन्दश्च तृचस्य गायत्रम्। परितः क्रियमाणोऽग्निरेव, मन्त्रप्रतिपाद्योऽपि स एव; अतः 'स्वयैव देवतया'-इत्युच्यते। अग्निगायत्र्योर्मुखजत्वसाम्यात् छन्दसः स्वत्वम्। 'नः' अस्माकम् 'अध्वरे' यज्ञे अयम् 'अग्निः' 'होता' यज्ञनिष्पादकः,-इति तस्य पादस्यार्थः। द्वितीयं पाद मनूद्य व्याचष्टे—"वाजी

सन् परिणीयत इति वाजिन मिव ह्येनं सन्तं परिणयन्ति” इति । अय मग्निः ‘वाजी’ अन्नप्रदानेनान्नवान्, गतिमान् वा, तादृशः ‘सन्’ ऋत्विग्भिः पशोः परितो नीयते,—तस्मादपाठेन ‘एनम्’ अग्निं ‘वाजिनम्’ एव सन्तं ऋत्विजः परितो नयन्ति ॥

द्वितीयस्या ऋचः पूर्वार्धं मनूद्य तात्पर्यं दर्शयति—“परि त्रिविष्ट्यध्वरं यात्यग्नी रथीरिवेति (सं० ४. १५. २.),—एष हि रथीरिवाध्वरं परियाति”-इति ॥

तृतीयस्या ऋचः प्रथमपाद मनूद्य व्याचष्टे—“परि वाजपतिः कविरिति (सं०४.१५.३.),—एष हि वाजानां पतिः”-इति । ‘कविः’ अनूचानः ; “ये वा अनूचानास्ते कवयः”-इति श्रुतेः * । तादृशोऽग्निः ‘वाजपतिः’ अन्नस्वामी । ‘एष हि’-इत्यादिना तदर्थप्रसिद्धिरुच्यते । अन्नभक्षकत्वाद्वाजपतिः ॥

अथ होतारं प्रति मैत्रावरुणप्रैषार्थं, मैत्रावरुणं प्रत्यध्वर्योः प्रैषमन्त्रं विधत्ते—“अत उपप्रेष्य होतर्हव्या देवेभ्य इत्याहाध्वर्युः”-इति । ‘अतः’ पर्यग्निकरणानुवचनादूर्ध्वम् ‘अध्वर्युः’ ‘उपप्रेष्य’-इत्यादिकं प्रैषमन्त्रं पठेत् । ‘होतः ! देवेभ्यः’ हवींषि ‘उपप्रेष्य’ प्रेरयेति तस्यार्थः । अत्र मैत्रावरुणस्य होतृसमीपे वरणीयत्वाद्धोतृशब्द उपलक्षकः । तथा सति मैत्रावरुणं प्रत्यध्वर्योर्मन्त्रो भविष्यति ॥

अथ मैत्रावरुणेन पठनीयं मन्त्रं विधत्ते—“अजैदग्निरसनद्वाज मिति मैत्रावरुण उपप्रैषं प्रतिपद्यते”-इति । अथ शामित्रदेशं प्रति नीयमानस्य पशोः पुरतो यः उल्मुकाकारो-

---

“एते वै कवयो यदृषयः”-इति शत० ब्रा० १. ४, २. ८ ।

ऽग्निः गच्छति, सः 'अग्निः' 'अजैत्' जयतु। यष्टोः पुरस्तादग्नेर्गमनं शाखान्तरे श्रूयते— "अग्निना पुरस्तादेति रक्षसा मपहत्यै"-इति (तै० सं० ६.३.८.२.)। तस्याग्नेर्जयो नाम हविःसम्पादनसामर्थ्यम्। सोऽग्निः 'वाजम्' अन्नं हविर्लक्षणम् 'असनत्'। अस्य मन्त्रस्यान्तः "उपप्रेष्य होतर्हव्या देवेभ्यः"-इति श्रूयते* यतः, अतो होतारं प्रति मैत्रावरुणः ; मुख्यस्याध्वर्युप्रैषस्य समीपवर्त्तित्वादय मुपप्रैषः ॥

अत्र ब्रह्मवादिनां चोद्यं वैयधिकरण्यरूप मुद्भावयति—"तदाहुर्यदध्वर्युर्होतार मुपप्रेष्यत्यथ कस्मान् मैत्रावरुण उपप्रैषं प्रतिपद्यत इति"-इति। अध्वर्युप्रयुक्ते मन्त्रे होतुः सम्बोधितत्वात् मैत्रावरुणस्य मन्त्रपाठे वैयधिकरण्यम्। तस्य चोद्यस्य परिहारं दर्शयति—"मनो वै यज्ञस्य मैत्रावरुणो, वाग्यज्ञस्य होता ; मनसा वा इषिता वाग्वदति, यां ह्यन्यमना वाचं वदत्यसुर्या वै सा वागदेवजुष्टा; तद्यन् मैत्रावरुण उपप्रैषं प्रतिपद्यते, मनसैव तद्वाच मीरयति,—तन्मनसेरितया वाचा देवेभ्यो हव्यं सम्पादयति"-इति। यज्ञपुरुषस्य मैत्रावरुणो मनःस्थानीयः ; होता तु वाक्स्थानीयः। लोके हि मनसैव प्रेरिता वाक्, शब्द मुच्चारयति ; यदा त्वन्यमनस्कः पुरुषो वाचं ब्रूते, 'सा' वाक् 'असुर्या' असुराणां प्रिया, 'न तु देवजुष्टा' देवानां न प्रिया। तथा सति यदि मैत्रावरुणः प्रथम मुपप्रैषं ब्रूते, मनसैव वाक् प्रेरिता भवति ; ततो मनसा प्रेरितया वाचा देवेभ्यो हव्यं सम्पादितं भवति।

---

* सोऽयं मन्त्रः—"अजैदग्निः असनद् वाजं नि देवो देवेभ्यो हव्यावाट् प्राञ्जोभिर्हिन्वानः धेनाभिः कल्पमानः यज्ञस्यायुः प्रतिरन् उपप्रेष्य होतः हव्या देवेभ्यः"—इति तै०ब्रा०३,६,५,१।

अन्यथा तथैवासुरेभ्यः सम्पादितं स्यात्। तस्मादध्वर्युणा होतरित्येवं सम्बोधितेऽपि मैत्रावरुणोक्तप्रैषपूर्वक मेव होतृवचनं युक्तम् ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां प्रथमाध्याये
पञ्चमः खण्डः ॥ ५ ॥

॥ अथ षष्ठः खण्डः ॥

दैव्याः शमितार आरभध्व मुत मनुष्या इत्याह ये चैव देवानां शमितारो ये च मनुष्याणां तानेव तत्संशास्त्युपनयत मेध्या दुर आशासाना मेधपतिभ्यां मेध मिति पशुर्वै मेधो यजमानो मेधपतिर्यजमान मेव तत् स्वेन मेधेन समर्द्धयत्यथो खल्वाहुर्यस्यै वाव कस्यै च देवतायै पशुरालभ्यते सैव मेधपति रिति स यद्येकदेवत्यः पशुः स्यान् मेधपतय इति ब्रूयाद् यदि द्विदेवत्यो मेधपतिभ्या मिति यदि बहुदेवत्यो मेधपतिभ्य इत्येतदेव स्थितं प्रास्मा अग्निं भरतेति पशुर्वै नीयमानः स मृत्युं प्रापश्यत्

स देवान्नान्वकामयतैतुं तं देवा अब्रुवन्नेहि स्वर्गं वै त्वा लोकं गमयिष्याम इति स तथेत्यब्रवीत् तस्य वै मे युष्माक मेकः पुरस्तादैत्विति तथेति तस्याग्निः पुरस्तादैत्सोऽग्नि मनु प्राच्यवत तस्मादाहुराग्नेयो वाव सर्वः पशुरग्निं हि सोऽनु प्राच्यवतेति तस्माद्वस्याग्निं पुरस्ताद्धरन्ति स्तृणीत बर्हिरित्योषध्यात्मा वै पशुः पशु मेव तत्सर्वात्मानं करोत्यन्वेनं माता मन्यता मनु पितानु भ्राता सगर्भ्यो ऽनु सखा सयूथ्य इति जनित्रैरेवैनं तत्स मनुमत मालभन्त उदीचीनाँ अस्य* पदो निधत्तात्सूर्यं चक्षुर्गमयताद्वातं प्राण मन्ववसृजतादन्तरिक्ष मसुं दिशः श्रोत्रं पृथिवीं शरीर मित्येष्वेवैनं तल्लोकेष्वा†दधात्येकधास्य त्वच माच्छ्यतात्पुरा नाभ्या अपि शसो वपा मुत्खिदतादन्तरेवोष्माणं वारयध्वादिति पशुष्वेव तत् प्राणान् दधाति श्येन मस्य वक्षः कृणुतात् प्रशसा बाहू शला दोषणी कश्यपेवांसा ऽच्छिद्रे श्रोणी कवषोरू स्रेकपर्णा ऽष्ठीवन्ता षड्विंशतिरस्य वङ्क्रयस्ता अनुष्ठ्योच्च्यावयताद् गात्रं-गात्र मस्या-

---

* 'उदीचीनां अस्य' क, ख, ग, ङ, टी० ख, घ ।

† 'तं लोकेष्वा' ख, ग, ङ ।

नूनं कृणुतादित्यङ्गान्येवास्य तद्यथावि प्रीणात्यूवध्यगोहं पार्थिवं खनतादित्याहौषधं वा ऊवध्यमियं वा ओषधीनां प्रतिष्ठा तदेनत् स्वायामेव प्रतिष्ठायामन्ततः प्रतिष्ठापयति ॥ ६ ॥

मैत्रावरुणीयप्रैषादूर्ध्वं होतुरध्रिगुप्रैषो बौधायनेन दर्शितः—"यदा जानात्युपप्रेष्य होतर्हव्या देवेभ्य इति, तं मैत्रावरुणः प्रेष्यत्यजैदग्निरित्यथ होताध्रिगु मन्वाह दैव्याः शमितार इति"-इति। 'अध्रिगुः' कश्चिद्देवः पशुविशसनस्य कर्त्ता ; तं प्रति होता "दैव्याः शमितारः"-इत्यादिकं प्रैषमन्त्र मनुब्रूयादिति तस्य सूत्रवाक्यस्यार्थः। त मिमं सूक्तमन्त्रं * विधत्ते—"दैव्याः शमितार आरभध्व मुत मनुष्या इत्याह"-इति (तै० सं० ३. ६. ६. †)। हे 'दैव्याः' देवसम्बन्धिनः, 'शमितारः' पशुविशसनकारिणः ! 'आरभध्वम्' विशसनस्योपक्रमं कुरुत। 'उत मनुष्याः' अपि मनुष्यरूपा अपि शमितारः आरभध्व मित्यादिक मध्रिगुप्रैषमन्त्रं होता पठेत् ॥

यथोक्तमन्त्रस्य प्रथमपादं व्याचष्टे—"ये चैव देवानां शमितारो, ये च मनुष्याणां, तानेव तत् संशास्ति"-इति। 'तत्' तेन प्रथमपादभागेन द्विविधजातीयान् प्रशमितॄन् प्रेरयति।

मन्त्रस्य द्वितीयभाग मनुवदति—"उपनयत मेध्या दुर आशासाना मेधपतिभ्यां मेध मिति"-इति। प्रारम्भे किं कर्त्तव्य मिति

---

* 'सूक्तोक्त मर्थं' ख, ग, घ।

† एष चाध्रिगुप्रैषमन्त्रोऽन्यशाखीय इति कल्पकारेण सपठ्य विहित. (आश्व०३.३.१.)।

वैत्, तदुच्यते—'मेध्याः' मेधार्हाः 'दुरः' द्वारो हविर्भागान्, विशसनहेतोर्वा, 'उपनयत' सन्निधापयत, 'मेधपतिभ्याम्' यज्ञस्वामिभ्याम्' पत्नीयजमानार्थमग्नीषोमदेवतार्थं वा, 'मेधं' यज्ञम् 'आशासानाः' प्रार्थयमानाः। हे शमितारो यूय मुपनयत। अत्र मेधशब्दं मेधपतिशब्दं च व्याचष्टे—"पशुर्वै मेधो यजमानो मेधपतिर्यजमान मेव तत् स्वेन मेधेन समर्धयति"-इति। मतान्तरानुसारेण मेधपतिशब्दस्यार्थं दर्शयति— "अथो खल्वाहुर्यस्यै वाव कस्यै च देवतायै पशुरालभ्यते, सैव मेधपतिरिति"-इति। अस्तु मेधपतिशब्दो देवतापरः, तावता च को लाभ इत्याशङ्क्याह—"स यद्येकदेवत्यः पशुः स्यान्मेधपतये इति ब्रूयाद्, यदि द्विदेवत्यो मेधपतिभ्या मिति, यदि बहुदेवत्यो मेधपतिभ्य इति,—एतदेव स्थितम्"-इति।

तृतीयभाग मनुवदति—"प्रास्मा अग्निं भरतेति"-इति। 'अस्मै' पश्वर्थं हे शमितारः! 'अग्निं' 'प्रभरत' प्रथमं नयत।

प्रथमतो नयन मुपपादयितु माख्यायिका माह— "पशुर्वै नीयमानः स मृत्युं प्रापश्यत्, स देवान्नान्वकामयतैतुं; तं देवा अब्रुवन्नेहि स्वर्गं वै त्वा लोकं गमयिष्याम इति; स तथेत्यब्रवीत्तस्य वै मे युष्माक मेकः पुरस्तादैत्विति; तथेति; तस्याग्निः पुरस्तादैत्सोऽग्नि मनुप्राच्यवत"-इति। शामित्रदेशं प्रति 'नीयमानः पशुः' प्रत्यक्षेण 'मृत्युं' दृष्टवान्। ततः 'सः' पशुः 'देवान् अनु' 'एतुं न-अकामयत' आगन्तुं नैच्छत्। ततो देवाः पशुं प्रत्येव मब्रुवन्—हे पशो! त्व मागच्छ। त्वया सह वयं सर्वे स्वर्गं गच्छाम इति। पशुश्च तदङ्गीकृत्य देवान् प्रत्येव मब्रवीत्—'युष्माकं' मध्ये कश्चिद् देवो मम 'पुरस्ताद् एतु'-'इति'। तद्वचन मङ्गीकृत्य 'अग्निः' देवः

'तस्य' पशोः 'पुरस्तात्' अगच्छत्। ततः 'सः' पशुस्तम् 'अग्नि मनु' स्वय मपि तुष्टः सन् प्रकर्षेणागच्छत्। तस्मादग्निं प्रहरत्येतद् वृत्तम्। उक्त मर्थं लोकप्रसिद्ध्या दृढ़यति—"तस्मादाहुराग्नेयो वाव सर्वः पशुरग्निं हि सो ऽनुप्राच्यवर्ततेति"-इति। यस्मादग्नि मनु पशुः प्रागच्छत्, 'तस्मादाग्नेयः सर्वः' पशुरितीयं याज्ञिकलोकप्रसिद्धिः। अत एव सर्वं पशु मग्नौ जुहोति। यस्मादेवं प्रसिद्धिः, तस्मादेव कारणात् पशोः पुरस्तादग्निं नयेयुरित्येत मर्थं * प्रसङ्गादभिधत्ते—"तस्मादस्याग्निं पुरस्ताद्धरन्ति"-इति। 'तस्मादु' तस्मादेव।

चतुर्थभाग मनूद्य व्याचष्टे—"स्तृणीत बर्हिरित्योषध्यात्मा वै पशुः, पशु मेव तत्सर्वात्मानं करोति"-इति। सञ्ज्ञपनस्थानं नीतस्य पशोरधस्तादुपाकरणसाधनयोर्बर्हिषोः अन्यतरद् बर्हिः 'हे शमितारः!' उपक्षिपत। पशुभक्षितानामोषधीनां पश्ववयवत्वेन परिणतत्वात् पशोरोषध्यात्मत्वम्। अतस्तद्भागपाठेन पशुं सर्वौषध्यात्मानं करोति।

पञ्चमभाग मनूद्य व्याचष्टे—"अन्वेनं माता मन्यता मनु पितानु भ्राता सगर्भ्यो ऽनु सखा सयूथ्य इति जनित्रैरेवैनं तत्स मनुमत मालभन्ते"-इति। सञ्ज्ञप्यमानम् 'एनं' पशुं मात्रादयो ऽङ्गीकुर्वताम्। समाने गर्भे भवः 'सगर्भ्यः' एकोदरः, भ्रातृविशेषण मेतत्। समाने यूथे भवः 'सयूथ्यः' पशुसमूहाद् व्यावर्तकविशेषण मेतत्। तद्भागपाठेन 'एनं' पशुं 'जनित्रैः' तज्जन्मसम्बन्धिभिः पश्वन्तरैरनुज्ञातं कृत्वा पश्चाद् 'आलभन्ते'।

षष्ठं भाग मनूद्य व्याचष्टे—"उदीचीनाँ अस्य पदो निधत्तात्,

---

* 'मंत्रं' क।

सूर्यं चक्षुर्गमयताद्, वातं प्राण मन्ववसृजतादन्तरिक्ष मसुं, दिशः श्रोत्रं, पृथिवीं शरीर मित्येष्वेवैनं तल्लोकेष्वादधाति"-इति। सञ्ज्ञप्यमानस्य पशोः 'पदः' पादान् 'उदीचीनान्' उत्तरदिग्गतान् 'निधत्तात्' स्थापयत। चक्षुरिन्द्रियं सूर्यदेवतां प्रापयत। 'प्राणं' वायुदेवतां प्रति 'अन्ववसृजतात्' प्रापयत। 'असुं' जीवनम् 'अन्तरिक्षं' प्रापयत। 'श्रोत्रं' दिग्देवतां प्रापयत। 'शरीरं' 'पृथिवीं' प्रापयत। तद्भागपाठेन 'एनं' पशुम् 'एष्वेव' यथोक्तदेवतासम्बन्धिषु 'लोकेषु' स्थापयति।

सप्तमभाग मनूद्य व्याचष्टे—"एकधास्य त्वच माच्छ्यतात् पुरा नाभ्या अपि शसो वपा मुत्खिदतादन्तरेवोष्माणं वारयध्वादिति पशुष्वेव तत्प्राणान् दधाति"-इति। 'एकधा' एकविधया विच्छेदराहित्येन 'अस्य' 'त्वचम्' 'आच्छ्यतात्' समन्ताच्छिन्नां कुरुत। 'नाभ्याः अपि' 'शसः' छेदात् पूर्व मेव 'वपाम्' 'उत्खिदतात्' उद्धरत। 'उष्माणम्' उच्छ्वासम् 'अन्तरेव' 'वारयध्वात्' निवारयत, अपिहितास्यं सञ्ज्ञपयतेत्यर्थः। तद्भागपाठेन 'पशुष्वेव प्राणान् सम्पादयति।

अष्टमभाग मनूद्य व्याचष्टे—"श्येन मस्य वक्षः कृणुतात्, प्रशसा बाहू, शला दोषणी, कश्यपेवांसा, ऽच्छिद्रे श्रोणी, कवषोरू स्रेकपर्णा ऽष्ठीवन्ता, षड्विंशतिरस्य वङ्क्रयस्ता अनुष्ठ्योच्चावयताद्, गात्रं-गात्र मस्यानूनं कृणुतादित्यङ्गान्येवास्य तद्गात्राणि प्रीणाति"-इति। 'श्येनं' श्येनाकृतिकम् 'अस्य' पशोः 'वक्षः' कुरुत। 'बाहू' 'प्रशसा' प्रकृष्टच्छेदनौ कुरुत। 'दोषणी' प्रकोष्ठौ 'शला कृणुतात्' शलाकाकारौ कुरुत। उभावपि 'अंसौ' कश्यपाकारौ कुरुत। 'श्रोणी' उभे अपि 'अच्छिद्रे' अनूने कुरुत।

'कवषोरू' कवषाकारावुरू 'स्रेकपर्णा' करवीरपत्राकारौ 'अष्ठीवन्ता' अविभक्तौ मुलयुक्तौ कुरुत। 'अस्य' पशोः 'वङ्क्रयः' वङ्क्राणि पार्श्वास्थीनि 'षड्विंशतिः' भवन्ति। 'ताः' सर्वाः 'अनुष्ठ्या' अनुक्रमेण स्वस्थानगतानि 'उच्च्यावयतात्' उद्धरत। 'गात्रं गात्रं' सर्वं मप्यवदानीय मङ्गम् 'अनूनं कृणुतात्' अविकलं कुरुत। तन्नागपाठेन 'अस्य' पशोः 'अङ्गान्येव' अवयवरूपाण्येव 'गात्राणि प्रीणाति'। गात्रशब्दः शरीरे तदवयवे च वर्त्तते; अतोऽत्रावयवविवक्षां द्योतयितु मङ्गानीति निर्द्देशः।

नवमभाग मनूद्य व्याचष्टे—"ऊवध्यगोहं पार्थिवं खनतादित्याहौषधं वा ऊवध्य मियं वा ओषधीनां प्रतिष्ठा; तदेनत् स्वाया मेव प्रतिष्ठाया मन्ततः प्रतिष्ठापयति"-इति। 'ऊवध्यगोहं' पुरीषगूहनस्थानं 'पार्थिवं खनतात्' पृथिवीमध्यस्थ गर्तं खनत। अत्रोवध्यशब्देन 'औषधम्' एवोच्यते; पुरीषस्य पशुभक्षितौषधिविकारत्वात्। 'ओषधीनां च' 'इयम्' एव भूमिः 'प्रतिष्ठा' आश्रयः। 'तत्' तथा सति 'एनत्' ऊवध्यं स्वकीयाया मेव 'प्रतिष्ठायां' भूमिरूपायाम् 'अन्ततः' पशोर्विशसनान्ते 'प्रतिष्ठापयति'॥

अथ मीमांसा। नवमाध्यायस्य तृतीयपादे (जै० सू० ३२—४०. अधि० १२.) चिन्तितम्—

"अविकारो विकारो वा स्यान्मेधपतिशब्दयोः।
विकारे स्वामिदेवार्थ एकार्थौ यान्तिमेऽपि किम्॥
स्वाम्यर्थो देवतार्थो वा स्यादन्याय्यत्वतोऽग्रिमः।
अर्थसत्त्वाद्विकारोऽत्र द्वावर्थौ शब्दयोर्द्वयोः॥
मन्त्रैक्यादयं एकोऽत्र स्वाम्यस्मिन् जायया द्विता।
देवार्थश्चेद्दैव एकोऽधिष्ठाने द्वं द्विधेरणम्॥

अध्रिगुप्रैषनिगदस्य * आदाविद माम्नायते—"दैव्याः शमितार उत मनुष्या आरभध्वम्। उपनयत मेध्या दुरः। आशासाना मेधपतिभ्यां मेधम्"-इति (तै०ब्रा० ३.६.६.)। शाखान्तरे "मेधपतये मेधम्"-इति। अथ अर्थः— 'शमितारः' पशुघातिनो द्विविधाः, दैव्या मनुष्याश्च; तानुभयान् सम्बोध्य होता कर्त्तव्यविशेषान् निर्द्दिशति। आरभ्यः कर्त्तव्यो मेधो यज्ञः, तद्योगात् दुरः-पदार्थान् हिंसाहेतून् इहानयत। किं कुर्वन्तः? यज्ञपतिभ्यां यज्ञपतये वा यज्ञम् 'आशासानाः' इति। तत्रैकवचनान्तस्य द्विवचनान्तस्य च मेधपति-शब्दस्य बहुपशुयुक्तासु विकृतिष्वनूह ऊहो वेति संशयः। ऊहपक्षेऽपि किमेकवचनान्तस्य यजमानोऽर्थः, द्विवचनान्तस्याग्नीषोमौ देवते,-इत्येव मर्थभेदः, किं वा शब्दद्वयस्यैक एवार्थ इति संशयः। एकार्थत्वपक्षेऽपि यजमान एवार्थो देवतैव वेति संशयः। तत्राग्नीषोमीये पशौ यजमानोऽग्नीषोमौ चेति त्रयो मेधस्य पतयः। तेष्वेकवचनस्य द्विवचनस्य चान्यायनिगदत्वेन प्रकृतावविवक्षितस्य वचनस्य विकृतावनूह इत्याद्यः पक्षः। प्रकृतौ समवेतार्थे सम्पादयितुं शक्ये सत्यन्यायनिगदत्वाभावाद्विकृतावूहः कर्त्तव्य इति द्वितीयः पक्षः। अस्मिन् द्वितीयपक्षेऽपि प्रकृतावुपन्यस्तप्रकारेणार्थभेदाद्विकृतिषु द्विबहुयजमानयुक्तास्वहीनादिषु यजमानानुसारेणैकवचनान्त ऊहनीयः; अनेकपशुयुक्तासु विकृतिषु देवतानुसारेण द्विवचनान्त ऊहनीयः।

---

* परसम्बोधनार्था मन्त्रा निगदाः। ते च यजूंष्येव; 'यजूंषि वा तद्रूपत्वात्'-इत्याहुश्च: (जै० सू० १. ४०--४५. अधि० १२.)। अध्वर्युप्रैषनिगदमन्त्रान् तैत्तिरीयाः समामनन्ति (ब्रा० ३. ६. ६. १–४.)। 'अथ होताध्रिगुं मन्वाह दैव्याः शमितार इति'-इति च तत्कल्पः।

सोऽयं शाखाविकल्पेन प्रथमः पक्षः; शाखाभेदेन पाठभेदेऽपि मन्त्रभेदाभावादर्थभेदो न युक्तः, किन्त्वेक एवार्थ इति पक्षान्तरम्। तदापि देवतायाः सम्प्रदानत्वेन स्वामित्वाभावान्मेधपतिशब्दयोग्यता नास्तीति यजमान एव तच्छब्दार्थः। तस्मिंश्च यजमाने स्वत एकत्वम्, जायया सह द्वित्व मित्येकवचनद्विवचने उभे अपि समवेतार्थे। ततो यजमानद्वयोपेतायां विकृतावेकवचनान्तो द्वित्वेनोहनीयो द्विवचनान्तो बहुत्वेनेति पूर्व्वः पक्षः। मेधस्य यजमानार्थत्वेनैवाशासनीयत्वस्य सिद्धत्वाद्देवतार्थत्वं त्वाशासनीयम्। ततो मेध माशासाना इत्येतद्देवतायां समवेतार्थंसम्प्रदानस्याप्युद्देश्यत्वेन प्राधान्यान्मेधपतित्व मविरुद्धम्। देवत्वाकारेणैकत्वादग्नित्वसोमत्वाकारेण द्वित्वाच्चैकवचनद्विवचने उपपन्ने*। तस्माद्देवतानुसारेण विकृतावूह इति राद्धान्तः" इति॥

तत्रैवान्यच्चिन्तितम् (जै० सू० ४१. ४२. अधि० १३.)—

"आदित्येष्वेव वान्येषु† ऊह्यो नो वोह्यतेऽन्यवत्।
गणार्थत्वादनूह्योऽतो विकल्पः प्रकृताविव॥

प्रजापशुसम्पत्तिकामस्य बहुदेवत्यः पशुराम्नायते—"यः कामयेत प्रथेयं पशुभिः प्र प्रजया जायेयेति, स एता मविं वशा मादित्येभ्यः कामायालभेत"-इति (तै० सं० २. १. २. ३.)। 'वशां' वन्ध्याम्, 'कामाय' कामुकेभ्यः इत्यर्थः। अत्र चोदकप्राप्तो 'मेधपतये'-इत्येकवचनान्तः शब्द आदित्यानां बहुत्वाद्बहुवचनान्तत्वेनोहनीयः। यथा मेधपतिभ्या मिति द्विवचनान्त

---

* 'उपपद्यते'-इति ए. सी. मु. तै० ब्रा० भा० २ भा० २९२ पृ०।

† 'आदित्येष्वेकवाच्यप'-इति च ए. सी. मु. तै० ब्रा० भा० २ भा० २९२ पृ०।

ऊह्यते *, यथा वा 'प्रास्मै'-इत्येकवचनान्त ऊह्यते †, तद्वदिति चेत्, मैवम्; प्रकृतावग्नीषोमयोर्गणैकत्व मेकवचनान्तो ब्रूते, आदित्याना मपि गणैकत्वं समान मित्यनूहः । तस्मादविकृत एकवचनान्त इतरेण सह प्रकृताविवात्रापि विकल्प्यते"-इति ॥

"तत्रैवान्यच्चिन्तितम् (जै० सू० ४२, अधि० १४.)—।

"कृष्णग्रीवादिकेऽनूह ऊहो वास्य न पूर्ववत् ।
देवत्वं न गणस्यात ऊहो बह्वभिधित्सया ॥

यूपैकादशिन्याम् ‡ अग्न्यादिदेवताकाः पशव आम्नाताः—'आग्नेयेन वापयति, मिथुनꣳ सारस्वत्या करोति, रेतः सौम्येन दधाति, प्रजनयति पौष्णेन"-इत्यादिना (तै० सं० ६.६.५.१.) । ते च स्वनामभिरन्यत्राम्नाताः—'आग्नेयः कृष्णग्रीवः सारस्वती मेषी, बभ्रुः सौम्यः, पौष्णः श्यामः'-इत्यादिना (वा०सं० २९.५८.) । तत्रास्यैकवचनान्तस्य मेधपतिशब्दस्यादित्येष्विवानूहः ? इति चेत्, मैवम्; वैषम्यात् । आदित्यगणस्य तत्र देवत्वम्, इह त्वेकैकस्यैव पृथग्देवत्वम्; अतो बहून् देवानभिधातुं बहुवचनान्तत्व मूहनीयम्"-इति ।

---

* 'मेधपतिभ्यां'-इति २७१ पृ० १४ पं० ।

† 'प्रास्मै'-इति च तत्रैव २७१ पृ० १७ पं० ।

‡ अग्निष्टोमे सोमायनसंज्ञाः विकल्पत आग्नेय-सारस्वत-सौम्य-पौष्ण-बार्हस्पत्य-वैश्वदेव-ऐन्द्र-मारुतैन्द्राग्न-सावित्र-वारुणाः सवनीयाः पशवो भवन्ति । तेषामेकादशानां नियोजनार्थमेक एव यूपः, प्रतिपशु एकैको यूपो वा भवति । एकादशानां वर्ग एकादशिनी, तस्याम्; तस्मिन् पक्षे इति यावत् (कात्या० श्रौ० ८. ८. ६, २६.)। एषा तु यूपैकादशिनी शतपथे (३. ८. ५.) 'प्रजापतिर्वै प्रजाः ससृजानः'--इत्याख्यानपूर्विका विहिता; तथा तैत्तिरीयसंहितायाञ्च 'प्रजापतिः प्रजा असृजत'--इत्यादिना (६. ६. ५.)।

तत्रैवान्यच्चिन्तितम् (जै० सू० २७, २८. अधि० १०.)—

“द्विपश्वोश्चक्षुरादूहो न वोहः ? पशुभेदतः ।
तेजोमात्रस्य सूर्यादावैकीभावादनूहनम् ॥

अग्नीषोमीयपशावध्रिगुप्रैषे पशुसम्बन्धिचक्षुरादीनां सूर्यादिसंसर्ग आम्नायते—“सूर्यं चक्षुर्गमयतात् । वातं प्राण मन्ववसृजतात् । दिशः श्रोत्रम्”-इत्यादि (तै० ब्रा० ३. ६. ६. २.) । “मैत्रꣳ श्वेत मालभेत, वारुणं कृष्णाम्”-इति (तै० सं० २.१.९.२.) विहितयोर्द्वयोः पश्वोर्मन्त्रगताश्चक्षुरादिशब्दा द्विवचनान्तत्वेनोहनीयाः । कुतः ? पशुभेदेन चक्षुरादीनां भेदात्, इति चेन्नैवम् । न खल्वत्रेन्द्रियाधिष्ठानं शरीरगतगोलकं चक्षुःशब्देन विवक्षितम्; तद्विवक्षाया मेकस्मिन्नपि पशौ गोलकभेदादेकवचनान्तचक्षुःशब्दस्यानन्वयप्रसङ्गात्, गोलकस्य सूर्यादिप्राप्त्यसम्भवाच्च । यत्तु रूपदर्शनादिसामर्थ्यलक्षणं तेजोमात्रं तदत्र चक्षुरादिशब्दैः विवक्षितम्; तच्च पश्वनेकत्वेऽपि ततो निर्गत्य सूर्यादावेकीभूतत्वात् समुद्रप्रविष्टनदीवन्न भेदेनावतिष्ठते । तस्मान्नास्त्यूहः”-इति ॥

तत्रैवान्यच्चिन्तितम् (जै० सू० २९—३१. अधि० ११.)—

“एकधेत्यविकारः स्यादभ्यासो वा ? सकृत्त्वतः ।
आद्यो नैवं प्राकृतस्य सकृत्त्वस्योचितत्वतः ॥

तस्मिन्नेवाध्रिगुप्रैषे श्रूयते—“एकधास्य त्वच माच्छ्यतात्”-इति (तै०ब्रा०३.६.६.२.) । छिन्धीत्यर्थः । तत्र द्वयोः पश्वोरेकधेत्यस्य शब्दस्य नास्ति विकारः । कुतः ? तस्य शब्दस्य इह सकृत्त्ववाचित्वात् ;—एकधा गाः पाययतीत्यत्र यौगपद्ये प्रयोगदर्शनात् । पश्वनेकत्वेऽपि त्वगुत्पाटनस्यैककालीनत्वं बहुपुरुषकर्तृकत्वं च घटत इति प्राप्ते, ब्रूमः;—प्रकृतावेकस्मिन् पशौ यौगपद्यलक्षणो-

ऽर्थो न सम्भवति, ततः सकलत्वं तस्य शब्दस्यार्थः। त्वगिय मवयवशो बहुकृत्वो न च्छेतव्या, किन्तु सर्व्वापि सकृदेकप्रयत्नेनेत्युक्तं भवति। ततो यत् प्रकृतौ सकलत्वं, तदेव विकृतावुचितम्। ततः प्रतिपशु सकलत्व मभिधातु मेकधेत्ययं मन्त्रोऽभ्यसितव्यः”-इति ॥

तत्रैवान्यच्चिन्तितम् (जै०सू०४ पा०२५--२७. अधि०६.)—

“सादृश्य मुत साकल्यं श्येनाद्युक्तौ विवक्षितम् ?।
प्रसिद्धसन्निधेराद्यस्तत्सत्त्वादखिलोक्तिः ॥

अध्रिगुप्रैषवचने एतदाम्नायते—“श्येन मस्य वक्षः कृणुतात्”-इति (तै० ब्रा० ३. ६. ६. २.)। तत्र यथा अमी पिष्टपिण्डाः सिंहाः क्रियन्ता मित्युक्ते प्रसिद्धसिंहसन्निधानात् पिष्टपिण्डेषु सिंहसादृश्यं कर्त्तव्यतया प्रतीयते, तथैवास्य पशोर्वक्षः श्येनं कृणुतादित्यत्र श्येनसादृश्यं वक्षसि कर्त्तव्यतया प्रतीयते। ततो वक्षः उद्धृत्य कर्त्तनादुपायेन पक्षचरणचञ्च्वादिकं सम्पाद्य श्येनसंस्थानं कर्त्तव्य मिति प्राप्ते, ब्रूमः ;— वक्षसि श्येनसादृश्यं स्वत एव पूर्व्व मस्ति ; ततो यथा तन्न नश्यति, तथा साकल्येनोद्धरणीय मिति विवक्षया श्येनशब्दः प्रयुज्यते। तथा सति छविरविकलं भवति। अंसादिष्वनेनैव न्यायेन साकल्यविवक्षया तत्तद्रूपकोक्तिर्द्रष्टव्या *। एतदेवाभिप्रेत्य श्रूयते,— “गात्रं-गात्र मस्यानूनं कृणुतात्”--इति (तै० ब्रा० ३. ६. ६. ३.)”-इति ॥

तत्रैवान्यच्चिन्तितम् (जै० सू० २३,२४. अधि० ५.)—

“प्रशसेत्यसिरर्थः स्यात् स्तुतिर्वा ? छेदनादसिः।
स्तुतिः कार्त्स्न्याय बाह्वोः स्यात् स्वधितिश्छेदसाधनम् ॥

---

* तथाच अंसौ कच्छपौ, दोषणी शलाके, कवषौ करवीरपर्वे इत्यादि (तै० ब्रा० ३ ६.६.)। अस्मन्मते तु श्येनमित्यादिपदानि वक्षआदीनां परिचयार्थान्येव श्रुतानीति।

अध्रिगुप्रैषे वाक्यान्तर माम्नातम्,—"प्रशसा बाहू"-इति (तै०ब्रा०३.६.६.२.)। तत्र 'शसु हिंसायाम् (१.७२७.)'-इत्यस्माद् धातोः सोपसर्गादुत्पन्नस्य सकारान्तप्रातिपदिकस्य तृतीयैकवचनान्तस्य प्रशसेति रूपं भवति। तच्चासेर्व्वाचकम्। तदेतत् केनचिद्ब्राह्मणवाक्येनानूद्यते—"दश प्रयाजानिष्ट्वा शास माहरेति, असिर्व्वै शास इत्याचक्षते"-इति (शत० ब्रा० ३. ८. १, ४.)। सोऽय मसिर्बाह्वोश्छेदनहेतुः। तस्माद् इष्टार्थलाभादसिः प्रशसेत्यस्य पदस्यार्थः ? इति चेत्, मैवम्। 'शंसु स्तुतौ (१. ७२८.)'-इत्यस्माद्धातोरय मुत्पन्नः। प्रशसावित्यस्य द्वितीयाद्विवचनान्तस्य शब्दस्य छान्दसे औकारलोपे आकारादेशे च कृते प्रशसेति भवति *। बाह्वोः प्रशस्तत्वं नाम कार्त्स्न्यम्। प्रशस्तौ बाहू कृणुतादित्युक्ते निःशेषेणोत्कर्त्तव्यौ बाहू इतीदृशो इष्टोऽर्थो लभ्यते। नात्र छेदनसाधनत्व मसेः सम्भवति; स्वधितेस्तत्साधनत्वेन विहितत्वात्। तस्मा[illegible]सुनिरवाद्य शब्दस्यार्थः। तथा सति बाहुशब्दो बहुवचनान्तत्वेन प्रशसेति पद मूहनीयम् †" इति ॥

तत्रैवान्यच्चिन्तितम् (जै० सू० १—१६. अधि० १.)—

"षड्विंशतिर्वङ्क्रयोऽस्येत्यनूहः स्यादुतोह्यते ? ।
ऊहेऽपि वचनान्यत्व मस्येत्यावर्त्ततेऽथवा ॥
षड्विंशतेरताभ्यासः समस्तोक्तिर्न चेदुत ।
अनूहो करणत्वेन इष्टलाभात्तदूहनम् ॥

---

* 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः'-इति पा० ७. १. ३९। प्रशसावित्यस्य द्वितीयाद्विवचनस्य छान्दस आत्वे प्रशसेति भवति-इत्येव वक्तव्यम्।

† बहुषु पशुषु संज्ञप्तेषु 'प्रशसा बाहू'-इति निगदे एव 'प्रशसान् बाहून्'-इति पाठसव्य मिति भावः ;

सङ्ख्यातश्च पश्वोर्युक्तेर्वङ्क्रीणां मुख्यतावशात् ।
अमी पक्षा न युज्यन्ते ता अनुष्ठ्येतिनिश्चयः ॥

अध्रिगुप्रैषे वाक्यमिदमाम्नायते—“षड्विंशतिरस्य वङ्क्रयः । ता अनुष्ठ्योच्च्यावयतात्” इति (तै० ब्रा० ३. ६. ६. ३.) । अयमर्थः—‘वङ्क्रयः’ वङ्क्राणि पार्श्वास्थीनि, तानि ‘अस्य’ पशोः षड्विंशतिसङ्ख्याकानि; एकैकस्मिन् पार्श्वे त्रयोदशानामवस्थितत्वात् । ताश्च वङ्क्रीः ‘अनुष्ठ्या’ अनुष्ठाय आनुक्रमेण गणयित्वेति यावत्, ‘उच्च्यावयतात्’ उद्धरतादिति । सोऽयं मन्त्रो वङ्क्रीणामुद्धरणे करणतया न विनियुक्तः, किन्तु सञ्ज्ञपनात् प्राक् पशौ नीयमाने होत्रा प्रयुज्यते । ततोऽसमवेतार्थत्वादनूह इत्याद्यः पक्षः । अकरणत्वेऽपि नादृष्टार्थत्वम्; वक्ष्यमाणार्थस्य स्मारकत्वेन दृष्टार्थलाभात् । तस्मात् प्रकृतौ समवेतार्थत्वाद् विकृतावूहः । तत्रापि चत्वारः पक्षाः । ननु,—सङ्ख्या मुख्यत्वेन प्रकाश्यते, तेन द्वयोः पश्वोर्द्विगुणितां षड्विंशतिसङ्ख्यां प्रकाशयितुं द्विवचनान्ततया षड्विंशतिशब्द ऊहनीय इत्याद्यः पक्षः । पशोश्चोदितत्वेन मुख्यत्वात् तद्वाचकं षड्विंशतिरस्येति पदं पश्वनुसारेणावर्त्तनीयम् इति द्वितीयः पक्षः । युक्तियोगः; षड्विंशतिसङ्ख्यायाश्च पशुना सह सम्बन्धः । तस्य मुख्यत्वात् प्रतिपशुविभक्तां सङ्ख्यां प्रकाशयितुं षड्विंशतिपदस्याभ्यासः । इति तृतीयः पक्षः । अत्र सर्वत्र मुख्यानुसारेण पदान्तराण्यूहनीयानि; सङ्ख्येयानां वङ्क्रीणां मुख्यत्वात् । तासां नियता सङ्ख्या वक्तव्या, ततो द्विपञ्चाशदेनयोः वङ्क्रयः, अष्टसप्ततिरेषां वङ्क्रयः*, इत्येवं यथायोगमूहनीयम् ।

---

* ‘षड्विंशतिरस्य वङ्क्रयः’—इत्यस्य पदस्य स्थाने द्विपशुस्थले ‘द्विपञ्चाशदेनयोर्वङ्क्रयः’—इति पठनीयः । एवं त्रिपशुस्थले ‘अष्टसप्ततिरेषां वङ्क्रयः’—इति ।

[illegible] पक्षः। अयमेव सिद्धान्तः; वाक्यशेषानुगुण्यात्। 'ता अनुष्टुभा [illegible]' (१०२पृ०)। स च व्याख्यातः (२७७, २८४ पृ०)" इति ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां प्रथमाध्याये
षष्ठः खण्डः ॥ ६ ॥

॥ अथ सप्तमः खण्डः ॥

अस्ना रक्षः संसृजतादित्याह तुषैर्वै फलीकरणैर्देवा हविर्यज्ञेभ्यो रक्षांसि निरभजन्नस्ना महायज्ञात् अस्ना रक्षः संसृजतादित्याह रक्षांस्येव तत् स्वेन भागधेयेन यज्ञान्निरवदयते तदाहुर्न यज्ञे रक्षसां कीर्तयेत् कानि रक्षांस्यृतेरक्षा वै यज्ञ इति तद् वा आहुः कीर्तयेदेव यो वै भागिनं भागान्नुदते चयते वैनं स यदि वैनं न चयतेऽथ पुत्रमथ पौत्रं चयते त्वेवैनमिति स यदि कीर्तयेदुपांशु कीर्तयेत्तिर इव वा एतद्वाचो यदुपांशु तिर इवैतद्यद्रक्षांस्यथ यदुच्चैः कीर्तयेदीश्वरो हास्य वाचो रक्षोभाषो जनितोर्योऽयं राक्षसीं वाचं वदति स यां वै दृप्तो वदति

या मुन्मत्तः सा वै राक्षसी वाङ् नात्मना दृप्यति नास्य प्रजायां दृप्त आ जायते य एवं वेद वनिष्ठु मस्य मा राविष्टोरूकं मन्यमाना नेद्वस्तोके तनये रवितारवच्छमितार इति ये चैव देवानां शमितारो ये च मनुष्याणां तेभ्य एवैनं तत्परिददात्यध्रिगो शमीध्वं सुशमि शमीध्वं शमीध्व मध्रिगा३उ * इति त्रिर्ब्रूयादपापेति चाध्रिगुर्वै देवानां शमितापापो निग्रभीता शमितृभ्यश्चैवैनं तं निग्रभीतृभ्यश्च सम्प्रयच्छति शमितारो यदत्र सुकृतं कृणवथास्मासु तद्यद्दुष्कृतं मन्यत्र तदित्याहाग्निर्वै देवानां होतासीत्स एनं वाचा व्यशाद्वाचा वा एनं होता विशास्ति तद्यदर्वाग्यत्परः कृन्तन्ति यदुल्बणं यद्विथुरं क्रियते शमितृभ्यश्चैवैनं तन्निग्रभीतृभ्यश्च समनुदिशति स्वस्त्येव † होतोन्मुच्यते सर्वायुः सर्वायुत्वाय सर्व मायुरेति य एवं वेद ॥ ७ ॥

यद्यप्यध्रिगुप्रैषमन्त्रो न समाप्तः, तथाप्यनन्तरभागे बहुवक्तव्यसद्भावात् खण्डान्तरं कृतम् ॥

दशमं भाग मनूद्य व्याचष्टे—"अस्ना रक्षः संसृजतादित्याह; —तुषैर्वै फलीकरणैर्देवा हविर्यज्ञेभ्यो रक्षांसि निरभजन्नस्ना महा-

---

* 'मधिगाउ' ग।

† 'स्वस्त्यवं' क।

यज्ञात्; स यदस्ना रक्षः संसृजतादित्याह, रक्षांस्येव तत् स्वेन भागधेयेन यज्ञान्निरवदयते"-इति। 'अस्ना' असृजा रुधिरेण 'रक्षः संसृजतात्' मांसाभिलाषव्याहृत्यर्थं राक्षसान् रक्तेनैव संयोजयत। एवं मन्त्रभागं होता ब्रूयात्। किमर्थमेतदिति, तदुच्यते— पुरा 'देवाः' 'तुषैः' व्रीहिगतैः हेयांशैः, 'फलीकरणैः' तण्डुलैश्च दर्शपूर्णमासादिहविर्यज्ञेषु समागतानि 'रक्षांसि' तोषयित्वा तेभ्यो यज्ञेभ्यो 'निरभजन्' हविर्भागरहितान्यकुर्वन्। महायज्ञे ज्योतिष्टोमादिके समागतानि रक्षांसि पशुरक्तेन तोषयित्वा, तस्माद् यज्ञाच्च 'निरभजन्' निःसारितवन्तः। हविर्यज्ञेभ्यो निःसारणं शाखान्तरे दर्शपूर्णमासप्रकरणे मन्त्रव्याख्याने समाम्नातम्— "रक्षसां भागोऽसीत्याह * तुषैरेव रक्षाꣳसि निरवदयते"-इति (तै॰ ब्रा॰ ३. २. ५. ११.) तदेतदापस्तम्बेनोक्तम्— "मध्यमे पुरोडाशकपाले तुषानोप्य रक्षसां भागोऽसीत्यधस्तात् कृष्णाजिनस्योपवपति"-इति (१.२०.९.)। महायज्ञान्निःसरण मग्नीषोमीयपशुप्रकरणे तैत्तिरीयैराम्नातम्— "रक्षसां भागोसीति स्थविमतो बर्हिरक्त्वापास्यत्यस्नैव रक्षाꣳसि निरवदयते"-इति (सं॰ ६.३.९.२.)। 'स्थविमतः' स्थौल्ययुक्ते बर्हिर्मूलभाग इत्यर्थः। एतदपि सूत्रकारेण स्पष्टीकृतम्— "बर्हिषोऽग्रं सव्येन पाणिनाऽऽदत्ते। अथ मध्यं यत आच्छ्यति, तदुभयतो लोहितेनाङ्क्त्वा रक्षसां भागोऽसीत्युत्तर मपर मवान्तरदेशं निरस्य" इति (आप॰ श्रौ॰ ७.१८.१३,१४.)। एवं सति यदस्ना रक्ष इति भागं पठेत्, तदानीं रक्षांसि स्वकीयभागेन युक्तानि कृत्वा महायज्ञात् 'निरवदयते' निःसारयति ॥

---

* रक्षसां भागोऽसीति मन्त्रस्तु तैत्तिरीयसंहितायां (१. १. ५. २) श्रुतः।

अथास्मा इत्येतस्य मन्त्रभागस्य पाठं पूर्वपक्षत्वेनाक्षिपति—“तदाहुर्न यज्ञे रक्षसां कीर्त्तयेत्;— कानि रक्षांस्यृतेरक्षा वै यज्ञ इति”–इति। ‘तत्’ तत्र मन्त्रभागे चोद्यं वादिनः ‘आहुः’। कथ मिति? तदुच्यते—‘यज्ञे’ प्रवर्त्तमाने सति ‘कानि’ चिदपि ‘रक्षांसि न कीर्त्तयेत्’। जातिविशेषानपेक्ष्य बहुवचननिर्देशः। राक्षसावान्तरजातीयानां मध्ये राक्षसम्, असुरं, पिशाचं, वा न कञ्चिदपि कीर्त्तयेत्। जातिविशेषाः श्रुत्यन्तरे सैन्यद्वयोपन्यासे श्रूयन्ते— “देवा मनुष्याः पितरस्तेऽन्यत आसन्नसुरा रक्षांसि पिशाचास्तेऽन्यतः”–इति (तै० सं० २.४.१.१.) अकीर्त्तने हेतुम् ‘ऋतेरक्षाः’-इतिपदेनोपन्यस्यति। तदेतत् समस्त मेक मेव पदम्,—ऋते शब्दो वर्जनवाची, वर्जितं रक्षो यस्मिन्यज्ञे सोऽयम् ऋतेरक्षाः। यज्ञे हि हविर्भागत्वाद्देवा एव नामग्रहण मर्हन्ति, न तु रक्षःप्रभृतयः। तस्मादेतं मन्त्रभागं न कीर्त्तयेत्,—इत्याक्षेपवादिना मभिप्रायः॥

समाधत्ते—“तदु वा आहुः,—कीर्त्तयेदेव”-इति। ‘तदु वै’ तस्मिन्नेव ‘अस्मा रक्षः’–इतिमन्त्रभागे सम्प्रदायविदः समाधानम् ‘आहुः’। यद्यपि तत्र रक्षोनामास्ति, तथापि तं भागं कीर्त्तयेदेव। तत्रोपपत्ति माह—“यो वै भागिनं भागान् नुदते, चयते वैनं, स यदि वैनं न चयते, ऽथ पुत्र मथ पौत्रं चयते त्वेवैन मिति”-इति। ‘यः’ पुमान् भागिनं भागार्हं सन्त मन्यं पुरुषं तदीयान् ‘भागान्’ ‘नुदते’, नाशयति, ‘एनं’ विनाशयितारं स नष्टभागः सन् ‘चयते वै’ च्यावयत्येव। ‘यदि वा’ यदा कदाचित् विनाशयितुः प्राबल्ये सति तदानीम् ‘एनं’ ‘न चयते’ न च्यावयति; ‘अथ’ अपि कालान्तरे तदीयं ‘पुत्रं’ पितृद्वेषेण

विनाशयति ; तदाप्ययमसौ 'पौष' वा विनाशयति ; किं बहुना, भागभ्रष्टो मनसि द्वेषं गृहीत्वा स्वविरोधिनम् 'एनं' भ्रंशयितारं यदा-कदाचित् केनापि द्वारेण 'ध्यायते त्वेव' विनाशयत्येव । 'इति' अनेनाभिप्रायेण मन्त्रभागं 'कीर्त्तयेदेव'-इति अभिप्रेतम् । यद्यपि रक्षसां हविर्भागो नास्ति, तथापि यज्ञे तुषकणादिः देवानर्हभागोऽस्त्येव ; तस्मात् कीर्त्तनपक्ष एव युक्तः ॥

तत्रैतस्य मन्त्रभागस्य कीर्त्तने किञ्चिद्विशेषं विधत्ते—"स यदि कीर्त्तयेदुपांशु कीर्त्तयेत्,—तिर इव वा एतद्वाचो यदुपांशु तिर इवैतद्रक्षांसि"-इति। 'सः' याज्ञिको 'यज्ञे' रक्षसां नामधेयं द्वेषपरिहाराय 'यदि कीर्त्तयेत्', तदापि 'उपांशु' परैर्यथा न श्रूयेत तथा 'कीर्त्तयेत्' । 'वाचः' सम्बन्धि 'यदुपांशु' कीर्त्तनम्, 'एतत् तिरः इव' तिरोहित मिव भवति । यथा कुड्यादिव्यवहितं स्तम्भादिकं चक्षुषा न दृश्यते, तथैवोपांशुकथितं न श्रूयते । 'रक्षांसि'-इति यदस्ति, 'एतद्' अपि 'तिर इव' ; चोरवच्च रक्षसां गूढचारित्वात् । तस्मात् तदीय कीर्त्तनस्योपांशुत्वं युक्तम् ॥

विपक्षे बाधं दर्शयति—"अथ यदुच्चैः कीर्त्तयेदीश्वरो हास्य वाचो रक्षोभाषो जनितोः"-इति । 'अथ' उपांशुवैलक्षण्येन 'यदुच्चैः कीर्त्तयेत्' 'अस्य' कीर्त्तयितुः सम्बन्धिनो 'वाचो रक्षोभाषः' 'जनितोः' जनयितुमयम् 'ईश्वरः' भवति । रक्षोभिर्भाष्यन्त इति 'रक्षोभाष्'-इत्यस्य स्त्रीलिङ्गस्य द्वितीयाबहुवचनं 'रक्षोभाषः' इति । तदेतद्वाच इत्यस्य विशेषणम् । अस्योच्चैःकीर्तयितुर्या वाचः सन्ति, ताः सर्वाः, रक्षःप्रोक्तवाग्रूपेणोत्पादयितुमयं सङ्कीर्तयिता समर्थो भवतीति ॥

कोऽयं समर्थ इत्याशङ्क्य तं विशेषाकारेण निर्दिशति—"योऽयं राक्षसीं वाचं वदति सः"–इति। लोके 'यः' पुमान् रक्षसां 'वाचं' परभर्त्सनरूपाम् उच्चध्वनित्वेन भीतिकरीं 'वाचं' ब्रूते, 'सः' पुमान् ता मत्युच्चैः कीर्त्तयन् रक्षसां वागुत्पादको भवति॥

कासौ राक्षसी वागित्याशङ्क्याह—"यां वै दृप्तो वदति, या मुन्मत्तः, सा वै राक्षसी वाग्"–इति। धनविद्यादिना 'दृप्तः' दर्पं प्राप्तः परतिरस्कारहेतुं 'यां' वाचं 'वदति', 'उन्मत्तः' च बुद्धिराहित्यात् पूर्वापरसम्बन्धरहितां यां वाचं वदति, 'सा' इय मुभयविधापि 'राक्षसी वाक्'॥

एतद्वेदनं प्रशंसति—"नात्मना दृप्यति, नास्य प्रजायां दृप्त आ जायते य एवं वेद"–इति। वेदिता स्वय मपि दर्पं नाप्नोति। तदा स्वीयायां च 'प्रजायां' कश्चिदपि 'दृप्तः' नोत्पद्यते॥

एकादशभाग मनूद्य व्याचष्टे—"वनिष्ठु मस्य मा राविष्टोरूकं मन्यमाना नेदस्तोके तनये रविता रवच्छमितार इति; ये चैव देवानां शमितारो ये च मनुष्याणां तेभ्य एवैनं तत्परिददाति" इति। हे 'शमितारः!' दैव्याः मनुष्याश्च, 'वनिष्ठु' वपायाः समीपवर्तिनं मांसखण्डम् 'अस्य' पशोः सम्बन्धिनम् 'उरूकं' उलूकाख्यपक्षिसदृशं 'मन्यमानाः', विशेषाकारेण विजानन्तो 'मा राविष्ट' मैव लवनं कुरुत;—उलूकसदृशो वनिष्ठुर्यथा वर्त्तते, तथैव उद्धरत,—न तु मध्यतश्छिन्नं कुरुतेत्यर्थः। एवं कुर्वतां 'वः' युष्माकं सम्बन्धिनि 'तोके' पुत्रे, 'तनये' तदीयापत्ये च 'रविता' शब्दयिता 'नेत्' नैव 'रवत्' भूयात्। यथाशास्त्रच्छेदने क्रियमाणे भवतां गृहे पुत्रपौत्रादिकं निमित्तीकृत्य रोदिता न भविष्यतीत्यर्थः। तद्भागपाठेन 'देवानां' मध्ये 'ये' 'शमितारः' सन्ति,

'मनुष्याणां च' मध्ये 'ये' सन्ति, 'तेभ्य एव' सर्वेभ्यः 'एनं' पशुं 'परिददाति' अवैकल्याय समर्पयति ॥

द्वादशभाग मनूच्य व्याचष्टे—"अध्रिगो शमीध्वं,—सुशमि शमीध्वं शमीध्व मध्रिगा३उ इति त्रिर्ब्रूयादपापेति चाध्रिगुर्वै देवानां शमितापापो निग्रभीता शमितृभ्यश्चैवैनं तन्निग्रभीतृभ्यश्च सम्प्रयच्छति"-इति। हे 'अध्रिगो' एतन्नामक! देवेषु शमितृषु मुख्यदेवा यूयं सर्वे 'शमीध्व" विशसनादिना पशुं संस्कुरुध्वम्। पुनरपि विशेषाकारेणोच्यते—'सुशमि' सुष्ठु शमनं शास्त्रीयं विशसनं यथा भवति तथा 'शमीध्वं' शमयत, सञ्ज्ञपयत। अध्रिगादौ प्लुतिर्दूरादाह्वानार्था; ओकारस्य प्लुतिवेलायाम् आकार उकारश्चेति वर्णद्वयं सम्पद्यते *। तथाविधा यूयम्, इतरैः सह यूयं 'सुशमीध्वं' † सर्वथा शमयत; न तूपचरितं शमनं कुरुत। क्रूरकर्मेति कृत्वा‡ तदुपेक्षणं मा भूदिति पुनः-पुनर्वचनम्। 'अध्रिगो शमीध्वम्'-इत्यादिकं वाक्यत्रयसमुदायं त्रिवार मावर्त्तयेत्; अपापेत्यपि तत्सम्बन्धिनं त्रिवार मावर्त्तयेत्। तदेतदाश्वलायन आह—"अध्रिग्वादि निगदा"-इत्यादि (श्रौ०३.३.४.)। 'अध्रिगो' अपापदेव!। सोऽय अपापवाची शाखान्तरे पठ्यते—"अध्रिगुश्चापापश्चोभौ देवानाᳪं शमितारौ"-इति (तै० ब्रा० ३. ६. ६. ४.)। अत्र तु तदवान्तरविशेषोऽभिधीयते—'देवानां' मध्ये यः 'शमिता' हन्ता, सः

---

* 'एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ'-इति पा० ८. २. १०७।

† टीकापुस्तकेषु सर्वत्र एव मेव पाठः; मूलपुस्तकेषु तु सर्वत्र 'शमीध्व'-इति पाठः।

‡ क्रूरकर्म त्वेवं विहितम्—'संज्ञपयन्ति प्रत्यक्शिरसमुदीचीनपादम्। अमायुं कृण्वन्तं संज्ञपयतेत्युक्त्वा पराङावर्त्ततेऽध्वर्युः'-इति आप० श्रौ० ७. १६. ५, ६.। 'मायुः शब्दः, तं मकुर्वन्त मित्यर्थः'-इति च तट्टीका। तच्च हृदरीधाय मुखे धानादीन् प्रवेशयति निग्रभिता। तदुक्तं कात्यायनेन—'संगृह्य मुखं तमयन्त्यवाश्यमानम्'-इति ६. ५. १८.।

'अध्रिगुः'; यश्च धानादिना 'निग्रभीता' निग्रहस्य कर्त्ता, सोऽयम् 'अपापः'; तद्भागपाठेनाध्रिगुप्रभृतिभ्यः 'शमितृभ्यश्च', अपापप्रभृतिभ्यो 'निग्रभीतृभ्यश्च' 'एनं' पशुं 'संज्ञपनाय 'प्रयच्छति' ॥

अध्रिगुमन्त्रपाठानन्तरं जपं विधत्ते—"शमितारो यदत्र सुकृतं कृणवथास्मासु, तद्यद्दुष्कृत मन्यत्र तदित्याहाग्निर्वै देवानां होतासीत्, स एनं वाचा व्यशाद्वाचा वा एनं होता विशास्ति; तद्यदर्वाग्यत्परः कृन्तन्ति, यदुल्बणं यद्विथुरं क्रियते, शमितृभ्यश्चैवैनत् तन्निग्रभीतृभ्यश्च स मनुदिशति, स्वस्त्येव होतोन्मुच्यते, सर्वायुः, सर्वायुत्वाय"–इति । हे 'शमितारः !' 'अत्र' पशुविशसनकर्मणि 'यत्' 'सुकृतं' कृतम्, 'कृणवथास्मासु तत्' ; तत्र 'यद् दुष्कृतम्', 'अन्यत्र तदिति' जपित्वा दक्षिणावृदावर्त्तते इति । एतन्मन्त्रार्थं मग्निर्वा इत्यादिनोच्यते । यदा देवा यज्ञं कुर्वन्ति, तदानीं तेषां मध्ये 'अग्निः' एव 'होता' अभूत् । 'सः' 'एनं' पशुं 'वाचा' अध्रिगुप्रैषरूपया 'व्यशात्' विशसनं कृतवान् । अध्रिगुप्रैषे आरभध्वं शमीध्व मित्यादि प्रेरणवाचकानां पदानां बहूनां विद्यमानत्वात् अस्त्येव होतुर्वाचिकं विशसनम् । तथा सति पशोरर्वाग्भागे 'यत् कृन्तन्ति' यच्च 'परः' परभागे उत्तमाङ्गं कृन्तन्ति, तस्मिन्नुभयस्मिन्नपि छेदने 'यदुल्बणं' शास्त्रार्थादतिरिक्तं 'क्रियते', 'यत्' च 'विथुरं' न्यूनं क्रियते, 'तत्' सर्व मेतत् पशोः शमितृभ्यो निग्रभीतृभ्यश्च 'स मनुदिशति' तेन मन्त्रजपेन सम्यक् कथयतीति 'वाचा होता' 'स्वस्त्येव' क्षेमेणैव पापात् 'मुच्यते' 'सर्वायुः' मृत्युरहितश्च भवति, यजमानस्याप्यपमृत्युराहित्याय । एतद्वेदनं प्रशंसति—"सर्व मायुरेति य एवं वेद"–इति * ॥

---

* अध्रिगुशब्दनिर्वचनम्, तत्प्रैषमन्त्रव्याख्यानादिकञ्च निरु० ३भा० ९०—९५ ।

नवमाध्यायस्य चतुर्थपादे (जै०सू०२२.अधि०४.) चिन्तितम्—

“पक्षी वपाथवोरूको रलयोरविशेषतः ।
पक्षी वपा सन्निधानाद्भ्रान्तिच्छेदनिषेधतः ॥

अध्रिगुप्रैषवचन मिद माम्नायते—“वनिष्ठुमस्य मा राविष्ट । उरूकं मन्यमानाः” इति (तै० ब्रा० ३. ६. ६. ३.)। वनिष्ठुः वपासमीपवर्त्ती कश्चित्पश्वङ्गविशेषः। तं ‘मा राविष्ट’ तस्य लवनं मा कुरुत। व्यत्ययेन लकारस्य रेफः (पा० ३.४.९८.)। किं कुर्वन्तः? ‘उरूकं मन्यमानाः’ वनिष्ठावुलूकबुद्धिं कुर्व्वन्तः इत्यर्थः। अत्रोरूकशब्देन काकविरोधी कश्चिदुलूकनामा पक्षिविशेषोऽभिधीयते *। कुतः? रलयोरविशेषात्;—पर्य्यङ्कः पल्यङ्कः, रोमाणि लोमानीत्यादिदर्शनात्। उरूकशब्दः सादृश्यलक्षकः। पक्षिसदृशं वनिष्ठुं विवेकेन मन्यमाना मा राविष्टेति वाक्यार्थः। तस्मादुरूकः पक्षीति प्राप्ते, ब्रूमः;—उरूकशब्देनात्र वपा लक्ष्यते। कुतः? वनिष्ठुसन्निधानात्। सति हि सन्निधावुरूकत्वभ्रान्तिर्वनिष्ठौ सम्भवति; भ्रान्तिप्राप्तञ्च लवन मत्र निषिध्यते। ‘उरूकं मन्यमाना वनिष्ठुं मा राविष्ट’-इत्युक्तत्वात्। वपालवनकाले भ्रान्त्या वनिष्ठोर्यल्लवनं तस्य निषेधे सति दृष्टार्थो लभ्यते, भ्रान्तिनिवारणस्य दृष्टत्वात्। त्वत्पक्षे तु वनिष्ठोर्ल्लवन मेव नास्ति। तच्चायुक्तम्; हृदयाद्यङ्गवद्वनिष्ठोर्ल्लवितव्यत्वात्। “वनिष्ठु मग्नीधे षडवत्तं सम्पादयति”-इत्याद्यनुष्ठानविधानात् (आप० श्रौ० ७. २६. ६.)। ततो लवननिषेधस्य असमवेतार्थत्वेनादृष्टार्थो मन्त्रपाठः प्राप्नुयात्। तस्माद्वपावचन मुरूकशब्दो यद्यपि वपायामप्रसिद्धः, तथाप्युरु विस्तीर्णं मूको भेदो यत्र,

---

* पेचक इति च प्रसिद्धः।

इत्यवयवार्थद्वारा मेदस्विन्यां वपायां युक्त उरूकशब्दः। एवं सत्यनेकवपासु विकृतिषु एकवचनान्त उरूकाशब्द ऊहनीयः” -इति ॥ ७ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां प्रथमाध्याये
सप्तमः खण्डः ॥ ७ ॥

॥ अथ अष्टमः खण्डः ॥

पुरुषं वै देवाः पशु मालभन्त॑ तस्मादालब्धान्मेध उदक्रामत्सो॑ऽश्वं प्राविशत्त॑स्मादश्वो मेध्यो ऽभव॑दथैन मुत्क्रान्तमेध मत्यार्जन्त॑ स किम्पुरुषो ऽभव॑त्ते ऽश्व मालभन्त॑ सो ऽश्वादालब्धादुदक्रामत्स॑ गां प्राविशत् तस्माद् गौर्मेध्यो ऽभव॑दथैन मुत्क्रान्तमेध मत्यार्जन्त॑ स गौरमृगो ऽभव॑त्ते गा मालभन्त॑ स गोरालब्धादुदक्रामत्सो॑ ऽविं प्राविशत्त॑स्मादविर्मेध्यो ऽभव॑दथैन मुत्क्रान्तमेध मत्यार्जन्त॑ स गवयो ऽभव॑त्तेऽवि मालभन्त॑ सोऽवेरालब्धादुदक्रामत्सो॑ऽजं प्राविशत्त॑स्मादजो मेध्यो ऽभव॑दथैन मुत्क्रान्तमेध मत्यार्जन्त॑ स उष्ट्रो ऽभव॑त्सोऽजे ज्योक्तमा मिवारमत॑ तस्मादेष एतेषां पशूनां

प्रयुक्ततमो यदजं॑स्ते ऽज मालभन्त॑ सो ऽजादालब्धादुदक्रामत्स॑ इ॒मां प्राविशत्त॑स्मादियं मेध्याभवद॑थैन मुत्क्रान्तमेध मत्यार्जं॑न्त स शरभो ऽभवत्त॑ एत उत्क्रान्तमेधा अमेध्याः पशवस्त॑स्मादेतेषां नाश्नीयात्॑ तमस्या मन्वगच्छं॑न्त्सो ऽनुगतो व्रीहिरभवत्त॑द्यत्पशौ पुरोळाश मनु निर्वपन्ति॑ समेधेन नः पशुनेष्ट मसत्॑ केवलेन नः पशुनेष्ट मसदिति॑ समेधेन हास्य पशुनेष्टं भवति॑ केवलेन हास्य पशुनेष्टं॑ भवति य एवं वेद॑ ॥ ८ ॥

अध्रिगुप्रैषं समाप्य पुरोडाशं विधातुं बहुभिः पर्यायैरुपेता काचिदाख्यायिकोच्यते । तत्र प्रथमं पर्यायं दर्शयति—‘पुरुषं वै देवाः पशु मालभन्त ; तस्मादालब्धान्मेध उदक्रामत्, सोऽश्वं प्राविशत् ; तस्मादश्वो मेध्यो ऽभवदथैन मुत्क्रान्तमेध मत्यार्जन्त, स किम्पुरुषो ऽभवत्” इति । पुरा कदाचिद् ‘देवाः’ स्वकीये यज्ञे ‘पुरुषं’ मनुष्यं ‘पशु मालभन्त’ पुरुषं पशुं कृत्वा तेन पशुना यष्टुमुद्युक्ताः । ‘तस्मादालब्धाद्’ यष्टुमुद्युक्तात् मनुष्यपशोः ‘मेधः’ यज्ञयोग्यो हविर्भागः ‘उदक्रामत्’ मनुष्यं परित्यज्यान्यत्रागच्छत् । गत्वा च ‘सः’ भागः ‘अश्वं प्राविशत्’ । यस्मादेवं ‘तस्मादश्वः’ यज्ञयोग्यः ‘अभवत्’ । ‘अथ’ तदानीम् ‘उत्क्रान्तमेधं’ परित्यक्तहविर्भागम् ‘एनं’ मनुष्यं देवाः ‘अत्यार्जन्त’ अतिशयेन वर्जितवन्तः ; तस्मिन् पशुत्व मपि न अकुर्व्वन् ।

देवैः स्वीकृत्य परित्यक्तः 'सः' मनुष्यः 'किम्पुरुषः' किन्नरो वानरजातीयः ॥

द्वितीयं पर्यायं दर्शयति—"तेऽश्व मालभन्त ; सोऽश्वादालब्धादुदक्रामत्, स गां प्राविशत् ; तस्माद गौर्मेध्योऽभवदथैन मुत्क्रान्तमेध मत्यार्जन्त, स गौरमृगोऽभवत्"-इति । आलब्धादश्वान्मेधो यज्ञयोग्यभाग उत्क्रम्य गां प्राविशत् ; स गौर्यज्ञयोग्य आसीत् । तदानी मयोग्यत्वेन त्यक्तः सोऽश्वो गौरमृगो ऽभवत् ; यस्य शृङ्गावपि लोमशौ भवतः ॥

तृतीयं पर्यायं दर्शयति—"ते गा मालभन्त, स गोरालब्धादुदक्रामत्सोऽविं प्राविशत् तस्मादविर्मेध्यो ऽभवदथैन मुत्क्रान्तमेध मत्यार्जन्त, स गवयो ऽभवत्तेऽवि मालभन्त, सोऽवेरालब्धादुदक्रामत्सो ऽजं प्राविशत्तस्मादजो मेध्यो भवदथैन मुत्क्रान्तमेध मत्यार्जन्त, स उष्ट्रो ऽभवत्" इति । अजादयः प्रसिद्धाः । उष्ट्रो दीर्घग्रीवः । अजं पुनरपि प्रशंसति—"सोऽजे ज्योक्तमा मिवारमत ; तस्मादेष एतेषां पशूनां प्रयुक्ततमो यदजः"-इति । 'सः' मेधाख्यो यज्ञयोग्यभागस्तस्मिन् 'अजे' 'ज्योक्तमा मिव' अतिशयेन चिरकाल मेव 'आरमत' क्रीड़ितवान् । तस्माच्चिरकाल मेव सद्भावात् योऽय मजोऽस्ति, स एषः 'एतेषां' पूर्वोक्तानां 'पशूनां' मध्ये 'प्रयुक्ततमः' शिष्टैरतिशयेन प्रयुक्तः ॥

चतुर्थं पर्यायं दर्शयति—"ते ऽज मालभन्त, सोऽजादालब्धादुदक्रामत्, स इमां प्राविशत्तस्मादियं मेध्याभवदथैन मुत्क्रान्तमेध मत्यार्जन्त, स शरभोऽभवत्"-इति । 'इमां' पृथिवीम् । 'शरभः' अष्टभिः पादैरुपेतः सिंहघाती मृगविशेषः । अत्र प्रसङ्गात् कश्चित् धर्म्मविशेषं दर्शयति—"त एत उत्क्रान्तमेधा अमेध्याः

पशवस्तस्मादेतेषां नाश्नीयात्”-इति । मनुष्याश्वगोऽव्यजेभ्यो मेधस्योत्क्रमणकालमेव निष्पन्नाः, 'त एते' किम्पुरुषादयो मेधरहितत्वाद् यज्ञयोग्याः पशवो नासन् * । अतः 'एतेषां' पशूनां सम्बन्धि मांसं 'नाश्नीयात्' ॥

अथ पुरोडाशं विधत्ते—“तमस्यामन्वगच्छंस्सोऽनुगतो व्रीहिरभवत्तद्यत्पशौ पुरोळाशमनु निर्वपन्ति, समेधेन नः पशुनेष्टमसत्, केवलेन नः पशुनेष्टमसदिति”-इति । 'तं' मेधाख्यं हविर्भागम् 'अस्यां' पृथिव्यां प्रविष्टं 'खनन्तो' देवाः 'अन्वगच्छन्', 'सः' च मेधो देवैः 'अनुगतः' उत्खातस्तु सन् सहसा 'व्रीहिरभवत्' । तथा सति यदि 'पशौ पुरोडाशमनु निर्वपन्ति' पश्वालम्भानन्तरमेव निर्वपेयुः, तदानीं 'नः' अस्माकं यज्ञयोग्यहविर्भागयुक्तेन 'पशुनेष्टम् असत्' द्रव्यं भवति । पुरोडाशनिर्वापकर्तृणां कोऽभिप्रायः ?—इति, सोऽभिधीयते—'नः' अस्माकं 'केवलेन' साधनान्तरनिरपेक्षेण मेधपूर्णेन 'पशुनेष्टमसत्'-'इति' एतदभिप्रायः ॥

वेदनं प्रशंसति—“समेधेन हास्य पशुनेष्टं भवति, केवलेन हास्य पशुनेष्टं भवति, य एवं वेद”-इति । समेधेनेत्यस्यैव वाक्यस्य

---

* एतेनानुमीयते आदिकाले नरमेधस्यासीत् प्राचुर्यम्, ततस्तदनुकल्पोऽश्वमेधः प्रचलितः, एवं क्रमेण शरभान्तो मेध्यश्चलितः, ततो ओषधिहिंसने क्वापि मनुष्यस्य सहजभावत्वं पुरोडाशस्य तस्यैव 'पिष्ट-पशुः' प्रारब्धः ; योऽनुष्ठितः सम्प्रति च प्रायः षड्विंशतरन्ततः प्राक् काश्या मह्मीतीरे पैशवाद्यधर्षयन्ति । शतपथेऽप्येवम् —'पुरुषो हि प्रथमः पशूनाम्' -इत्यादि ६. २. १. १८ । शतपथः पिष्टपशुश्च म० सं० ५. ३७ । उक्तं च तथा—'दधि मधु घृतमापो धाना भवन्त्येतद्वै पशूनां रूपम्'-इति तै० सं० २. ३. २. ८ । 'पशवो वै पुरोडाशः'-इति च ७. १. ९ । पक्षान्तरं प्रख्याति च 'स वा एष पशुरेवालभ्यते यत् पुरोडाशः'-इति (९ खं०) ।

व्याख्यानं केवलेनेत्यादि । तदेतत् सर्वं श्रुत्यन्तरे सङ्गृहीतम्—“पशु मालभ्य पुरोडाशं निर्वपति, समेध मेवैन मालभते” इति (तै० सं० ६.३.१०.१.) ॥

अत्र मीमांसा । द्वादशाध्यायस्य प्रथमपादे (जै०सू० १—६. अधि० १.) चिन्तितम्—

“उपकारी संस्कृतिर्वा पुरोडाशः पशूदितः ।
तद्धितोक्त्या द्वयोर्देवभेदादुपकृतिर्मता ॥
सन्दंशान्निश्चितेऽङ्गत्वे दृष्टोऽर्थः स्मृतिसंस्कृतिः ।
देवान्तरं चेद्विकृत मग्नीषोमनिवर्त्तनम् ॥

ज्योतिष्टोमाङ्गभूताग्नीषोमीये पशौ श्रूयते—“अग्नीषोमीयस्य वपां प्रचर्याग्नीषोमीय मेकादशकपालं निर्वपति”-इति (तै०सं० ६.३.१०.)। तत्र पशावुक्तः पुरोडाशः, स किं पशोरारादुपकारकः, उत पशुदेवतासंस्कारः ? इति सन्देहः* । तत्र “अग्नीषोमीयं पशु मालभेत”-इति (तै०सं०६.१.११.६.) पशुविधौ तद्धितोक्ता अग्नीषोमदेवता यथा गुणत्वेन पशौ विधीयते, तथा पशुपुरोडाशेऽपि। तथा सति विधिभेदेन विधेयदेवताभेदात् संस्कारो न युक्तः ; गुणत्वं च संस्कार्यविरोधीति पूर्वोक्तम् । तस्मात् पशो

---

* “क्रियारूपाणि च द्विविधानि । गुणकर्माणि, प्रधानकर्माणि च । एतानि सन्निपत्योपकारकाणि, आरादुपकारकाणीति चोच्यते । कर्माङ्गद्रव्याद्युद्देशेन विधीयमानं कर्म सन्निपत्योपकारकम् । यथा अवघातप्रोक्षणादि । तच्च दृष्टार्थ मदृष्टार्थं दृष्टादृष्टार्थेति । दृष्टार्थ मवघातादि, अदृष्टार्थं प्रोक्षणादि, दृष्टादृष्टार्थं पशुपुरोडाशादि । स द्रव्यत्यागांशेनैवादृष्टं, देवतोद्देशेन च देवतास्मरणं दृष्टं करोति । द्रव्याद्यनुद्दिश्य केवलं विधीयमानं कर्म आरादुपकारकम् । यथा प्रयाजादि । आरादुपकारकं च परमापूर्वोत्पत्तावेवोपयुज्यते ; सन्निपत्योपकारकं तु द्रव्यदेवतासंस्कारद्वारा यागस्वरूपेऽप्युपयुज्यते इति जै० मी० अर्थ० ।

आरादुपकारक इति प्राप्ते, ब्रूमः ;— देवताभेदवादिना तावदिदं वक्तव्यम्,— पशुः पुरोडाशश्चेत्युभौ किं स्वतन्त्रौ यागौ, किं वाङ्गाङ्गिरूपौ ? तत्रापि किं मङ्गं किं वाङ्गीति । तत्र पशुधर्मैरुभयतः संदृष्टस्य पुरोडाशस्य स्वतन्त्राङ्गित्वे तयोः पशुप्रकरणपाठबाध्यत्वादभिमत मुपकारकत्वं न सिध्येत् । अङ्गत्वेऽपि दृष्टसम्भवाददृष्टकल्पन मन्याय्यम् ; भवति चात्र दृष्टम्,—पुरोडाशवाक्येन तद्धितान्तपदेन पशुवाक्यगताया देवताया अनुवादे सति तदीयस्मरणपूर्वकनिर्वापे पशुदेवतायाः संस्क्रियमाणत्वात् । एवं च सति पशुवाक्ये गुणत्वेन प्रतीतायाः पुरोडाशवाक्ये प्राधान्यावगमात् संस्कार्यत्व मविरुद्धम् । तस्मात्पशुदेवतासंस्कारः पुरोडाशः । एवं च सत्यग्नीषोमीयपशुविकृतौ वायव्यपशावग्नीषोमदेवतायां निवृत्तायां तदीयपुरोडाशेऽपि सा निवर्त्तेत इति बाधः फलिष्यति”-इति ॥

यद्वा, दशमाध्यायस्य प्रथमपादे (जै०सू०१९· २२. अधि०९.) चिन्तितम् —

“पश्वर्थानुष्ठितैर्नास्ति पुरोडाश उपक्रिया ।
अस्ति वा विध्यभावे न ह्यस्त्यकार्यत्वतोऽध्ववत् ॥

अग्नीषोमीये पशौ यानि चोदकप्राप्तानि प्रयाजादीन्यङ्गान्यनुष्ठितानि, तैः पशुपुरोडाशे उपकारो नास्ति । कुतः ? तदुपकारबोधकस्य विधेरभावात् । चोदकस्तु दर्शपूर्णमासवत् पशुरनुष्ठेयः इत्येवंरूपत्वात् पशावेव उपकारं बोधयति । ननु पुरोडाशस्यापीष्टिविकृतित्वात्तत्रापि चोदकोऽस्तीति चेत्, बाढम् ! अतएव भिन्नचोदकबलात् पुरोडाशोपकाराय प्रयाजाद्यङ्गानि पृथगनुष्ठेयानीति प्राप्ते, ब्रूमः ;— यद्यपि पश्वर्थः पुरोडाशस्योपकारः,—

इत्येतादृशं शास्त्रं नास्ति, तथाप्यय मुपकारोऽर्थप्राप्तो न निवारयितुं शक्यते। यथा प्रदीपस्य वेदिकार्यं निर्मितस्यार्थसिद्धमार्गप्रकाशकत्व मनिवार्यम्, तथा पशुतन्त्रमध्येऽनुष्ठीयमानस्य पुरोडाशस्य पश्वर्थैरङ्गैरुपकारः केन वार्येत?। तस्मादन्यार्थैरप्यस्त्युपकारः ॥ ८ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां प्रथमाध्याये
अष्टमः खण्डः ॥ ८ ॥

॥ अथ नवमः खण्डः ॥

स वा एष पशुरेवालभ्यते यत्पुरोळाशस्तस्य यानि किंशारूणि तानि रोमाणि ये तुषाः सा त्वग्ये फलीकरणास्तदसृग्यत्पिष्टं किक्नसास्तन्मांसं यत् किञ्चित्कं सारं तदस्थि सर्वेषां वा एष पशूनां मेधेन यजते यः पुरोळाशेन यजते तस्मादाहुः पुरोळाशसत्रं लोक्य मिति युव मेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तं युवं सिन्धूँरभिशस्तेरवद्यादग्नीषोमावमुञ्चतं गृभीतानिति वपायै यजति सर्वाभिर्वा

एष देवताभिरालब्धो भवति॑ यो दीक्षितो भवति॑ तस्मादाहुर्न दीक्षितस्याश्नीयादिति॑ स यदग्नीषोमावमुञ्चतं गृभीतानिति॑ वपायै यजति॑ सर्वाभ्य एव तद्देवताभ्यो॑ यजमानं प्रमुञ्चति॑ तस्मादाहुरशितव्यं वपायां हुतायां॑ यजमानो हि स तर्हि भवतीत्या॑न्यं दिवो मातरिश्वा जभारेति॑ पुरोळाशस्य यज॑त्यमथ्नादन्यं परि श्येनो अद्रेरिति॑त इव च ह्येष इत इव च॑ मेधः समाहृतो भवति॑ स्वदस्व हव्या स मिषो दिदीही॑ति पुरोळाशः स्विष्टकृतो यजति॑ हविरेवास्मा एतत् स्वदय॑तीष मूर्ज मात्मन् धत्ते॑ इळा मुपह्वयते॑ पशवो वा इळा॑ पशूनेव तदुपह्वयते॑ पशून्यजमाने दधाति॑ ॥ ९ ॥

विहितं पशुपुरोडाशं प्रशंस्य पश्वादपादिवाक्यान्निदन्तवादौ तं प्रशंसति—“स वा एष पशुरेवालभ्यते यत्पुरोळाशः”-इति । पशुशरीरसादृश्यादयं पुरोडाशोऽनुष्ठितः पश्वालम्भ एव भवति । तदेतत्सादृश्यं विशदयति—“तस्य यानि किंशारूणि तानि रोमाणि, ये तुषाः सा त्वग्, ये फलीकरणास्तदसृग्, यत्पिष्टं किक्नसास्तन्मांसं, यत्किञ्चित्कं सारं तदस्थि”-इति । ‘तस्य’ व्रीहिबीजस्य सम्बन्धीनि ‘यानि किंशारूणि’ शूकपलालादीनि ‘तानि’ पशुरोमस्थानीयानि; ‘ये तुषाः’ तण्डुलवेष्टनरूपाः प्रथमावघातेन परित्याज्याः, सा तुषसमष्टिः, पशुत्वक्स्थानीया; ‘ये फलीकरणाः’ तण्डुलश्वैत्यार्थेना-

वघातेन छेद्या अंशास्तत्सर्वम् 'असृक्' पशुरक्तस्थानीयम्, 'यत्पिष्टं' तण्डुलपेषणेन निष्पन्नं पिण्डयोग्यरूपम्, ये च 'किक्नसाः' सूक्ष्माः पिष्टावयवाः, तत्सर्वं पशुमांसस्थानीयम् ; 'यत्किञ्चित्कं सारं' स्वार्थे कप्रत्ययः ; यत्किञ्चिदन्यद् व्रीहिसम्बन्धिकाठिन्यरूपं सारं 'तदस्थि' तत् पशोरस्थिस्थानीयम् । एवं पशुसाम्यात् पुरोडाशस्य पशुत्वम् ॥

एवं सति यत् फलितं तद्दर्शयति—"सर्वेषां वा एष पशूनां मेधेन यजते, यः पुरोळाशेन यजते"-इति। पुरोडाशयाग एव सर्वपशुसम्बन्धि-यज्ञयोग्यो हविर्यागः । सर्वपशुसम्बन्धश्च "पुरुषं वै देवाः"-इत्यादिना प्रपञ्चितः (२८४पृ०) । लौकिकोक्त्या प्राशस्त्यं द्रढयति—"तस्मादाहुः पुरोळाशसत्रं लोक्य मिति"-इति । यस्मात् पुरोळाशयागः सर्वपशुसारभूतः, तस्मात् पुरोडाशानुष्ठानं 'लोक्यं' प्रेक्षणीय मिति याज्ञिकाः 'आहुः' । अत एव प्रैषमन्त्रे "पुरोडाशाँ अलङ्कुरु"-इत्येव माम्नातम् (शत० ब्रा० ४.२.५.११.) ॥

अथ वपादीनां क्रमेण याज्याविवक्षुरादौ वपायाज्यां विधत्ते—"युव मेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तम्; युवं सिन्धूँरभिशस्तेरवद्यादग्नीषोमावमुञ्चतं गृभीतानिति (सं० १.९३.५.) वपायै यजति"-इति । हे 'सोम!' त्वं च 'अग्निश्च' 'युवं' एतावुभौ युवाम् एतानि सर्वैः दृश्यमानानि 'रोचनानि' प्रकाशरूपाणि नक्षत्रादीनि 'दिवि' द्युलोके 'अधत्तम्' । कीदृशौ युवाम् 'सक्रतू' समानकर्म्माणौ । हे अग्नीषोमौ युवां ! स्वकीयत्वेन स्वीकृतान् 'सिन्धून्' समुद्रवत्प्रौढान् राजामात्यादीन् पुरुषान्, यजमानादीन्वा 'अभिशस्तेः' सङ्ग्रामादिषु ब्राह्मणवधादिरूपादपवादाद् 'अवद्यात्' तन्निमित्तदुरिताच्च 'अमुञ्चतम्' मुक्तान् अकुरुतम्;—एतत्पश्चादि-

कर्मानुष्ठानेन जनापवादो दुरितं च नश्यतीत्यर्थः । 'वपायै यजति' इति वपाहोमार्थं मन्त्रं याज्यात्वेन पठेदित्यर्थः ॥

पूर्वोत्तरपक्षाभ्यामेतां याज्यां प्रशंसति—"सर्वाभिर्वा एष देवताभिरालब्धो भवति, यो दीक्षितो भवति, तस्मादाहुर्न दीक्षितस्याश्नीयादिति; स यदग्नीषोमावमुञ्चतं गृभीतानिति वपायै यजति, सर्वाभ्य एव तद्देवताभ्यो यजमानं प्रमुञ्चति; तस्मादाहुरशितव्यं वपायां हुतायां यजमानो हि स तर्हि भवतीति"-इति । 'यः' पुमान् यज्ञार्थी 'दीक्षितो भवति', 'एषः' 'सर्वाभिः' अपि 'देवताभिः' स्वकीयहविर्दानार्थम् 'आलब्धः' स्वीकृतो 'भवति' । 'तस्मात्' एतदीयस्य द्रव्यस्य देवताभिरवरुद्धत्वात् 'दीक्षितस्य' गृहे 'नाश्नीयात्'-'इति' पूर्वपक्षिणः 'आहुः' । तत्र होता 'यदग्नीषोमावमुञ्चतम्'-'इति' एतं याज्यायाश्चतुर्थपादं पठेत् । तदा तेन पाठेन 'सर्वाभ्यो देवताभ्यो यजमानं' होता मोचयति । 'तस्मात्' कारणाद्वपाहोमे निष्पन्ने सति तद्गृहे भोक्तव्यम् ; 'तर्हि' तस्मिन्वपाहोमोत्तरकाले 'सः' दीक्षितो 'यजमानो भवति' । पूर्वं तु दीक्षित एव, न तु यजमानः ; इदानीं यागस्य निष्पन्नत्वादयं यजमानः । तथा सति देवतावरोधात्* मुक्तस्य गृहे भोक्तुं शक्य मिति सिद्धान्तिनः 'आहुः' ॥

अथ पुरोडाशस्य याज्यां विधत्ते—"आन्यं दिवो मातरिश्वा जभारेति पुरोळाशस्य यजति"-इति(सं०१.९३.६.) । द्वितीयपाद मनूद्य पादद्वयस्य सहैव तात्पर्यं दर्शयति—"अमथ्नादन्यं परि श्येनो अद्रेरितीत इव च प्रेव इत इव च मेधः समाहृतो भवति"-इति । 'मातरिश्वा' वायुः 'अन्यम्' अग्नीषोमयोरन्यतरं

---

* 'देवताविरोधात्' ख, ग ।

सोमाख्यं देवम् 'दिवः' द्युलोकाद् 'आजभार' आहृतवान्; गायत्रीरूपं कृत्वा वायुः सोम मानीतवान्। इति प्रथमपादस्यार्थः। 'श्येनः' बलवत्पक्षी, तादृशोऽध्वर्युः 'अन्यम्' उभयोर्देवयोरन्यतर मग्निम्, 'अद्रेः' पर्वतजन्यात्काष्ठादरणिरूपात् 'पर्यमथ्नात्' परितो मथनं कृतवान्। इति द्वितीयपादस्यार्थः। 'एष मेधः' यज्ञयोग्यः पुरोडाशोऽपि 'इत इव चेत इव च' अस्मान्मनुष्यादस्मादश्वाद् गोः अवेः अजाच्च भूम्याः 'समाहृतः'। एवं सति इतस्ततः आनयनसाम्यात् पुरोडाशस्येव अग्नीषोमप्रतिपादिका याज्या योग्येत्यर्थः॥

पुरोडाशसम्बन्धिस्विष्टकृतो याज्यां विधत्ते—"स्वदस्व हव्या समिषो दिदीहीति (सं० ३.५४.२२.) पुरोळाशः स्विष्टकृतो यजति"-इति। हे स्विष्टकृदग्ने! 'हव्या' हवींषि 'स्वदस्व' स्वादूनि कुरु; 'इषः' अन्नानि 'सन्दिदीहि' सम्यक् प्रयच्छेति तस्य पादस्यार्थः। ता मेतां याज्यां प्रशंसति—"हविरेवास्मा एतत् स्वदयतीष मूर्जं मात्मन् धत्ते"-इति। एतेन याज्यापाठेन 'अस्मै' कर्मसिद्ध्यर्थं यजमानार्थं वा हविरेव स्वादूकरोति। यः 'इषम्' ओदनम् 'ऊर्जम्' क्षीरादिरसं च 'आत्मन् धत्ते' होता स्वात्मनि सम्पादयति॥

पुरोडाशीयस्विष्टकृद्यागादूर्ध्वं पशुपुरोडाशसम्बन्धि इडोपाह्वानं विधत्ते—"इळा मुपह्वयते; पशवो वा इळा, पशूनेव तदुपह्वयते,—पशून्यजमाने दधाति"-इति। "इळोपहूता सह दिवा"-इत्यादिना (आश्व० श्रौ० १. ७. ७.) सूत्रगतेन, "उपहूतं रथन्तरं सह पृथिव्या"-इत्यादिना (तै० ब्रा० ३. ५. ८. १.) शाखान्तराम्नातेन मन्त्रेण वा इळाख्यां देवता मुपह्वयते। "गौर्वा

यस्य शरीरम्"-इति श्रुत्यन्तरादिष्टदेवतायाः पशुरूपत्वम्* । 'तत्' तेनोपाख्यानेन 'पशूनेव' आह्वयति । 'यजमाने' च 'पशून्' सम्पादयति † ॥ ९ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां प्रथमाध्याये
नवमः खण्डः ॥ ९ ॥

॥ अथ दशमः खण्डः ॥

मनोतायै हविषो ऽवदीयमानस्यानुब्रूहीत्याहाध्वर्युस्त्वं ह्यग्ने प्रथमो मनोतेति सूक्तमन्वाह तदाहुर्यदन्यदेवत्य उत पशुर्भवत्यथ कस्मादाग्नेयीरेव मनोतायै हविषो ऽवदीयमानस्यान्वाहेति तिस्रो वै देवानां मनोतास्तासु हि तेषां मनांस्योतानि वाग्वै देवानां मनोता तस्यां हि तेषां मनांस्योतानि गौर्वै देवानां मनोता तस्यां हि तेषां मनांस्योतान्यग्निर्वै देवानां मनोता तस्मिन् हि तेषां मनांस्योतान्यग्निः

---

* शत० ब्रा० १. ८. १. २४ द्रष्टव्यम् ।

† व्याख्यातश्चैतदिडाह्वानं तैत्तिरीयसंहिताभागे (२.६.७.) । शतपथेऽप्येव मेव श्रुत मिडाह्वानम् 'उपहूयते । उपहूतꣳ रथन्तरꣳ सह पृथिव्या'-इत्यादिना (१.८.१.१९.) ।

सर्वा मनोता अग्नौ मनोताः सङ्गच्छन्ते तस्मादाग्नेयीरेव मनोतायै हविषो ऽवदीयमानस्यान्वाहाग्नीषोमा हविषः प्रस्थितस्येति हविषो यजति हविष इति रूपसमृद्धा प्रस्थितस्येति रूपसमृद्धा सर्वाभिर्हास्य समृद्धिभिः समृद्धं हव्यं देवानप्येति य एवं वेद वनस्पतिं यजति प्राणो वै वनस्पतिर्जीवं हास्य हव्यं देवानप्येति यत्रैवं विद्वान् वनस्पतिं यजति स्विष्टकृतं यजति प्रतिष्ठा वै स्विष्टकृत् प्रतिष्ठाया मेव तद्यज्ञ मन्ततः प्रतिष्ठापयतीळा मुपह्वयते पशवो वा ळा पशूनेव तदुपह्वयते पशून् यजमाने दधाति-- धाति ॥ १० ॥

॥ इत्यैतरेयब्राह्मणे द्वितीयपञ्चिकायां प्रथमोध्यायः ॥१॥

अथ हृदयाद्यङ्गरूपस्य प्रधानहविषो ऽवदानकाले किञ्चित् सूक्तं विधातुं प्रैषमन्त्रं विधत्ते—"मनोतायै हविषो ऽवदीयमानस्यानुब्रूहीत्याहाध्वर्युः"-इति । देवानां मनांस्योतानि दृढं प्रविष्टानि यस्यां देवतायां सा मनोता । तदर्थं हृदयादेरेकादशाङ्गरूपं हविरवदीयते ॥

तस्य हविषोऽनुकूला ऋचोऽनुब्रूहीत्यध्वर्युः प्रैषमन्त्रं पठन् सूक्तं* विधत्ते—"त्वं ह्यग्ने प्रथमो मनोतेति सूक्त मन्वाह"-इति ।

---

* मनोतासूक्त मिदम् । तदाहाश्वलायनः—'मनोतायै सम्प्रेषितस्त्वं ह्यग्ने प्रथम इत्याह'-इत्यादि ३. ६. १ । तै० ब्रा० ३. ६. १०. एतदेव सूक्तम् ।

त्वं ह्यग्ने इत्यादिकं त्रयोदशर्चं सूक्तम् (मं६.१.१—१३.)। तन्मैत्रावरुणो ब्रूयात्*। तदाह बौधायन:—"यदा आमाति मनोतायै हविषोऽवदीयमानस्यानुब्रूहीति, तदा मैत्रावरुणो मनोता मन्वाह—त्वं ह्यग्ने प्रथम:"-इति। अत्र वैय्यधिकरण्यलक्षणं चोद्यम् अवतारयति—"तदाहुर्यदन्यदेवत्य उत पशुर्भवत्यथ कस्मादाग्नेयीरे मनोतायै हविषोऽवदीयमानस्यान्वाहेति"-इति। अत्र हविरग्नीषोमदेवत्यम्, सूक्तगता ऋच: केवलाग्निदेवताका:। तत्र 'यत्' यस्मात् कारणात् पशु: 'अन्यदेवत्य: उत' देवतान्तरयुक्त: खलु भवति, तस्मात् कारणाद्वैय्यधिकरण्य मिदम्। तच्चायुक्त मिति ब्रह्मवादिनश्चोद्यम् 'आहु:'। तस्य समाधानं दर्शयति—"तिस्रो वै देवानां मनोतास्तासु हि तेषां मनांस्योतानि; वाग् वै देवानां मनोता, तस्यां हि तेषां मनांस्योतानि; गौर्वै देवानां मनोता, तस्यां हि तेषां मनांस्योतानि; अग्निर्वै देवानां मनोता, तस्मिन् हि तेषां मनांस्योतान्यग्नि: सर्वा मनोता, अग्नौ मनोता: सङ्गच्छन्ते; तस्मादाग्नेयीरेव मनोतायै हविषोऽवदीयमानस्यान्वाह"-इति। वाग्गौरग्निरित्येतासु देवतासु देवमन:समाश्रितत्वात् तिस्रोऽपि देवता मनोता इत्युच्यन्ते। ताश्च तिस्र: सर्वा मनोता:, अग्नि:स्वरूपा एव; अग्नौ तासां सङ्गतत्वात्। सङ्गतिश्च तदीयहविषोऽग्न्याधारकत्वात्। तस्मादग्नेर्मुख्यत्वादग्निदेवताका ऋचोऽनुब्रूयात्॥

अथ हृदयाद्यङ्गरूपस्य प्रधानहविषो याज्यां विधत्ते—"अग्नी-

---

* तैत्तिरीयाम्नाये तु हविर्वनस्पतिस्विष्टकृतां मैत्रावरुणेन वपाया: पुरोऽनुवाक्या: प्रैषाश्च ब्राह्मणीयतृतीयकाण्डेऽनुक्रमेणैव श्रुता: (६. ११. अनु०), तत्र उपरश्मिमनुवाके याज्या अपि।

षोमा हविषः प्रस्थितस्येति (सं० १.९३. ७.) हविषो यजति”-इति । अग्नीषोमेत्यादिकां याज्यां पठेदित्यर्थः । अस्या याज्याया हविरानुकूल्यं दर्शयति—“हविष इति रूपसमृद्धा, प्रस्थितस्येति रूपसमृद्धा”-इति । इदं हृदयादिकं हविः, प्रस्थितं वेद्या मासादितम् ; याज्यायां हविषः प्रस्थितस्येति पदद्वयं श्रुतम् । तस्मादिय मनुकूला । वेदनं प्रशंसति—“सर्वाभिर्हास्य समृद्धिभिः समृद्धं हव्यं देवानप्येति य एवं वेद”-इति । हविषो यथाशास्त्र मवदानपाकविशेषः, परस्परं हृदयादीना मसङ्कीर्णत्वम्,-इत्यादयो याः समृद्धयो ऽपेक्षिताः, ताभिः सम्पूर्णं भूत्वा तद्धविर्देवान् प्राप्नोति ॥

अथ वनस्पतियागं विधत्ते—“वनस्पतिं यजति, प्राणो वै वनस्पतिः”-इति । वनस्पतिः वृक्षः । तथाविधशरीरयुक्तां देवतां यजेत् । तत्प्रकार आपस्तम्बेन दर्शितः—“जुह्वा मुपस्तीर्य सकृत् पृषदाज्यस्योपहत्य द्विरभिघार्य वनस्पतयेऽनुब्रूहि वनस्पतये प्रेष्येति संप्रैषौ वषट्कृते जुहोति”-इति (श्रौ० ७. २५. १५.) । अत्र वनस्पतेः वृक्षशरीरस्य जीवाविष्टत्वात् प्राणरूपत्वम् * । यष्टुर्वेदनं प्रशंसति—“जीवं हास्य हव्यं देवानप्येति यत्रैवं विद्वान् वनस्पतिं यजति”-इति । विदुषो यष्टुर्हविरेवं प्राणोपेतं चेतनं भूत्वा तद्धविर्देवानाप्नोति ॥

अथ स्विष्टकृद्यागं विधत्ते—“स्विष्टकृतं यजति, प्रतिष्ठा वै स्विष्टकृत् ; प्रतिष्ठाया मेव तद्यज्ञ मन्ततः प्रतिष्ठापयति”-

---

* भगवतो निरुक्तकारस्य यास्कस्याभिमतविरुद्ध मिदं भाष्यम् । तेन ह्युक्तम्—‘यज्ञसंयोगाद्राजा स्तुतिं लभेत, राजसंयोगाद् युद्धोपकरणानि । तेषां रथः प्रथमागामी भवति’-इति, ‘आत्मैवैषां रथो भवत्यात्माश्व आत्मायुध मात्मेषवः’-इत्यादि च (निरु०९.२.१;७.१.५.)।

इति । वैकल्यपरिहारेण स्विष्टकृत्त्वापादनात् स्विष्टकृतः प्रतिष्ठात्वम् । तद्यागानुष्ठानेनेमं 'यज्ञ मन्ततः' समाप्त्यवसरे प्रतिष्ठायां स्थापयति * ॥

इळोपह्वानं† विधत्ते—"इळा मुपह्वयते ; पशवो वा इळा, पशूनेव तदुपह्वयते,—पशून् यजमाने दधाति-दधाति"-इति । पूर्ववद् (२०४ पृ०) व्याख्येयम् ; पुरोडाशेडा पूर्वखण्डेऽभिहिता, इह तु पश्विडेति विशेषः । अत्र सर्वत्र यद्यच्चोदकतः प्राप्तम्, तस्य सर्वस्य विधि मनूद्य प्रशंसा कृतेति द्रष्टव्यम् ॥ दधातीतिपदाभ्यासो ऽध्यायसमाप्त्यर्थः ॥

अथ मीमांसा । दशमाध्यायस्य तृतीयपादे (जै० सू० ४२. अधि० २२.) चिन्तितम्—

"मनोतामन्त्र ऊह्योऽस्ति वायव्ये नास्ति वाद्यसौ ।
आग्नेय्येवेति वचनं प्रकृतौ सार्थकं यतः ॥
अग्नीषोमावग्निनैव लक्षितौ वचनं विना ।
अनर्थकं तत्र वाक्यं ‡ विकृतावूहवारणम् ॥

"त्वꣳ ह्यग्ने प्रथमो मनोता"-इति (सं० ६.१.१.), अयं मनोतामन्त्रो ऽग्नीषोमीयपशौ पठितः (तै० ब्रा० ३. ६. १०.); वायव्यपशावयं चोदकप्राप्तः । तत्र 'त्वं हि वायो प्रथमः'-इत्येव मूह्योऽस्ति । यत्तु वचनम्—'यद्यप्यन्यदेवत्यः पशुराग्नेय्येव मनोता कार्या'-इति, तत्प्रकृतौ पठितम् ; तत्रैव वचनं सार्थकम् ; द्विदेवत्यपशावेकवचनमन्त्रस्य प्रकरणपठितस्याप्ययोग्यत्वशङ्कया पुनर्विधा-

---

* 'स्थापयेत्' ख । † 'इळोपाह्वानं' क, घ ।

'अनर्थकागतौ वाक्याद्' ए. सो. सु. सं० ग्रा० भा० २ भा० ४११ पृ० ।

कार्यत्वात् *। नैवम्; हविषो गच्छन्तीत्यादिवाक्यगतस्याग्निशब्दस्याग्नीषोमलक्षकत्वेनायोग्यतया शङ्काया अनुदयात्। अतः प्रज्ञातावनर्थकं तद्वाक्यं विज्ञातावूहनिवारणेन चरितार्थं भवति। तस्मादूहो नास्ति"-इति ॥ १० ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां प्रथमाध्याये
दशमः खण्डः ॥ १० ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायाः प्रथमोऽध्यायः ॥

---

* अतएवाहाश्वलायनः—"तत्र प्रैषे कतर एवाग्नीषोमावेव मितौ तरीयिषः। अन्यत्र द्विदेवतान्मैत्रावरुणदैवते च। तथा दृष्टत्वात्। प्रकृतत्वा गाणगारिः। उत्पन्नानां स्यात् आम्नायेऽनर्थभेदे निरर्थो विकारः"-इति श्रौ० ३. ६. ३—७ सू०।

॥ अथ द्वितीयाध्यायः ॥

(नव)

॥ अथ प्रथमः खण्डः ॥

देवा वै यज्ञ मतन्वत तांस्तन्वानानसुरा अभ्यायन्यज्ञवैशस मेषां करिष्याम इति तानाप्रीते पशौ पुर इव पर्यग्नेर्यूपं प्रति पुरस्तादुपायंस्ते देवाः प्रतिबुध्याग्निमयीः पुरस्त्रिपुरं पर्यास्यन्त यज्ञस्य चात्मनश्च गुप्त्यै ता एषा मिमा अग्निमय्यः पुरो दीप्यमाना भ्राजमाना अतिष्ठंस्ता असुरा अनपधृष्यैवापाद्रवंस्ते ऽग्निनैव पुरस्तादसुररक्षांस्यपाघ्नताग्निना पश्चात्तथैवैतद्यजमाना यत्पर्यग्निकुर्वन्त्यग्निमयीरेव तत्पुरस्त्रिपुरं पर्यस्यन्ते यज्ञस्य चात्मनश्च गुप्त्यै तस्मात्पर्यग्नि कुर्वन्ति तस्मात्पर्यग्नये ऽन्वाह तं वा एतं पशु माप्रीतं सन्तं पर्यग्निकृत मुदञ्चं नयन्ति तस्योल्मुकं पुरस्ताद्धरन्ति यजमानो वा एष निदानेन यत्पशुरनेन ज्योतिषा यजमानः पुरोज्योतिः स्वर्गं लोक मेष्यतीति तेन ज्योतिषा यज-

मानः पुरोज्योतिः स्वर्गं लोक मेति तं यत्र निहनिष्यन्तो भवन्ति तदध्वर्युर्बर्हिरधस्तादुपास्यति यदेवैन मद आम्नीतं सन्तं पर्यग्निकृतं बहिर्वेदि नयन्ति बर्हिषद मेवैनं तत्कुर्वन्ति तस्योवध्यगोहं खनन्त्यौषधं वा ऊवध्य मियं वा ओषधीनां प्रतिष्ठा तदेनत्स्वाया मेव प्रतिष्ठाया मन्ततः प्रतिष्ठापयन्ति तदाहुर्यदेष हविरेव यत्पशुरथास्य बह्वपैति लोमानि त्वगसृक्कुष्ठिकाः शफा विषाणे स्कन्दति पिशितं केनास्य तदापूर्यत इति यदेवैतत्पशौ पुरोळाश मनु निर्वपन्ति तेनैवास्य तदापूर्यते पशुभ्यो वै मेधा उदक्रामंस्तौ व्रीहिश्चैव यवश्च भूतावजायेतां तद्यत्पशौ पुरोळाश मनुनिर्वपन्ति समेधेन नः पशुनेष्ट मसत् केवलेन नः पशुनेष्ट मसदिति समेधेन हास्य पशुनेष्टं भवति केवलेन हास्य पशुनेष्टं भवति य एवं वेद ॥ ११ ॥

यूपोऽथ यूपाञ्जन माप्रियश्च पर्यग्न्युपप्रैष मथाभिगुश्च ।
पशौ पुरोडाशविधिर्मनोतावनस्पतिस्विष्टकृदिडास्तुतिश्च ॥

अथ सप्तमाध्याये पशुप्रैषप्रातरनुवाकौ वक्तव्यौ । तत्र पर्यग्निकरणस्तुत्यर्था माख्यायिका माह—"देवा वै यज्ञ मतन्वत; तांस्तन्वानानसुरा अभ्यायन्यज्ञवेशस मेषां करिष्याम इति ; तानाप्रीते पशौ पुर इव पर्यग्नेर्यूपं प्रति पुरस्तादुपायंस्ते देवाः प्रतिबुध्याग्नि-

सर्वाः पुरस्त्रिपुरं पर्यास्यन्त, यज्ञस्य चात्मनश्च गुप्त्यै ; ता एतां मिमा अग्निमय्यः पुरो दीप्यमाना भ्राजमाना अतिष्ठंस्ता असुरा अनपधृष्यैवापाद्रवंस्ते ऽग्निनैव पुरस्तादसुररक्षांस्यपाघ्नताग्निना पश्चात्"-इति । पुरा कदाचिद् 'देवा यज्ञम्' 'अतन्वत' विस्तारितवन्तः । यद्यपि पूर्वमीमांसाकर्तृभिर्नवमाध्याये देवाना मशरीरत्वात्कर्म्माधिकारो नास्तीत्युक्तम् *, तथापि प्रशंसार्थत्वेन स्वार्थतात्पर्याभावाद्† अविरोधः । यद्वा ; उत्तरमीमांसाकर्तृभिः शरीर मङ्गीकृत्य विद्याधिकारोपपादनाद् ‡ इतरेषां § शरीरराहित्य मृत्विगादिवत् कर्म्मकाले प्रत्यक्षशरीरं नास्तीति तदभिप्रायं कर्म्माधिकारनिराकरणस्य कर्म्मसाध्यस्य स्वर्गस्य प्राप्तत्वात्तत्प्रयोजनाभावाभिप्रायम् । जगदनुग्रहार्थं तु तेषां शरीराणा मस्त्येवाधिकार इत्यभिप्रेत्य यज्ञ मतन्वतेत्यत्रोच्यते । 'तान्' देवान् यज्ञविस्तारिणो ऽभिलक्ष्य 'असुराः' आगच्छन् । केनाभिप्रायेणेति, तदुच्यते—'एषां

---

* जै०सू०९.१.६—१०. अधि० ४ ; ४२—४४ सू० अधि० १५ ; ६.७.१२ सू० अधि०१२ ।

† तथाचाह शबरस्वामी—"असद्वृत्तान्तान्वाख्यानं, स्तुत्यर्थेन प्रशंसाया गम्यमानत्वात् । इहान्वाख्याने वर्त्तमाने, इयं निष्पद्यते,—यत्र वृत्तान्तज्ञानं, यत्र काचित्प्ररोचना, द्वेषो वा । तत्र वृत्तान्तान्वाख्यानं न प्रवर्त्तकं न निवर्त्तकं च इति प्रयोजनाभावात् अनर्थक मिति अविवक्षितं ; प्ररोचनया तु प्रवर्त्तते, द्वेषात् निवर्त्तते इति तयोर्विवक्षा । वृत्तान्तान्वाख्यानेऽपि विधीयमाने आदिमत्ता दोषो वेदस्य प्रसज्येत !"—इति (जै० सू० १. २. १०. भा०) ।

‡ वे० सू० १. ३. २६—३३. अधि० ८ ।

§ 'इतरेषाम्' मनुष्याणाम् । तथाहि—'अपि वा कर्मपृथक्त्वाद् यथा होताध्वर्युर्ब्रह्मोद्गातेत्यप्येकस्य सतः'—इति निरु० ७. २. १ । तत्रैव तत उत्तरम्—'अथाकारचिन्तनं देवतानाम्'—इत्युपक्रम्य 'अपुरुषविधाः स्युः'—इत्यादिना (७. २. २, ३.) इन्द्रादीनां विग्रहाभ्युपगम एव सिद्धान्तितो यास्केन ।

देवानां 'यज्ञवेशसं' यज्ञविघातं 'करिष्याम इति' तदभिप्रायः। कदा, कुत्र, समागता इति तदुच्यते,— 'पश्वावाप्रीते' प्रयाजैस्तर्पिते सति 'पर्यग्नेः पुर इव' पर्यग्निकरणात् पूर्वस्मिन् काले 'यूपं प्रति' 'पुरस्तात्' पूर्वदेशे, 'तान्' देवानसुरा उपागच्छन्। 'ते देवाः' तदागमनं निश्चित्य 'अग्निमयीः पुरः' अग्निप्राकाराः 'त्रिपुरं' वेष्टनत्रयं यथा भवति तथा 'पर्यास्यन्त' पशोः पुरतः प्रक्षिप्तवन्तः। तच्च प्रक्षेपणं 'यज्ञस्य' देवानां स्वरूपस्य च रक्षणाय भवति। 'एषां' देवानां सम्बन्धिन्यः 'ताः पुरः' पशोः परितो ज्वलन्त्यो ऽन्धकारं निवर्त्य तं देशं प्रकाशयन्त्यः 'अतिष्ठन्'। 'ता अग्निमय्यः पुरः' 'अनपधृष्येव' तिरस्कार मकृत्वैव 'अपाद्रवन्' अपगताः। तत्र देवास्तेन च प्राकाररूपेण 'अग्निना' पूर्वस्यां दिशि असुरान् रक्षांसि च हतवन्तः;—'पश्चाद्' अपि 'अग्निना' एव हतवन्तः॥

अथ पर्यग्निकरणं विधत्ते— "तथैवैतद्यजमाना यत्पर्यग्नि कुर्वन्त्यग्निमयीरेव तत्पुरस्त्रिपुरं पर्यस्यन्ते, यज्ञस्य चात्मनश्च गुप्त्यै; तस्मात्पर्यग्नि कुर्वन्ति, तस्मात्पर्यग्नये ऽन्वाह"-इति। यथा देवैरग्निप्राकाराः कृताः, 'तथैवैतद्यजमानाः' पर्यग्नि 'कुर्वन्ति'। अतो यद्येतत्कुर्युस्तदानीमग्निप्राकारवेष्टनं पशोः परितः प्रक्षिपन्ति 'यज्ञस्य चात्मनश्च' रक्षणाय भवति। तस्मादवश्यं पर्यग्निकरणमपेक्षितम्। तदर्थमनुवचनं चापेक्षितम्। तच्च पर्यग्निकरणमापस्तम्बो विस्पष्टयति—"आहवनीयादुल्मुकमादायाग्नीध्रः परि वाजपतिः कविरिति त्रिः प्रदक्षिणं पर्यग्नि करोति पशुम्"-इति (श्रौ० ७.१५.२.)। अनुवचनं पूर्वमेवाग्निर्होता न इत्यादिन दर्शितम् (२६७ पृ०)। पर्यग्निकरणादूर्ध्वं पशोः शामित्रदेशं प्रत्या

नयनं विधत्ते—"तं वा एतं पशु माप्रीतं सन्तं पर्यग्निकृत मुदञ्चं नयन्ति"-इति । प्रयाजैस्तोषितं पर्यग्निकरणेन रक्षितम् पशु मुदङ्मुखं कृत्वा नयेयुः । नीयमानस्य पशोः पुरतो नेतव्यं विधत्ते—"तस्योल्मुकं पुरस्ताद्धरन्ति"-इति । तदेतदुभय मापस्तम्बेन स्पष्टीकृतम्—"आहवनीयादुल्मुक मादायाग्नीध्रः पूर्वः प्रतिपद्यते । शमिता पशुं नयति । उरोरन्तरिक्षेत्यन्तरा चात्वालोत्करावुदञ्चं पशुं नयन्ति"-इति (७.१५.८-१०.)। पशोः पुरतो वह्निनयनं प्रशंसति—"यजमानो वा एष निदानेन यत्पशुरनेन ज्योतिषा यजमानः पुरोज्योतिः स्वर्गं लोक मेष्यतीति तेन ज्योतिषा यजमानः पुरोज्योतिः स्वर्गं लोक मेति"-इति । यः 'पशुः' अस्ति, 'एषः' 'निदानेन' सूक्ष्मदृष्टिनिरूपणेन 'यजमानः' एव भवति ; पशुना स्वात्मनो निष्क्रीतत्वात् । पशोर्यजमानत्वं निष्क्रयणं च पूर्व मेव [आत्मनिष्क्रयण मेवास्य सन्दृकयति (?)] श्रुत्यन्तरोदाहरणेन दर्शितम् (२५६, २५७ पृ०)। पशोः पुरतो नीयमानज्योतिषायं यजमानः पुरोवर्त्तिदीपयुक्तो भूत्वा स्वर्गं लोकं प्रयास्यति । यथा राजामात्यादिः पर्यटने रात्रौ पुरोवर्त्तिदीपयुक्तो गच्छति, तद्वदित्यभिप्रेत्योल्मुकं पुरस्तान्नयन्ति ;—तदभिप्रायानुसारेणैव यजमानोऽपि तथा स्वर्गं लोकं प्राप्नोति । तदेतदग्नेः पुरतो नयनं शाखान्तरेऽप्याम्नातम्—"यर्हि पशु माप्रीत मुदञ्चं पशुं नयन्ति, तर्हि तस्य पशुश्रपणꣳ हरेत् ; तेनैवैनं भागिनं करोति"-इति (तै० सं० ३. १. ३. २.)।

शामित्रदेशं नीतस्य पशोर्हननस्थले बर्हिःप्रक्षेपं विधत्ते—"तं यत्र निहनिष्यन्तो भवन्ति, तदध्वर्युर्बर्हिरधस्तादुपास्यति"-इति । 'तं' पशुं यस्मिन् देशे हनिष्याम इत्येवं मन्यन्ते, तस्मिन्

देशे 'अध्वर्युः' भूमौ 'बर्हिः' प्रक्षिपेत्। तदेतत् शाखान्तरे समन्त्रक माम्नातम्—"पृथिव्याः सम्पृचः पाहीति बर्हिरुपास्यत्यस्कन्दायास्कन्नꣳ हि तद्यद्बर्हिषि स्कन्दत्यथो बर्हिषद मेवैनं करोति"-इति (तै० सं० ६. ३. ८. २. *)। तदेतदापस्तम्बेन स्पष्टीकृतम्—"अभिपर्यग्निकृते देशे उल्मुकं निदधाति। स शामित्रः। तं दक्षिणेन प्रत्यञ्चं पशु मवस्थाप्य पृथिव्याः सम्पृचः पाहीति तस्याधस्ताद् बर्हिरुपास्यत्युपाकरणयोरन्यतरत्। तस्मिन् सञ्ज्ञपयन्ति † प्रत्यक्शिरस मुदीचीनपादम्"--इति (७.१६. २-५.)। पशोरधो बर्हिःप्रक्षेपं प्रशंसति—"यदेवैन मद आप्रीतं सन्तं पर्यग्निकृतं बर्हिर्वेदि नयन्ति, बर्हिषद मेवैनं तत् कुर्वन्ति"-इति। प्रयाजैस्तोषितं, पर्यग्निकरणेन रक्षितं, पशुं सौमिकवेदेः बहिर्भागे संज्ञपनाय नयन्तीति अदो यदस्ति, तदानीम् 'एनं' पशुं 'बर्हिषद मेव' दर्भेऽवस्थित मेव 'कुर्वन्ति'। यद्वा; 'बर्हिषदं' यज्ञेऽवस्थितं वेद्या मवस्थितं 'कुर्वन्ति'। बाह्यदेशे नयनदोषं परिहरतीत्यर्थः॥

पशोः पुरीषस्थापनार्थ मवटखननं विधत्ते—"तस्योवध्यगोहं खनन्ति"-इति। ऊवध्यं पुरीषं, तस्य गोहं गोपनस्थानं, तत्कुर्युः। अस्य खननस्य कालः आपस्तम्बेन दर्शितः—"ऊवध्यगोहं पार्थिवं खनतादित्यभिज्ञायोवध्यगोहं खनति"-इति (श्रौ० ७.१६.१.)। होता त्वध्रिगुप्रैषमन्त्रे ‡ यदोवध्यगोह मिति वाक्यं पठति, तदा

---

* पृथिव्याः सम्पृचः पाहीति मन्त्रस्तु, तै० सं० १. ३. ८. २।

† 'शमितार इति शेषः। अक्षतस्य मारणं संज्ञपनम्'-इति तट्टीका।

‡ स मन्त्रः तैत्तिरीयब्राह्मणे (३. ६. ६ अनुवाके) आम्नातः, इह षष्ठाध्यायीयषष्ठसप्तमखण्डयोः व्याख्यातश्च (२७१—२९४ पृ०)।

खनेदित्यर्थः । तदेतदूवध्यगोहखननं प्रशंसति—"औषधं वा ऊवध्य मियं वा ओषधीनां प्रतिष्ठा, तदेनत् स्वाया मेव प्रतिष्ठाया मन्ततः प्रतिष्ठापयन्ति"-इति । तदेतदर्थवादवाक्यं पूर्वाध्याय-मन्त्रप्रसङ्गे व्याख्यातम् [*] ॥

अथ पशुपुरोडाशं [†] प्रशंसितुं प्रश्न मुत्थापयति—"तदाहुर्यदेव हविरेव यत्पशुरथास्य बह्वपैति,—लोमानि त्वगसृक् कुष्ठिकाः शफा विषाणे ; स्कन्दति पिशितं ; केनास्य तदापूर्यत इति"-इति । 'तत्' तत्र पशौ ब्रह्मवादिनः 'आहुः'—'यद्' यदा यः 'पशुः' अस्ति, 'एषः' सर्वोऽपि 'हविरेव' ; कृत्स्नस्य पशोरुपाकृतत्वात् । 'अथ' तदानीं कस्याप्यवयवस्यापनयो न युक्तः ; इह तु 'बहु' अवयवजातम् 'अपैति' ; तद्यथा—'लोमानि' रोमाणि, 'त्वक्' चर्म, 'असृक्' रक्तम्, 'कुष्ठिकाः' उदरवर्तिनो भक्षितास्तृणादयः, 'शफाः' खुराः, 'विषाणे' शृङ्गद्वयम् । एतत्सर्व मपैति ; अग्नौ होमाभावात् । किञ्च 'पिशितं' मांसं यत्किञ्चित् 'स्कन्दति' भूमौ पतति, तदप्यपैति । एवं सति 'केन' प्रकारेण 'अस्य' पशोः सम्बन्धि 'तत्' सर्व मवयवजातं समन्तात् 'पूर्यते' ? इति प्रश्नः ।

तस्योत्तर माह—"यदेवैतत्पशौ पुरोळाश मनु निर्वपन्ति, तेनैवास्य तदापूर्यते"-इति । पश्वालम्भनम् 'अनु'सृत्य 'पुरोळाशं निर्वपन्ति' इति 'यत्' इद मस्ति, 'तेनैव' 'अस्य' पशोः सम्बन्धि 'तत्' सर्वं मवयवजातं पूरितं भवति ।

तदेतदुपपादयति—"पशुभ्यो वै मेधा उदक्रामंस्तौ व्रीहिश्चैव यवश्च भूतावजायेतां ; तद्यत्पशौ पुरोळाश मनु निर्वपन्ति', समेधेन

---

[*] २७५ पृ० १२ पं० पशुभक्षिताना मित्यादिना ।

[†] 'पश्वङ्गः पुरोडाशः पशुपुरोडाशः'-इति आप० श्रौ० ७. २२, १. टी० ।

नः पशुनेष्ट मसत्केवलेन नः पशुनेष्ट मसदिति"-इति। मनुष्याश्वादिभ्यः सकाशात् 'मेधाः' यज्ञयोग्याः भागाः 'उदक्रामन्'; तदेतत् पुरुषं वै देवा इत्यस्मिन् खण्डे प्रपञ्चितम् (२९४—३०० पृ०)। उत्क्रान्तमेधा भूमौ प्रविश्य 'व्रीहिर्यवश्च'-इति यौ धान्यविशेषौ विद्येते, तावुभौ 'भूमौ'* तद्रूपतां प्राप्तौ 'अजायेतां' भूमेः सकाशादुत्पन्नौ। तद्यत्पशावित्यादिकं तस्मिन्नेव खण्डे व्याख्यातम् (२९७ पृ० ५पं०)।

एतद्वेदनं प्रशंसति —"समेधेन ह्यस्य पशुनेष्टं भवति, केवलेन ह्यस्य पशुनेष्टं भवति, य एवं वेद"-इति। एतदपि तत्रैव व्याख्यातम् (२९७ पृ० १६ पं०)। पुनरप्यत्रोक्तिर्यवप्रशंसार्था; पूर्वत्र व्रीहिमात्रं प्रशंसितम्, इह तु व्रीहियवा उभावपि प्रशस्येते इत्यविशेषः ॥

अत्र "यदेष हविरेव यत्पशुः"-इत्युक्तम् (३१७ पृ० ५ पं०), तत्र कश्चिद्विशेषो मीमांसा-दशमाध्यायस्य सप्तमपादे (जै० सू० १, २. अधि० १.) चिन्तितः—

"पशुः कृत्स्नो हविः किं वा प्रत्यङ्गं हविरन्यतः।
आद्यो वा चोदनान्नैव मवदानपृथक्त्वतः॥

"अग्नीषोमीयं पशु मालभेत"-इत्यत्र (२५१, २५५ पृ०) कृत्स्नस्य पशोरेकहविष्ट्वं युक्तम्। कुतः? अग्नीषोमदेवतां प्रति द्रव्यत्वेन पशोश्चोदितत्वात्। न हि हृदयाद्यङ्गं साक्षात् पशुर्भवतीति प्राप्ते, ब्रूमः;—"हृदयस्याग्रेऽवद्यति, अथ जिह्वाया अवद्यति, वक्षसोऽवद्यति, दोष्णोरवद्यति, पार्श्वयोरवद्यति"-इत्यादिना हृदयाद्यङ्गाना मवदानानि पृथगाम्नायन्ते (तै० सं० ६.३.

---

* मद्दृष्टेषु सर्वमूलपुस्तकेषु 'भूतौ'-इति, सर्वटीकापुस्तकेषु 'भूमौ'-इत्येव।

१०.४.)। अवदानं च हविष्ट्वप्रयोजकः संस्कारः ; पुरोडाशे ह्येतु मवदीयमानत्वदर्शनात्। हविःशब्दस्तु कर्मव्युत्पत्त्या होमयोग्यं द्रव्यं ब्रूते। पश्वाजातिचोदना तु हृदयाद्यङ्गद्वारेण। तस्मात् प्रत्यङ्गं हविर्भेदः”–इति ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां द्वितीयाध्याये
प्रथमः खण्डः ॥ १ (११) ॥

॥ अथ द्वितीयः खण्डः ॥

तस्य वपा मुत्खिद्याहरन्ति ता मध्वर्युः स्रुवेणाभिघारयन्नाह स्तोकेभ्यो ऽनुब्रूहीति तद्यत् स्तोकाः * श्चोतन्ति सर्वदेवत्या वै स्तोका नेन्म इमे ऽनभिप्रीता देवान् गच्छानिति जुषस्व सप्रथस्तम मित्यन्वाह वचो देवप्सरस्तमं हव्या जुह्वान आसनीत्यग्ने रेवैनांस्तदास्ये जुहोतीमं नो यज्ञ ममृतेषु धेहीति सूक्त मन्वाहेमा हव्या जातवेदो जुषस्वेति हव्यजुष्टि माशास्ते स्तोकाना मग्ने मेदसो घृतस्येति मेदसश्च हि घृतस्य

---

* अत्र सर्वत्रैव 'स्तोकाः श्चोतन्ति'–इति सविसर्गपाठः क-पुस्तके ।

दैवानां होताग्ने प्राशान प्रथमो निषद्येत्येव तदाह घृतवन्तः पावक ते स्तोकाः श्चोतन्ति मेदस इति मेदसश्च ह्येव हि घृतस्य च भवन्ति स्वधर्मं देववीतये श्रेष्ठं नो धेहि वार्य मित्याशिष माशास्ते तुभ्यं स्तोका घृतश्चुतोऽग्ने विप्राय सन्त्येति घृतश्चुतो हि भवन्त्यृषिः श्रेष्ठः समिध्यसे यज्ञस्य प्राविता भवेति यज्ञसमृद्धि माशास्ते तुभ्यं श्चोतन्त्यध्रिगो शचीव स्तोकासो अग्ने मेदसो घृतस्येति मेदसश्च ह्येव हि घृतस्य च भवन्ति कविशस्तो बृहता भानुना गा हव्या जुषस्व मेधिरेति हव्यजुष्टि मेवाशास्त ओजिष्ठं ते मध्यतो मेद उद्भृतं प्र ते वयं ददामहे श्चोतन्ति ते वसो स्तोका अधि त्वचि प्रति तान् देवशो विहीत्यभ्येवैनांस्तद्वषट् करोति यथा सोमस्याग्ने वीहीति तद्यत् स्तोका श्चोतन्ति सर्वदेवत्या वै स्तोकास्तस्मादियं स्तोकशो वृष्टिर्विभक्तोपाचरति ॥ २ (१२) ॥

अथ स्तोकानुवचनीयाः* विधातु मादौ प्रैषमन्त्रं विधत्ते—
“तस्य वपामुत्खिद्याहरन्ति; ता मध्वर्युः स्रुवेणाभिघारयन्नाह,—

---

* ‘अग्निसंयोगाद् ये मेदसो बिन्दवश्चोतन्ति, ते स्तोकाः’—इति आप० श्रौ० टी० ७. २०. ३। ‘विप्लुतया शाखया धार्यमाणया वपाया उपरि ‘त्वा मु ते दधिरे’—इतिमन्त्रेण आज्ये हुते सति तस्मात् पतन्तो बिन्दवः स्तोकाः’—इति च सा०भा० (तै०सं०१.३.९.)।

स्तोकेभ्यो ऽनुब्रूहीति"-इति । 'तस्य' पशोः 'वपाम्' उदरगतां वसा-सहचरीम् 'उत्खिद्य' उद्धृत्य होमार्थम् 'आहरन्ति' । 'तां' च वपाम् 'अध्वर्युः' 'अभिघारयन्' प्रैषमन्त्रं ब्रूयात् । तदेतदापस्तम्बो विस्पष्टयति—"त्वा मु ते दधिरे हव्यवाह मिति स्रुवेण वपा मभिजुहोति । प्रादुर्भूतेषु स्तोकेषु स्तोकेभ्यो ऽनुब्रूहीति सम्प्रेष्यति"-इति (श्रौ० ७. २०. २, ३.) । तस्य प्रैषकथनस्य तात्पर्यं दर्शयति—"तद्यत् स्तोका श्चोतन्ति, सर्वदेवत्या वै स्तोका, नेन्म इमे ऽनभिप्रीता देवान् गच्छानिति"-इति । 'तत्' तस्यां वपायां तदानी मेव छिन्नाया मार्द्रायां श्रप्यमाणायां यदा 'स्तोकाः' नीरविन्दवः 'श्चोतन्ति' निर्मला अधः पतन्ति, तदानीं सर्वदेवानां प्रियत्वात् 'इमे' स्तोकाः स्वयम् 'अनभिप्रीताः' अस्मासु प्रीतिरहिताः 'देवान्' 'गच्छान्' गमिष्यन्ति । तथा सति महदेतदस्माकं भयकारणम् तन्माभूदित्यभिप्रेत्य स्तोकप्रीणनार्थमिदं प्रैषानुवचनम् । अत्र 'नेत्' इत्ययं शब्दः परिभयार्थः ॥

अथानुवचनं विधत्ते—"जुषस्व सप्रथस्तम मित्यन्वाह"-इति । तस्य अनुवचनस्य काल आश्वलायनेन दर्शितः—"वपायां श्रप्यमाणायां प्रेषितः स्तोकेभ्यो ऽन्वाह जुषस्व सप्रथस्तम मिमं नो यज्ञ मिति"-इति (श्रौ० ३.४.१.*) । अत्रानुवचनवक्ता मैत्रावरुणः । तदाह बौधायनः—"यदा जानाति स्तोकेभ्यो ऽनुब्रूहीति, तदा मैत्रावरुणः स्तोकीया अन्वाह जुषस्व सप्रथस्तम मिति"-इति ॥ तस्या ऋचो द्वितीयतृतीयपादा वनुवदति—"वचो देवप्सरस्तमं हव्या जुह्वान आसनि"-इति । सर्वस्यां

---

* जुषस्वेत्येका (मं० १. ७५. १.), इमं नो यज्ञ मिति सूक्तात्मिकाः पञ्च (मं० ३. २१. १—५.) ; त इमाः षडेवर्चस्तैत्तिरीयैरेकत्राम्नाताः (ब्रा० ३. ६. ७.) ।

[illegible] 'हव्या' हवींष्यस्मदीयानि 'आसनि' आस्ये मुखे 'जुह्वानः' प्रक्षिपन् 'वचः' अस्मदीयं स्तोत्रं 'जुषस्व' सेवस्व। कीदृशं वचः? 'सप्रथस्तमम्' अतिशयेन प्रथसा विस्तरेण सहितं, 'देवप्सरस्तमं' देवानामतिशयेन प्रीणयितृ। अत्रासनीति-पदस्याभिप्रायं दर्शयति—"अग्नेरेवैनांस्तदास्ये जुहोति"-इति। 'तत्' तेन मन्त्रपाठेन स्तोकानग्नेरेव मुखे जुहोति॥

अनुवचनीयामेकामृचं विधाय पुनरप्यनुवचनीयं पञ्चर्चं सूक्तं (सं० ३.२१.१—५.) विधत्ते—"इमं नो यज्ञममृतेषु धेहीति सूक्तमन्वाह"-इति। 'जातवेदः!' इति सम्बोधनं वक्ष्यते। 'नः' अस्मदीयम् 'इमं' यज्ञम् 'अमृतेषु' देवेषु 'धेहि' स्थापय। द्वितीयपादमनूद्य व्याचष्टे—"इमा हव्या जातवेदो जुषस्वेति हव्यजुष्टिमाशास्ते"-इति। जुषस्वेत्यभिधानाद्धविःसेवायाः प्रार्थनम्। तृतीयपादमनूद्य व्याचष्टे—"स्तोकानामग्ने मेदसो घृतस्येति मेदसश्च हि घृतस्य च भवन्ति"-इति। हे 'अग्ने!' 'मेदसः' वपायाः, हूयमानस्य च 'घृतस्य' ये 'स्तोकाः' विन्दवः सन्ति, तेषां मध्ये स्वादूनीत्यध्याहारः। 'प्राशान'-इतिवक्ष्यमाणेनान्वयः। अत्र ये स्तोकाः पतन्ति, यस्मात् 'मेदसश्च घृतस्य च' सम्बन्धिनो 'भवन्ति', तस्माद्युक्तोऽयं वादः। चतुर्थपादमनूद्य व्याचष्टे—"होतः प्राशान प्रथमो निषद्येत्यग्निर्वै देवानां होताग्ने प्राशान प्रथमो निषद्य त्वेव तदाह"-इति। हे 'होतः' होमनिष्पादकाग्ने! त्वं 'प्रथमः' मुख्यः सन् 'निषद्य' उपविश्य 'स्तोकान्' 'प्राशान' भक्षय। यद्यपि होतृशब्दोऽत्र प्रयुक्तः, तथाप्यग्नेरेव देवहोतृत्वात् अग्निमेव सम्बोध्य चतुर्थपादो ब्रूते॥

अस्मिन् सूक्ते द्वितीयस्या ऋचः पूर्वार्द्धं मनूद्य व्याचष्टे—"घृतवन्तः पावक ते स्तोका श्चोतन्ति मेदस इति, मेदसश्च ह्येव हि घृतस्य-च भवन्ति"-इति। हे 'पावक' शोधकाग्ने! 'ते' त्वदर्थं 'मेदसः' वपायाः सम्बन्धिनः 'घृतवन्तः' घृतसहिताः 'स्तोकाः' बिन्दवः 'श्चोतन्ति'। अत्र मेदःसम्बन्धे घृतसम्बन्धे च पृथक् प्रसिद्धिं वक्तुं मेदसश्च ह्येव हि घृतस्य चेति 'हि'-शब्दद्वयम्। उत्तरार्द्धं मनूद्य व्याचष्टे—"स्वधर्म्मं देववीतये श्रेष्ठं नो धेहि वार्यमित्याशिषमाशास्ते"-इति। 'देववीतये' देवानां भक्षणाय 'नः' अस्माकं 'स्वधर्म्मं' कुलोचितं यागाद्यनुष्ठानरूपं धर्म्मं 'धेहि' सम्पादय। कीदृशं धर्म्मम्? 'श्रेष्ठम्' अतिप्रशस्तम्; अतएव 'वार्यं' सर्वैर्वरणीयम्। अत्र स्वधर्म्मं धेहीत्यनेनाशीः प्रतीयते ॥

तृतीयस्या ऋचः पूर्वार्द्धं मनूद्य व्याचष्टे—"तुभ्यं स्तोका घृतश्चुतोऽग्ने विप्राय सन्त्येति, घृतश्चुतो हि भवन्ति"-इति। सनिः दानं, ता मर्हतीति सन्त्यः। हे 'सन्त्य' फलप्रदानकुशलाग्ने! 'विप्राय' मेधाविने 'तुभ्यं' त्वदर्थं 'स्तोकाः' बिन्दवः, 'घृतश्चुतः' घृतस्राविणो वर्त्तन्ते। अत्र घृतस्रावित्वप्रसिद्धिं 'हि'-शब्देन दर्शयति। उत्तरार्द्धं मनूद्य व्याचष्टे—"ऋषिः श्रेष्ठः समिध्यसे यज्ञस्य प्राविता भवेति, यज्ञसमृद्धिमाशास्ते"-इति। हे अग्ने! 'ऋषिः' द्रष्टा 'श्रेष्ठः' प्रशस्ततमश्च * 'समिध्यसे' अस्माभिः प्रज्वाल्यसे; अतो 'यज्ञस्य' अस्मदीयस्य 'प्राविता' प्रकर्षेण रक्षिता भव। अत्र यज्ञरक्षणवचनेन यज्ञसमृद्धि-प्रार्थनम् ॥

चतुर्थ्या ऋचः पूर्वार्द्धं मनूद्य व्याचष्टे—"तुभ्यं श्चोतन्त्यध्रिगो

---

* 'प्रशस्ततमश्च' घ।

शचीव स्तोकासो अग्ने मेदसो घृतस्येति, मेदसश्च ह्येव हि घृतस्य च भवन्ति"-इति । हे 'अध्रिगो' अधृतरश्मे ! हे 'शचीवः' शक्तिमन् ! 'अग्ने !' 'मेदसः' वपायाः सम्बन्धिनः 'घृतस्य' 'स्तोकासः' बिन्दवः 'तुभ्य' त्वदर्थं 'श्चोतन्ति' क्षरन्ति । अत्रापि 'हि'-शब्दद्वयं पूर्ववत् । उत्तरार्धं मनूद्य व्याचष्टे—"कविशस्तो बृहता भानुना गा हव्या जुषस्व मेधिरेति, हव्यजुष्टि मेवाशास्ते"-इति । हे अग्ने ! त्वं 'कविशस्तः' विद्वद्भिर्ऋत्विग्भिः स्तुतः सन् 'बृहता भानुना' महता तेजसा युक्तः 'आगाः' आगच्छ । हे 'मेधिर' यज्ञयोग्य ! अस्मदीयानि हव्यानि 'जुषस्व' । तदेतद्धविःसेवायाः प्रार्थनम् ॥

पञ्चम्या ऋचश्चतुरोऽपि पादाननुवदति—"ओजिष्ठं ते मध्यतो मेद उद्भृतं, प्र ते वयं ददामहे, श्चोतन्ति ते वसो स्तोका अधि त्वचि, प्रति तान् देवशो विहीति"-इति । हे अग्ने ! त्वदर्थम् 'ओजिष्ठ' बलवत्तमं 'मेदः' वपारूपं 'मध्यतः' पशोर्मध्यभागात् 'उद्भृतं' उत्खाय सम्पादितं 'वयं' यजमानाः 'ते' तुभ्यं 'प्रददामहे' प्रकर्षेण दद्मः । हे 'वसो' सर्वेषां निवासहेतो ! 'अधि त्वचि' वपाया अधिश्रिताः 'स्तोकाः' बिन्दवः 'ते' त्वदर्थं 'श्चोतन्ति' क्षरन्ति । 'देवशः' तत्तद्देवतुष्ट्यर्थं 'तान्' स्तोकान् 'प्रतिविहि' प्रत्येकं पिब । एतन्मन्त्रतात्पर्यं दर्शयति—"अभ्येवैनांस्तद्वषट् करोति, यथा सोमस्याग्ने वीहीति"-इति । 'तत्' तेन मन्त्रपाठेन 'एनान्' स्तोकान् 'अभि' वषट्कारमन्त्रं पठति । 'यथा सोमस्य'-इत्यादिमन्त्रस्तद्वत् ॥

इदानीं स्तोकान् प्रशंसति—"तद्यत् स्तोका श्चोतन्ति, सर्वदेवत्या वै स्तोकास्तस्मादियं स्तोकशो वृष्टिर्विभक्तोपाचरति"-

इति । 'तत्' तस्यां वपायां 'यत्' यस्मात् कारणात् 'स्तोकाः श्चोतन्ति', ते च 'स्तोकाः' सर्वासां देवतानां प्रिया एव, 'तस्मात्' देवानुग्रहात् 'इयं वृष्टिः' लोके 'स्तोकशः' प्रतिबिन्दुभिः * 'विभक्ता' सती भूसमीप मागच्छति † ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां द्वितीयाध्याये
द्वितीयः खण्डः ॥ २ (१२) ॥

॥ अथ तृतीयः खण्डः ॥

तदाहुः का स्वाहाकृतीनां पुरोनुवाक्या' कः प्रैषः का याज्येति' या एवैता अन्वाहैताः पुरोनुवाक्या' यः प्रैषः स प्रैषो' या याज्या सा याज्या' तदाहुः का देवता स्वाहाकृतय इति' विश्वेदेवा

---

* घ-पुस्तकेऽत्र सर्वत्रैव बिन्दुशब्दो वकारादिः ।

† 'वायो वीहि स्तोकाना मित्याह, तस्माद् विभक्ताः स्तोका अवपद्यन्ते'–इति तै० सं० ६. ३. ९ । 'वायो वीहि स्तोकाना मिति बर्हिषोऽध मधस्ताद् वपाया उपास्यति'–इति च आप० ७. २०. १ । वायो वीहि मन्त्रस्तु तै० सं० १. ३. ९. २ । 'स्तोक्या जुहोति या एव वर्ष्या आपस्ता अवरुन्धे'–इत्यादि च तै० ब्रा० ३. ८. ६. २, ३ ।

इति ब्रूयात्त॑स्मात् स्वाहाकृतं हविरदन्तु देवा इति॑ यजन्तीति॑ देवा वै यज्ञेन श्रमेण॑ तपसाहुतिभि॑ः स्वर्गं लोक मजयं॑स्तेषां वपाया मेव हुतायां॑ स्वर्गो लोकः प्राख्यायत॑ ते वपा मेव हुत्वा॑ऽनादृत्येतराणि कर्माण्यूर्ध्वाः स्वर्गं लोक मायं॑स्ततो वै मनुष्याश्च ऋषयश्च॑ देवानां यज्ञवास्त्वभ्यायन्॑ यज्ञस्य किञ्चिदेषिष्याम॑ः* प्रज्ञात्या इति॑ ते ऽभितः परिचरन्त† एत॑‡ पशु मेव निरान्त्रं॑ शयानं॑ ते विदुरियान्वाव किल पशु॑र्यावती वपेति॑ स एतावानेव पशु॑र्यावती वपा ऽथ यदेनं॑ तृतीयसवने श्रपयित्वा जुह्वति॑ भूयसीभिर्न आहुतिभिरिष्ट मसत्॑केवलेन नः पशुनेष्ट मसदिति॑ भूयसीभिर्ह्यस्याहुतिभिरिष्ट॑ भवति॑ केवलेन हास्य पशुनेष्टं भवति य एवं वेद॑ ॥ ३ (१३) ॥

अथ वपाप्रशंसां हृदि निधाय तदुपयोगिनं कञ्चित्प्रश्न मुत्थापयति—“तदाहुः का स्वाहाकृतीनां पुरोनुवाक्याः, कः प्रैषः, का याज्येति”-इति। स्वाहाकृतिशब्देनान्तिमप्रयाजदेवता उच्यन्ते§। तासां देवतानां पुरोनुवाक्याप्रैषयाज्यासु ज्ञानरहिता ब्रह्मवादिनः पृच्छन्ति। तस्य प्रश्नस्योत्तर माह—“या एवैता अन्वाहिताः

---

* ‘देशिष्यामः’ ग, ङ, टी० घ।

†, ‡ ‘प्रतिचरन्त’, ‘पेत्य’ क।

§ २६३ पृ० ३ पं० यावद् प्रयाजदेवताः प्रदर्शिताः।

पुरोनुवाक्या, यः प्रैषः स प्रैषो, या याज्या सा याज्या"-इति। वपासम्बन्धिस्तोकार्थं प्रेषितो मैत्रावरुणो जुषस्वेत्यादयो 'या एवैता अन्वाह', 'एताः' एव * स्वाहाकृतीनां 'पुरोनुवाक्याः' भवन्ति, न अन्याः सन्ति। अनेन वपाप्रशंसा सूचिता। प्रैषसूक्ते "होता यक्षदग्निं स्वाहाज्यस्य"-इति प्रयाजान्तिमो 'यः प्रैषः' आम्नातः (तै०ब्रा०३.६.२.१२.), 'सः' एषः 'प्रैषः'। आप्रीसूक्ते 'या' ऋक् उत्तमप्रयाज्यारूपेणाम्नाता (तै०ब्रा०३.६.४,१२.), सैव स्वाहाकृतिदेवतानां याज्या। तदेतत्सर्वं अज्ञानप्रश्नस्योत्तरम् ॥

पुनरपि तथाविधं प्रश्नान्तरमुत्थापयति—"तदाहुः का देवता स्वाहाकृतय इति"-इति। अग्निवाय्वादिवत् स्वाहाकृत्याख्या अपि प्रसिद्धाः काश्चित् न सन्ति; तस्मादेताः 'काः?'-इति अज्ञात्वा प्रश्नः। तस्योत्तरं दर्शयति—"विश्वे देवा इति ब्रूयात्"-इति। प्रसिद्धा ये देवाः सन्ति, ते सर्वे स्वाहाकृत्याख्या इत्यभिज्ञात उत्तरं ब्रूयात्। तदेतदुपपादयति—"तस्मात् स्वाहाकृतं हविरदन्तु देवा इति यजन्तीति"-इति। अस्यान्तिमप्रयाजयाज्यायाश्चतुर्थपाद एवमाम्नातः—"स्वाहाकृतं हविरदन्तु देवाः"-इति (सं० १०. ११०, ११.)। तस्य पादस्यायमर्थः—स्वाहाकारेण संस्कृतं हविः सर्वे देवा भक्षयन्त्विति। एवं सति स्वाहाकृतिनामकाः सर्वे देवाः। 'तस्मात्' स्वाहाकृतमित्यादिपादसहितेन मन्त्रेणान्तिमं प्रयाजं 'यजन्ति'-'इति' एवं मन्त्रलिङ्गं स्वाहाकृतिशब्देन सर्वदेवताभिधाने प्रमाणमित्यर्थः। पशोः पर्यग्निकरणात् पूर्वं प्रयाजकाले दशैव प्रयाजा इष्टाः, अन्तिम-

---

* पूर्वस्मिन् खण्डे विहिता अष्टौ स्तोकानुवचनीया एवेत्यर्थः।

प्रयाजस्त्ववस्थापितः *। तदुक्त मापस्तम्बेन—"दशमैकादशयाज्या मवशिनष्टि"-इति (श्रौ० ७. १४. ८.)। सोऽय मवशिष्टोऽन्तिमप्रयाजः "जुषस्व सप्रथस्तमम्"--इत्यादिस्तोकानुवचनादूर्ध्वम्, वपाहोमात् प्रागिज्यते। अतो व्यवहितत्वादन्तिमप्रयाजविषयः पुरोनुवाक्याप्रैषयाज्याप्रश्नो युक्तः। वपासमीपवर्त्तित्वादेव स्तोकानुवचनमन्त्राणा मेतदीयपुरोनुवाक्यात्वं चोपपन्नम्। अनुष्ठानस्य व्यवधानेऽपि प्रैषयाज्ये तत्तदनुवाकोक्ते (तै० ब्रा० ३. ६. २, ४ अनु०) एवेति स्मर्यते॥

अथ वपाहोमं प्रशंसितु माख्यायिका माह—"देवा वै यज्ञेन श्रमेण तपसाहुतिभिः स्वर्गं लोक मजयंस्तेषां वपाया मेव हुतायां स्वर्गो लोकः प्राख्यायत; ते वपा मेव हुत्वा ऽनादृत्येतराणि कर्माण्यूर्ध्वाः स्वर्गं लोक मायंस्ततो वै मनुष्याश्च ऋषयश्च देवानां यज्ञवास्त्वभ्यायन्, यज्ञस्य किञ्चिदेषिष्यामः प्रज्ञात्या इति; तेऽभितः परिचरन्त एतं पशु मेव निरान्त्रं शयानं; ते विदुरियान्वाव किल पशुर्यावती वपेति"-इति। पुरा कदाचिद् 'देवाः' ज्योतिष्टोमादियागेन, तीर्थयात्रादिश्रमेण, कृच्छ्रचान्द्रायणादितपसा, कूष्माण्डगणहोमादिगताभिराहुतिभिश्च 'स्वर्गं लोक मजयन्' वशीकृतवन्तः। 'तेषां' देवानां यज्ञमध्ये 'वपाया मेव हुतायां' 'स्वर्गः' प्रख्यातोऽभूत्। ततः 'ते' देवाः 'वपा मेव हुत्वा' उत्तरकालीनानि सर्वाणि 'कर्माण्यनादृत्य' ऊर्ध्वाभिमुखाः 'स्वर्गं लोकं' प्राप्ताः। अनन्तरं 'मनुष्याश्च ऋषयश्च' यज्ञसम्बन्धि किञ्चिद् उत्तम मङ्ग मन्विष्य नेष्याम इति विचार्य तत्प्रज्ञानाय यज्ञानां ज्ञानाय 'देवानां' यज्ञभूमिं प्रति अगच्छन्। आगत्य च 'ते' मनुष्यादयः तदन्वेष-

---

* ते चैकादशैव २६२—२६३ पृष्ठेषु व्याख्याता द्रष्टव्याः।

पार्श्वे तस्यां यज्ञभूमौ पतित: '[illegible]' 'निरान्त्र' निरस्तं '[illegible] भूमौ पतितं 'पशुमेव' 'ऐत्' प्राप्तवन्त: । वपाया हविष्ट्वस्य हुतत्वादयं पशुर्निरान्त्रो दृष्टः । यद्यप्यान्त्रशब्दः पुरीतद्वाची*, तथाप्यत्र तेन वपोपलक्ष्यते । मनुष्यादयः स्वमनस्येव 'विदुः' निश्चितवन्तः,—'वपा यावती' विद्यते, एतावानेव 'किल पशुः' ! अन्यथा कथं देवाः वपामेव हुत्वा शिष्टान्यङ्गान्युपेक्षितवन्तः ? । तथा पशौ सारभूतमङ्गं वपेति आख्यायिकामुखेन वपां प्रशंस्य श्रुतिः स्वयमपि साक्षात् प्रशंसति—"स एतावानेव पशुर्यावती वपा"-इति । पशुशरीरमध्ये 'वपा यावती' विद्यते, 'एतावानेव' मुख्यः 'पशुः'; "हविरदन्तु देवाः"-इतिमन्त्रे (सं० १०.११०.११.) वपायाः सर्वदेवहविष्ट्वाभिधानात् ॥

ननु सुत्यादिने सवनीयपशोर्वपां प्रातःसवने हुत्वा, शिष्टानि हृदयाद्यङ्गानि तृतीयसवने पश्चा यजमाना जुह्वति; वपामात्रस्य पशुस्वरूपत्वे तृतीयसवने पशुशेषं जुह्वतां कोऽभिप्राय इत्याशङ्क्याह —"अथ यदेनं तृतीयसवने श्रपयित्वा जुह्वति, भूयसीभिर्न आहुतिभिरिष्टमसत्, —केवलेन नः पशुनेष्टमसदिति"-इति । 'अथ' वपायाः पशुसारत्वे सति 'एनम्' अवशिष्टं पशुं 'तृतीयसवने श्रपयित्वा जुह्वति'-इति 'यद्' अस्ति, तत्र जुह्वतामयमभिप्रायः—यद्यपि वपायाग एव स्वर्गाय पर्याप्तः, तथापि 'नः' अस्माकं 'भूयसीभिः' बहुलाभिः 'आहुतिभिरिष्टम्' अस्तु†, 'केवलेन' द्रव्यान्तरनिरपेक्षेण निरवशेषेण 'नः' अस्मदीयेन 'पशुनेष्टम्' अस्तु 'इति' । अधिकं नैव दोषायेति लौकिकन्यायेन तृतीयसवने पश्वङ्ग-

---

* 'पुरीतद्वाची' च ।

† लुङि असदिति लेटो रूपम् ; तथैवार्थोऽयम् ।

सीमः ; न तु वपाया न्यूनत्वबुद्धेरित्यर्थः । वेदनं प्रशंसति —"भूयसीभिर्ह्यस्याहुतिभिरिष्टं भवति, केवलेन ह्यास्य पशुनेष्टं भवति य एवं वेद"-इति ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां द्वितीयाध्याये
तृतीयः खण्डः ॥ ३ (१३) ॥

॥ अथ चतुर्थः खण्डः ॥

सा वा एषा ऽमृताहुति॑रेव यद्वपाहुति॑रमृताहुतिरग्न्याहुति॑-रमृताहुतिराज्याहुति॑-रमृताहुतिः सोमाहुति॑रेता वा अशरीरा आहुतयो॑ या वै काश्चाशरीरा आहुतयो॑ ऽमृतत्व मेव ताभिर्यजमानो जयति॑ सा वा एषा रेत एव यद्वपा॑ प्रेव वै रेतो लीयते॑ प्रेव वपा लीयते॑ शुक्लं वै रेतः शुक्ला वप ऽशरीरं वै रेतो ऽशरीरा वपा॑ यद्वै लोहितं यन्मांस तच्छरीरं॑ तस्माद् ब्रूयाद्या॑वदलोहितं तावत्परिवासयेति॑ सा पञ्चावत्ता भवति॑ यद्यपि चतुरवत्त

यजमानः स्यादथ पञ्चावत्तैव वपाज्यस्योपस्तृणाति हिरण्यशकलो वपा हिरण्यशकल आज्यस्योपरिष्टादभिघारयति तदाहुर्यद्धिरण्यं न विद्येत कथं स्यादिति द्विराज्यस्योपस्तीर्य वपा मवदाय द्विरुपरिष्टादभिघारयत्यमृतं वा आज्य ममृतं हिरण्यं तत्र स काम उपाप्तो य आज्ये तत्र स काम उपाप्तो यो हिरण्ये तत्पञ्च सम्पद्यन्ते पाङ्क्तो ऽयं पुरुषः पञ्चधा विहितो लोमानि त्वङ्मांस मस्थि मज्जा स यावानेव पुरुषस्तावन्तं यजमानं संस्कृत्याग्नौ देवयोन्यां जुहोत्यग्निर्वै देवयोनिः सो ऽग्नेर्देवयोन्या आहुतिभ्यः सम्भूय हिरण्यशरीर ऊर्द्धः स्वर्गं लोक मेति ॥ ४ (१४) ॥

आज्याद्याहुतीनां प्राशस्त्यप्रसिद्धेः तद्वपाहुतिरपि प्रशस्तेति विवक्षया ताभिः सहैता माहुतिं प्रशंसति---"या वा एषा ऽमृताहुतिरेव यद्वपाहुतिरमृताहुतिरग्न्याहुतिरमृताहुतिराज्याहुतिरमृताहुतिः सोमाहुतिरेता वा अशरीरा आहुतयो; या वै काश्चाशरीरा आहुतयो, ऽमृतत्व मेव ताभिर्यजमानो जयति"-इति। या वपाहुतिरस्ति, सैषा स्वय ममृताहुतिः; देवाना ममृते यावती प्रीतिस्तावत्प्रीतिर्वपाहुतौ विद्यमानत्वात्। आतिथ्यकर्मसु मथितस्याग्नेराहवनीयाग्नौ प्रक्षेपरूपा येय माहुतिः, साप्यमृताहुतिः; अमृतत्वाख्यस्य देवत्वस्य प्राप्तिहेतुत्वात्। याप्यन्या

काचिदाज्याहुतिः, साप्यमृताहुतिः; "अमृतं वा आज्यम्"-इति-श्रुतेः। याप्यन्या सोमाहुतिः, सापि; "अपाम सोम ममृता अभूम"-इति (सं० ८.४८.३.) सोमस्यामृतत्वप्राप्तिसाधनत्वश्रवणात्। या एतास्तस्य आहुतयः, ताः सर्वा अशरीराः; शीघ्रमरणयुक्तशरीरप्राप्तिसाधनत्वाभावात्। अतएव याः काश्चिदशरीरा आहुतयः सन्ति, ताभिर्यजमानश्चिरजीवनरूपम् 'अमृतत्वं' देवत्वमेव प्राप्नोति॥

पुनः प्रकारान्तरेण वपां प्रशंसति—"सा वा एषा रेत एव यद्वपा;—प्रेव वै रेतो लीयते, प्रेव वपा लीयते; शुक्लं वै रेतः, शुक्ला वपा; ऽशरीरं वै रेतो, ऽशरीरा वपा; यद्वै लोहितं, यन्मांसं, तच्छरीरं; तस्माद्ब्रूयाद्यावदलोहितं तावत् परिवासयेति"-इति। येयं वपास्ति, सेयं रेत एव; तत्सादृश्यात्। कथं सादृश्यम्? इति तदुच्यते—रेतो योन्यां निषिक्तं सत्प्रलीयते, एवं वपाप्यग्नौ हुता प्रलीयत एव। इद मेकं सादृश्यम्। शुक्लवर्णत्वं द्वितीयम्। अशरीरत्वं तृतीयम्। तस्मात् प्रजोत्पादकरेतोवद्वपा प्रशस्ता। न च वपायाः शरीरमध्येऽवस्थानात् शरीरत्वं शङ्कनीयम्;—यदेव 'लोहितं' रक्त मस्ति, यच्च मांसम्, अनेन मुग्धबालादिप्रसिद्धास्त्वगस्थ्यवयवा उपलक्ष्यन्ते; अतो बालादिप्रसिद्धं रक्तमांसादिक मेव तन्मुख्यं शरीरम्; न तु वपायां रेतसि वा बालप्रसिद्धिरस्ति, ततस्तयोरशरीरत्वम्। यस्माद्वपाशरीरयोर्विभाग उक्तः, तस्माद्याज्ञिको वपोद्धरणकर्त्तारं प्रत्येवं ब्रूयात्। वपायाः स्वरूपं यावद् 'अलोहितं' रक्तरहितं श्वेतं भवति, तावत् सर्वं 'परिवासय' छिन्धीति। तदेवं वपा प्रशस्ता *॥

---

* 'प्रजापतिर्वा इद मेक आसीत्'-इत्यादिना वपाविधानम् तै० सं० २, १. १. ४।

तस्याः पञ्चसंख्याने विशेषं विधत्ते—“सा पञ्चावत्ता भवति; यद्यपि चतुरवत्ती यजमानः स्यादथ पञ्चावत्तैव वपा”-इति । द्विविधा यजमानाः,—चतुरवत्तिनः, पञ्चावत्तिनश्चेति । चतुर्भिरवदानैर्युक्ताश्चतुरवत्ती, पञ्चभिर्युक्ताः पञ्चावत्तिनः । एवं स्थिते वपा पञ्चभिरवदानैर्युक्ता कर्त्तव्या । तत्र, पञ्चावत्तिनो यजमानस्य स्वत एव पञ्चावदानानि प्राप्तानि; यस्तु चतुरवत्ती, तस्यापि पञ्चावदानानि वपायां कुर्यात् । तान्येतानि पञ्चापि विभज्य दर्शयति—“आज्यस्योपस्तृणाति; हिरण्यशल्को वपा, हिरण्यशल्क आज्यस्योपरिष्टादभिघारयति”-इति । ‘आज्यस्य’ आज्येनेत्यर्थः । तदेतदापस्तम्बेन स्पष्टमुक्तम् (श्रौ० ७.२०.९ ११.) । “जुह्वा मुपस्तीर्य हिरण्यशकल मवधाय कृत्स्नां वपा मवदाय हिरण्यशकल मुपरिष्टात् कृत्वाभिघारयति । एवं पञ्चावत्ता भवति । चतुरवत्तिनोऽपि पञ्चावत्तैव स्यात्”-इति ॥

हिरण्यरहितस्य प्रकारान्तरेण पञ्चावदानानि प्रश्नोत्तराभ्यां दर्शयति—“तदाहुर्यद्धिरण्यं न विद्येत, कथं स्यादिति; द्विराज्यस्योपस्तीर्य वपा मवदाय द्विरुपरिष्टादभिघारयति”-इति ।

आज्यस्य हिरण्यप्रतिनिधित्व मुपपादयति—“अमृतं वा आज्य ममृतं हिरण्यं; तत्र स काम उपाप्तो य आज्ये, तत्र स काम उपाप्तो यो हिरण्ये; तत्पञ्च सम्पद्यन्ते”-इति । आज्यस्य द्विरु-

---

‘वपा मेकः परिशय आत्मनात्मानं परिक्रमे’-इति [illegible] ६. ३ ७. ५ । ‘मेध’ वा एतत् पशूनां यद् वपा”-इत्यपि तत्रैवार्थ (९. ५.) । ‘मेदसा देवा वपया यजत्रम्’-इति (तै० ब्रा० २. ८. ४. ४.) वपाया याज्या । ‘वपा [illegible] जुषांसि, तत्र [illegible] मवपाकानाम्’-इति शत० ब्रा० १२. ७. १. ९ । ‘मेदोऽस्याः प्रहरन्ति वपार्थं’-इत्यादि (२०. ७. ७) कात्यायनीयं वपाकाण्ड’ चेह [illegible] द्रष्टव्यम् ।

त्वेन हिरण्यस्य च दर्शनीयत्वेन प्रियत्वादमृतत्वम्। एवं सति यत्र हिरण्यं प्रक्षिप्यते, तत्राज्यप्रयुक्तो यः कामः स प्राप्तो भवति; यत्र त्वाज्यं प्रक्षिप्यते, तत्र हिरण्यप्रयुक्तो यः कामः स प्राप्तो भवति। तस्मादाज्येन हिरण्येन पञ्चावदानानि सम्पद्यन्ते ॥

अवदानगतां पञ्चसङ्ख्यां प्रशंसति— "पाङ्क्तो ऽयं पुरुषः, पञ्चधा विहितो लोमानि त्वङ्मांस मस्थि मज्जा; स यावानेव पुरुषस्तावन्तं यजमानं संस्कृत्याग्नौ देवयोन्यां जुहोत्यग्निर्वै देवयोनिः;—सो ऽग्नेर्देवयोन्या आहुतिभ्यः सम्भूय हिरण्यशरीर ऊर्ध्वः स्वर्गं लोक मेति" इति। पञ्चसङ्ख्यायोगात् पुरुषस्य पाङ्क्तत्वम्। तद्योगाच्च लोमादिभिः पञ्चभिर्निष्पादितत्वात्। तस्मात्पञ्चभिरवदानैः पुरुषो यावान् लोमादिपञ्चावयवोपेतोऽस्ति, तावन्तं सर्व मपि यजमानं संस्कृत्याग्नौ देवत्वप्राप्तिकारणे हुतवान् भवति। अग्नेश्च यागद्वारा देवजन्मकारणत्वम्। एवं सति 'सः' यजमानो देवत्वकारणादग्नेः, स्वेनानुष्ठिताभ्य आहुतिभ्यः समष्टिरूपेणोत्पद्य सुवर्णवर्णशरीरयुक्तः ऊर्ध्वगामी स्वर्गं प्राप्नोति ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां द्वितीयाध्याये
चतुर्थः खण्डः ॥ ४ (१४) ॥

(पशुशेषः समाप्तः *)

---

* मत्सम्पादितपुस्तकानां 'क'मात्रे नास्त्येतद् वाक्यम्।

॥ अथ पञ्चमः खण्डः ॥

देवेभ्यः प्रातर्यावभ्यो होतरनुब्रूहीत्याहाध्वर्यु रेते वाव देवाः प्रातर्यावाणो यदग्निरुषा अश्विनौ त एते सप्तभिः सप्तभिश्छन्दोभिरागच्छन्त्यास्य देवाः प्रातर्यावाणो हवं गच्छन्ति य एवं वेद प्रजापतौ वै स्वयं होतरि प्रातरनुवाक मनुवक्ष्यत्युभये देवासुरा यज्ञ मुपावसन्नस्मभ्य मनुवक्ष्यत्यस्मभ्य मिति स वै देवेभ्य एवान्वब्रवीत्ततो वै देवा अभवन् परासुरा भवत्यात्मना परास्य द्विषन् पाप्मा भ्रातृव्यो भवति य एवं वेद प्रातर्वै स तं देवेभ्यो ऽन्वब्रवीद्यत्प्रातरन्वब्रवीत् तत् प्रातरनुवाकस्य प्रातरनुवाकत्वं महति रात्र्या अनूच्यः सर्वस्यै वाचः सर्वस्य ब्रह्मणः परिगृहीत्यै यो वै भवति यः श्रेष्ठता मश्नुते तस्य वाचं प्रोदिता मनु प्रवदन्ति तस्मान्महति रात्र्या अनूच्यः पुरा वाचः प्रवदितोरनूच्यो यद्वाचि प्रोदितायामनुब्रूयादन्यस्यैवैन मुदितानुवादिनं कुर्यात्तस्मान्महति रात्र्या अनूच्यः पुरा शकुनिवादादनुब्रूयान्निर्ऋतेर्वा एतन्मुखं यद्वयांसि यच्छकुनयस्तद्यत्पुरा शकुनिवादादनुब्रूयाद्यथा यज्ञियां वाचं प्रोदिता मनु प्रवदिष्यामीति तस्मान्महति रात्र्या अनूच्यो ऽथो

खलु यदैवाध्वर्युरु॑पाकुर्यादथानुब्रूयाद्॑ . यदा वा अध्वर्युरुपाकरोति॑ वाचैवोपाकरोति॑ वाचा होता ऽन्वाह॑ वाग्घि॑ ब्रह्म॑ तत्र स काम उपाप्तो यो वाचि च॑ ब्रह्मणि च॑ ॥ ५ (१५) ॥

अथ प्रातरनुवाको वक्तव्यः । तदर्थमादौ प्रैषमन्त्रं विधत्ते—"देवेभ्यः प्रातर्यावभ्यो होतरनुब्रूहीत्याहाध्वर्युः"—इति । सुत्यादिने प्रातःकाले यान्ति यज्ञभूमिं गच्छन्तीति प्रातर्यावाणः । तादृशेभ्यो 'देवेभ्यः' तत्प्रीत्यर्थं हे 'होतः' अनुकूला ऋचो 'ब्रूहि'—त मेतं प्रैषमन्त्रम् 'अध्वर्युः' पठेत् । तं मन्त्रं व्याचष्टे—"एते वाव देवाः प्रातर्यावाणो यदग्निरुषा अश्विनौ ; त एते सप्तभिः सप्तभिश्छन्दोभिरागच्छन्ति"—इति । योऽय मग्निः, या चोषःकालाभिमानिनी देवता, यौ चाश्विनौ, एत एव देवाः प्रैषमन्त्रे प्रातर्यावाण इति विशेष्यन्ते । तत्कथम्? इति, तदुच्यते—'त एते' देवाः प्रत्येकं सप्तच्छन्दोयुक्ताभिः ऋग्भिर्यज्ञभूमि मागच्छन्ति । तस्मात् प्रातर्यावाणः 'सप्तभिः-सप्तभिः'-इति वीप्सा प्रत्येकसङ्ख्यान्वयार्था । ताश्च ऋचः सर्वा आश्वलायनेन "आपो रेवतीः क्षयथ"—इत्यादिग्रन्थेन उदाहृताः (श्रौ० ४. १२. ७.) । तत्र,—

'उपप्रयन्त इत्यादिषु (सं० १. ७४. १.) छन्दो गायत्रम् ।
'त्व मग्ने वसूनित्यादिषु (सं० १. ४५. १.) अनुष्टुप्छन्दः ।
'अबोध्यग्निरित्यादिषु (सं० ५. १. १.) त्रिष्टुप्छन्दः ।
'एना वो अग्नि मित्यादिषु (सं० ७. १६. १.) बृहतीच्छन्दः ।
'अग्ने वाजस्येत्यादिषु (सं० १. ७९. ४.) उष्णिक्छन्दः ।

'जनस्य गोपा इत्यादिषु (सं० ५. ११. १.) जगतीच्छन्दः ।
'अग्निं तं मन्य इत्यादिषु (सं० ५. ६. १.) पङ्क्तिश्छन्दः ।
तान्येतानि सप्त छन्दांस्याग्नेये क्रतौ प्रातरनुवाके द्रष्टव्यानि * ।
'प्रति त्या सूनरीत्यादिषु (सं० ४. ५२. १.) गायत्रीच्छन्दः ।
'उषो भद्रेभिरित्यादिषु (सं० १. ४९. १.) अनुष्टुप् ।
'इदं श्रेष्ठ मित्यादिषु (सं० १. ११३. १.) त्रिष्टुप् ।
'प्रत्यु अदर्शीत्यादिषु (सं० ७. ८१. १.) बृहती ।
'उषस्तच्चित्र माभरेत्यादिषु (सं० १. ९२. १३.) उष्णिक् ।
'एता उ त्या इत्यादिषु (सं० १. ९२. १.) जगती ।
'महे नो अद्येत्यादिषु (सं० ५. ७९. , पङ्क्तिः ।
तान्येतान्युषस्ये प्रातरनुवाके सप्त छंदांसि † ।
'एषो उषा इत्यादिषु (सं० १. ४६. १.) गायत्री ।
'यदद्य इत्यादिषु (सं० ५. ७३. १.) अनुष्टुप् ।
'आ भात्यग्निरित्यादिषु (सं० ५. ७६. १.) त्रिष्टुप् ।
'इमा उ वा मित्यादिषु (सं० ७. ७४. १.) बृहती ।
'अश्विना वर्तिरित्यादिषु (सं० १. ९२. १६.) उष्णिक् ।
'अबोध्यग्निर्ज्म इत्यादिषु (सं० १. १५७. १.) जगती ।
'प्रति प्रियतम मित्यादिषु (सं० ५. ७५. १.) पङ्क्तिः ।
तान्येतान्याश्विने प्रातरनुवाके सप्त छन्दांसि ‡ ।
तैरेतैः प्रत्येकं सप्तभिः छन्दोभिर्देवाना मागमनं द्रष्टव्यम् ॥

---

* 'उपप्रयन्त०—०इत्याग्नेयः क्रतुः'-इति आश्व० श्रौ० ४. १३. ७. ८ ।

† 'अथोषस्यः । प्रति०—० इत्युषस्यः क्रतुः'-इति आश्व० श्रौ० ४. १४. १, २।

‡ 'अथाश्विनः । एषो उषाः०—० प्रति प्रियतम मिति पाङ्क्तम् । इतीमानि छन्दसां पृथक् सूक्तानि प्रातरनुवाकः'-इति आश्व० श्रौ० ४. १५. १, २ ।

एतद्वेदनं प्रशंसति—"आस्य देवाः प्रातर्यावाणो हवं गच्छन्ति य एवं वेद"-इति। हूयते अत्रेति हवः यज्ञः। अस्य वेदितुर्हवं उक्ता देवाः प्राप्नुवन्ति ॥

प्रैषमन्त्रे देवेभ्योऽनुब्रूहीति यदुक्तम् (३३५ पृ० २पं०) तदुपपादयितुं प्रातरनुवाकस्य देवसम्बन्धं विशदयति—"प्रजापतौ वै स्वयं होतरि प्रातरनुवाक मनुवक्ष्यत्युभये देवासुरा यज्ञ मुपावसन्नस्मभ्य मनुवक्ष्यत्यस्मभ्य मिति; स वै देवेभ्य एवान्वब्रवीत्"-इति। पुरा कदाचित् कस्मिंश्चिद्यज्ञे प्रजापतिः स्वयं होता भूत्वा प्रातरनुवाक मनुवक्तु मुद्यतः, तस्मिन्ननुवक्ष्यति देवाश्चासुराश्च 'अस्मभ्यम्' अस्मदर्थ मेवानुवक्ष्यतीति प्रत्येक मभिप्रेत्य तं यज्ञ मुपेत्य तत्रासन्निति। 'अस्मभ्यम्'-इति वीप्सा वर्गद्वयस्य प्रत्येक मन्वयार्था। तदानीं प्रजापतिरसुरान् उपेक्ष्य देवार्थ मेवान्वब्रवीत्। ततः प्रातरनुवाकस्य पूर्वोक्तैरग्न्यादिभिर्देवसम्बन्धः ॥

प्रातरनुवाकस्य देवोत्कर्षहेतुत्वं दर्शयति—"ततो वै देवा अभवन् परासुराः"-इति। 'अभवन्' भूति मुत्कर्षं प्राप्ताः; असुरास्तु 'पराभवन्' अपकर्षं प्राप्ताः। वेदनं प्रशंसति—"भवत्यात्मना परास्य द्विषन् पाप्मा भ्रातृव्यो भवति य एवं वेद"-इति। 'आत्मना भवति' स्वय मुत्कृष्टो भवति; तदीयस्तु भ्रातृव्यः 'पराभवति' ॥

प्रातरनुवाकशब्दस्य निर्वचनं दर्शयति—"प्रातर्वै स तं देवेभ्योऽन्वब्रवीद्यत्प्रातरन्वब्रवीत्तत्प्रातरनुवाकस्य प्रातरनुवाकत्वम्"-इति। प्रातःकाले एव 'सः' प्रजापतिः 'तम्' अनुवाकम् ऋक्समूहं देवार्थ मनुक्रमेणाब्रवीत्। यस्मादेवं, तस्मात्प्रातरनुवाक इति नाम सम्पन्नम् ॥

तस्य प्रातरनुवाकस्य कालविशेषं विधत्ते—"महति रात्र्या अनूच्यः; सर्वस्यै वाचः सर्वस्य ब्रह्मणः परिगृहीत्यै; यो वै भवति, यः श्रेष्ठता मश्नुते, तस्य वाचं प्रोदिता मनु प्रवदन्ति; तस्मान्महति रात्र्या अनूच्यः"-इति । 'रात्र्याः' पूर्वस्यौपवसथ्याख्यस्य * दिनस्याग्नीषोमीयपश्वनुष्ठानयुक्तस्य या रात्रिः, तस्या रात्रेः सम्बन्धिनि शेषे महत्यवतिष्ठमाने सति, प्रातरनुवाकाख्य ऋक्समूहो वक्तव्यः । एतदुक्तं भवति — यस्मिन् काले प्रारब्धः प्रातरनुवाकः, तमसोपघातात् पुरैव समापयितुं शक्यः स्यात्, तदा प्रारब्धव्य इति । तथाविध मनुवचनं लौकिक्याः सर्वस्याः वाचः 'ब्रह्मणः' वेदस्य सर्वस्यापि परिग्रहाय भवति । 'यो वै'-इत्यादिना लौकिको न्याय उच्यते । लोके यः पुमान् 'भवति' ऐश्वर्यं प्राप्नोति, यश्च विद्यावृत्तादिभिः श्रेष्ठत्वं प्राप्नोति, 'तस्य' उभयविधस्य पुरुषस्य सम्बन्धिनीं वाचं 'प्रोदितां' प्रथमत उक्ताम् 'अनु' पश्चात् सर्वे भृत्याः शिष्याश्च प्रवदन्ति । तस्मात्तत्रापि राजाचार्यादिवाक्स्थानीयः प्रातरनुवाकः ; स्वेतरवैदिकलौकिकसर्ववाक्प्रवृत्तेः । पूर्वं रात्र्याः सम्बन्धिनि महत्यवशिष्टे काले पाश्चात्ययामेऽनुवक्तव्यः । यद्यप्यय मुषःकालो न तु प्रातःकालः, तथापि प्रातःकालसमीप-

---

* 'उपसदा मन्तिमं' सुत्याहात् पूर्वं मग्नीषोमीयाहरेवौपवसथ्य मुच्यते । तथापि वचनान्तरपरिदृष्टादिदमेव—'अथौपवसथ्य महः'-इत्यादि ७. ५. ६ । 'अग्नीषोमीयसम्बन्धिदिन मुपवसथशब्देनोच्यते । उपवसथसम्बन्धि [कर्म] औपवसथ्यम्-इति कात्या० श्रौ० ८. १. ६. टी० या० दे० । "तेऽस्य विश्वे देवा गृहानागच्छन्ति, तेऽस्य गृहेषूपवसन्ति, स उपवसथः"-इति (१.१.१.७.), 'उपवसथेऽग्नीषोमीयं पशु मालभते'-इति (१.४.४.११.), 'उपवसथे नाश्नीयात्'-इति च (६. ५. १. ६.) शत० ब्रा० । तैत्तिरीयेऽप्येव मेव (ब्रा० १. ५. ९. ७.) । औपवसथ्यकर्माणि च कात्यायनाष्टमाध्यायादितोऽवगन्तव्यानि ।

वर्त्तित्वात् प्रातरनुवाकस्य कृत्स्नत्वम्। [illegible] कञ्चिद् विशेषं विधत्ते—“पुरा वाचः प्रवदितोरनूच्यः”-इति। रात्रौ निद्रां कुर्वन्तः प्राणिन उषःकाले प्रबुध्य वाचं प्रवदन्ति; तस्मात् ‘प्रवदितोः’ प्रवचनात् पूर्वमेवाय मनुवक्तव्यः। विपक्षे बाधक माह—“यद्वाचि प्रोदितायामनुब्रूयादन्यस्यैवैन मुदितानुवादिनं कुर्यात्”-इति। निद्रां परित्यज्य प्रबुद्धैः पुरुषैः वाचि प्रोदितायां यदि पश्चाद् ब्रूयात्, तदानीम् ‘एनम्’ प्रातरनुवाकं ‘उदितानुवादिनं कुर्याद्’ अन्यैरुदिता या वाक्, तदनुवादित्वे सति भृत्यादिशिष्यादिरूपत्वं स्यात्; न तु राजाचार्यादिरूपत्वम्। स्वपक्षं निगमयति— “तस्मान्महति रात्र्या अनूच्यः”-इति। अपरं विशेषं विधत्ते—“पुरा शकुनिवादादनुब्रूयात्”-इति। ‘शकुनयः’ पक्षिणः उषःकाले प्रबुध्य वदन्ति, ध्वनिं कुर्वन्ति; तस्माद्वादात् पूर्वमेवानुब्रूयात् *। तदेतदुपपादयति—“निर्ऋतेर्वा एतन्मुखं यद्वयांसि यच्छकुनयस्तद्यत्पुरा शकुनिवादादनुब्रूयान्मा ऽयज्ञियां वाचं प्रोदिता मनु प्रवदिष्मेति; तस्मान्महति रात्र्या अनूच्यः”-इति। ‘निर्ऋतिः’ काचिद्राक्षसरूपा मृत्युदेवता; यानि ‘वयांसि’ ये च ‘शकुनयः’, एतत् सर्वं मृत्युदेवताया मुखम्। अत्र वयःशब्देन पक्षिसामान्य मुच्यते, शकुनिशब्देन पक्षिविशेषः। येषां सञ्चाराद्ध्वनीष्टानिष्टसूचकतया मनुष्या व्यवहरन्ति, ते शकुनयः। यस्मादुभयं मृत्युमुखम्, तस्माद्यदि तदुभयध्वनेः पुरा अनुब्रूयात्, तदानीं ‘प्रोदितां’ प्रथमत उक्ताम् ‘अयज्ञियां’ यज्ञसम्बन्धरहितां ‘वाच मनु’ ‘मा प्रवदिष्म’ प्रातरनुवाकं पश्चादुक्तवन्तो मा भवामेति होतु-

---

* ‘अथैतस्या रात्रेर्विवासकाले प्राग् वयसां प्रवादात् प्रातरनुवाकायामन्त्रितः’-इत्यादि आश्व० श्रौ० ४. १२. १—६।

रश्मिप्रायो भवति । अतो महति रात्रिशेषे ऽवस्थिते सति शकुनिवादस्याप्यनुदयात् तदानीमेवानूच्यः ॥

पक्षान्तरं विधत्ते—"अथो खलु यदैवाध्वर्युरुपाकुर्यादथानुब्रूयाद्"-इति । अध्वर्योरुपाकरणं प्रैषमन्त्रपाठः * । स एव प्रातरनुवाकस्य कालः । तदेतदुपपादयति—"यदा वा अध्वर्युरुपाकरोति, वाचैवोपाकरोति; वाचा होता ऽन्वाह; वाग्घि ब्रह्म,—तत्र स काम उपाप्तो यो वाचि च ब्रह्मणि च"-इति । अध्वर्योरुपाकरणं प्रैषमन्त्ररूपया वैदिकवाचैव सम्पद्यते । होतुरनुवचनम् अपि वैदिकवाचा भवति । यस्मादुभयविधा वाक् 'ब्रह्म' वेदरूपा, तस्मादुपाकरणानन्तरभाविना अनुवचनेन लौकिकवाचि वैदिकवाचि यत्फलं भावि, तत् प्राप्नोति । अयं कालविशेषः शाखान्तरे ऽप्याम्नातः—"पुरा वाचः प्रवदितोः प्रातरनुवाक मुपाकरोति; यावत्येव वाक् ता मवरुन्धे"-इति (तै०सं० ६.४.३.१.) । उपाकरणं चापस्तम्बेन स्पष्टीकृतम्—"पुरा वाचः पुरा वा वयोभ्यः प्रवदितोः प्रातरनुवाक मुपाकरोति । प्रातर्यावभ्यो देवेभ्य अनुब्रूहि, ब्रह्मन् वाचं यच्छ, प्रतिप्रस्थातः सवनीयान् निर्वप, सुब्रह्मण्य सुब्रह्मण्या माह्वयेति सम्प्रेष्यति'-इति (श्रौ०१२.३.१४,१५.) ॥५॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां द्वितीयाध्याये
पञ्चमः खण्डः ॥ ५ (१५) ॥

---

* 'प्राग् वाचं प्रवदितोः प्रातरनुवाकोपाकरणं देवेभ्यः प्रातर्यावभ्योऽनुब्रूहीति [illegible] माह्वयन्'-इति कात्या० श्रौ० ९. १. १० ।

॥ अथ षष्ठः खण्डः ॥

प्रजापतौ वै स्वयं होतरि॑ प्रातरनुवाकमनुवक्ष्यति॑ सर्वा देवता आशंसन्त॑ मामभि प्रतिपत्स्यति मामभीति॑ स प्रजापतिरैक्षत॑ यद्येकां देवता मादिष्टा॑ मभि प्रतिपत्स्यामीतरा मे केन॑ देवता उपाप्ता भविष्यन्तीति॑ स एतामृचमपश्यदापो॑ रेवतीरित्यापो वै सर्वा॑ देवता॑ रेवत्यः सर्वा देवताः॑ स एतयर्चा प्रातरनुवाकं॑ प्रत्यपद्यत॑ ताः सर्वा देवताः प्रामोदन्त॑ मामभि प्रत्यपादि मामभीति॑ सर्वा ह्यस्मिन् देवताः॑ प्रातरनुवाकमनुब्रुवति प्रमोदन्ते॑ सर्वाभिर्हास्य देवताभिः॑ प्रातरनुवाकः प्रतिपन्नो भवति य एवं॑ वेद॑ ते देवा अबिभयुरादातारो॑ वै न इमं॑ प्रातर्यज्ञ मसुरा॑ यथौजीयांसो बलीयांस॑ एव मिति तानब्रवीदिन्द्रो मा बिभीत॑ त्रिषमृद्ध मेभ्यो ऽहं॑ प्रातर्वज्रं प्रहर्तास्मीत्येतां वाव तदृचमब्रवीद्वज्रस्तेन यदपोनप्त्रीया॑ वज्रस्तेन यत् त्रिष्टुब्॑ वज्रस्तेन यद्वाक् त मेभ्यः प्राहरत्तेनैनानहंस्ततो वै देवा अभवन्॑ परासुरा भवत्यात्मना परास्य द्विषन्॑ पाप्मा भ्रातृव्यो भवति य एवं वेद॑ तदाहुः स वै होता स्याद्य एतस्यामृचि॑ सर्वाणि छन्दांसि प्रजनयेदित्येषा वाव

भिरनूक्ता सर्वाणि छन्दांसि भवन्त्येषा छन्दसां प्रजातिः ॥ ६ (१६) ॥

अथ प्रातरनुवाके प्रथमा मृचं विधातु माख्यायिका माह—"प्रजापतौ वै स्वयं होतरि प्रातरनुवाक मनुवक्ष्यति ; सर्वा देवता आशंसन्त,—मा मभि प्रतिपत्स्यति मा मभीति ; स प्रजापतिरैक्षत,—यद्येकां देवता मादिष्टा मभि प्रतिपत्स्यामीतरा मे केन देवता उपाप्ता भविष्यन्तीति ; स एता मृच मपश्यदापो रेवतीरित्यापो वै सर्वा देवता, रेवत्यः सर्वा देवताः ; स एतयर्चा प्रातरनुवाकं प्रत्यपद्यत ; ताः सर्वा देवताः प्रामोदन्त,—मा मभिप्रत्यपादि मा मभीति"-इति। प्रजापतौ वै स्वय मेव होतृत्वं प्राप्य कस्मिंश्चिद्यज्ञे प्रातरनुवाक मनुवक्तु मुद्युक्ते सति सर्वा अपि देवताः प्रत्येकं माम् 'अभि'लक्ष्य 'प्रतिपत्स्यति' प्रारम्भं करिष्यति 'इति' एवम् 'आशंसन्त' अपेक्षां कृतवन्तः । 'मा मभि' इति वीप्सा सर्वसङ्ग्रहार्था । मह्येवत्वयैवर्चा प्रारब्ध इति सर्वासां देवतानां प्रत्येक माशा मवलोक्य 'सः' प्रजापतिः स्वमनसि विचारितवान् । स एव विचारो यद्येत्यादिना स्पष्टीक्रियते। 'आदिष्टां' केनचिन्मन्त्रेण प्रतिपादिता मेकां देवताम् 'अभि'लक्ष्य यद्यहं 'प्रतिपत्स्यामि' प्रारम्भं करिष्यामि, तदानीम् 'इतराः' देवताः, कुप्येयुरिति * शेषः। तस्मात्कारणात् 'मे' मम 'केन' प्रकारेण 'देवताः' सर्वा अपि† 'उपाप्ताः' उपक्रमे प्राप्ता भविष्यन्ति। एवं विचार्य 'सः' प्रजापतिः सर्वदेवतासिद्ध्यर्थम् "आपो रेवतीः क्षयथा हि वस्वः"-इत्येता मृचम् (सं०१०.३०.१२.)

---

*, † इतरा देवताः केनेत्याद्येकवाक्यत्वं पदान्तरागमापेक्षोऽध्याहृतम् ।

अपश्यत्। तत्र आप्-शब्देन, रेवती-शब्देन च सर्वा देवता उक्ता भवन्ति ; आप्नुवन्तीत्यापः ; रायो धनानि यासां सन्तीति रेवत्यः ; यज्ञभूमिप्राप्तिर्धनवत्त्वञ्च सर्वासु देवतासु विद्यते, तस्मात्सर्वदेवताप्रतिपादिकेयमृक्। 'सः' प्रजापतिः रेवत्यां एवोपक्रान्तवान्। तेन सर्वा देवताः प्रत्येकं मा मभिलक्ष्य प्रारब्धः जात इति प्रहृष्टमनसः। वीप्सा पूर्ववत् ॥

अथार्थवादेन विधिं सूचयति—"सर्वा ह्यस्मिन् देवताः प्रातरनुवाक मनुब्रुवति प्रमोदन्ते"-इति। स एतयर्चा प्रातरनुवाकं प्रतिपद्यत इति शेषः। यः पुमान् "आपो रेवतीः"-इत्येतया प्रातरनुवाकं प्रारभते*, 'अस्मिन्' प्रारभ्यानुब्रुवति सर्वा देवताः प्रहृष्यन्ति ; तस्मादनयैवर्चा प्रारभेतेति विधिरुन्नेयः। वेदनं प्रशंसति— "सर्वाभिर्हास्य देवताभिः प्रातरनुवाकः प्रतिपन्नो भवति य एवं वेद"-इति। तदेतदाश्वलायनेनाभिहितम्—"अन्तरेण युगधुरावुपविश्य† प्रेषितः प्रातरनुवाक मनुब्रूयान्मन्द्रेणापो रेवतीः क्षयथा हि वस्व उपप्रयन्त इति सूक्ते"-इति (श्रौ०४.१३.६,७) ॥

आपोरेवतीरित्येतामृच माख्यायिकया प्रशंसति—"ते देवा अबिभयुरादातारो वै न इमं प्रातर्यज्ञ मसुरा यथौजीयांसो बलीयांस एव मिति ; तानब्रवीदिन्द्रो मा बिभीत त्रिषमृद्ध एभ्यो ऽहं प्रातर्वज्रं प्रहर्तास्मीत्येतां वाव तद्वच मब्रवीद्वज्रस्तेन यदपोनप्त्रीया, वज्रस्तेन यत् त्रिष्टुम्, वज्रस्तेन यद्वाक्, त मेभ्यः प्राहरत् ; तेनैनानहंस्ततो वै देवा अभवन् परासुराः"-इति। पुरा कदाचित् प्रजापतौ प्रातरनुवाक मनुब्रुवति सति तत्समीपे आगता देवाः 'अबिभयुः' भीतिं प्राप्ताः। केनाभिप्रायेणेति, तदुच्यते—यथा लोके

---

* 'प्रारभेत' घ।

† 'युगधुरा उपविश्य' ए० सो० मु० आश० श्रौ०।

वैरिणस्तथ: 'ओजीयांसः' अतिशयेनौजसा सप्तमधातुना युक्तत्वात् पुष्टशरीराः, 'बलीयांसः' महता सैन्येन युक्तत्वादतिशयेन प्राबल्यात्, आगत्य धन मपहरन्ति; एव मसुराः 'नः' अस्मदीयम् 'इमं' प्रातर्यज्ञं प्रातरनुवाकरूपम् 'आदातारो वै' आदास्यन्त्येव, अपहरिष्यन्त्येवेति । तदानी मिन्द्रो 'मा बिभीत' भीतिं मा कुरुतेति 'तान्' देवान् अब्रवीत् । कथं भीत्या अभावः ? इति, तदुच्यते—'अहम्' इन्द्र एव 'एभ्यः' असुरेभ्यः; असुरविनाशार्थं 'प्रातः' काले 'त्रिषत्यं' त्रिभिः प्रकारैः सत्यं प्रबलं वज्रं 'प्रहर्तास्मि' तेषा मुपरि प्रक्षेप्स्यामि । ततो हे देवाः ! अस्माकं भीतिर्माभूत् । इत्युक्त्वा तदानीम् 'एतां' वाचम्, आपो रेवतीरिति यास्ति, ता मृच मेवाब्रवीत् । तस्या ऋचः त्रिप्रकारवज्रत्वं कथम् ? इति, तदुच्यते— 'यद्' यस्मात्कारणात् 'अपोनप्त्रीया' सा ऋक् अपोनप्तृदेवताका,—तथाचानुक्रमणीकारो यस्मिन् सूक्ते सास्ति (सं० १०.३०.), तस्य सूक्तस्य देवतां ब्रूते—"प्र देवत्रा पञ्चोना कवष ऐलूष आप मपोनप्त्रीयं वा" इति । 'तेन' अपोनप्तृदेवताकत्वेन कारणेनायं मन्त्रो 'वज्रः' सम्पन्नः । सोऽय मेकः प्रकारः । अपोनपा देवोऽतिक्रूरः, तत्तदीयाया ऋचो वज्रत्वं युक्तम् । यस्मादियं त्रिष्टुप्छन्दस्का, तेनापि प्रकारेण वज्रत्वम् । 'इन्द्रियं वै वीर्यं त्रिष्टुप्'-इतिश्रुत्यन्तरे वीर्यरूपत्वश्रवणाद् (४६ पृ०) वज्रत्वम्* । सोऽयं द्वितीयः प्रकारः । यस्मादियं वाग्रूपा, तेनापि प्रकारेण वज्रत्वम् ; "स वाग्वज्रो यजमानं हिनस्ति"-इत्यत्र† शब्दरूपाया वाचो वज्रत्वश्रवणात् ।

---

* त्रिष्टुभो वज्रत्वञ्चेहैव साक्षात् श्रुतं पुरस्तात्—त्रिष्टुबिन्द्रस्य वज्रः'-इति (२४२पृ० ५पं०) ।

† 'स वाग्वज्रो यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोऽपराधात्'-इति पा० शि० १०.४ । तदाहृतञ्च पा० महाभा०१.१.१. । स च वाग्वज्रमन्त्रः 'इन्द्रशत्रुर्वर्धस्व'-इति तैत्तिरीय-

सोऽयं तृतीयः प्रकारः। त मेवं त्रिपञ्चकम् अनूप वज्रम् 'एभ्यः' असुरेभ्यः प्राहरत्। तेन 'एनान्' असुरान् 'अहन्' हतवान्। 'ततः' एवासुरवधाद् देवा विजयिनो ऽभवन्, असुराश्च पराभवन्। वेदनं प्रशंसति—"भवत्यात्मना परास्य द्विषन् पाप्मा भ्रातृव्यो भवति य एवं वेद"-इति। पूर्ववद् (३३८ पृ०) व्याख्येयम्॥

अस्या ऋचस्त्रिरावृत्तिं विधत्ते—"तदाहुः,—स वै होता स्याद्य एतस्या मृचि सर्वाणि छन्दांसि प्रजनयेदित्येषा वाव त्रिरनूक्ता, सर्वाणि छन्दांसि भवत्येषा छन्दसां प्रजातिः"-इति। 'तत्' तस्याम्, आपोरेवतीरित्यृचि ब्रह्मवादिन एव माहुः। यः पुमानेतस्या मृचि सर्वाणि छन्दांस्युत्पादयेत्, स एव मुख्यो होता स्यात्, न त्वन्य इति। एतद्ब्रह्मवादिनां वचनं श्रुत्वा कश्चिदभिज्ञः सर्वच्छन्दसा मुत्पादनप्रकारं ब्रूते,—येयं मृगनूक्ता, सेय मेव त्रिः पठिता सती सर्वच्छन्दसां स्वरूपम् भवति। इयं त्रिष्टुब्रूपत्वाच्चतुश्चत्वारिंशदक्षरा *। तस्यां त्रिरावृत्तायां द्वात्रिंशदधिकशताक्षराणि सम्पद्यन्ते। तेषु जगत्यादीन्यधिकाक्षराणि, गायत्र्यादीनि न्यूनाक्षराणि, सर्वच्छन्दांसि सम्पादयितुं शक्यन्ते †। तस्मादेषा

संहिताया मसकृत् श्रुतः (२.४.१२.१ ; ५.२.१.)। "तत्र मन्त्रगतस्वरापराधो निमित्तम्। तथाहि इन्द्रस्य शातयितेन्द्रशत्रुरिति विवक्षायां तत्पुरुषसमासस्यान्तोदात्तत्वेन भवितव्यम्, आद्युदात्तस्त्वयं शब्दः प्रयुक्तः, स च बहुव्रीहितां द्योतयति। बहुव्रीहौ प्रकृत्या पूर्वपदमिति पूर्वपदाद्युदात्तत्वविधानात्। सति बहुव्रीहाविन्द्रः शातयिता यस्येत्यर्थो भवति। सोऽयं मन्त्रगतः स्वरापराधः। अपराधाभावे सति उन्नतया ज्वालया यजमानस्य कार्यसिद्धिः सूचिता भवति। अपराधे त्ववनतया ज्वालया यजमानस्य कार्यसिद्ध्यभावः सूच्यते"-इति सा०भा०।

* सैषा—"आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृथामृतं च। रायश्च स्थ स्वपत्यस्य पत्नीः सरस्वती तद् गृणते वयो धात्"-इति सं० १०. ३०. १२।

† विराट्३० — गायत्री४— उष्णिक् ८— अनुष्टुप्१२— बृहती१६ — पङ्क्तिः२० —त्रिष्टुप्२४ — जगती२८= १३२ अक्षराणि। एवमेवैतदुपदिष्टमष्टीकितो च-पुस्तके।

सर्वेषां छन्दसां 'प्रजातिः' उत्पत्तिस्थानम्। यद्येषा विराड्भक्तिः सूत्रकारेण नोक्ता, तर्हि सर्वच्छन्दोऽन्तर्भावनेय ऋचः प्रशंसास्तु ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां द्वितीयाध्याये
षष्ठः खण्डः ॥ ६ (१६) ॥

॥ अथ सप्तमः खण्डः ॥

शत मनूच्य मायुष्कामस्य शतायुर्वै पुरुषः शतवीर्यः शतेन्द्रिय आयुष्येवैनं तद्वीर्य इन्द्रिये दधाति त्रीणि च शतानि * षष्टिश्चानूच्यानि यज्ञकामस्य त्रीणि च वै शतानि षष्टिश्च संवत्सरस्याहानि तावान्संवत्सरः संवत्सरः प्रजापतिः प्रजापतिर्यज्ञ उपैनं यज्ञो नमति यस्यैवंविद्वांस्त्रीणि च शतानि † षष्टिं चान्वाह सप्त च शतानि विंशतिश्चानूच्यानि प्रजापशुकामस्य सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्रास्तावान्संवत्सरः संवत्सरः प्रजाप-

---

*, † उभयत्रैव 'शतानि च' क।

त्रियं प्रजायमानं' विश्वं रूप मिद मनु प्रजायते' प्रजापति मेव तत्प्रजायमानं' प्रजया पशुभिरनुप्रजायते' प्रजात्यै प्रजायते' प्रजया पशुभिर्य एवं वेदाष्टौ शतान्यनूच्यान्यब्राह्मणोक्तस्य' यो वा दुरुक्तोक्तः' शमलगृहीतो यजेताष्टाक्षरा वै गायत्री' गायत्र्या वै देवाः' पाप्मानं शमल मपाघ्नत' गायत्र्यैवास्य तत्पाप्मानं' शमल मपहन्त्यप * पाप्मानं हते य एवं वेद' सहस्र मनूच्यं' स्वर्गकामस्य' सहस्राश्वीने वा इतः स्वर्गो लोकः' स्वर्गस्य लोकस्य समष्ट्यै' सम्पत्त्यै सङ्गत्या' अपरिमित मनूच्य' मपरिमितो वै प्रजापतिः' प्रजापतेर्वा एतदुक्थं' यत्प्रातरनुवाकस्तस्मिन्त्सर्वे कामा अवरुध्यन्ते' स यदपरिमित मन्वाह' सर्वेषां कामाना मवरुध्यै' सर्वान्कामानवरुन्धे य एवं वेद' तस्मादपरिमित मेवानूच्यं' सप्ताग्नेयानि छन्दांस्यन्वाह' सप्त वै देवलोकाः' सर्वेषु देवलोकेषु राध्नोति य एवं वेद' सप्तोषस्यानि छन्दांस्यन्वाह' सप्त वै ग्राम्याः पशवो' ऽव ग्राम्यान् पशून् रुन्धे य एवं वेद' सप्ताश्विनानि छन्दांस्यन्वाह' सप्तधा वै वागवदत्तावद्वै' वागवदत्सर्वस्यै वाचः सर्वस्य ब्रह्मणः परिगृहीत्यै' तिस्रो देवता

---

* 'मपहन्त्व' क।

अन्वाह॑ त्रयो वा इमे त्रिवृतो लोका॑ एषा मेव लोकाना * मभिजित्यै ॥ ७ (१७) ॥

अथ प्रातरनुवाकगतानामृचां काम्या विशेषा वक्तव्याः । तत्रायुरर्थं शतसङ्ख्यां विधत्ते—"शत मनूच्य मायुष्कामस्य ;—शतायुर्वै पुरुषः शतवीर्यः शतेन्द्रिय आयुष्येवैनं तद्वीर्य इन्द्रिये दधाति"-इति । अपमृत्युरहित मायुर्यः कामयते, तस्य ऋचां शत मनूच्यम् । ऋग्विशेषास्तु सूत्रान्तरे द्रष्टव्याः । शतसङ्ख्याका वत्सरा आयुः यस्य मनुष्यस्य सोऽयं 'शतायुः' । अधर्मसम्पादितस्यापमृत्योरभावे संवत्सरशतं मनुष्या जीवन्ति । दशसङ्ख्याकानीन्द्रियाणि, प्रत्येकं दशसु नाड़ीषु वर्त्तमानत्वात् तन्मिलित्वा शतेन्द्रियाणि भवन्ति । ततस्तद्व्यापाराणा मपि शतत्वेन शतवीर्यत्वम् । तस्माच्छतानुवचनेन तत्सङ्ख्याके आयुषि वीर्ये इन्द्रिये च 'एनं' यजमानं स्थापयति ॥

अहीनरात्रादुत्तरक्रतुकामस्य सङ्ख्यान्तरं विधत्ते—"त्रीणि च शतानि षष्टिश्चानूच्यानि यज्ञकामस्य ;—त्रीणि च वै शतानि षष्टिश्च संवत्सरस्याहानि, तावान्त्संवत्सरः, संवत्सरः प्रजापतिः, प्रजापतिर्यज्ञः"-इति । षष्ट्युत्तरशतत्रयदिवसपरिमितो यः संवत्सरः कालात्मा, स एव प्रजापतिः । संवत्सरादिकालविशेषणां प्रजापतिसृष्टत्वेन तदभेदोपचारः । तथा यज्ञस्यापि तेन सृष्टत्वात् तद्रूपत्वम् । एवं सति षष्ट्युत्तरशतत्रयसङ्ख्यायाः संवत्सरप्रजापतिद्वारा यज्ञसम्बन्धादुत्तरक्रतुप्राप्तिहेतुत्वं भवति । होतुर्वेदनं

---

* 'देवलोकाना' क ।

प्रशंसति—"उपैनं यज्ञो नमति, यश्चैवं विद्वांस्त्रीणि च शतानि षष्टिं चान्वाह"-इति ॥

अथ प्रजां पशूंश्च कामयमानस्य पूर्वसङ्ख्याया द्विगुणां सङ्ख्यां विधत्ते—"सप्त च शतानि विंशतिश्चानूच्यानि प्रजापशुकामस्य ; —सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्रास्तावान्संवत्सरः ; संवत्सरः प्रजापतिर्यं प्रजायमानं विश्वं रूप मिद मनु प्रजायते ; प्रजापति मेव तत्प्रजायमानं प्रजया पशुभिरनुप्रजायते प्रजात्यै"-इति । संवत्सरगताना मह्नां रात्रीणां च पृथग्गणनायां मिलित्वा विंशत्यधिकसप्तशतसङ्ख्या संवत्सरे सम्पद्यते । संवत्सरस्य च प्रजापतित्व मुक्तम् (२४ पृ०) । एतावता विंशत्युत्तरसप्तशतसङ्ख्यायाः प्रजापतिसम्बन्धो दर्शितः । यं प्रजायमान मित्यादिना काम्यमानानां प्रजानां पशूनां च प्रजापतिसम्बन्धः प्रदर्श्यते । लोके कस्मिंश्चिद् गृहे प्रजायमानं 'यं' पुरुष मनु 'विश्वं रूप मिदम्' ओषधिवनस्पत्यादि स्थावरम्, भ्रातृभगिनीगोमहिष्यादिकं जङ्गमं च, सर्वं प्रजायते । तत्तद्गृहे प्रजायमानं प्रजापति मेव अनुप्रजापशुरूपेण सर्वं मुत्पद्यते । एतदुक्तं भवति—कस्यचिद् धनिकस्य पुत्रे उत्पद्यमाने सति कुटुम्बाभिवृद्ध्या तज्जीवनार्थं सस्यादिनिष्पत्तिं गोमहिष्यादिसम्पत्तिं च स धनिकः प्रभूतां करोति । तस्य पुत्रस्य भ्रातृभगिन्यादयोऽपि पुनर्जायन्ते । तत्र च स्थावरजङ्गमरूपाणां प्रजानां पालनहेतुत्वादयं जायमानः पुत्र एव च प्रजापतिः । अतः प्रजापतिद्वारा प्रजापशुसम्बन्धोऽपि भवतीति । तस्मादियं सङ्ख्या यजमानस्य 'प्रजात्यै' प्रजापशूत्पादनाय सम्पद्यते । वेदनं प्रशंसति—"प्रजायते प्रजया पशुभिर्य एवं वेद"-इति ॥

अत्र दुर्ब्राह्मणत्वपरिहारकामस्य सङ्ख्यान्तरं विधत्ते—"अष्टौ शतान्यनूच्यान्यब्राह्मणोक्तस्य; यो वा दुरुक्तोक्तः शमलगृहीतो यजेताष्टाक्षरा वै गायत्री, गायत्र्या वै देवाः पाप्मानं शमल मपाघ्नत; गायत्र्यैवास्य तत् पाप्मानं शमल मपहन्ति"-इति। अब्राह्मणत्वेन स्मृतिषु योऽभिहितः, सोऽय मब्राह्मणोक्तो राजसेवाधिकारी। स्मृतिवाक्यं चात्र पूर्व मेवोदाहृतम् (१२८ पृ०)। तादृशस्याष्टौ शतान्यनुब्रूयात्। अथवा, यो वा 'दुरुक्तोक्तः' दुरुक्तेनापवादेन जनैर्व्यवहृतः, स 'शमलगृहीतः' मलिनेन लोकविरुद्धेन स्वीकृतः। तादृशो यदा यजेत, तदाप्यष्टौ शतान्यनुब्रूयात्। गायत्र्या अष्टाक्षरत्वात्, तया च मलिनस्य पापस्य देवैर्विनाशितत्वात्, अष्टसङ्ख्या मनुतिष्ठन् गायत्र्यैव 'मलिनं' पापं विनाशयति। वेदनं प्रशंसति—"अप पाप्मानं हते य एवं वेद"-इति। अपहन्तीत्यर्थः॥

सङ्ख्यान्तरं विधत्ते—"सहस्र मनूच्यं स्वर्गकामस्य; सहस्राश्वीने वा इतः स्वर्गो लोकः, स्वर्गस्य लोकस्य समष्ट्यै सम्पत्त्यै सङ्गत्यै"-इति। प्रबलोऽश्व एकेनाह्ना यावन्ति योजनानि गच्छति, तावद्योजनपरिमितो देशो ऽश्वीनः। स च सहस्रसङ्ख्यया गुणितः सहस्राश्वीनः। 'अश्वस्यैकाहगमः'-इति-(५.२.१९.)-पाणिनीयसूत्रादाश्वीनशब्दनिष्पत्तिः *। 'इतः' भूलोकादारभ्य 'सहस्राश्वीने' ऊर्ध्वदेशे स्वर्गो लोको वर्त्तते। अतः सहस्रसङ्ख्या स्वर्गस्य लोकस्य 'समष्ट्यै' प्राप्त्यै भवति; प्राप्तस्य 'सम्पत्त्यै' स्वापेक्षित-

---

* 'एकाहेन गम्यत इत्येकाहगमः आश्वीनोऽध्वा'-इति सि० कौ०। 'आश्वीनं यदश्वेन दिनेनैकेन गम्यते'-इति अम० को० २. ८. ४७।

सर्वभोग्यवस्तुसम्पादनाय भवति ; सम्बन्धस्य च 'सन्तत्यै' महता मिन्द्रादिदेवानां प्रीतिपूर्वकसम्बन्धाय भवति ॥

सर्वकामसिद्ध्यर्थं नियतापरिच्छेदराहित्यसङ्ख्यां विधत्ते—“अपरिमित मनूच्य मपरिमितो वै प्रजापतिः ; प्रजापतेर्वा एतदुक्थं यत्प्रातरनुवाकस्तस्मिन् सर्वे कामा अवरुध्यन्ते ; स यदपरिमित मन्वाह, सर्वेषां कामाना मवरुध्यै”-इति । शतं सहस्र मित्यादि सङ्ख्यापरिमाणं परित्यज्य मध्यरात्रादूर्ध्व मुपक्रम्य सूर्योदयात् प्राचीनकाले यावतीरनुवक्तुं शक्तिरस्ति तावतीरनुब्रूयात् । जगत्कारणभूतः प्रजापतिश्चापरिमितः ;— न ह्येतावदस्य स्वरूप मिति प्रजापतेः * परिमातुं शक्यते । यः प्रातरनुवाकोऽस्ति, तदेतत् तादृशस्य प्रजापतेः 'उक्थं' प्रियं शस्त्रम् ; अतः 'तस्मिन्' प्रातरनुवाके सर्वे कामा अन्तर्भवन्ति । एवं सति 'सः' होता यद्यपरिमित मनुब्रूयात्, तदानीं तदनुवचनं सर्वकामप्राप्त्यै भवति । वेदनं प्रशंसति—“सर्वान् कामानवरुन्धे य एवं वेद”-इति । बहुफलहेतुत्वादपरिमितपक्ष मादरेण निगमयति—“तस्मादपरिमित मेवानूच्यम्”-इति † ॥

प्रातरनुवाकगतास्वृक्षु छन्दोविशेषान् विधत्ते—“सप्ताग्नेयानि छन्दांस्यन्वाह, सप्त वै देवलोकाः”-इति । प्रातरनुवाके त्रयो भागाः । तत्र प्रथमो भाग आग्नेयः । तस्मिंश्च गायत्री, अनुष्टुप् त्रिष्टुप्, बृहती, उष्णिक्, जगती, पङ्क्तिरिति सप्तभिश्छन्दोभिर्युक्ता ऋचोऽनुब्रूयात् । देवानां सम्बन्धिनो बहुलोकयुक्ता लोकविशेषाः सप्त ; तस्माच्छन्दसां सप्तसङ्ख्या प्रशस्ता । वेदनं प्रशं-

---

* 'प्रजापतिः' क, ख, ग ।

† तदुक्त माश्वलायनेन—'शतप्रभृत्यपरिमितः'-इति ४. १५. ९ ।

सति—"सर्वेषु देवलोकेषु राध्नोति य एवं वेद"-इति। भूलोकादय: सप्तलोकान्ता: सप्त वै देवलोका द्रष्टव्या: ॥

प्रातरनुवाकस्य द्वितीयभागे छन्दांसि विधत्ते—"सप्तौष्णिहानि छन्दांस्यन्वाह, सप्त वै ग्राम्या: पशव:"-इति। यथा प्रथमभागस्याग्निर्देवता, तथा द्वितीयभागस्योषा देवता। तस्मादुष:प्रतिपादिकास्वृक्षु पूर्ववद् गायत्र्यादीनि सप्त छन्दांसि द्रष्टव्यानि। ग्रामे भवा: ग्राम्या: पशव:, ते च सप्त। तथाच बौधायन:—"सप्त ग्राम्या: पशवोऽजाश्वो गौर्महिषी वराहो हस्त्यश्वतरी च"-इति। आपस्तम्बमतानुसारिणस्त्वेवं वर्णयन्ति —

"अजाविकं गवाश्वं च गर्दभोष्ट्रनरास्तथा।
सप्त वै ग्राम्यपशवो गीयन्ते कविसत्तमै: ॥" इति।

तस्मादत्र सप्तसङ्ख्या युक्ता। वेदनं प्रशंसति—"अव ग्राम्यान् पशून् रुन्धे य एवं वेद"--इति ॥

तृतीयभागे छन्दांसि विधत्ते—"सप्ताश्विनानि छन्दांस्यन्वाह; सप्तधा वै वागवदत्तावद्वै वागवदत् सर्वस्यै वाच: सर्वस्य ब्रह्मण: परिगृहीत्यै"-इति। तृतीयभागस्याश्विनौ देवता। तस्मादाश्विनी: सप्तच्छन्दोयुक्ता ऋचोऽनुब्रूयात्। लोके गानरूपा या वागस्ति, सा 'सप्तधा अवदत्' षड्जऋषभादिस्वरोपेता प्रवृत्ता *। तावदेव वैदिकवागप्यवदत्; साम्नि क्रुष्टप्रथमद्वितीयादीनां सप्तस्वराणामधीयमानत्वात् †। अतोऽत्र सप्तसङ्ख्या, लौकिक्या:

---

* 'षड्जश्च ऋषभश्चैव गान्धारो मध्यमस्तथा।
पञ्चमो धैवतश्चैव निषाद: सप्तम: स्वर: ॥'-इत्यादि ना० शि० १. २. ५।

† 'प्रथमश्च द्वितीयश्च तृतीयश्च चतुर्थक:।
मन्द्र: क्रुष्टो ह्यतिस्वार एतान् कुर्वन्ति सामगा: ॥'-इति ना०शि० १. १. १२।

सर्वस्या वाचो वेदस्य च सर्वस्याः परिग्रहाय भवति । त्रिष्वप्येष्वाग्नेयौषस्याश्विनभागेषु छन्दांस्यस्माभिः पूर्व मेवोदाहृत्य प्रदर्शितानि (२२६—२२७ पृ०) ॥

भागत्रये देवतात्रयं विधत्ते—“तिस्रो देवता अन्वाह ; त्रयो वा इमे त्रिवृतो लोका एषा मेव लोकाना मभिजित्यै”-इति । अग्निः, उषाः, अश्विनाविति देवतात्रयम् । यथा गुणत्रयमेलनरूपा रज्जुस्त्रिवृत्, एवम् ‘एते’ पृथिव्यन्तरिक्षद्युलोकाः परस्परं मिलितास्त्रिवृतः । यद्वा, एकैकस्मिंल्लोके सत्त्वरजस्तमोगुणभेदेन अस्योत्तममध्यमाधमरूपत्वात्प्रत्येकं त्रिवृत्त्वम् । अतो देवतात्रिसङ्ख्या, लोकत्रयजयाय भवति ॥ ७ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां द्वितीयाध्याये
सप्तमः खण्डः ॥ ७ (१७) ॥

॥ अथ अष्टमः खण्ड. ॥

तदा॑हुः कथ मनूच्यः प्रातरनुवाक इति॑ यथाच्छन्दस मनूच्यः प्रातरनुवाकः॑ प्रजापतेर्वा एतान्यङ्गानि यच्छन्दां॑स्येष उ एव प्रजापतिर्यो॑ यजते॑ तद्यजमानाय हितं पच्छो ऽनूच्यः॑ प्रातरनुवाकश्चतु-

ष्पादा वै पशवः पशूना मवरुध्या ऋचंचम एवानूच्या
यथैवैन मेतदन्वाह प्रतिष्ठाया एव द्विप्रतिष्ठो वै पुरुष-
श्चतुष्पादाः पशवो यजमान मेव तद्* द्विप्रतिष्ठं
चतुष्पात्सु पशुषु प्रतिष्ठापयति तस्मादृचंचम एवा-
नूच्यस्तदाहुर्यद् व्यूळ्हः प्रातरनुवाकः कथ मव्यूळ्हो
भवतीति यदेवास्य बृहती मध्यान्नैतीति ब्रूयात्तेने-
त्याहुतिभागा वा अन्या देवता अन्यास्तोमभागा-
श्छन्दोभागास्ता या अग्नावाहुतयो हूयन्ते ताभि-
राहुतिभागाः प्रीणात्यथ यत् स्तुवन्ति च शंसन्ति च
तेन स्तोमभागाश्छन्दोभागा उभय्यो हास्यैता देवताः
प्रीता अभीष्टा† भवन्ति य एवं वेद त्रयस्त्रिंशद्वै देवाः
सोमपास्त्रयस्त्रिंशदसोमपा अष्टौ वसव एकादश रुद्रा
द्वादशादित्याः प्रजापतिश्च वषट्कारश्चैते देवाः
सोमपा एकादश प्रयाजा एकादशानुयाजा एका-
दशोपयाजा एते ऽसोमपाः पशुभाजनाः सोमेन
सोमपान् प्रीणाति पशुना ऽसोमपानुभय्यो हास्यैता
देवताः प्रीता अभीष्टा‡ भवन्ति य एवं वेदाभूदुषा
रुशत्पशुरित्युत्तमया परिदधाति तदाहुर्यत् त्रीन्
क्रतूनन्वाहाग्नेय मुषस्य माश्विनं कथ मस्यैकयर्चा

---

* 'यजमान मेतद्' ङ।

†. ‡ 'अभिष्टा' क।

परिदधतः सर्वे वय ऋतवः परिहिता भवन्तीत्यभूदुषा रुशत्पशुरित्युषसो रूपमग्निरधाय्यृत्विय इत्यग्नेरयोजि वां वृषण्वसू रथो दस्रावमर्त्यो *माध्वी मम श्रुतं हवमित्यश्विनोरेव सूक्तस्यैकयर्चा* परिदधतः सर्वे वय ऋतवः परिहिता भवन्ति—भवन्ति ॥ ८ (१८) ॥

॥इत्यैतरेयब्राह्मणे द्वितीयपञ्चिकायां द्वितीयोध्यायः॥२॥

अथ तस्य प्रातरनुवाकस्यानुवचनप्रकारविशेषं निर्णेतुं प्रश्नमवतारयति—"तदाहुः,—कथमनूच्यः प्रातरनुवाक इति"-इति। किमेकैकस्मिन् भागे गायत्र्यादीनि छन्दांस्यनुक्रमेणैवानुवक्तव्यानि, आहोस्विदन्यथा ? इत्येकः संशयः। अनुक्रमपक्षेऽपि किं पादे पादे अवसानं कृत्वानुवचनीयम्, आहोस्वित् तदर्द्धेऽवसानं कृत्वा ? इति द्वितीयः संशयः। तत्र प्रश्नोत्तरमाह—"यथाच्छन्दसमनूच्यः प्रातरनुवाकः; प्रजापतेर्वा एतान्यङ्गानि, यच्छन्दांस्येष उ एव प्रजापतिर्यो यजते, तद्यजमानाय हितम्"-इति। अनुक्रमेणावस्थितानि गायत्र्यादीनि छन्दांसि अनतिक्रम्येति 'यथाच्छन्दसम्', छन्दःक्रमेणैवायमनुवचनीयः। छन्दसां प्रजापतिसृष्टत्वेन तदयवत्वात्, यजमानस्य च प्रजापतिपदप्राप्तियोग्यत्वेन प्रजापतिरूपत्वात्, तदङ्गरूपच्छन्दसां क्रमेणानुवचनं यजमानाय अवयवविपर्यासराहित्येन हितं भवति। तस्माच्छन्दःक्रमेणैवानुवक्तव्यः ॥

द्वितीयविचारे पूर्वपक्ष माह—"पच्छो ऽनूच्यः प्रातरनुवाकश्चतुष्पादा वै पशवः, पशूना मवरुद्ध्यै"-इति । 'पच्छः' एकैकस्मिन् पादे अवसायेत्यर्थः । सिद्धान्त माह—"अर्धर्चश एवानूच्यो यथैवैन मेतदन्वाह प्रतिष्ठाया एव ; द्विप्रतिष्ठो वै पुरुषश्चतुष्पादाः पशवो यजमान मेव तद् द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति ; तस्मादर्धर्चश एवानूच्यः"-इति । 'अर्धर्चशः' एकैकस्मिन् ऋचोऽर्धे अवसायावसाय प्रातरनुवाकोऽनूच्यः । 'एव'कारः पूर्वपक्षव्यावृत्त्यर्थः । यथैवेत्यादिना अर्द्धर्चश इत्येतदेव स्पष्टीक्रियते। एत मर्थं* 'यथैव' येनैव प्रकारेण 'एतदनु' अध्ययनकालीनं गुरूच्चारण मनु,—यथाध्ययनकाले प्रत्यर्द्ध मवसाय 'आह' पठति, तथैव प्रातरनुवाकानुष्ठानकालेऽपि। न त्वत्र ऋगन्ते प्रणवप्रक्षेपादिवत् किञ्चित् नूतनं कर्त्तव्य मस्ति । तदेतदर्द्धर्चशोऽनुवचनम् 'प्रतिष्ठाया एव' यजमानस्य प्रतिष्ठार्थ मेव भवति । तत्कथम् ? इति, तदेवोच्यते—यथैकस्या ऋचो द्वे अर्द्धर्चे, एवं पुरुषो 'द्विप्रतिष्ठः' । प्रतितिष्ठति स्थैर्येणावस्थितो भवति आभ्यां पादाभ्या मिति, प्रतिष्ठे द्वौ पादौ† ; प्रतिष्ठे यस्यासौ द्विप्रतिष्ठः। पशूनां चत्वारः पादाः ; तथा सति पादचतुष्टयोपेतासु ऋक्षु द्वाभ्या मवसानयुक्ताभ्या मनुवचने कृते सति 'द्विप्रतिष्ठं' द्विपादं यजमानं चतुष्पात्सु पशुषु प्रतिष्ठापयति । तस्मादर्द्धर्चश एवानुवचनं युक्तम् ॥

तत्र प्रातरनुवाकक्रम माक्षिप्य समाधत्ते—"तदाहुर्यद् व्यूळ्हः प्रातरनुवाकः, कथ मव्यूळ्हो भवतीति ? यदेवास्य बृहती मध्यैतीति ब्रूयात्तेनेति"-इति । छन्दसां यो ऽय मनुक्रमः, सोऽय मनुक्रमणिकाकारेण दर्शितः—"अथ छन्दांसि गायत्र्युष्णिगनुष्टुब्-

---

* 'एत मर्थं' घ। † 'द्वौ पादौ' घ।

बृहतीपङ्क्तित्रिष्टुब्जगत्यतिजगतीशक्वर्यतिशक्वर्यष्ट्यत्यष्टिधृत्यतिधृतयश्चतुर्विंशत्यक्षरादीनि चतुरुत्तराणि” इति (का० छ० ष० १.१.)। चतुर्विंशत्यक्षरोपेतां गायत्री मारभ्योत्तरोत्तरं छन्दश्चतुर्भिश्चतुर्भिरक्षरैरधिक मित्यर्थः। त मेतं छन्दसां क्रमं विपर्यस्य प्रातरनुवाके क्रमान्तर मूहितम्,—गायत्र्यनुष्टुप्त्रिष्टुब्बृहत्युष्णिग्जगतीपङ्क्तिरिति। सोऽयं क्रमोऽस्माभिराश्वलायनोक्तक्रमेण पूर्व मेवोदाहृतः (३२६ पृ०)। तस्मात्प्रातरनुवाकोक्तक्रमस्य विपर्ययेणोहनादयं व्यूढः सम्पन्नः। सोऽय मनुचितः। तस्मात् कथ मव्यूढो भवतीति प्रश्नः, आक्षेपो वा। यदेवेत्यादिक मुत्तरम्। यस्मादेव कारणात् छन्दःक्रमे अनुष्ठानक्रमे वास्य प्रातरनुवाकस्य मध्याद् बृहतीच्छन्दो ‘नैति’ नापगच्छतीत्युत्तर मभिज्ञो ब्रूयात्। ‘तेन’ कारणेनाय मव्यूढः सम्पन्न इत्यगन्तव्यम्॥

अथ प्रातरनुवाकं प्रशंसति—“आहुतिभागा वा अन्या देवता अन्या स्तोमभागाश्छन्दोभागास्ता या अग्नावाहुतयो हूयन्ते, ताभिराहुतिभागाः प्रीणात्यथ यत् स्तुवन्ति च शंसन्ति च तेन स्तोमभागाश्छन्दोभागाः”-इति। ‘अन्याः’ काश्चित् देवताः, अग्नौ हूयमाना माहुतिं भजन्ते इति; ‘अन्याः’ काश्चित् देवताः साम्न आवृत्तिप्रकारभेदेन निष्पन्नं त्रिवृत्पञ्चदशादि स्तोमं * भजन्ते; अपराः काश्चित् देवताः ऋग्गतगायत्र्यादि छन्दो भजन्ते। एवं सति ‘ताः’ विधिवाक्येषु प्रसिद्धाः आहुतयो याः सन्ति, ताभिराहुतिभागानां देवतानां प्रीतिः; उद्गातारः स्तोमयुक्तैः सामभिः स्तुवन्तीति यत्, तेन स्तोमभागानां प्रीतिः; होतारः छन्दोयुक्ताभिर्ऋग्भिः शंसन्तीति यत्, तेन छन्दोभागानां प्रीतिः। वेदनं प्रशं-

---

* सामब्राह्मणस्य ‘तिसृभ्यो हिङ्करोति’-इत्याद्यध्यायद्वयं (ता० ब्रा० २,३.) द्रष्टव्यम्।

इति—"उभय्यो हास्यैता देवताः प्रीता अभीष्टा भवन्ति य एवं वेद"-इति। आहुतिभागा एको राशिः, स्तोमभागाश्छन्दोभागाश्च द्वितीयो राशिः, एता उभयविधा अपि देवताः वेदनेन प्रीताः सत्यो वेदितुरभीष्टप्रदा भवन्ति ॥

शंसनेन छन्दोभागानां प्रीत्यभिधानात् प्रातरनुवाकस्य प्रशंसा सम्पन्ना; विभिन्ने प्रीतिनिमित्ते दृष्टान्तमभिप्रेत्य सोमं पशुं प्रशंसति —"त्रयस्त्रिंशद्वै देवाः सोमपाः, त्रयस्त्रिंशदसोमपाः। अष्टौ वसवः*, एकादश रुद्राः†, द्वादशादित्याः‡, प्रजापतिश्च, वषट्कारश्च§,

---

* "अग्निश्च जातवेदाश्च सहोजा अजिरा प्रभुः। वैश्वानरो नर्यापाश्च पङ्क्तिराधाश्च सप्तमः। विसर्पेवाष्टमोऽग्नीनाम् एतेऽष्टौ वसवः क्षिता इति"—तै० आ० १.९.१। 'क्षिता इति'—एतदंशस्य व्याख्याने माह सायणः—'क्षिताः' शब्देन निवासं प्राप्ताः (वसवः)। 'इति' शब्द उपधानप्रदर्शनार्थः'। अस्मन्मते तु "क्षितौ इति"—एवं पदच्छेदो युक्ततरः; भूम्यामिति चार्थं उपदेश्यः। आह हि यास्कः 'अग्निः पृथिवीस्थानः'-इति (निरु० ७.२.१.)।

† "अथ वायोरेकादश। प्रभ्राजमाना व्यवदाता याश्च वासुकिवैद्युताः। रजताः परुषाः श्यामाः कपिला अतिलोहिताः। ऊर्ध्वा अवपतन्ताश्च वैद्युत इत्येकादश"—इति तै० आ० १.९.४। 'प्रभ्राजमाना इत्येकादश रुद्राः'-इति च तत्रत्यः।

‡ "कतम आदित्या इति? द्वादश वै मासाः संवत्सरस्यैत आदित्याः; एते हीदं सर्वमाददाना यन्ति; ते यदिदं सर्वमाददाना यन्ति तस्मादादित्या इति"-इति बृ०उप० ३.९.५। अपरथा च गण्यन्ते। तद्यथा—"त्वष्टा, धाता, भगः, अंशः, पूषा, विष्णुः, विवस्वान्, वरुणः, केशी (केशिनः), वृषाकपिः, यमः, अजएकपात्"-इति निघ० ५.६। एते हि अरुणोदयादारभ्यास्तमयं [illegible] [illegible] कामायाः सूर्या एव। तथाहि 'त्वष्टा सुभर्व'-इत्यादि [illegible] (१२.११—३०.) निरुक्तयन्त्योऽवगन्तव्याः। धाता, मित्रः, अर्यमा, शक्रः, भगः, विवस्वान्, पूषा, सविता, त्वष्टा, विष्णुः, इति च द्वादश महाभारते १। २५२२।

§ 'अष्टौ०—०दित्या इमे एव द्यावापृथिवी त्रयस्त्रिंश्यौ, त्रयस्त्रिंशत्ते; प्रजापतिश्चतुस्त्रिंशः'-इति शत० ब्रा० ४.५.७.२। तत्रैव स्थलान्तरेऽपि—'अष्टौ०—०दित्यास्त एकत्रिंशत्, इन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति'-इति ११.६.३.५। 'आदित्यैर्नया-

—एते देवाः सोमपाः । एकादश प्रयाजाः, एकादशानुयाजाः, एकादशोपयाजाः,—एते असोमपाः, पशुभाजनाः । सोमेन सोमपान् प्रीणाति, पशुना असोमपान्"–इति । वस्वादीनां वषट्कारान्तानां देवतानां सोमयागेन प्रीतिः । 'होता यक्षदग्नि मित्यादिमैत्रावरुणप्रैषमन्त्रेषु, 'समिद्धो अद्येत्यादियाज्यासु चाभिहिताः समिदाद्या एकादश प्रयाजदेवताः * । 'देवं बर्हिः सुदेव मित्यादिप्रैषमन्त्रेषु, 'देवं बर्हिर्वसुवन इत्यादियाज्यासु चाभिहिता बर्हिराद्या एकादशानुयाजदेवताः † । 'समुद्रं गच्छ स्वाहेत्यादिमन्त्रोक्ताः समुद्रादय एकादशोपयाजदेवताः ‡ । सर्वा अपि सोमपानवर्जिताः पशु मेव भजन्ते ; तासां पशुना तृप्तिः । वेदनं प्रशंसति— "उभय्यो हास्यैता देवताः प्रीता अभीष्टा भवन्ति य एवं वेद"–इति । अत्र सोमपाना मसोमपानां च भिन्नप्रीतिनिमित्ततया छन्दोभागानां देवताना मितरदेवताविलक्षणं प्रीतिनिमित्तं प्रातरनुवाक इत्यभिप्रायः ॥

तस्य प्रातरनुवाकस्य समाप्तिं मृचं विधत्ते—"अभूदुषा रुश-

धाम त्रयस्त्रिंशत् शुभान् भुगाम् ; आदित्यांश्च वसूंश्चैव रुद्रांश्चैवाश्विनावपि'–इति च । रामा० ३. २०. १५ ।

* समिधः, तनूनपात् नराशंसो वा, इडः, बर्हिः, दुरः, उषासानक्ता, दैव्याहोतारा, तिस्रो देव्यः (इडा, सरस्वती, भारती), त्वष्टा, वनस्पतिः, स्वाहाकृतयः ;—इत्येकादश प्रयाजदेवताः । तै० ब्रा० ३. ६. २, ३ द्रष्टव्याः ।

† बर्हिः, द्वारः, उषासानक्ता, जोष्ट्री, ऊर्जाहुती, दैव्याहोतारा, तिस्रो देव्यः, नराशंसः, वनस्पतिः, बर्हिः, स्विष्टकृत् ;—इत्येकादशानुयाजदेवताः । तै० ब्रा० ३.६.१३,१४ द्रष्टव्याः ।

‡ समुद्रः, अन्तरिक्षम्, सविता, अहोरात्रे, मित्रावरुणौ, सोमः, यज्ञः, छन्दांसि, द्यावापृथिवी, दिव्यं नभः, वैश्वानरः, आपः ;—इत्येकादशोपयाजदेवताः तै० सं० १.५.११ ; ६. ४. १ द्रष्टव्याः । उपयजोपयाजशब्दावेकार्थौ ।

पशुरिति (सं० ५.७५.९.) उत्तमया परिदधाति”-इति। अत्र कश्चिदाक्षेप मुत्थापयति—“तदाहुर्यत् त्रीन् क्रतूनन्वाहाग्नेय मुषस्य माश्विनं, कथ मस्यैकयर्चा परिदधतः सर्वे त्रयः क्रतवः परिहिता भवन्तीति”-इति। क्रतुशब्दः सोमयागसम्बन्धिनः प्रातरनुवाकभागानुपलक्षयति। ते च भागाः त्रयः;—आग्नेयः, उषस्यः, आश्विनश्चेति। तान् सर्वानसौ होता ब्रूते। तदानी मेकयर्चा परिधानं कुर्वतः ‘अस्य’ होतुस्त्रयो भागाः सर्वेऽपि कथं समापिता भवन्ति? इत्याक्षेप माहुः। तत्र समाधानं दर्शयति—“अभूदुषा रुशत्पशुरित्युषसो रूप माग्निरधाय्यृत्विय इत्यग्नेरयोजि वां वृषण्वसू रथो दस्रावमर्त्यो माध्वी मम श्रुतं हव मित्याश्विनोरेव सु ह्वास्यैकयर्चा परिदधतः सर्वे त्रयः क्रतवः परिहिता भवन्ति भवन्ति” इति। येयम् ‘उषाः’ सूर्योदयात् पूर्वभाविनी, सेयं रुशत्पशुरभूत्। ‘रुशन्तः’ परस्परं ध्वनिं कुर्वन्तः पशवो यस्या मुषसि, सेयं ‘रुशत्पशुः’। रात्रौ निद्रां कुर्वन्तः पशव उषःकाले प्राप्ते ध्वनिं कुर्वन्तीति प्रसिद्ध मेतत्। उषोदेवताया अस्मिन् पादे अभिहितत्वात् अयं प्रथमः पादः, उषसो ‘रूपम्’ अनुकूल इत्यर्थः। ‘ऋत्वियः’ अरणिमथनरूपे ऋतुकाले भवस्तादृशोऽग्निः, ‘आ’ समन्तात् ‘अधायि’ आधानेन सम्पादितः। अत्राग्नेरभिधानाद् द्वितीयः पादोऽग्नेः रूपम्। ‘वृषण्वसू’ वर्द्धमानधनौ ‘दस्रौ’ हे अश्विनौ देवौ! ‘वां’ युवयोः ‘अमर्त्यो रथः’ मनुष्याणामयोग्यः समीचीनो रथः ‘अयोजि’ अश्वाभ्यां योजितः। अतो ‘माध्वी’ मधुरया वाचा ‘मम हवं’ मदीय माह्वानं ‘श्रुतं’ युवां शृणुतम्। अस्मिन्नुत्तरार्द्धे अश्विनोरभिधानाद् अय मर्द्धोऽश्विनो रूपम्। तस्माद् ‘एकयर्चा’ देवतात्रयप्रतिपादिकया ‘एव सु ह’ एत

मेव प्रातरनुवाकं 'परिदधतः' समापयतः 'अस्य' होतुः 'वयः ऋतवः' प्रातरनुवाकभागाः सर्वे 'परिहिताः' समापिता भवन्ति ॥ पदाभ्यासोऽध्यायसमाप्त्यर्थः ॥ ८ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां द्वितीयाध्याये
अष्टमः खण्डः ॥ ८ (१८) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायाः द्वितीयोऽध्यायः ॥

॥ अथ तृतीयाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

ऋषयो वै सरस्वत्यां सत्र मासत ते कवष मैलूषं सोमादनयन् दास्याः पुत्रः कितवो ऽब्राह्मणः कथं नो मध्ये ऽदीक्षिष्टेति तं बहि*र्धन्वोदवहन्नत्रैनं पिपासा हन्तु सरस्वत्या उदकं मा पादिति स बहिर्धन्वोदूळ्हः पिपासया वित्त एतदपोनप्त्रीय मपश्यत् प्र देवत्रा ब्रह्मणे गातुरेत्विति तेनापां प्रियं धामोपागच्छत्त मापो ऽनूदायंस्तं सरस्वती समन्तं पर्यधावत्तस्माद्धाप्येतर्हि परिसारक मित्याचक्षते यदेनं सरस्वती समन्तं परिससार ते वा ऋषयो ऽब्रुवन्विदुर्वा इमं देवा उपेमं ह्वयामहा इति तथेति त मुपाह्वयन्त त मुपहूयैतदपोनप्त्रीय मकुर्वत प्र देवत्रा ब्रह्मणे गातुरेत्विति तेनापां प्रियं धामोपागच्छन्नुप देवाना मुपापां प्रियं धाम गच्छत्युप देवानां जयति परमं लोकं य एवं वेद यश्चैवं विद्वानेतदपोनप्त्रीयं कुरुते

---

* 'बर्हि०' टी० ख, टी० ग।

तत्सन्तत मनुब्रूयात् सन्ततवर्षी ह प्रजाभ्यः पर्जन्यो भवति यश्चैवं विद्वानेतत्सन्तत मन्वाह यदवग्राह मनुब्रूयाज्जीमूतवर्षी ह प्रजाभ्यः पर्जन्यः स्यात्तस्मात्सन्तत मेवानूच्यं तस्य त्रिः प्रथमां सन्तत मन्वाह तेनैव तत्सर्वं सन्तत मनूक्तं भवति ॥ १ (१९) ॥

पर्जन्यादेर्विशेषांश्च स्तोकाः स्वाहाकृतीरपि ।
वपां चाधीयते प्रातरनुवाकविधिः परम् ॥

अथापोनप्त्रीयादयो वक्तव्याः ; तदर्थ मादावाख्यायिका माह —"ऋषयो वै सरस्वत्यां सत्र मासत ; ते कवष मैलूषं सोमादनयन् ; दास्याः पुत्रः कितवोऽब्राह्मणः, कथं नो मध्ये दीक्षिष्टेति ; तं बहिर्धन्वोदवहन्नेनं पिपासा हन्तु, सरस्वत्या उदकं मा पादिति ; स बहिर्धन्वोदूळ्हः पिपासया वित्त एतदपोनप्त्रीय मपश्यत्,— प्र देवत्रा ब्रह्मणे गातुरेत्विति ; तेनापां प्रियं धामोपागच्छत् ; त मापोऽनूदायंस्तं सरस्वती समन्तं पर्यधावत्"-इति । भृग्वङ्गिरःप्रभृतयः 'ऋषयः' कदाचित् 'सरस्वत्याम्' एतन्नामकनदीतीरे 'सत्र मासत' । द्वादशरात्र* मारभ्य उपरितनं त्रयोदशरात्रादिकं बहुयाजमानकं कर्म्म सत्र मित्युच्यते । तदुद्दिश्य तत्र स्थितवन्तः ; सत्र मन्वतिष्ठन्नित्यर्थः । तदानीं तेषां मध्ये कश्चिदिलूषाख्यस्य पुरुषस्य पुत्रः कवषनामकोऽवस्थितोऽभूत् । 'ते' च ऋषयः, तं कवषं सोमयागात् निःसारितवन्तः । तेषा

---

* 'द्वादशाह' घ ।

अभिप्राय उच्यते—‘दास्याः पुत्रः’-इत्युक्तिराक्षेपार्थः *। ‘कितवः’ द्यूतकारः; तस्मादब्राह्मणोऽयम्। ईदृशो ‘नः’ अस्माकं शिष्टानां मध्ये स्थित्वा कथं दीक्षां कृतवानिति तेषा मभिप्रायः †। ‘तं’ कवषं सरस्वतीतीराद् ‘बहिः’ दूरं ‘धन्व’ जलरहितां भूमिं प्रति ‘उदवहन्’ उद्धृतवन्तः, बलादपसारितवन्तः। धन्वदेशे बलात्प्रेरयितॄणा मय मभिप्रायः,—‘अत्र’ जलवर्जितदेशे ‘एनं’ कवषं पिपासा मारयतु;—सरस्वत्या नद्याः पवित्र मुदक मयम् पापिष्ठो मा पिबत्विति। ‘सः’ च कवषोऽत्र सरस्वत्याः ‘बहिः’ दूरं ‘धन्व’ निर्जलं देशं प्रति ‘उदूढः’ उत्कर्षेणापसारितः, पिपासया ‘वित्तः’ लब्धः, आक्रान्तः। तत्परिहारार्थम् ‘एतत्’ प्रदेवत्रेत्यादिक मपोनप्तृदेवताकं सूक्तं (सं० १०.३०.) वेदमध्ये विचार्यापश्यत्। ‘तेन’ सूक्तेन जपितेन ‘अपां’ जलाभिमानिनीनां देवतानां प्रियं स्थान मुपागच्छत्। ‘तं’ चागतम् ‘आपः’ देवताः ‘अनूदायन्’ अनुग्रहेणोत्कर्षो यथा भवति तथा प्राप्तवत्यः। ततः ‘सरस्वती’ नदी ‘तं’ कवषं ‘पर्यधावत्’ परितः प्रवाहवेगेन प्रवृत्तासीत्। इम ‡ मर्थं लोकप्रसिद्ध्या द्रढयति—“तस्माद्धाप्येतर्हि परिसारक मित्याचक्षते, यदेनं सरस्वती समन्तं परिससार”—इति। ‘यद्’ यस्मिन् स्थाने ‘सरस्वती’ ‘नदी’ ‘एनं’ कवषं ‘समन्तं’ सर्वासु दिक्षु परिससार, तत् स्थानम् ‘एतर्ह्यपि’ एतस्मिन्नपि काले तीर्थविशेषाभिज्ञाः पुराणकर्त्तारः परिसारक मित्येतन्नाम्ना व्यवहरन्ति। अथ सत्रानुष्ठायिनां तेषा मृषीणां कृत्यं दर्शयति—“ते वा ऋषयो ऽब्रुवन्,—विदुर्वा इमं देवा

---

* ‘इत्युक्तिरधिक्षेपाय’ घ।

† ‘उक्त’ घ।

‡ अशिष्ट इति तस्य शिष्टाव्यवहार्यत्वम्, दास्याः पुत्र इति निन्दार्थमुक्तं न तु सत्यमित्याशयः।

उपेमं ह्वयामहा इति, तथेति; तमुपाह्वयन्त; तमुपहूयैतदपोनप्त्रीयमकुर्वत,— प्र देवत्रा ब्रह्मणे गातुरेत्विति; तेनापां प्रियं धामोपागच्छन्नुप देवानाम्"-इति। 'ते' भृग्वादयः परस्परमिदमब्रुवन्,— 'इमं' कवषं 'देवाः' सर्वेऽपि 'विदुः' विजानन्त्येव। अतोऽस्य कितवत्वादिदोषो नास्ति। तस्मादिममस्मत्समीपं प्रति आह्वयामः,—'इति' विचार्य तमुपह्वयन्ते। तेन दृष्टमपोनप्तृदेवताकम् प्रदेवत्रेत्यादि सूक्तम् 'अकुर्वत' प्रयुक्तवन्तः। 'तेन' सूक्तेन जलदेवतानामन्यदेवतानां च प्रियं स्थानमुपागच्छन्। एतद्वेदनपूर्वकमनुष्ठानं च प्रशंसति—"उपापां प्रियं धाम गच्छत्युप देवानां जयति परमं लोकं य एवं वेद, यश्चैवं विद्वानेतदपोनप्त्रीयं कुरुते"-इति। यस्मादेवं प्रशस्तं तस्मादपोनप्त्रीयं कुर्यादिति विधिरुन्नेयः॥

तस्मिन्नपोनप्त्रीयसूक्ते प्रातरनुवाकवत्प्रसक्तमर्धर्चेऽवसानं निवारयितुं नैरन्तर्यं विधत्ते—"तत्सन्ततमनुब्रूयात्"-इति। होतुर्वेदनं प्रशंसति—"सन्ततवर्षी ह प्रजाभ्यः पर्जन्यो भवति, यश्चैवं विद्वानेतत्सन्ततमन्वाह" इति। 'पर्जन्यः' मेघः 'सन्ततवर्षी' नैरन्तर्येण वृष्टिमान्,— यावती वृष्टिरपेक्षिता, सा सम्पूर्णा भवतीत्यर्थः। विपक्षे बाधकपूर्वकं स्वपक्षमुपसंहरति—"यदवग्राहमनुब्रूयाज्जीमूतवर्षी ह प्रजाभ्यः पर्जन्यः स्यात्तस्मात्सन्ततमेवानूच्यम्"-इति। 'अवग्राहं' तस्मिन्नर्धर्चे पादे वा अवगृह्यावगृह्य पुनःपुनरवसानं कृत्वा यद्यनुब्रूयात्, तदा प्रजोपकारार्थं प्रवृत्तः पर्जन्यो 'जीमूतवर्षी' स्यात्। जीमुतः पर्वतः; "जीमूतौ मेघपर्वतौ" इत्युक्तत्वात् *। अनुपयुक्ते पर्वते एव वर्षति, न तूपयुक्तेषु

---

* अम० को० ३. ३. ५८।

सर्वेष्वित्यर्थः । यस्मादेवं तस्मादवग्रहो न कार्यः, किन्तु सन्तत मेवानूच्यम् ॥

तस्मिन् सूक्ते प्रथमाया ऋच आवृत्तिसहितं सान्तत्यं विधीयते—"तस्य त्रिः प्रथमां सन्तत मन्वाह,—तेनैव तत्सर्वं सन्तत मनूक्तं भवति"-इति । अस्य सूक्तस्य प्रथमायास्त्रिरावृत्तिसान्तत्येन सर्वस्यापि सूक्तस्य सान्तत्यं सिध्यति । प्रथमायाः * सान्तत्य माश्वलायनो दर्शयति—"अध्यर्द्धकारं प्रथमा मृगावान मुत्तराः"-इति (श्रौ० ५. १. ५.) । त्रिरावृत्तायाः प्रथमायाः अर्धत्रयेणावसानं कृत्वा पठेत्; उत्तरासा मृचा मवसानं कृत्वा पाठः कर्त्तव्य इत्यर्थः ॥ २० ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां तृतीयाध्याये
प्रथमः खण्डः ॥ १ (२०) ॥

॥ अथ द्वितीयः खण्डः ॥

ता एता नवानन्तराय मन्वाह हिनोता नो अध्वरं देवयज्येति दशमी मावव् ततीरध नु द्विधारा

---

* 'प्रथमायां' घ ।

इत्यावृत्तास्वेकधनासु प्रति यदापो अदृश्र मायतीरिति प्रतिदृश्यमानास्वा धेनवः पयसा तूर्ण्यर्था इत्युपायतीषु समन्या यन्त्युपयन्त्यन्या इति समायतीष्वापो वा अस्पर्धन्त वयं पूर्वं यज्ञं वक्ष्यामो वयमिति याश्चेमाः पूर्वेद्युर्वसतीवर्यो गृह्यन्ते याश्च प्रातरेकधनास्ता भृगुरपश्यदापो वै स्पर्धन्त इति ता एतयर्चा समज्ञपयत्समन्या यन्त्युपयन्त्यन्या इति ताः समजानत सञ्ज्ञानाना हास्यापो यज्ञं वहन्ति य एवं वेदापो न देवीरुपयन्ति होत्रियमिति होतृचमसे समवनीयमानास्वन्वाह वसतीवरीष्वेकधनासु चावेरपो ऽध्वर्या३उ इति होताध्वर्युं पृच्छत्यापो वै यज्ञो विदो यज्ञाँ३ इत्येव तदाहोते मनन्नमुरित्यध्वर्युः प्रत्याहोतेमाः पश्येत्येव तदाह तास्वध्वर्यो इन्द्राय सोमं सोता मधुमन्तं वृष्टिवनिं तीव्रान्तं बहुरमध्यं वसुमते रुद्रवत आदित्यवत ऋभुमते विभुमते वाजवते बृहस्पतिवते विश्वदेव्यावते यस्येन्द्रः पीत्वा वृत्राणि जङ्घनत्प्र स जन्यानि तारिषो३मिति प्रत्युत्तिष्ठति प्रत्युत्थेया वा आपः प्रति वै श्रेयांस मायन्त मुत्तिष्ठन्ति तस्मात्प्रत्युत्थेया अनुपर्यावृत्या अनु वै श्रेयांसं

पर्यावर्त्तन्त॑ तस्मादनुपर्यावृत्या अनुब्रुवतैवानुप्रपत्तव्यं॑ मौक्ष्वरो ह यद्यप्यन्यो यजे॑ताथ होतारं यशो ऽर्त्ती॑स्तस्मादनुब्रुवतैवानुप्रपत्त॑व्य अम्बयो यन्त्यध्वभिरि॑त्येता मनुब्रुवन्ननुप्रपद्ये॑त जामयो अध्वरीयतां॑* पृञ्चतीर्मधुना पय इति यो ऽमधव्यो यशोऽर्त्तो बुभूषेदमूर्या उप सूर्ये॑ याभिर्वा सूर्यः सहेति॑ तेजस्कामो ब्रह्मवर्चसकामो॑ ऽपो देवीरुपह्वये॑ यत्र गावः पिबन्ति न इति॑ पशुकामस्ता॑ एताः सर्वा एवानुब्रुवन्ननुप्रपद्येतैतेषां कामाना मवरुध्या॑ एतान् कामानवरुन्धे य एवं वे॑देमा अग्मन् रेवतीर्जीवधन्या इति॑ साद्यमानास्वन्वाह॑ वसतीवरीष्वेकधनासु चा॑गमन्नाप उशतीर्बर्हिरेद मिति॑ सन्नासु स एतया परिदधाति॑ ॥ २ (२०) ॥

तत्सूक्तवचने प्रकारविशेषं विधत्ते—“ता एता नवानन्तरायमन्वाह”-इति। प्र देवत्रेत्यारभ्य नवसङ्ख्याका ऋचो याः सन्ति, तासां द्वयोः ऋचोर्मध्ये ‘अन्तरायः’ विच्छेदो न भवति तथानुब्रूयात्। अपरं विशेषं विधत्ते—“हिनोता नो अध्वरं देवयज्येति दशमीम्”-इति। अध्ययनक्रमेण “आवर्वृतती”-इति दशमी (१०.३०.१०.); तां परित्यज्य तदुत्तरभाविनी “हिनोता नः”-इति (१०.३०.११.) ‘दशमीं’ कृत्वानुब्रूयात्। परित्यक्तायास्तस्याः

---

* ‘अध्वरीयतां३’ ग ।

अनुवचने कालविशेषं विधत्ते—"आववृततीरध नु द्विधारा इत्यासन्नास्वेकधनासु"-इति।

अत्रायं प्रयोगक्रमः।— "सुत्यादिनात् पूर्वस्मिन् दिने अग्नीषोमीयं पशु मनुष्ठाय वसतीवरीसञ्ज्ञिताः सोमाभिषवकाले सवनीयाः * अपः स्नानीय वेद्या मवस्थाप्य अर्द्धरात्राद् ऊर्द्धं निद्रां परित्यज्य आग्नीध्रधिष्ण्यादींस्तत्तन्मन्त्रैरभिमृश्य सोमादीनां पात्राण्यासाद्य प्रातरनुवाकार्थं होतारं सम्प्रेष्यप्रातरनुवाकान्ते "शृणोत्वग्निः"-इति (तै०सं०१.३.१३.) मन्त्रेण हुत्वा तत एकधनाः † अपः आनेतुं गच्छन्नपोनप्त्रीयसूक्तार्थं होतारं सम्प्रेष्यति,—एकधना अप आनयेति। सोऽयं प्रयोगक्रमः आध्वर्यवसूत्रेषु द्रष्टव्यः। तत्र होतारं प्रति अपोनप्त्रीयविषये प्रैष मापस्तम्बो दर्शयति—"यत्राभिजानात्यभूदुषा रुशत्पशुरिति, तत्प्रचरण्या

---

* "अग्नीषोमीयस्य वपामार्जनान्ते वसतीवरीर्गृह्णाति स्यन्दमानानां मनस्तमिते"-इति कात्या० श्रौ० ८.९.७। 'सोमार्था आपो वसतीवरी-शब्देनोच्यन्ते'-इत्यादिश्च तद्वृत्तिः। "यत्र होतुः प्रातरनुवाक मनुब्रुवत उपशृणुयात्तदपोऽध्वर्युर्वहन्तीनां गृह्णाति"-इति आप० श्रौ० १२.५.५। 'यावत्यध्वनि प्रातरनुवाकस्य शब्दः श्रूयते, तावत्येव वहन्तीना मपो गृह्णाति'-इति च तद्वृत्तिः। 'वसन्तु नु न इद मिति तद्वसतीवरीणां वसतीवरीत्वम्'-इति तन्नामनिर्वचनम् तै० सं० ६.४.२.१। वसतीवरीग्रहणविध्यादिकं तु तत्रैव तत उत्तरं द्रष्टव्यम्। तत्तन्मन्त्रास्त्वाम्नातास्तत्र प्रथमे काण्डे (३.१२,१३.)।

† 'एकधनशब्दार्थं स्वय मेव व्याचष्टे—"[प्रत्यगेकधनानयुग्मान्] उदहरणांस्त्रिप्रभृत्या पञ्चदशभ्यः"-इति (सू०)। उदकं ह्रियत एभिरित्युदहरणाः कलशाः। त्र्यादिपञ्चदशपर्यन्तम्। अयुग्मसङ्ख्यान् विषमसङ्ख्यान् (शत० ब्रा० ३.९.३.३४.)। अग्निष्टोमे त्रयः पञ्च वा, अत्यग्निष्टोमेऽपि तावन्त एव, उक्थ्ये पञ्च वा सप्त वा, षोडशिनि सप्त वा नव वा, वाजपेये नव वैकादश वा, अतिरात्रे एकादश वा त्रयोदश वा, अप्तोर्यामे त्रयोदश वा पञ्चदश वेति'-इत्यादिः कात्या० श्रौ० ९.२.२३ वृ०। 'एकधनस्थानं चोत्तरस्य हविर्धानस्याधस्तादक्षस्य पश्चात्'-इति च तत्रैव (९.४.१.)।

जुहोति शृणोत्वग्निः समिधा हवं म इति । अपरं चतुर्गृहीतं गृहीत्वा सम्प्रेष्यत्यप इष्य होतर्मैत्रावरुणस्य चमसाध्वर्यवाद्रवैकधनिन आद्रवत नेष्टः पत्नी उदानयोन्नेतर्होतृचमसेन वसतीवरीभिश्च चात्वालं प्रत्यास्तेति"-इति (श्रौ०१२.५.१,२.) । अस्मात् प्रैषादूर्ध्वं होता सूक्त मनुब्रूयात् । तदाहाश्वलायनः—"परिहिते ऽप इष्य होतरित्युक्तो ऽनभिहिङ्कृत्यापोनप्त्रीया मन्वाह"-इति (श्रौ० ५.१.१.) । तत्र पूर्वोक्तदशमीसंहिता ऋचो ऽनूच्य एकधनिनः पुरुषाः प्रेषिताः सन्तः एकधनाख्या अपः घटैर्गृहीत्वा यदा जलसमीपादावर्त्तन्ते, तदानीं तास्वेकधनाख्यास्वप्सु आहृतासु सतीषु तदावृत्तिं समीक्षमाणो होता पूर्वं परित्यक्ताम् "आवर्वृततीः"-इति (सं० १०. ३०. १०.), एता मृचं तस्मिन् काले अनुब्रूयादित्यर्थः ॥

ऋगन्तरकालं विधत्ते—"प्रति यदापो अदृश्र मायतीरिति प्रतिदृश्यमानासु"-इति । ता एकधनाख्या आपो ग्रहणस्थानात् प्रतिनिवृत्ताः पुरुषैरानीयमाना यदा होत्रा दृश्यन्ते, तदानीं "प्रति यदापः"-इति (सं० १०, ३०. १३.), एता मृच मनुब्रूयात् ॥

पुनरप्यृगन्तरकालं विधत्ते—"आ धेनवः पयसा तूर्ण्यर्था इत्युपायतीषु"-इति । होत्रा दृष्टाः ता एकधनाख्या आपो यदा चात्वालसमीपं प्रत्यागच्छन्ति, तदानीम् 'उपायतीषु' समीप मागच्छन्तीषु तासु "आ धेनवः"-इति (सं०५,४३.१,), एता मृचं ब्रूयात् ॥

पुनरप्यृगन्तरकालं विधत्ते—"स मन्या यन्त्युपयन्त्यन्या इति समायतीषु"-इति । पूर्वत्र "उन्नेतर्होतृचमसेन वसतीवरीभिश्च

चात्वालं प्रत्यासेति”-इत्यापस्तम्बसूत्रोक्तः(१२.५.२.) प्रैष उदाहृतः। ततः उन्नेता होतृसम्बन्धिनं चमसं वसतीवर्याख्याः पूर्वदिनानीता अपश्चात्वालसमीपे समानयति। मैत्रावरुणस्य चमसाध्वर्यवाद्रवेति-प्रेषितत्वान्मैत्रावरुणस्य परिचारकश्चमसाध्वर्युरपि तदीयं चमसं चात्वालसमीपे समानयति। तेन होतृचमसेन वसतीवर्यो गृह्यन्ते, मैत्रावरुणचमसेनैकधनाश्च गृह्यन्ते। ततो वसतीवरीसहिते होतृचमसे मैत्रावरुणचमसगतासु एकधनास्वध्वर्युणा समीपं नीतासु संयोजयितुं समागतासु “स मन्या यन्ति”-इत्यादिका ऋचम् (सं० २.३५.३.) अनुब्रूयात्। त मेत मनुवचनकाल मापस्तम्बो विशदयति—“होतृचमसेन वसतीवरीभ्यो निषिच्योपरि चात्वाले होतृचमसं मैत्रावरुणचमसं च सꣳस्पर्श्य वसतीवरीर्व्यानयति। स मन्या यन्तीत्यभिज्ञाय होतृचमसान्मैत्रावरुणचमस आनयति; मैत्रावरुणचमसाद्धोतृचमसे; एतद्वा विपरीतम्”-इति (श्रौ० १२. ६. १, २.)।

एतस्या ऋचः प्रशंसार्थ माख्यायिका माह—“आपो वा अस्पर्धन्त,—वयं पूर्वं यज्ञं वक्ष्यामो वय मिति; याश्चेमाः पूर्वेद्युर्वसतीवर्यो गृह्यन्ते, याश्च प्रातरेकधनास्ता भृगुरपश्यदापो वै स्पर्धन्त इति; ता एतयर्चा समज्ञपयत्स मन्या यन्त्युपयन्त्यन्या इति; ताः समजानत”-इति। पूर्वेद्युः सम्पादिता वसतीवर्याख्या या आपः, याश्च परेद्युः सम्पादिता एकधनाख्याः, ता उभयविधा अपि यज्ञनिर्वहणे पूर्वभावितार्थं मन्योन्यं स्पर्द्धां कृतवत्यः। तदानीं भृगुनामक ऋषिः, आप एव परस्परं स्पर्द्धन्त्य इत्यपश्यत्। अर्थवादत्वादचेतनानां स्पर्द्धायां न चोदनीयम्। यद्वा, तत्तदभिमानिन्यो देवताः स्पर्द्धन्ते इत्यवगन्तव्यम्। ततो भृगुः स्पर्द्धां दृष्ट्वा

“स मध्वा यन्ति”-इत्येतयर्चा ‘ताः’ उभयीरपः ‘समज्ञपयत्’ ‘सञ्ज्ञानं’ परस्पर मैकमत्यं प्रापयत्। ततो मन्त्रसामर्थ्यात् ‘ताः’ उभयविधा आपः ‘समजानत’ ऐकमत्यं प्राप्ताः। वेदनं प्रशंसति— “सञ्ज्ञानाना ह्यास्यापो यज्ञं वहन्ति य एवं वेद”-इति। या वसतीवर्यो याश्चैकधनाः, ता द्विविधा अपि ‘सञ्ज्ञानानाः’ परस्पर मैकमत्यं प्राप्ताः ‘अस्य’ विदुषः यज्ञं निर्वहन्ति ॥

ऋगन्तरकालं विधत्ते— “आपो न देवीरुपयन्ति होत्रिय मिति होतृचमसे समवनीयमानास्वन्वाह वसतीवरीष्वेकधनासु च”-इति। एतासु द्विविधास्वप्सु होतृचमसे सिच्यमानासु तस्मिन् काले “आपो न देवीः”-इति (सं० १.८३.२) एता मृच मनुब्रूयात् ॥

अथ होतुः किञ्चिद्यजुरात्मकं मन्त्रं विधत्ते—“अवेरपो ऽध्वर्या३उ इति, होताध्वर्युं पृच्छति”-इति। हे अध्वर्यो! द्विविधा अपः किम् ‘अवेः’ लब्धवानसि ? अस्मिन्मन्त्रे प्लुतिः * प्रश्नार्था। त मेतं मन्त्रं व्याचष्टे—“आपो वै यज्ञो ऽविदो यज्ञाँ३ इत्येव तदाह”-इति। एतद्विविधा अप्यापः सोमाभिषवसाधनत्वेन यज्ञनिर्वाहकत्वात् यज्ञस्वरूपा एव। तथा सति ‘यज्ञम्’ अप्रूपम् ‘अविदः’ किं लब्धवानसि ? इत्यनेन प्रकारेण, ‘तदाह’, ‘तत्’ मन्त्रवाक्यं ब्रूते। यज्ञा३मिति प्लुतिः † पूर्ववत् ॥

अध्वर्योः प्रत्युत्तरमन्त्रं विधत्ते—“उते मनन्नमुरित्यध्वर्युः प्रत्याह”-इति। ‘उत’-शब्दोऽपिशब्दार्थः। ‘ईम्’-इति ‡ वाक्य-

---

*, † पा० सू० ८. २. १०७. वा० १।

‡ “अथ ये प्रवृत्तेऽर्थे ऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति, पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्विति (कम्, ईम्, इत्, उ.)”-इति निरु० १. ३. ५।

पूरणार्थनिपातः, ‘इमाः’-इत्यस्मिन्नर्थे वर्त्तते । ‘इमाः’ द्विविधा अप्यापः ‘अनन्नमुः’ अतिशयेन उपनताः, प्राप्ताः । ‘इति’ एतम् । अध्वर्योः उत्तरमन्त्रं व्याचष्टे—“उतेमाः पश्येत्येव तदाह”-इति । ‘इमाः’ द्विविधा अप्यापो हे होतः ! पश्य । ‘इति’ अनेन प्रकारेण तन्मन्त्रवाक्यं ब्रूते । शाखान्तरेऽप्येतत्सर्वं श्रुतम्—‘अध्वर्यो वेरपा३ इत्याह उते मनन्नमुरुतेमाः पश्येति वावैतदाह”-इति (तै० सं० ६. ४. ३. ४.) ॥

अथ किञ्चिन्निगदरूपेण मन्त्रेण होतुः प्रत्युत्थानं विधत्ते—“तास्वध्वर्यो इन्द्राय सोमं सोता मधुमन्तं वृष्टिवनिं तीव्रान्तं बहुरमध्यं, वसुमते रुद्रवत आदित्यवत ऋभुमते विभुमते वाजवते बृहस्पतिवते विश्वदेव्यावते, यस्येन्द्रः पीत्वा वृत्राणि जङ्घनत्प्र स जन्यानि तारिषो३मिति प्रत्युत्तिष्ठति”-इति । ‘तासु’-इत्यादिः ‘ॐ’-इत्यन्तो निगदः । तेन मन्त्रेण होता द्विविधाना मप्यपां प्रत्युत्थानं कुर्यात् । हे ‘अध्वर्यो: !’ द्विविधास्वप्सु, ‘सोमं सोता’ सोमस्याभिषवकर्त्ता भव । कीदृशं सोमम् ‘मधुमन्तं’ माधुर्यरसोपेतं, ‘वृष्टिवनिं’ वृष्टेः सम्भजनकर्त्तारं, वृष्टिप्रद मित्यर्थः । ‘तीव्रान्तं’ तीव्र मवश्यम्भावि फल मन्ते यस्य सोमस्य सोऽयं तीव्रान्तः, अविघ्नेन सोमयागे समाप्ते सति सर्वथा फलत्येवेत्यर्थः ; ‘बहुरमध्यं’ बहुल मङ्गादिक मनुष्ठानं मध्ये प्रारम्भसमाप्त्योरन्तराले यस्यासौ बहुरमध्यः ; ऋत्विग्वरण मारभ्योदवसानीयेष्टेः पूर्वम्, दीक्षणीयाद्यङ्गकर्मभिः, उपांश्वन्तर्यामग्रहादिभिश्च प्रधानैः, अनुष्ठानबाहुल्यं प्रसिद्धम् । कीदृशायेन्द्राय ? वसुरुद्रादित्यैः, अन्यैरप्यृभुभिदेवैः, ‘विभुभिः’ समर्थैः भृत्यैः, ‘वाजेन’ अन्नेन, ‘बृहस्पतिना’ सुरगुरुणा, सर्वदेवहितैर्भार्य्यैश्च युक्तत्वेन वस्वादिमते ।

अय मिन्द्रो 'यस्य' सोमस्य वल्लीरूपस्य रसं पीत्वा 'वृत्राणि' यजमानस्य शत्रून् पापानि च 'जङ्घनत्' विनाशितवान् । तादृशं सोममिति पूर्वत्रान्वयः । अथवा, 'अस्य' यजमानस्य सम्बन्धिनं सोमं पीत्वेति व्याख्येयम् । 'सः' यजमानः 'जन्यानि' जने सम्भावितानि 'प्रतारिषत्' प्रकर्षेण तीर्णवान् भवति । 'ॐ'-इत्यङ्गीकारार्थः,— अयं युक्तार्थ एव मेवेत्यङ्गीकारार्थः । एतन्मन्त्रसाध्यं प्रत्युत्थान मुपपादयति—"प्रत्युत्थेया वा आपः, प्रति वै श्रेयांस मायन्त मुत्तिष्ठन्ति ; तस्मात्प्रत्युत्थेयाः" इति । याश्च द्विविधा आपः, ताः 'प्रत्युत्थेयाः' एव, दर्शनानन्तर मेव प्रत्युत्थानं कर्त्तव्यम् । लोकेऽपि श्रेयांस मतिप्रशस्त माचार्यपित्रादिकम् 'आयन्त' स्वसम्मुखत्वेन समागच्छन्त' प्रति शिष्यपुत्रादयः उत्तिष्ठन्त्येव * । तस्मादतिप्रशस्ता आपः प्रत्युत्थानयोग्याः ॥

न केवलं प्रत्युत्थानं किन्तु अनुवर्त्तन मपि कर्तव्य मिति विधत्ते—"अनुपर्यावृत्त्याः"-इति । 'अनु' पृष्ठतः 'पर्यावृत्त्याः' परितः सञ्चरणयोग्या द्विविधा आपः । तदेतदुपपादयति—"अनु वै श्रेयांसं पर्यावर्त्तन्ते ; तस्मादनुपर्यावृत्त्या अनुब्रुवतैवानुप्रपत्तव्यम्"-इति । 'श्रेयांसम्' आचार्यादिकम् 'अनु'गम्य शिष्यादयः परितः सञ्चरन्ति । तस्मादत्रापि शिष्यस्थानीयेन होत्रा पूर्वोक्त मपोनप्त्रीयं निगदम् 'अनुब्रुवतैव' तासा मपां पृष्ठतोऽनुगन्तव्यम् । ननु यागकर्त्तृत्वाद्यजमानस्यैवानुव्रजनं युक्तम्, न तु होतुरित्याशङ्क्याह—"ईश्वरो ह यद्यप्यन्यो यजेताथ होतारं यशोऽर्त्तोस्तस्मादनुब्रुवतैवानुप्रपत्तव्यम्"-इति । यद्यपि होता यागकर्त्ता न भवति, अथाप्यनुव्रजनं होतारं 'यशः' कीर्तिः 'अर्त्तोः' ईश्वरो

---

* म० सं० २अ० ११९, १२० श्लो० ।

ब' प्राप्तुं समर्थैव। तस्मात्कीर्त्तिहेतुत्वादनुब्रुवतैव होत्रा तासा मपा मनुगमनं कर्त्तव्यम् ॥

ननु प्र देवत्रेत्यादीना मृचां (२६२ पृ०), तास्वध्वर्यवित्यादिनिगदस्य (२७४ पृ०) च, पूर्व मेवानूक्तत्वात् इतः पर मनुगमनकाले किं मनुवक्तव्य मित्याशङ्क्य अनुवक्तव्या मवशिष्टा मृचं विधत्ते— "अम्बयो यन्त्यध्वभिरिति (सं० १. २३. १६.), एतामनुब्रुवन्ननुप्रपद्येत"--इति। अस्या ऋचो द्वितीयतृतीयपादावनुवदति—"जामयो अध्वरीयतां पृञ्चतीर्मधुना पय इति"--इति। तस्याय मर्थः—'अम्ब'-इत्यव्ययं मातृवाचकः; तद्रूपत्वं यान्तीत्यम्बयाः। छान्दसो ह्रस्वः। मातृसमाना एता द्विविधा आपः। 'अध्वभिः' नानाविधैर्मार्गैः 'यन्ति' गच्छन्ति। कीदृश्यः? 'अध्वरीयताम्' अध्वरं यज्ञ मात्मन इच्छतां यजमानानां 'जामयः' सनाभयो भ्रातृस्थानीया इत्यर्थः। तथा स्वकीयं 'पयः' उदकं 'मधुना' मधुरेण सोमरसेन 'पृञ्चतीः' संयोजयन्त्यः। अस्या मृचि मधुशब्दतात्पर्यं दर्शयति—"यो ऽमधव्यो यशोर्त्तौ बुभूषेद्"--इति। 'यः' पुमान्, पूर्वम् 'अमधव्यः' मधुररसं सोमं नार्हति, स यदि 'यशोर्त्ताः' सोमयागनिमित्तां कीर्त्तिं प्राप्तुं समर्थो भवितु मिच्छेत्, सः पुमान् पूर्वोक्ता मनुब्रुवन् अनुप्रपद्येतेत्यन्वयः ॥

ऋगन्तरं फलविशेषाय विधत्ते—"अमूर्या उप सूर्ये याभिर्वा सूर्यः सहेति तेजस्कामो ब्रह्मवर्चसकामः"-इति। शरीरकान्तिं श्रुताध्ययनसम्पत्तिं च कामयमानः पुमान् "अमूर्याः"-इति (सं० १. २३. १७.), एता मृच मनुब्रूयात्। फलान्तरार्थं मृगन्तरं विधत्ते—"अपो देवीरुपह्वये यत्र गावः पिबन्ति न इति पशुकामः"--इति। पशुप्राप्त्यर्थम् "अपो देवीः"-इति (सं०

१.२३.१८.), एता मृच मनुब्रूयात् । 'अम्बयो यन्ति'-'अमूर्याः'-'आपो देवीः'-इत्येतासां तिसृणां विधि मुपसंहरति— "ता एताः सर्वा एवानुब्रुवन्ननुप्रपद्येतैतेषां कामाना मवरुध्यै"-इति। अथवा, नित्यानुष्ठानार्थोऽयं पुनर्विधिः; एतेषा मित्यादिस्तत्प्रशंसार्थः । वेदनं प्रशंसति—"एतान् कामानवरुन्धे य एवं वेद" इति ॥

ऋगन्तरस्य कालं विधत्ते —"एमा अग्मन्नित्योजविधन्या इति साद्यमानास्वन्वाह वसतीवरीष्वेकधनासु च"-इति । उक्ता द्विविधा आपो यदा वेद्यां साद्यन्ते, तदानीम् "एमा अग्मन्"-इति (सं० १०. ३०. १४.), एता मनुब्रूयात् ।

ऋगन्तरेण समाप्तिं विधत्ते —"आग्मन्नाप उशतीर्बर्हिरेद मिति सन्नासु स एतया परिदधाति" इति । द्विविधास्वप्सु वेद्यां स्थापितासु "आग्मन्नापः"- इति (१०.३०.१५.), एता मृच मनुब्रूयात्, 'सः' अनुवक्ता होता 'एतया' ऋचा 'अनुवचनं' समापयेत् ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां अष्टमाध्याये
द्वितीयः खण्डः ॥ २ (२०) ॥

॥ अथ तृतीयः खण्डः ॥

शिरो वा एतद्यज्ञस्य यत्प्रातरनुवाक॑ः प्राणापाना उपांश्वन्तर्यामौ॑ वज्र एव वाङ्नाहुतयो॑रुपांश्वन्तर्यामयो॑र्होता वाचं विसृजेत॑ यद्हुतयोरुपांश्वन्तर्यामयो॑र्होता वाचं विसृजेत॑ वाचा वज्रेण यजमानस्य प्राणान्वीयाद्य॑ एनं तत्र ब्रूयाद्वाचा वज्रेण यजमानस्य प्राणान् व्यगात्प्रा॑ण एनं हास्यतीति शश्वत्तथा स्या॑त्तस्माद्धुतयोरुपांश्वन्तर्यामयो॑र्होता वाचं विसृजेत॑ प्राणं यच्छ स्वाहा॑ त्वा सुहव सूर्यायेत्युपांशु मनुमन्त्रयेत॑ त मभिप्राण्यात्प्राण प्राणं मे यच्छेत्य॑पानं यच्छ स्वाहा॑ त्वा सुहव सूर्यायेत्यन्तर्याम मनुमन्त्रयेत॑ त मभ्यपान्यादपानापानं मे यच्छेति॑ व्यानाय त्वेत्युपांशुसवनं॑ ग्रावाण मभिमृश्य वाचं विसृजत॑ आत्मा वा उपांशुसवन॑ आत्मन्येव तद्धोता॑ प्राणान् प्रतिधाय वाचं विसृजते॑ सर्वायुः सर्वायुत्वाय॑ सर्व मायुरेति य एवं वेद॑ ॥ ३ (२१) ॥

पूर्वस्मिन् खण्डे द्विविधास्वप्सु वेद्यां सादितास्वपोनप्त्रीयानुवचनस्य समापन मुक्तम् । तत्र सादनप्रकार आपस्तम्बेन दर्शितः —"अपरया द्वारा हविर्द्धान मपः प्रपादयति ; पूर्वया गतश्रियः ।

पूर्वया यजमानः प्रपद्यते। दक्षिणस्य हविर्धानस्य प्रधुरि प्रचरणीꣳ सादयति। यं कामयेत पशुकः स्यादिति, तं प्रचरण्योपस्पृशेत्। एतस्यैव हविर्धानस्याधस्तात् पुरोऽक्षं मैत्रावरुणचमसम्, उत्तरस्यां वर्त्तन्यां पुरस्ताꣳ होतृचमसम्, उत्तरस्य हविर्धानस्याधस्तात् पुरोऽक्षं वसतीवरीः, पश्चादक्ष मेकधनाः। एतद्वा विपरीतम्। अतो * यजमानोऽनुप्रपद्यते"-इति (श्रौ० १२. ६. ९—१३. ४.)। एवं सादितास्वप्सु, अपोनप्त्रीया ऋचः समाप्य होता अवतिष्ठते। ततोऽध्वर्युः दधिग्रहेण †, उपांशुग्रहेण, अदाभ्यग्रहेण, उपांशुग्रहेण, अन्तर्यामग्रहेण क्रमात्प्रचरति ‡। तावदयं होता वाचं नियम्यैवास्ते॥

तदिदं विधत्ते—"शिरो वा एतद्यज्ञस्य यत्प्रातरनुवाकः, प्राणापाना उपांश्वन्तर्यामौ, वज्र एव वाङ् नाहुतयोरुपांश्वन्तर्यामयोर्होता वाचं विसृजेत"-इति। योऽयं प्रातरनुवाकः पूर्वमुक्तः, सोऽयं यज्ञस्य शिरःस्थानीयः। उपांश्वन्तर्यामग्रहौ प्राणापानस्थानीयौ; "एष ते योनिः प्राणाय त्वा", "एष ते योनिरपानाय त्वा"-इति तदीयमन्त्रयोः श्रवणात् (तै० सं० १.४.२,३.)। होतुर्या वाक्, सा वज्रस्थानीया। अतएवान्यत्र श्रूयते—"यद्वै होताध्वर्यु मित्याह्वयते, वज्र मेव मभि प्रवर्त्तयति"-इति। एवं सत्यध्वर्युणोपांश्वन्तर्यामग्रहयोर्हुतयोः सतोः पश्चाद्धोता वाचं विसृजेत; तावत्पर्यन्तं वाचं नियच्छेत्॥

विपक्षबाधपूर्वकं स्वपक्ष मुपसंहरति—"यदहुतयोरुपांश्वन्तर्या-

---

* 'अपो' ए० सो० सु० आप० श्रौ०।

† 'दधिग्रहो नित्यः काम्यश्च। काम्याविितरौ (आज्यग्रहसोमग्रहौ)' आप० १२.७.८।

‡ 'ग्रहकाण्ड' तद्ब्राह्मणं (तै० सं० १.४.१—३२, ६.४,५) चैतत् सर्व मेव द्रष्टव्यम्।

तयोर्होता वाचं विसृजेत, प्राणा वज्रेण यजमानस्य प्राणान्वीयात्; य एनं तत्र ब्रूयाद्वाचा वज्रेण यजमानस्य प्राणान् व्यगात्प्राण एनं हास्यतीति; शश्वत्तथा स्यात्तस्मादहुतयोरुपांश्वन्तर्यामयोर्होता वाचं विसृजेत"-इति। उपांश्वन्तर्यामहोमात्पूर्वं वाचं विसृजन् होता वाग्वज्रेण यजमानस्य प्राणान् 'वीयात्' विगतान् कुर्यात्। कथं प्राणविगमः? इति, तदुच्यते— 'तत्र' तस्मिन् होतुर्वाग्विसर्गे सति, यः कश्चिदागत्यायं होता वाग्वज्रेण यजमानस्य प्राणान् 'व्यगात्' विगतानकरोत्, तस्मात्प्राणः 'एनं' यजमानं 'हास्यति' परित्यक्ष्यति 'इति' एवं होतारं प्रति ब्रूयात्; तदानीं तेन पुरुषेण होतरि शप्ते सति, तदीयशापेन 'शश्वत्तथा स्यात्' अवश्यं यजमानप्राणविगमो होतुस्तद्वधप्रत्यवायश्च भवेत्। तस्मादहुतयोरुपांश्वन्तर्यामयोर्होता वाचं विसृजेत ॥

उपांश्वन्तर्यामहोमादूर्ध्वं वाग्विसर्गप्रकारं विधत्ते—"प्राणं यच्छ स्वाहा त्वा सुहव सूर्यायेत्युपांशु मनुमन्त्रयेत, त मभिप्राण्य प्राणं मे यच्छेत्यपानं यच्छ स्वाहा त्वा सुहव सूर्यायेत्यन्तर्याम मनुमन्त्रयेत, त मभ्यपान्यापानं मे यच्छेति; व्यानाय त्वेत्युपांशुसवनं ग्रावाण मभिमृश्य वाचं विसृजते"-इति। शोभनो हवो होमो यस्येत्युपांशुग्रहस्य सोऽयं 'सुहवः'। 'हे सुहव!' 'सूर्याय' तदभिमानिसूर्यदेवताप्रीत्यर्थं 'त्वा' उपांशुग्रहरूपं 'स्वाहा' सुष्ठु हुतं करोमि। अतो यजमानसम्बन्धिनं प्राणं 'यच्छ' देहि। 'इति' अनेन मन्त्रेण उपांशुग्रहस्यानुमन्त्रणं कुर्यादिति। अन्वीक्ष्य मन्त्रण मनुमन्त्रणम्। ततः 'त मभिप्राणेत्'। 'तम्' उपांशुग्रह मभिलक्ष्योच्छ्वासं कुर्यात्। तत्र प्राणेत्यादिको मन्त्रः। हे प्राणरूप, उपांशुग्रह! 'मे' मह्यं प्राणं 'यच्छ' देहि। हे 'सुहव!'

अन्तर्यामग्रहे स्वेतावान् विशेषः, अन्यत् पूर्ववत्— 'अपानेत्' निश्वासं कुर्यात् । उपांशुग्रहार्थं सोमाभिषवहेतुर्यः पाषाणः, तं व्यानायत्वेति मन्त्रेणाभिमृशेत् । हे 'पाषाण' उपांशुसवनाख्य ! त्वां प्राणापानयोर्मध्यवर्त्ति-व्यानवायुसिद्ध्यर्थम्, अभिमृशामीति शेषः । अभिमर्शनादूर्ध्वं मौनं परित्यज्य वाग्व्यवहारं कुर्यात् ॥

उपांशुसवन मभिमर्शन मुपपादयति—"आत्मा वा उपांशुसवन आत्मन्येव तद्धोता प्राणान् प्रतिधाय वाचं विसृजते सर्वायुः सर्वायुत्वाय"-इति । योऽयम् 'उपांशुसवनः' ग्रावा, सोऽयम् 'आत्मा वै' शरीर मेतत् । तदीयाभिमर्शनेनायं होता शरीरे एव प्राणान् अवस्थाप्य स्वयं शतसंवत्सरपरिमितेन सर्वेणायुषा युक्तो वाचं विसृजते । तच्च यजमानस्य सम्पूर्णायुःप्राप्तये भवति । वेदनं प्रशंसति—"सर्व मायुरेति य एवं वेद"-इति ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां तृतीयाध्याये
तृतीयः खण्डः ॥ ३ (२१) ॥

॥ अथ चतुर्थः खण्डः ॥

तदाहुः सर्पे३त्॑ न सर्पे३त् इति॑ सर्पेदिति हैक आहुरुभयेषां वा एष देवमनुष्याणां॑ भक्षो यद्बहि-

ष्पवमानस्तस्मादेन मभिसङ्गच्छन्त इति वदन्तस्तत्तन्नादृत्यं यत्सर्पेद्दच मेव तत्साम्नो ऽनुवर्त्मानं कुर्याद्य एनं तत्र ब्रूयादनुवर्त्मान्वा अयं होता सामगस्याभूदुद्गातरि यशो ऽधादच्योष्टायतनाच्च्योष्यत आयतनादिति शश्वत्तथा स्यात् तस्मात्तत्रैवासीनो ऽनुमन्त्रयेत यो देवाना मिह सोमपीथो यज्ञे वर्हिषि वेद्यां तस्यापि भक्षयामसीत्येव मु हास्यात्मा सोमपीथादनन्तरितो भवत्यथो ब्रूयान्मुख मसि मुखं भूयास मिति मुखं वा एतद्यज्ञस्य यद्बहिष्पवमानो मुखं स्वेषु भवति श्रेष्ठः स्वानां भवति य एवं वेदासुरी वै दीर्घजिह्वी देवानां प्रातःसवन मवालेट् तद् व्यमाद्यत्ते देवाः प्राजिज्ञासन्त ते मित्रावरुणाव ब्रुवन् युव मिदं निष्कुरुत मिति तौ तथेत्यब्रूतां तौ वै वो वरं वृणावहा इति वृणाथा मिति तावेत मेव वर मवृणातां प्रातःसवने पयस्यां सैनयोरेषा च्युता वरवृता ह्येनयोस्तद्यदस्यै विमत्त मिव तदस्यै समृद्धं विमत्त मिव हि तौ तया निरकुरुताम् ॥ ४ (२२) ॥

अन्तर्यामग्रहहोमादूर्ध्वं महाभिषवं कृत्वैन्द्रवायव मारभ्य पवमत्यन्तग्रहार्थं तत्तत्पात्रेषु सोमं गृहीत्वाऽऽसादितेषु वैप्रुषान् होमान्

हुत्वा बहिष्पवमानार्थं* प्रसर्पयेयुः। प्रसर्पणप्रकार मापस्तम्ब आह—"सप्तहोतारं मनसानुद्रुत्याहवनीये सग्रहं हुत्वोदञ्चः प्राञ्चो बहिष्पवमानाय पञ्चर्त्विजः समन्वारब्धाः सर्पन्ति। अध्वर्युं प्रस्तोतान्वारभते, प्रस्तोतारं प्रतिहर्ता, प्रतिहर्तार मुद्गातोद्गातारं ब्रह्मा, ब्रह्माणं यजमानः"-इति (श्रौ० १२.१६.१७,१७.१.)। आश्वलायनोऽप्याह—"अध्वर्युमुखाः समन्वारब्धाः सर्पन्त्यातीर्थदेशात्† स्तोत्रायोपविशन्त्युद्गातार मभिमुखास्तान् होतानुमन्त्रयतेऽत्रैवासीनो यो देवाना मिह"-इति (श्रौ० ८. १३. २२.)। ततो होतुः सर्पणं निवारयितुं पूर्वपक्ष मुपन्यस्यति—"तदाहुः, —सर्पे३त्, न सर्पे३त् ? इति ; सर्पेदिति हैक आहुरुभयेषां वा एष देवमनुष्याणां भक्षो यद्बहिष्पवमानस्तस्मादेन मभिसङ्गच्छन्त इति वदन्तः"-इति। 'तत्' तत्र, ऐन्द्रवायवादिग्रहणादूर्ध्वकाले अध्वर्युप्रमुखाणां सर्पणे केचित् 'आहुः' विचारयन्ति। कि मयं होता तैः सह सर्पेत् न वेति। विचारार्थे प्लुतिः‡। अयं होतापि सर्पेदिति केचित्पूर्वपक्षिण आहुः। तत्रोपपत्तिं च कथयन्ति—उद्गातृभिर्गेयम् "उपास्मै गायता नरः"-इत्यादिकं

---

* "सामगाना मुत्तरा-ग्रन्थे तृचात्मकानि सूक्तान्याम्नातानि। तत्र 'उपास्मै गायता नरः' -इत्याद्यं सूक्तम्, 'दविद्युतत्या रुचा'-इति द्वितीयम्, 'पवमानस्य ते कवे'-इति तृतीयम्। ज्योतिष्टोमस्य प्रातःसवनानुष्ठाने तेषु त्रिषु सूक्तेषु गायत्रं साम गातव्यम्। तदिदं सूक्तत्रयगानसाध्यं स्तोत्रं बहिष्पवमान मित्युच्यते ; तत्रावस्थिताना मृचां पवमानार्थत्वाद्बहिः सम्बन्धाच्च। न खल्विदं स्तोत्रम् इतरस्तोत्रवत् सदोनामकस्य मण्डपस्य मध्ये औदुम्बर्याः शाखायाः सन्निधौ प्रयुज्यते, किन्तु सदसो बहिःप्रसर्पद्भिः प्रयुज्यते"-इति सामसंहिताभाष्योपक्रमे सायणः।

† 'तेनान्तरेण प्रतिपद्यन्ते चात्वालं चोत्करं चैतद्वै देवानां तीर्थम्'-षड्विं०ब्रा० १.१।

‡ पा० ८. २. १०७. वा० १।

स्तोत्रं (सा० उ० आ० १.१.१-९.) बहिष्पवमानशब्देनोच्यते । यो बहिष्पवमानः, एष एव देवानां मनुष्याणां च उभयेषां 'भक्षः'; तेन हि सर्वे तृप्यन्ति । अत एव सर्वत्र स्तोमभागानां स्तोत्रेषु प्रीतिः श्रुता (३५५ पृ०) । 'तस्मात्' कारणात् 'एनं' बहिष्पवमानं देवमनुष्याः सर्वे अभिसङ्गच्छन्ते 'इति' एतामुपपत्तिं 'वदन्तः' पूर्वपक्षिणो यदाहुः, तन्निराकरोति—"तत्तन्नादृत्यम्"-इति । तस्मिन् सर्पणे 'तत्' पूर्वपक्षिमतं नादरणीयम् ।

विपक्षे बाधं दर्शयति—"यत्सर्पेदृच मेव तत्साम्नो ऽनुवर्त्मानं कुर्यात्स एनं तत्र ब्रूयादनुवर्त्मान्वा अयं होता सामगस्याभूदुद्गातरि यशो ऽधादच्योष्टायतनाच्च्योष्यत आयतनादिति शश्वत्तथा स्यात्"-इति । यद्ययं होता तैः सह सर्पेत्, तदानीं* स्वकीयां ऋच मेव साम्नः 'अनुवर्त्मानं' पृष्ठगामिनीं कुर्यात् । तच्चायुक्तम्; ऋच आधारत्वात्, साम्न आधेयत्वात् । अत एव छन्दोगा आमनन्ति —"तदेतस्यामृच्यध्यूढं साम ; तस्मादृच्यध्यूढं साम गीयते"-इति (छा०उप०१.६.१.) । ततः पुरोगामिन्या ऋचः पश्चाद्गामित्व मयुक्तम् । 'तत्र' होतुः सर्पणे 'यः' कश्चिदागत्य 'एनं' होतारं ब्रूयात् । अयं होता 'सामगस्य' उद्गातुः 'अनुवर्त्मान्वै' पृष्ठगाम्येवाभूत् । अतो होता, स्वकीयां 'यशः' कीर्त्तिमुद्गातरि 'अधात्' स्थापितवान्; स्वयम्-'आयतनात्' स्वकीयपदात् 'अच्योष्ट' च्युतवान्, इतः पर मपि 'च्योष्यते' स्वकीयस्थानात् प्रच्युतो भविष्यति । 'इति' एवं पुरुषान्तरेण शप्तस्य होतुरवश्यं तथा भवेत् ॥

सर्पणं निवार्यानुमन्त्रणं विधत्ते—"तस्मात्तत्रैवासीनो ऽनुमन्त्रयेत"-इति । यस्मात्सर्पणे दोषाः सन्ति, तस्माद्यत्र पूर्वम्

---

* 'तदीयां' ख, ग ।

प्रवर्तित:, तत्रैवासीन इतरेषां सर्पणं अन्वीक्ष्यानुमन्त्रयेत ॥ तस्मिन्ननुमन्त्रणे मन्त्रं दर्शयति—"यो देवाना मिह सोमपीथो यज्ञे बर्हिषि वेद्यां तस्यापि भक्षयामसीति"-इति । 'इह' देशे क्रियमाणो 'यः' सोमयागः, तस्मिन् या वेदिः, यच्च तत्रत्यं बर्हिः, तत्र सर्वदेवानां सम्बन्धी 'सोमपीथः' सोमयागरूपो बहिष्पवमानाख्यो यो भक्षोऽस्ति, तस्याप्यंशं वयं भक्षयामः । 'इति' एषोऽनुमन्त्रणमन्त्रः । तं प्रशंसति—"एष मु हास्यात्मा सोमपीथादनन्तरितो भवति"-इति । एव मेवानुमन्त्रणे सति 'अस्य' होतुः 'आत्मा' जीवः सोमपानात् कदाचिदप्यन्तरितो न भवति ॥

मन्त्रान्तरं च विधत्ते—"अथो ब्रूयान्मुख मसि मुखं भूयास मिति"-इति । पूर्वोक्तान्मन्त्रादनन्तरं मुखमित्यादिकमपि मन्त्रं ब्रूयात् । हे बहिष्पवमान ! यज्ञस्य त्वं 'मुख मसि यज्ञमध्ये मुख्योऽसि, अतस्त्वत्प्रसादादह मपि 'मुखं' मुख्यो भूयासम् । एतन्मन्त्रं प्रशंसति— "मुखं वा एतद्यज्ञस्य यद्बहिष्पवमानः"-इति । स्तोत्रेषु सर्वेषु आद्यत्वाद्बहिष्पवमानस्य मुखत्वम्* । वेदनं प्रशंसति —"मुखं स्वेषु भवति श्रेष्ठः स्वानां भवति य एवं वेद"-इति । मुखत्वं लोकव्यवहारप्रवर्त्तकत्वम् । श्रेष्ठत्वं विद्यावित्तादिसम्पत्तिः ॥

अथ सवनीयपुरोडाशेषु येयं मैत्रावरुणी पयस्यास्ति, तत्सद्भाव

---

* उपरायर्थं बहिष्पवमानसूक्तोर्ध्वस्थ ऊर्ध्वं यानि चत्वारि सूक्तान्याम्नातानि, तानीव प्रातःसवने गायत्रसाम्ना गीयमानानि चत्वारि आज्यस्तोत्राण्युच्यन्ते । तत ऊर्ध्वं यानि त्रीणि सूक्तानि, तानीव माध्यन्दिनसवने गायत्रामहीयवरौरवयौधाजयौशनसामभिर्गीयमानानि पञ्च माध्यन्दिनपवमानस्तोत्राणि । तत आम्नातेषु चतुर्षु सूक्तेषु रथन्तर-वामदेव्य-नौधस-कालेय-सामभिः सम्पाद्यानि चत्वारि पृष्ठस्तोत्राणि माध्यन्दिनसवनीयानीव । ततस्तृतीयसवनीयानि गायत्र-संहित-सफ-पौष्कल-श्यावाश्वाङ्गिरस-सामभिर्निष्पाद्यानि आर्भवपवमानस्तोत्राणि षडिति ।

आपस्तम्बेन दर्शितः— "प्राग्वंशे प्रतिप्रस्थाता सवनीयान् निर्वपति। सर्वे यवा भवन्ति लाजार्थान् परिहाप्य। इन्द्राय हरिवते धाना इन्द्राय पूषण्वते करम्भं सरस्वत्यै भारत्यै परिवाप मिन्द्राय पुरोडाशं मित्रावरुणाभ्यां पयस्या मिति"–इति (श्रौ०१२.४.४-६.)। ता मेतां पयस्यां प्रशंसितु माख्यायिका माह— "आसुरी वै दीर्घजिह्वी देवानां प्रातःसवन मवालेट्, तद्, व्यमाद्यत्, ते देवाः प्राजिज्ञासन्त; ते मित्रावरुणावब्रुवन्,—युव मिदं निष्कुरुत मिति; तौ तथेत्यब्रूतां; तौ वै वो वरं वृणावहा इति, वृणाथा मिति; तावेत मेव वर मवृणातां,—प्रातःसवने पयस्यां; सैनयोरेषा च्युता; वरवृता ह्येनयोस्तद्यदस्यै विमत्त मिव तदस्यै समृद्धं; विमत्त मिव हि तौ तया निरकुरुताम्"–इति। दीर्घा जिह्वा यस्याः सा 'दीर्घजिह्वी', असुरजातावुत्पन्नत्वात् 'आसुरी'। तथाच तलवकारा आमनन्ति— "दीर्घजिह्वी वा आसुर्यास"–इति*। सा च देवानां सम्बन्धि प्रातःसवनम् 'अवालेट्' स्वकीयया जिह्वया तस्यावलेहं कृतवती। तत् प्रातःसवनं विषजिह्वालेहनेन 'व्यमाद्यत्' विविधं मत्त मभूत्; सर्वस्यापि सवनप्रयोगस्य विपर्यासो जातः। ते देवास्तत्परिहारोपायं 'प्राजिज्ञासन्त' प्रकर्षेण विचारितवन्तः। विचार्य च तत्परिहारसमर्थौ मित्रावरुणौ अब्रुवन्,—हे मित्रावरुणौ! 'युवं' युवाम् उभौ 'इदं' प्रातःसवनं 'निष्कुरुतम्' निर्गतदोषं† कुरुतम्। तत् तावदङ्गीकृत्य देवेभ्यो वरं याचित्वा प्रातःसवनगतां पयस्या

---

* 'दीर्घजिह्वी वा इदं रक्षो यज्ञहा'—इत्यादि ता० ब्रा० १३.६। 'श्वानं दीर्घजिह्वम्'—इति ऋ० सं० ९.१०१.१। 'दीर्घजिह्वी च च्छन्दसि'—इति (पा० ४. १. ५९.) निपातनादीकारः। महाभारते त्विय मादिपर्वणि दानवीति, वनपर्वणि तु राक्षसीति।

† 'निर्गतविषाददोषं' घ।

भेव स्वकीयवरत्वेन हृतवन्तौ । पयसि भवा आमिक्षा 'पयस्या' । 'सा' एषा वरहृतत्वादेनयोः कदाचिदप्यविच्युता । तत्र प्रातःसवनं यदङ्गम् 'अस्यै' अनया दीर्घजिह्वया विमत्त मिव जात मासीत्, 'तत्' सर्वम् 'अस्यै' अस्मै, अनया पयस्यया समृद्ध मासीत् । यस्माद्‌ विमत्त मिव स्थितं प्रातःसवनं 'तौ' मित्रावरुणौ 'तया' पयस्यया 'निरकुरुतां' निवारितवन्तौ, तस्मात् समृद्धिर्युक्ता ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां तृतीयाध्याये
चतुर्थः खण्डः ॥ ४ (२२) ॥

॥ अथ पञ्चमः खण्डः ॥

देवानां वै सवनानि नाध्रिय॑न्त त एतान् पुरोळाशानपश्यं॑स्ताननुसवनं निरव॑पन्त्सवनानां धृत्यै॑ ततो वै तानि तेषा मध्रिय॑न्त तद्यदनुसवनं॑ पुरोळाशा निरुप्यन्ते॑ सवनाना मेव धृत्यै॑ तथा हि तानि तेषा मध्रियन्त पुरो वा एतान् देवा॑ अक्रत यत्पुरोळाशा॑स्तत्पुरोळाशानां॑ पुरोळाश॑त्वं तदाहुरनुसवनं पुरोळाशान् निर्व॑पेदष्टाकपालं प्रातःसवने॑ एकादशकपालं माध्यन्दिने सवने॑ द्वादशकपालं तृतीयसवने॑ तथा हि सवनानां रूपं॑ तथा

निरुप्यन्ते यदनुसवनं पुरोळाशांस्तस्मात्तानेकादशकपालानेव निर्वपेत् तदाहुर्यतो घृतेनानक्तं स्यात्ततः पुरोळाशस्य प्राश्नीयात्सोमपीथस्य गुप्त्यै घृतेन हि वज्रेणेन्द्रो वृत्र मह‍न्निति तत्तन्नादृत्यं हविर्वा एतद्यदुत्पूतं सोमपीथो वा एष यदुत्पूतं तस्मात्तस्य यत एव कुतश्च प्राश्नीयात्सर्वतो वा एता स्वधा यजमान मुपचरन्ति यदेतानि हवींष्याज्यं धाना: करम्भ: परिवाप: पुरोळाश: पयस्येति सर्वत एवैनं स्वधा उपचरन्ति य एवं वेद ॥ ५ (२३) ॥

अथ सवनीयपुरोडाशान् * विधातु मादौ कथा माह— “देवानां वै सवनानि नाध्रियन्त ; त एतान् पुरोळाशानपश्यंस्ताननुसवनं निरवपन्त्सवनानां धृत्यै, ततो वै तानि तेषा मध्रियन्त” --इति। यानि प्रातःसवन-माध्यन्दिनसवन-तृतीयसवनानि सन्ति, तानि त्रीणि देवाना मर्थे ‘नाध्रियन्त’ नैव धृतानि, देवैरवरोद्धु मशक्यानि आसन्। ‘ते’ देवाः तद्धारणहेतून् पञ्च पुरोडाशान् दृष्ट्वा तान् प्रतिसवनं निरवपन्। तैः पुरोडाशैः तुष्टानि सवनानि देवाना मर्थे धृतान्यासन्॥ आख्यायिकया प्रशस्य पुरोडाशान् विधत्ते— “तद्यदनुसवनं पुरोळाशा निरुप्यन्ते, सवनाना मेव

---

* ‘सवनेषु भवः सवनीयः। वपया प्रातःसवने चरन्ति, पुरोडाशेन माध्यन्दिने, अङ्गैस्तृतीयसवने इतरं यथेष्टम्’—इति आश्व० श्रौ० ५. २. १. ह०।

धृत्यै ; तथा हि तानि तेषा मध्रियन्त"-इति । 'तत्' [illegible] [illegible] यजमानैः प्रतिसवनं पुरोडाशा निरुप्येरन् [illegible] स निर्वापः सवनानां धारणाय भवति । 'तथा' तेनैव हि प्रकारेण 'तानि' सवनानि 'तेषां' देवाना मध्ये ध्रियन्ते ; अतो मनुष्याणा मपि निर्वाप एव धारणोपायः ॥

इदानीं पुरोडाशशब्दं निर्वक्ति—"पुरो वा एतान् देवा अक्रत, यत्पुरोळाशास्तत् पुरोळाशानां पुरोळाशत्वम्"-इति । पुरोडाशाः सन्ति ; एतान् देवाः 'पुरो वै' सोमाहुतिभ्यः पुरस्ताद् देवाः 'अक्रत' कृतवन्तः । तस्मात् पुरोडाशेति नाम सम्पन्नम् 'दा दाने'—इति धातुः*, पुरतो दीयमानं हविरित्यर्थः । यद्यपि धानादिषु हविःषु चतुर्थ एव † पुरोडाशः, तथापि छत्रिन्यायेन धानादीनां सर्वेषां पुरोडाशत्वोपचारः । यद्वा, पुरःशब्द एव व्याख्येयः,—सवनानां धारणार्थं देवा एतानि हवींषि दुर्गमाणि पुराण्यकुर्वतेति । यदि पुरस्ताद् यदि वा पुराणि सर्वथापि पुरोडाशशब्दो निष्पद्यते ॥

अथ पुरोडाशस्वरूपविशेषं निर्द्धारयितुं पूर्वपक्ष माह—"तदाहुरनुसवनं पुरोळाशान् निर्वपेदष्टाकपालं प्रातःसवन एकादशकपालं माध्यन्दिने सवने द्वादशकपालं तृतीयसवने ; तथा हि सवनानां रूपं तथा छन्दसा मिति"-इति । 'तत्' तेषु पुरोडाशेषु पूर्वपक्षिण आहुः ;— प्रतिसवनं निर्वपणीयेषु पुरोडाशेषु क्रमेण

---

* 'पुरो दाशते पुरोडाः'—इति सि० कौ० वै० ३ अ० । पा० ३. २, ७१ ।

† "एतानि हवींषि—आज्यं, धानाः, करम्भः, परिवापः, पुरोळाशः, पयस्येति"—इति (१८८ पृ० ८ पं०) श्रुतेर्यद्यपि पुरोडाशस्य पञ्चमत्वं गम्यते, पर [illegible] "धानाः करम्भः परिवापः पुरोळाशः पयस्यया सोम वै यज्ञो हविष्पंक्तिः"—इत्यादिश्रुतेश्चतुर्थत्व मेव ।

कपालसङ्ख्याष्टत्वादिरूपा द्रष्टव्या। सवनानां रूपस्य तथाविधत्वात्। तच्च छन्दोद्वारेण द्रष्टव्यम्। गायत्री, त्रिष्टुप्, जगती चेति छन्दांसि सवननिष्पादकानि; "गायत्रं प्रातःसवनं०—०त्रैष्टुभं माध्यन्दिनं सवनं०—०जागतं तृतीयसवनम्"-इति श्रुत्यन्तरात् *। तथा सति तत्तच्छन्दोगताक्षरसङ्ख्यानुसारेण कपालसङ्ख्या युक्तेति † पूर्वपक्षः। तं निराकृत्य सिद्धान्तं दर्शयति—"तत्तदादृत्य मैन्द्रा वा एते सर्वे निरुप्यन्ते, यदनुसवनं पुरोळाशास्तस्मात्तानेकादशकपालानेव निर्वपेत्"--इति। पञ्चसु हविःषु धानादिषु मध्ये चतुर्थस्य पुरोडाशस्येन्द्रदेवताकत्वादैन्द्रस्यान्यत्रैकादशकपाल एव प्रायेण विधीयते इति तत्प्रयत्नावगमात् ‡ अत्रापि त्रिष्वपि सवनेष्वैन्द्रान् पुरोडाशानेकादशकपालानेव निर्वपेत्। शाखान्तरेऽपि विधिविलोमदोषेण § पूर्वपक्षं निराकृत्य सिद्धान्तोऽभिहितः—"एकादशकपालानेव प्रातःसवने कुर्यात्, एकादशकपालान् माध्यन्दिने सवने"-इत्यादि (तै०ब्रा०१.५.११.४.)।

---

* "आग्नावैष्णव मष्टाकपालं निर्वपेत् प्रातःसवनस्याकाले सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यदष्टाकपालो भवत्यष्टाक्षरा गायत्री गायत्रं प्रातःसवनं प्रातःसवन मेव तेनाप्नोति। आग्नावैष्णव मेकादशकपालं निर्वपेन्माध्यन्दिनस्य सवनस्याकाले सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यदेकादशकपालो भवत्येकादशाक्षरा त्रिष्टुप् त्रैष्टुभं माध्यन्दिनꣳ सवनं माध्यन्दिन मेव सवनं तेनाप्नोत्याग्नावैष्णवं द्वादशकपालं निर्वपेत्तृतीयसवनस्याकाले सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यद्द्वादशकपालो भवति द्वादशाक्षरा जगती जागतं तृतीयसवनं तृतीयसवन मेव तेनाप्नोति"--इति तै० सं० २. २. ९। भाष्य मेतस्य मन्त्रकाण्डे (तै० सं० १. ८.२२.) द्रष्टव्यम्।

† अतएव श्रुतं तैत्तिरीये— 'तं वसवोऽष्टाकपालेन प्रातःसवने भिषज्यन्, रुद्रा एकादशकपालेन माध्यन्दिने सवने, विश्वेदेवा द्वादशकपालेन तृतीयसवने'—इति ब्रा० १.५.११.२।

‡ 'विधीयते+ +मद्दीमादृष्टं वाक्यसर्गात्तत्प्रयत्नावगमाद्' घ।

§ तथाहि—'स यदष्टाकपालान् प्रातःसवने कुर्यात्, एकादशकपालान् माध्यन्दिने सवने, द्वादशकपालाꣳस्तृतीयसवने, विलोम तद्यज्ञस्य क्रियेत'—इति तै० ब्रा० १. ५. ११. ४।

आपस्तम्बस्तु शाखाभेद मनुसृत्य पक्षद्वय मप्युदाहरति—"अष्टौ पुरोडाशकपालान्येकादश माध्यन्दिने द्वादश तृतीयसवने । सर्वानैन्द्रानेकादशकपालाननुसवन मेके समामनन्ति"-इति (श्रौ० १२, ४, १, २,) ॥

अत्र तत्पुरोडाशशेषभक्षणे कश्चित् पूर्वपक्ष मुपन्यस्यति—तदाहुर्यतो घृतेनानक्तं स्यात्तन्नः पुरोळाशस्य प्राश्नीयात्सोमपीथस्य गुप्त्यै घृतेन हि वज्रेणेन्द्रो वृत्र महन्निति"-इति । तत्सोमपानस्य रक्षणाय भवति । यस्मादिन्द्रो घृत मेव वज्रं कृत्वा तेन वृत्रं हतवान्, तस्मात् तस्य क्रूरत्वात् घृतरहितं सकलं भक्ष्यमिति पूर्वपक्षिण आहुः । तं निराकृत्य सिद्धान्तं दर्शयति—"तत्तन्नादृत्यं;-हविर्वा एतद्यदुत्पूतं, सोमपीथो वा एष यदुत्पूतं, तस्मात्तस्य यत एव कुतश्च प्राश्नीयात्; सर्वतो वा एता स्वधा यजमान मुपक्षरन्ति; यदेतानि हवींष्याज्यं धानाः करम्भः परिवापः पुरोळाशः पयस्येति" -इति । घृतरहितभाग एव भक्षणीय इति मतं नादरणीयम् । उत्पवनसंस्काररहितस्य घृतस्य वज्रत्वेऽपि यदुत्पूतं घृतं तद्धविरेव । किञ्च यदुत्पूतं तत्सोमपीथसदृश मेव । तस्मात् 'तस्य' पुरोडाशस्य यतः कुतश्च घृतयुक्ताद् घृतरहिताद्वा यस्मात् कस्मादपि भागात् प्राश्नीयात् । आज्यं धानादीनि यानि हवींषि सन्ति, ता एताः सर्वतः 'स्वधा' अन्नम्, तद्रूपा एव भूत्वा यजमानम् 'उपक्षरन्ति' स्रवन्ति ; तस्मात् सर्वतः प्राशन मुपपन्नम् । वेदनं प्रशंसति—"सर्वत एवैनं स्वधा उपक्षरन्ति य एवं वेद"-इति ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां तृतीयाध्याये
पञ्चमः खण्डः ॥ ५ (२२)

॥ अथ षष्ठः खण्डः ॥

यो वै यज्ञं हविष्पंक्तिं वेद॑ हविष्पंक्तिना यज्ञेन राध्नोति॑ धानाः करम्भ॑ः परिवापः पुरोळाशः पयस्ये॑त्येष वै यज्ञो हविष्पंक्ति॑र्हविष्पंक्तिना यज्ञेन राध्नोति य एवं वेद॑ यो वै यज्ञ मक्षरपंक्तिं वेदा॑क्षरपंक्तिना यज्ञेन राध्नोति॑ सुमत्पद्वग्द इ॑त्येष वै यज्ञो ऽक्षरपंक्ति॑रक्षरपंक्तिना यज्ञेन राध्नोति य एवं वेद॑ यो वै यज्ञं नराशंसपंक्तिं वेद॑ नराशंसपंक्तिना यज्ञेन राध्नोति॑ द्विनाराशंसं प्रातःसवनं॑ द्विनाराशंसं माध्यन्दिनं सवनं॑ सकृन्नाराशंसं तृतीयसवन॑मेष वै यज्ञो नराशंसपंक्ति॑र्नराशंसपंक्तिना यज्ञेन राध्नोति य एवं वेद॑ यो वै यज्ञं सवनपंक्तिं वेद॑ सवनपंक्तिना यज्ञेन राध्नोति॑ पशुमुपवसथे त्रीणि सवनानि॑ पशुमनूबन्ध्य इ॑त्येष वै यज्ञः सवनपंक्ति॑ः सवनपंक्तिना यज्ञेन राध्नोति य एवं वेद॑ हरिवाँ इन्द्रो धाना अत्तु पूषण्वान्॑ करम्भं॑ सरस्वतीवान् भारतीवान्॑ परिवाप इन्द्रस्यापूप इति॑ हविष्पंक्त्या यजत्यृ॑क्सामे वा इन्द्रस्य हरी॑ पशवः पूषान्नं॑ करम्भः॑ सरस्वतीवान् भारतीवानिति॑ वागेव सरस्वती प्राणो भरतः॑ परिवाप इन्द्रस्यापूप इत्यन्न॑मेव परिवाप॑ इन्द्रिय मपूप॑

एतासामेव तद्देवतानां यजमानं सायुज्यं सरूपतां सलोकतां गमयति गच्छति श्रेयसः सायुज्यं गच्छति श्रेष्ठतां य एवं वेद हविरग्ने वीहीत्यनुसवनं पुरोळाशः स्विष्टकृतो यजत्यंचत्वारो वा एतेनाग्नेः प्रियं धामोपागच्छन्त्स परमं लोकमजयदुपाग्नेः प्रियं धाम गच्छति जयति परमं लोकं य एवं वेद यस्यैवं विद्वानेतया हविष्पंक्त्या यजते यजतीति च यजतीति च ॥ ६ (२४) ॥

॥इत्यैतरेयब्राह्मणे द्वितीयपञ्चिकायां तृतीयोऽध्यायः ॥३॥

विहितान् सवनीयपुरोडाशान् धानादिरूपान् प्रशंसति— "यो वै यज्ञं हविष्पंक्तिं वेद हविष्पंक्तिना यज्ञेन राध्नोति ;— धानाः, करम्भः, परिवापः, पुरोळाशः पयस्येत्येष वै यज्ञो हविष्पंक्तिर्हविष्पंक्तिना यज्ञेन राध्नोति य एवं वेद"--इति। हविषां धानादिद्रव्यरूपाणां पंक्तिः समूहो यस्मिन् सोमयागे सोऽयं 'हविष्पंक्तिः'; तादृशं यज्ञं यो वेद, स तथैव तादृशेन यज्ञेन समृद्धो भवति। भृष्टा यवतण्डुला 'धानाः'। तदाहापस्तम्बः -- "कपालानामुपधानकाले प्रथमकपालमन्त्रेण धानार्थं लाजार्थं कपाले अधिश्रित्य तण्डुलानोप्य धानाः करोति। व्रीहीनोप्य लाजान् करोति। पुरोडाशमधिश्रित्यामिक्षावत्पयस्यां करोति। उद्वासनकाले धाना उद्वास्य विभागमन्त्रेण विभज्यार्धा आज्येन संयौति। अर्धाः पिष्टाना मावृता सक्तून् करोति। मन्थं संयुतं करम्भ इत्याचक्षते। लाजान् परिवाप इति। तण्डुलाजेभ्यः

सुम्नान् संहरति"-इति (श्रौ० १२. ४. ८—१४.)। पुरोडाशः प्रसिद्धः; अन्ये धाना-करम्भ-परिवाप-पयस्या-शब्दा आपस्तम्बेन व्याख्याताः। एतैर्हविर्भिर्युक्तो यज्ञो हविष्पंक्तिः। हविष्पंक्तिमित्यादि पुनर्वचन मुपसंहारार्थम्। यद्वा पूर्वं वेदनपूर्वकानुष्ठानप्रशंसा, इह तु वेदनमात्रप्रशंसा द्रष्टव्या। हविषां पञ्चसंख्यानां समूहरूपा या पंक्तिः, सा शाखान्तरेऽप्याम्नाता—"ब्रह्मवादिनो वदन्ति,—नर्चा न यजुषा पंक्तिराप्यते ऽथ किं यज्ञस्य पांक्तत्व मिति? धानाः, करम्भः, परिवापः, पुरोडाशः, पयस्या; तेन पंक्तिराप्यते; तद्यज्ञस्य पांक्तत्वम्"—इति (तै० सं० ६. ५. ११. ४, ५.)। अत्रार्थवादेन धानादीनां पुरोडाशद्रव्याणां विधिरुन्नेतव्यः॥

अनेनैव न्यायेनाक्षराणां पञ्चानां विध्युन्नयनं दर्शयति—"यो वै यज्ञ मक्षरपंक्तिं वेदाक्षरपंक्तिना यज्ञेन राध्नोति;—सुमत्पद्वग्दित्येष वै यज्ञो ऽक्षरपंक्तिरक्षरपंक्तिना यज्ञेन राध्नोति य एवं वेद"-इति। पञ्चसंख्याकाना मक्षराणां समूहोऽक्षरपंक्तिः। 'सु'-इत्येक मक्षरम्, 'मत्'-इति द्वितीय मक्षरम्, 'पद्'-इति तृतीय मक्षरम्, 'वक्'-इति चतुर्थ-मक्षरम्, 'दे'-इति पञ्चम मक्षरम्; तान्येतान्यक्षराणि होढजपादौ प्रयोक्तव्यानि *। तथाच सम्प्रदायविद आहुः—

"एतद्धोढजपाख्यस्य स्यादितोऽक्षरपञ्चकम्।
एकैक मक्षरं चात्र परस्य ब्रह्मणो वपुः॥
'सु' पूजितं, 'मत्' प्रहृष्टं, 'पत्' सर्वव्यापि, तच्च 'वक्'—
सर्वस्य वक्तृ ब्रह्मैव, 'दे' फलानां प्रदातृ तत्॥"-इति।

अन्यत् पूर्ववद् व्याख्येयम्॥

---

* "पराङ्ङुध्वर्यावावहर्त सुमत्पद्वग्दे"-इत्यादि आश्व० श्रौ० ५.९.१।

तथा पञ्चविधनाराशंसस्य [illegible] दर्शयति— "यो वै यज्ञं नराशंसपंक्तिं वेद, नराशंसपंक्तिना यज्ञेन राध्नोति; द्विनाराशंसं प्रातःसवनं, द्विनाराशंसं माध्यन्दिनं सवनं, सकृन्नाराशंसं तृतीयसवनम् एष वै यज्ञो नराशंसपंक्तिर्नराशंसपंक्तिना यज्ञेन राध्नोति य एवं वेद"-इति। भक्षिताप्यायितानामासादितानां चमसानां नराशंसशब्दः संज्ञा। अत उक्तमाचार्येण*—"आप्यायितांश्चमसानासादयन्ति, ते नाराशंसा भवन्ति"-इति। (श्रौ० ५. ६. १०.)। भक्षितेषु चमसेषु पुनः पूरणमाप्यायनम्। तथाविधाश्चमसाः प्रातःसवने द्विः प्रयुज्यन्ते, तथा माध्यन्दिनसवनेऽपि; तृतीयसवने तु सकृदेव; एवं पञ्चसंख्योपेतत्वात् नराशंसानां पंक्तिर्यज्ञे विद्यते॥

तथैव सवनपंक्तिं दर्शयति— "यो वै यज्ञं सवनपंक्तिं वेद, सवनपंक्तिना यज्ञेन राध्नोति; पशुरुपवसथे त्रीणि सवनानि पशुरनूबन्ध्य इत्येष वै यज्ञः सवनपंक्तिः; सवनपंक्तिना यज्ञेन राध्नोति य एवं वेद"-इति। परेद्युर्यक्ष्यमाणस्य यजमानस्य समीपे पूर्वेद्युर्देवतास्तदीयं यज्ञं प्रतीक्षमाणा वसन्ति; तस्मात् 'उप' समीपे वसन्त्यस्मिन्दिवस इति पूर्वदिवसः; उपवसथाख्ये पूर्वदिवसे यः पशुरग्नीषोमीयः, सोऽप्यत्र सवनसमीपवर्तित्वात्सवनत्वेन गण्यते। प्रातःसवनादीनि तु त्रीणि प्रसिद्धान्येव सवनानि। सवनेभ्य ऊर्ध्वमनुष्ठेयोऽनुबन्ध्याख्यः पशुरपि पूर्ववत्सवनत्वेन गण्यते। अतः पञ्चानां सवनानां पंक्त्या समूहेन युक्तो यो यज्ञ एष एव सवनपंक्तिः। एवं हविष्पंक्तिं प्रसङ्गेनाक्षर-

---

* एतत्सूत्रकारेण आश्वलायनेनेति यावत्। तत्र '[illegible]'-इत्यादीनि सूत्राणि द्रष्टव्यानि ५.६.२—१०।

पंक्तिर्नराशंसपंक्तिः सवनपंक्तिरित्येतावदभिहितम् । एतदेवाभिप्रेत्य तत्र तत्र "पांक्तो यज्ञः"—इति श्रूयते * ॥

अथ प्रकृतानां सवनीयपुरोडाशानां क्रमेण याज्यां विधत्ते—

"हरिवाँ इन्द्रो धाना अत्तु, पूषण्वान् करम्भं, सरस्वतीवान् भारतीवान् परिवाप, इन्द्रस्यापूप इति हविष्पंक्त्या यजति"—इति । हरिनामानौ द्वावश्वौ अस्य स्त इति 'हरिवान्' इन्द्रः । सोऽयं धानाः 'अत्तु' भक्षयतु । सेयं प्रथमहविषो याज्या । पोषकत्वात् पशवः पूषञ्छब्देनोच्यन्ते, तत्स्वामी देवः 'पूषण्वान्' । स तु करम्भम्, अत्त्वित्यनुवर्त्तते । सेयं द्वितीयहविषो याज्या । सरस्वती वाक्, सास्यास्तीति देवविशेषः 'सरस्वतीवान्' । स एव 'भारतीवान्';—शरीरभरणाद्भरणः प्राणः, तस्य सम्बन्धिनी देहे ऽवस्थितिर्भारती, तद्युक्तो देवो 'भारतीवान्' । अयं विशेषणद्वयोपेतो देवः 'परिवापः' परिवापाख्यं हविरत्तु । इयं तृतीयस्य हविषो याज्या । इन्द्रस्य 'अपूपः' पुरोडाशः, प्रिय इति शेषः । तथा सतीन्द्रोऽपूपमत्त्वित्यर्थादवगम्यते । सेयं चतुर्थहविषो याज्या । पञ्चमहविःस्वरूपायाः पयस्यायाः शाखान्तरादत्रोपसंहर्तव्या † । एवं 'हविष्पंक्त्या यजति' हविष्पंक्तिविषयां याज्यां पठेदित्यर्थः ॥

प्रथमयाज्यां व्याचष्टे— "ऋक्सामे वा इन्द्रस्य हरी, पशवः पूषा करम्भः सरस्वतीवान् भारतीवानिति ; वागेव सरस्वती, प्राणो

---

* उपरिष्टादिहैव ३.२.९ । शत० ब्रा० १.१.२.१६ । तै० सं० ७.१.१०.४ ।

† तथाहि तैत्तिरीयकम्—"तदश्विनौ धानाभिरभिषिज्यताम्, पूषा करम्भेण, भारती परिवापेण, मित्रावरुणौ पयस्यया"—इति ब्रा० १.५.११.२ । 'धाना भृष्टयवाः, करम्भो यवपिष्टमाज्यसंयुतम्, परिवापो लाजाः, पयस्या आमिक्षा'—इति च तत्र सा० भा० । "पयस्या भवति पयो हि वा एतस्मादपक्रामति"—इति च पयस्यास्वरूपश्रुतिः तै० सं० २.३.१२.१ ।

भरतः, परिवाप इन्द्रस्यापूप इत्यन्न मेव परिवाप इन्द्रिय मपूपः"—इति। ऋग्देवता सामदेवता चेत्युभयदेवतारूपाविन्द्रस्याश्वौ; अतो हरिवानितिमन्त्रोक्तिरित्यर्थः। द्वितीययाज्यां व्याचष्टे—पशव इति। पोषकत्वात्पशूनां पूषत्वम्, स्वादु पोषकत्वात् करम्भस्याशनत्वम्। अतः पशुस्वामिनः करम्भो योग्य इत्यर्थः। तृतीययाज्यां व्याख्यापूर्वं व्याचष्टे— सरस्वतीवानिति। अत्र सरस्वतीवान् भारतीवानिति व्याख्येय मनूद्य वागित्यादिना तद्व्याख्यानं क्रियते। 'वागेव सरस्वती'-इत्येतं लोकप्रसिद्धम्; न त्वत्र किञ्चिदन्य मस्तीत्येवशब्दस्यार्थः। शरीरभरणहेतुत्वात् प्राणो भरतशब्दवाच्यः, तदीयशक्तिर्भारती। तदुभयोपेतं मत्प्रत्ययस्यार्थ इति द्रष्टव्यम्। तृतीययाज्याया उत्तरार्द्धं चतुर्थयाज्यां चानूद्य व्याचष्टे— परिवाप इति। परिवापशब्दवाच्यानां लाजानां मृदुत्वेनात्तुं सुकरत्वादन्नत्वम्। इन्द्रियवृद्धिहेतुत्वादपूपस्येन्द्रियत्वम्। अत्र हरिपूषादिविशेषणरूपदेवताभेदाद्याज्याभेदेऽपि यजनीयविशेषस्य इन्द्रस्य एकत्वादेकयाज्यात्व मभिप्रेत्य हविष्पंक्त्या यजतीत्येकप्रधानविधिरिति द्रष्टव्यम् * ॥

होतुरुक्तयाज्यावेदनं प्रशंसति— "एतासा मेव तद्देवतानां यजमानं सायुज्यं सरूपतां सलोकतां गमयति,— गच्छति श्रेयसः सायुज्यं, गच्छति श्रेष्ठतां य एवं वेद"-इति। य एवं वेदिता होता यजमान मिन्द्रादिदेवतानां 'सायुज्यं' सहवासं, 'सरूपतां' समानशरीरत्वं, 'सलोकताम्' एकलोकावस्थानं च प्रापयति,—स्वयं च

---

* अतएव श्रूयते—'अथ कस्मादेतयाऽऽवया मिन्द्र मेव यजन्तीति एता [illegible] देवता इति ब्रूयात्'"-इति तै० आ० १.४.११.६। 'यस्मादेताः सर्वा देवता एन मिन्द्र मुपजीवन्तीति शेषः, तस्मादिन्द्रमेव धानादिहविःस्वामित्वं युक्तम्'-इति च तत्र सा०भा०।

होता 'श्रेयसः' अतिप्रशस्तस्येन्द्रादेः 'सायुज्यं' सहवासं प्राप्नोति, भागाधिक्येन श्रेष्ठतां च प्राप्नोति ॥

सवनीयपुरोडाशसम्बन्धिनः स्विष्टकृतो याज्यां विधत्ते— "हविरग्ने वीहीत्यनुसवनं पुरोळाशः स्विष्टकृतो यजति"-इति । हे अग्ने ! इद मस्माभिर्दत्तं हविः 'वीहि' भक्षय । एता मेव त्रिष्वपि सवनेषु याज्यां पठेत् ॥ एता मेव प्रशंसति— "अवत्सारो वा एतेनाग्नेः प्रियं धामोपागच्छत्स परमं लोक मजयदुपाग्नेः प्रियं धाम गच्छति जयति परमं लोकं य एवं वेद, यश्चैवं विद्वानेतया यजते हविष्मत्या यजतीति च यजतीति च"-इति । अवत्सारनामकः कश्चिदृषिः हविरित्येतेन मन्त्रेणाग्निदेवतायाः प्रियं स्थानं प्राप्य तत ऊर्द्ध्वं ततोऽप्युत्कृष्टं लोकं जितवान् । अथ सर्वत्र यजुःस्वरूपैव याज्या । तदेतन्मन्त्रवेदनं तत्पूर्वक मनुष्ठानं च प्रशंसति – उपाग्ने रिति । यस्यात्र वेदिनः फलतया हविष्प्राप्तिं स्वार्थं मनुष्ठितो यजमानस्य, परार्थं याज्यां पठतो होतुश्च फलं भवति । उभयविवक्षयात्मनेपदपरस्मैपदप्रयोगः ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां तृतीयाध्याये षष्ठः खण्डः ॥ ६ (२४) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायाः तृतीयोऽध्यायः ॥

॥ अथ चतुर्थाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

देवा वै सोमस्य राज्ञोऽग्रपेये न समपादयन्नहं प्रथमः पिबेयमहं प्रथमः पिबेयमित्येवाकामयन्त ते सम्पादयन्तोऽब्रुवन् हन्ताजिमयाम स यो न उज्जेष्यति स प्रथमः सोमस्य पास्यतीति तथेति त आजिमयुस्तेषामाजिं यतामभिसृष्टानां वायुर्मुखं प्रथमः प्रत्यपद्यताथेन्द्रोऽथ मित्रावरुणावथाश्विनौ सोऽवेदिन्द्रो वायुमुद्वै जयतीति तमनु परापतत्सह नावथोज्जयावेति स नेत्यब्रवीदहमेवोज्जेष्यामीति तृतीयं मेऽथोज्जयावेति नेति हैवाब्रवीदहमेवोज्जेष्यामीति तुरीयं मेऽथोज्जयावेति तथेति तं तुरीयेऽत्यार्जत तत्तुरीयभागिन्द्रोऽभवत् त्रिभाग्वायुस्तौ सहैवेन्द्रवायू उदजयतां सह मित्रावरुणौ सहाश्विनौ त एता मेते यथोज्जितं भक्षा इन्द्रवायोः प्रथमोऽथ मित्रावरुणयोरथाश्विनोः स एष इन्द्रतुरीयो ग्रहो गृह्यते यदैन्द्रवायवस्तदेतदृषिः पश्यन्नभ्यनूवाच नियुत्वाँ इन्द्रसारथिरिति तस्माद्वा-

सङ्गृहीतारो वदन्ते॑ऽमुनैवानूकाशेन॑ यदह इन्द्रः सारथिरिव भूत्वोदजयत्॑ ॥ १ (२५) ॥

अपोनप्त्रीयतच्छेष उपांश्वादिग्रहा अपि ।
सवनीयाः पुरोडाशाः पवमानाय सर्पणम् ॥

इदानीं मैन्द्रवायवादीन् द्विदेवत्यान् ग्रहान् विधातु माख्यायिका माह— "देवा वै सोमस्य राज्ञो अग्रपेये न समपादयन्नहम्प्रथमः पिबेय महम्प्रथमः पिबेय मित्येवाकामयन्त ; ते सम्पादयन्तो ऽब्रुवन्,—हन्ताजि मयाम स यो न उज्जेष्यति, स प्रथमः सोमस्य पास्यतीति ; तथेति ; त आजि मयुस्तेषा माजिं यता मभिसृष्टानां वायुर्मुखम्प्रथमः प्रत्यपद्यताथेन्द्रो ऽथ मित्रावरुणावथाश्विनौ"-इति । पुरा कदाचिद् देवाः सोमस्य 'अग्रपेये' प्रथमपाने निमित्तभूते सति 'न समपादयन्' सम्पादनं सम्पत्तिं न प्राप्ताः, किन्तु अह मेव प्रथमः पिबेय मिति सर्वेऽप्यकामयन्त ; सर्वे समयबन्धपुरःसरम् 'आजिं' धावनावधिं कञ्चिद् वृक्षं पाषाण मन्यद्वा किञ्चिद् 'अयाम' प्राप्नुवाम । स यो यः कश्चिदपि 'नः' अस्माकं मध्ये 'उज्जेष्यति' तस्मिन् धावने उत्कर्षेण जयं प्राप्स्यति, स एक एव प्रथमो भूत्वा 'सोमस्य' सोमं पास्यति । तं देवाः तथेत्यङ्गीकृत्य 'आजिं' धावनमर्यादाम् 'अयुः' प्राप्तवन्तः । आजिं 'यतां' प्राप्नुवतां अभिसृष्टाना मभितः प्रवृत्तानां तेषां मध्ये वायुः प्रथमो भूत्वा 'मुखम्' अवधेः सम्मुखं प्रत्यपद्यत । वायोः पृष्ठतः इन्द्रः, तस्य पृष्ठतो मित्रावरुणौ, तयोः पृष्ठतोऽश्विनौ । एवं क्रमेण सर्वे धावनं प्रारब्धवन्तः । तस्मिन् धावने वायोरिन्द्रस्य च

परस्परं संवादं दर्शयति— "सो ऽवेदिन्द्रो वायु मुद्वै जयतीति; त मनु परापतत्; सह नावथोज्जयावेति; स नेत्यब्रवीदह मेवोज्जेष्यामीति; तृतीयं मे ऽथोज्जयावेति; नेति हैवाब्रवीदह मेवोज्जेष्यामीति; तुरीयं मे ऽथोज्जयावेति; तथेति; तं तुरीये-ऽत्यार्जत; तत्तुरीयभागिन्द्रो ऽभवत् त्रिभाग्वायुः"-इति। अयं वायुरुत्कर्षेण जयत्येवेति स इन्द्रः 'अवेत्' स्वमनसि ज्ञातवान्। ज्ञात्वा च 'तं' वायुम् 'अनु' पृष्ठतः 'परापतत्' सहसैवाधावत्। आगत्य चेद मुक्तवान्—हे वायो! 'नौ' आवयोरुभयोः सह सोमपान मस्तु,— तवार्द्धम्, ममार्द्धम्। अथ तस्मात् कारणात् आवा मुभौ सहैवोत्कर्षेण जयं प्राप्नुवावेति। 'सः' वायुः 'नेति' निराकृत्य अह मेक एवोज्जेष्यामीत्यब्रवीत्। ततः स इन्द्र एव मुवाच,— ममार्द्धं माभूत् किन्तु 'तृतीयं' त्रिषु भागेषु भागो ऽस्तु, तव द्वौ भागौ। अथैवं सति सहैवावा मुज्जयावेति। पुनरपि नेत्येव निराकृत्य स वायुरह मेवोज्जेष्यामीत्यब्रवीत्। ततः स इन्द्रः पुनरप्युवाच,— तृतीयो माभूत् किन्तु मे 'तुरीयं मस्तु' चतुर्थो भागो ऽस्तु, तव त्रयो भागाः। अथैवं मत्वावा मुभावुज्जयावेति। ततो वायुरङ्गीकृत्य 'तम्' इन्द्रं 'तुरीये' चतुर्थभागे 'अत्यार्जत' अतिशयेन स्थापितवान्। तस्मात्कारणादिन्द्रश्चतुर्थांशभागभूत्, वायुरंशत्रयभागवान्॥

अथ विजयक्रमेण सोमपानक्रमं दर्शयति— "तौ सहैवेन्द्रवायू उदजयतां, सह मित्रावरुणौ, सहाश्विनौ; त एते मते यथोज्जितं भक्षाः,—इन्द्रवाय्वोः प्रथमो ऽथ मित्रावरुणयोरथाश्विनोः"- इति। इन्द्रवायू उभौ सहैव 'उदजयतां' यावता मवधिदेशं प्राप्नुतः। तयोः पृष्ठतो मित्रावरुणौ सह प्राप्नुतः। तयोः पृष्ठतो ऽश्विनौ सह

प्राप्तः । 'एवा' इत्यागमो 'यथोज्जितम्' तत्तज्जय मनतिक्रम्य त सूते 'भक्षाः' सोमपानरूपाः अभवन् । इन्द्रवाय्वोः प्रथमं सोमपानम्, ततो मित्रावरुणयोः सोमपानम्, ततोऽश्विनोः सोमपानमित्येवं द्विदेवत्यग्रहाणां क्रमो व्यवस्थितः ॥

इदानीमैन्द्रवायवग्रहं विधत्ते— "स एष इन्द्रतुरीयो ग्रहो गृह्यते यदैन्द्रवायवः"-इति । योऽयमिन्द्रवायुदेवताको ग्रहः, स एष 'इन्द्रतुरीयः' इन्द्रस्य तुरीयभागो यस्मिन् ग्रहे सोऽयमिन्द्रतुरीयः, तादृशं ग्रहं गृह्णीयात् ॥

उक्तभागविशेषं मन्त्रसंवादेन द्रढयति— "तदेतदृषिः पश्यन्नभ्यनूवाच, नियुत्वाँ इन्द्रसारथिरिति"-इति । तदेतच्चतुर्थभागत्वं दिव्यदृष्ट्या पश्यन् कश्चिन्मन्त्रात्मक ऋषिः *, तेन मन्त्रेण 'अभ्यनूवाच' साकल्येन तदुक्तवान् । नियुत्वानित्यादिको मन्त्रः (सं० ४. ४६. २.) । नियुत्वच्छब्दो वायुसम्बन्धिनां मन्त्राणां वाचकः ; "अध वायुं नियुतः सश्चत स्वाः"-इत्यादिमन्त्रेष्वभिधानात् (सं० ७. ९०. ३.) । नियुतो यस्य वायोः सन्ति, सोऽयं 'नियुत्वान्' † । इन्द्रः सारथिर्यस्य वायोः, सोऽयम् 'इन्द्रसारथिः' । अत्र सारथित्वाभिधानादिन्द्रस्य चतुर्थभागप्राप्तिर्दर्शिता ॥

उक्त मर्थं लोकव्यवहारेण द्रढयति— "तस्माद्धाप्येतर्हि भरताः सत्वनां वित्तिं प्रयन्ति ; तुरीये हैव संग्रहीतारो वदन्तेऽमुनैवानुकाशेन,— यदद इन्द्रः सारथिरिव भूत्वोदजयत्"-इति । यस्मात् सारथिरूपस्येन्द्रस्य चतुर्थभागः पूर्वं प्राप्तः, 'तस्मात् धा' अत एव कारणात् 'एतर्ह्यपि' इदानीमपि 'भरताः'

---

* इदं कर्तृकारकयोरैकात्म्यमुपगतं सायणसैत्यालोच्यम् ।

† 'नियुतो वायोः'-इति निघ० १. १५. १० ।

यतः सत्त्राणि तन्वन्ति विस्तारयन्तीति सत्त्रा होतारः । 'सत्त्वानां' प्राणीनां 'चित्तिं' चेतनां जीवितरूपाम् 'प्रयन्ति' प्रकर्षेण सम्पादयन्ति । ते च 'सत्त्रहोतारः' सारथयः 'तुरीये हैव' युष्मत्सम्बन्धस्य द्रव्यस्य चतुर्थभाग एव 'वदन्ते' अस्माक मेतावदुचित मिति कथयन्ति । तदौचित्ये युक्ति माह— 'अमुनैव' पूर्वोक्तेनैव 'अनूकाशेन' दृष्टान्तेन । स एव दृष्टान्तो यदद इत्यादिना स्पष्टीक्रियते । यस्मात् कारणादिन्द्रो वायोः सारथिरिव भूत्वा 'अदः' चतुर्थांशरूपं सोमात्मकं धन मुदजयत्, तस्माल्लोकेऽपि तथैव प्रवृत्त मित्यर्थः ॥१॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां चतुर्थाध्याये
प्रथमः खण्डः ॥ १ (२४) ॥

॥ अथ द्वितीयः खण्डः ॥

ते वा एते प्राणा एव यद् द्विदेवत्या॑ वाक् च प्राणश्चैन्द्र॑वायवश्चक्षुश्च मनश्च मैत्रावरुणः॑ श्रोत्रं चात्मा चा॑श्विनस्तस्य हैतस्यैन्द्रवायवस्याग्नेय्यौ॑ ऽनुष्टुभौ पुरोनुवाक्ये कुर्वन्ति॑ गायत्र्यौ याज्ये॑ वाक् च वा एष प्राणश्च ग्रहो यदैन्द्रवाय॑वस्तदपि छन्दोभ्यां॑ यथायथं कल्प्स्येते * इति॑ तत्तन्नादृत्यं॑ व्यृद्धं वा

---

* 'क्लृप्स्येते' क, ग, ङ ; टी० ख, टी० ग ।

एतद्यज्ञे क्रियते॑ यत्र पुरोनुवाक्या ज्यायसी याज्यायै॑ यत्र वै याज्या ज्यायसी तत्समृद्ध॑ मथो यत्र समे यस्यो तत्का॑माय तथा कुर्या॑त्प्राणस्य च वाचश्चा॑चैव तदुपाप्तं॑ वायव्या पूर्वा॑ पुरोनुवाक्यैन्द्रवायव्युत्तरैवं याज्ययोः॑ सा या वायव्या॑ तया प्राणं कल्पयति॑ वायुर्हि प्राणो ऽथ यैन्द्रवायवी॑ तस्यै यदैन्द्रं॑ पदं॑ तेन वाचं कल्पयति॑ वाग्घ्यैन्द्र्युपो तं॑ काम माप्नोति॑ यः प्राणे च वाचि च॑ न यज्ञे विषमं करोति॑॥ २ (२६)॥

अथैन्द्रवायवमैत्रावरुणाश्विनाख्यान् द्विदेवत्यग्रहान् प्राणरूपत्वेन प्रशंसति— "ते वा एते प्राणा एव यद् द्विदेवत्याः"-इति। तेषां त्रयाणां प्राणरूपत्वं विभज्य दर्शयति— "वाक् च प्राणश्चैन्द्रवायवश्चक्षुश्च मनश्च मैत्रावरुणः श्रोत्रं चात्मा चाश्विनः" इति। उच्छ्वासादिवृत्तिभेदवर्त्ती वायुः प्राणः। वागादीनीन्द्रियाणि; तेषां प्राणरूपत्वाभावेऽपि प्राणाधीनवृत्तिलाभत्वेन पूर्वत्र प्राणा इति निर्देशः कृतः। इम मर्थं वाजसनेयिन आमनन्ति— "त एतस्यैव सर्वे रूप मभवंस्तस्मादेत एतेनाख्यायन्ते प्राणाः"-इति (शत० ब्रा० १४.४.३.३२.*)। तत्र वायुरूपो मुख्यः प्राणो वाक् चेत्येतदुभय मैन्द्रवायवग्रहस्वरूपम्। चक्षुर्मनश्चेतीन्द्रियद्वयं मैत्रावरुणग्रहस्वरूपम्। श्रोत्रं जीवात्मा चेत्युभय माश्विनग्रहस्वरूपम्॥

---

* "पञ्चधा विहितो वा अयं शीर्षन् प्राणा मनो वाक् प्राणश्चक्षुः श्रोत्रम्'-इत्यादि च शत० ब्रा० ९.२.२.५ ; ३.५.२.५ ; ३.१.३.१९–२१ ; ५.२.४.१० ; ११.७.१.७ ; १२.१.७.२।

वक्ष्यमाणयाज्यानुवाक्योपयोगित्वेन प्राणरूपतया प्रशंसितस्यैन्द्रवायवग्रहस्य याज्यानुवाक्ये विधातुं पूर्वपक्षमाह— "तस्य हैतस्यैन्द्रवायवस्याप्येके ऽनुष्टुभौ पुरोनुवाक्ये कुर्वन्ति, गायत्र्यौ याज्ये" -इति। योऽयमैन्द्रवायवग्रहः पूर्वमुक्तः, तस्यैके ह याज्ञिकाः अनुष्टुप्छन्दस्के ऋचौ पुरोनुवाक्ये कृत्वा गायत्रीच्छन्दस्के ऋचौ याज्ये इति कुर्वन्ति। 'अपि' शब्दो वानर्थकः, यदापि कुर्वन्तीत्येवं पूर्वपक्षानुवादार्थो वा। तेषां पूर्वपक्षिणामभिप्रायं दर्शयति— "वाक् च वा एष प्राणश्च ग्रहो यदैन्द्रवायवस्तदपि छन्दोभ्यां यथायथं कल्प्स्येते इति" इति। योऽयमैन्द्रवायवग्रहः, स एष प्राणात्मकः; तत्रेन्द्रो वाचो व्याकरणरूपायाः कर्त्ता, "तामिन्द्रो मध्यतो वाचं व्याकरोत्"-इतिश्रुत्यन्तरात् (तै० सं० ६. ४. ७. ४.*)। अतः इन्द्रद्वारा वाग्रूपत्वम्; "यः प्राणः स वायुः"-इतिश्रुत्यन्तरात् † प्राणरूपत्वम्। तावुभावपि यथोक्ताभ्यामनुष्टुब्गायत्रीच्छन्दोभ्यां 'यथायथं' स्वस्वमनतिक्रम्य 'कल्प्स्येते' कल्पितौ भविष्यतः। "वाग्वा अनुष्टुप्"-इतिश्रुत्यन्तरात् (प० ३. २. ४.) अनुष्टुप्छन्दसो वाग्रूपत्वम्, "प्राणो वा गायत्री"-इतिश्रुत्यन्तराद्गायत्र्याः प्राणरूपत्वम्। अत्र मन्त्रविशेषाः शाखान्तरे द्रष्टव्याः ‡। सोऽयं पूर्वपक्षिणामभिप्रायः।

पूर्वपक्षनिराकरणपूर्वकं सिद्धान्तं दर्शयति— "तत्तन्नादृत्यं; व्यृद्धं वा एतद्यज्ञे क्रियते,—यत्र पुरोनुवाक्या ज्यायसी याज्यायै;

---

* "ता मिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्"-इति संहितापाठः। ६का० ४प्र० ४ अनु०-भाष्ये अस्य व्याख्यानं द्रष्टव्यम्।

† "यो वै प्राणः स वातः + + + अयं वै प्राणो योऽयं पवते"-इति शत० ब्रा० ५.२.४.९।

‡ "आ वायो भूष शुचिपाः"—इत्यादयः तै० सं० १ का० ४ प्र० ४ अनु०।

यत्र वै याज्या ज्यायसी तत्समृद्ध, मथो यत्र समे ; यस्मै तत् कामाय तथा कुर्यात्, प्राणस्य च वाचश्चात्रैव तदुपाप्तम्"-इति । 'तत्' पूर्वपक्षमतं नादरणीयम् । तत्र हेतुरुच्यते,— यस्मिन् कर्म्मणि याज्यायाः सकाशात् पुरोनुवाक्याक्षरैरभ्यधिका, तत्कर्म्म 'व्यृद्धं' समृद्धिरहितम् ; पूर्वपक्षिणस्त्वत्रान्यूनां याज्यां पुरोनुवाक्या मधिकां कुर्वन्ति ; तस्मादेतन्मत मयुक्तम् । 'यत्र वै' यस्मिंस्तु कर्म्मणि पुरोनुवाक्यायाः सकाशात् अभ्यधिका याज्या भवति, 'तत्' कर्म्म समृद्धम् । अपि च यत्र कर्म्मणि याज्यानुवाक्ये समे भवतः, तदपि कर्म्म समृद्धम् । साम्यपक्षेऽन्योऽपि गुणोऽस्ति, तत्कथ मिति तदुच्यते,— 'प्राणस्य च वाचश्च' प्राणवाचोर्मध्ये यस्य यस्य वस्तुनः 'कामाय' अपेक्षितफलसिद्धये 'तत् तथा कुर्यात्' तेन पूर्वोक्तप्रकारेणाष्टुब्गायत्रीजन्य मनुष्ठानं पूर्वपक्षिणः कुर्वन्ति, तत्सर्वं विफलम् । तत्रैव याज्यानुवाक्ययोः साम्यानुष्ठान एव 'उपाप्तं' शीघ्रं प्राप्तं भवति । तस्मात् साम्यपक्ष एवादरणीय इत्यर्थः । साम्यपक्षे पूर्वपक्ष्यभिप्रेतं प्रयोजनं कथं सिध्येदित्याशङ्क्याह— "वायव्या पूर्वा पुरोनुवाक्यैन्द्रवायव्युत्तरैवं याज्ययोः ; सा या वायव्या तया प्राणं कल्पयति, वायुर्हि प्राणो, ऽथ यदैन्द्रवायवी तस्यै यदैन्द्रं पदं, तेन वाचं कल्पयति, वाग्घैन्द्र्युपो तं काम माप्नोति यः प्राणे च वाचि च ; न यज्ञे विषमं करोति"-इति । द्वयोः पुरोनुवाक्ययोर्मध्ये या पूर्वा पुरोनुवाक्या, सा 'वायव्या' वायुदेवताका ; "वायवा याहि दर्शत"-इत्यस्या मृचि (सं० १. २. १.) वायोः श्रवणात् । या तूत्तरा पुरोनुवाक्या, सेयम् 'ऐन्द्रवायवी' ; "इन्द्रवायू इमे सुताः" -इत्यस्या मृचि (सं० १. २. ४.) इन्द्रवाय्वोः श्रवणात् । एवं याज्ययोरपि द्रष्टव्यम् । उभयोर्याज्ययोर्मध्ये या पूर्वा, सा वायव्या ;

"अग्रं पिबा मधूनाम्"–इत्यस्यामृचि (सं० ४. ४६. १.) 'सुतं वायो दिविष्टिषु'–इति वायोः श्रवणात्। योत्तरा याज्या, सैन्द्रवायवी; "प्रतीमा नो अभिष्टिभिः"–इत्यस्यामृचि (सं० ४.४६.२.) 'नियुत्वाँ इन्द्रसारथिः'–इतीन्द्रः श्रूयते, 'वायो सुतस्य'–इति वायुरपि श्रूयते; तस्मादियमैन्द्रवायवी। एवं सति या वायव्या पुरोनुवाक्या याज्या च, तया प्राणकल्पितः स्वव्यापारसमर्थो भवति; "यः प्राणः स वायुः"–इति श्रुत्यन्तरेण वायुप्राणयोरेकत्वस्य पूर्वपक्षिणाप्यङ्गीकर्त्तव्यत्वात्। अथ यैन्द्रवायवी पुरोनुवाक्या, याज्या वा, 'तस्यै' तस्यामुभयविधायां यत् 'ऐन्द्रम्' इन्द्रसम्बन्धि पदं विद्यते, तेन पदेन वाचं 'कल्पयति' समर्थां करोति। 'हि' यस्मात्कारणाद्वागैन्द्री,— इन्द्रस्य व्याकरणकर्तृत्वात् *, तस्माद्वाचा सामर्थ्यं भवति। एव मनुतिष्ठन् पुरुषो वाक्प्राणयोर्यः कामोऽस्ति, तं प्राप्नोति,—यश्च च्छन्दःसाम्यं, विषम मनुष्ठानं न करोति ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां चतुर्थाध्याये
द्वितीयः खण्डः ॥ २ (२६) ॥

---

* पुरासीदैन्द्रं व्याकरणमिति प्रवादोऽपि नैतदनृतम्। यतः 'इन्द्रश्चन्द्रः'–इति वोपदेवीयकविकल्पद्रुमप्रमुखग्रन्थादौ लिखितत्वादिन्द्राचार्यस्य व्याकरणाभिज्ञत्वमात्रं प्रतीयते, न तु व्याकरणप्रणेतृत्वम् (मि० आ० जी.); तथात्वेऽपि नैतरेयब्राह्मणपूर्वतनत्वं तस्य सम्भाव्यते।

॥ अथ तृतीयः खण्डः ॥

प्राणा वै द्विदेवत्या एकपात्रा गृह्यन्ते तस्मात्प्राणा एकनामानो द्विपात्रा हूयन्ते तस्मात्प्राणा द्वन्द्वं येनैवाध्वर्युर्यजुषा प्रयच्छति तेन होता प्रतिगृह्णात्येष वसुः पुरूवसुरिह वसुः पुरूवसुर्मयि वसुः पुरूवसुर्वाक्पा वाचं मे पाहीत्यैन्द्रवायवं भक्षयत्युपहूता वाक् सह प्राणेनोप मां वाक् सह प्राणेन ह्वयतां मुपहूता ऋषयो दैव्यासस्तनूपावानस्तन्वस्तपोजा उप मा मृषयो दैव्यासो ह्वयन्तां तनूपावानस्तन्वस्तपोजा इति प्राणा वा ऋषयो दैव्यासस्तनूपावानस्तन्वस्तपोजास्तानेव तदुपह्वयत एष वसुर्विदद्वसुरिह वसुर्विदद्वसुर्मयि वसुर्विदद्वसुश्चक्षुष्पाश्चक्षुर्मे पाहीति मैत्रावरुणं भक्षयत्युपहूतं चक्षुः सह मनसोप मां चक्षुः सह मनसा ह्वयता मुपहूता ऋषयो दैव्यासस्तनूपावानस्तन्वस्तपोजा उप मा मृषयो दैव्यासो ह्वयन्तां तनूपावानस्तन्वस्तपोजा इति प्राणा वा ऋषयो दैव्यासस्तनूपावानस्तन्वस्तपोजास्तानेव तदुपह्वयत एष वसुः संयद्वसुरिह वसुः संयद्वसुर्मयि वसुः संयद्वसुः श्रोत्रपाः श्रोत्रं मे पाहीत्याश्विनं भक्षयत्युपहूतं श्रोत्रं सहात्मनोप मां

श्रोत्रं सहात्मना ह्वयता मुपहूता ऋषयो दैव्यासस्त-नूपावानस्तन्वस्तपोजा उप मा ऋषयो दैव्यासो ह्वयन्तां तनूपावानस्तन्वस्तपोजा इति प्राणा वा ऋषयो दैव्यासस्तनूपावानस्तन्वस्तपोजास्तानेव तदुप-ह्वयते पुरस्तात्प्रत्यञ्च मैन्द्रवायवं भक्षयति तस्मात्पुर-स्तात्प्राणापानौ पुरस्तात्प्रत्यञ्चं मैत्रावरुणं भक्षयति तस्मात्पुरस्ताच्चक्षुषी सर्वतः परिहार माश्विनं भक्षयति तस्मान्मनुष्याश्च पशवश्च सर्वतो वाचं वदन्तीं शृण्वन्ति ॥ ३ (२७) ॥

अथ द्विदेवत्याना मैन्द्रवायवमैत्रावरुणाश्विनग्रहाणां त्रयाणां ग्रहणहोमयोः पात्रवैषम्यं विधत्ते— "प्राणा वै द्विदेवत्या एकपात्रा गृह्यन्ते, तस्मात्प्राणा एकनामानो द्विपात्रा हूयन्ते ; तस्मात्प्राणा द्वन्द्वम्"-इति । द्वे देवते युग्मरूपे येषां ग्रहाणां ते द्विदेवत्याः । इन्द्रश्च वायुश्चेत्येकं युग्मम्, मित्रश्च वरुणश्चेति द्वितीयं युग्मम् ; यावश्विनौ तौ तृतीयं युग्मम् ; त एते द्विदेवत्यग्रहाः । प्राणा वै इन्द्रियरूपा एव ; "वाग्वा ऐन्द्रवायवश्चक्षुर्मैत्रावरुणः श्रोत्र माश्विनः" -इतिश्रुत्यन्तरात् (४१३ पृ०) । ते च ग्रहा एकपात्रा ग्रहीतव्याः ; —इन्द्रवाय्वोरेकस्मिन् पात्रे ग्रहणम्, मित्रावरुणयोरेकस्मिन्निति । यस्मात्प्राणरूपाणां ग्रहाणा मेकपात्रत्वं तस्माद्वाक्-चक्षुः-श्रोत्ररूपाः प्राणाः 'एकनामानः' प्राणा इत्येव मेतेषां नाम । ते च ग्रहा होमकाले द्विपात्रा होतव्याः । तत्तद्ग्रहणपात्रेणाध्वर्युर्जुहोति,—प्रतिप्रस्थाता पात्रान्तरेण जुहोतीति । यस्माद्धोमकाले पात्रद्वयं,

[illegible]चक्षुरादय: प्राणा: [illegible]गोलकेषु 'इत्थं' द्वौ द्वौ भूत्वा वर्तन्ते। अयमर्थ: श्रुत्यन्तरे प्रश्नोत्तराभ्यामाम्नात: — "ब्रह्मवादिनो वदन्ति,— कस्मात्सत्यादेकपात्रा द्विदेवत्या गृह्यन्ते, द्विपात्रा हूयन्त इति ? यदेकपात्रा गृह्यन्ते, तस्मादेकोन्तरत: प्राणो ;— द्विपात्रा हूयन्ते, तस्माद् द्वौद्वौ बहिष्टात् प्राणा:"-इति (तै० सं० ६. ४. ८. ३.)। होमकाले द्विपात्रत्वमापस्तम्बेन स्पष्टीकृतम्— "हविर्धानप्रक्रम्यसम्प्रेष्यति वायव इन्द्रवायुभ्यामनुब्रूहीत्युपयामगृहीतोऽसि वाक्षसदसीत्यादित्यपात्रेण प्रतिप्रस्थाता द्रोणकलशादैन्द्रवायवस्य प्रतिनिग्राह्यं गृहीत्वा न सादयत्यैन्द्रवायवमादायाध्वर्युर्द्रोणकलशाच्च परिप्लवया राजान मुभौ निष्क्रम्य दक्षिणतोऽवस्थाय दक्षिणं परिधिसन्धि मन्ववहृत्याध्वरो यज्ञोऽय मस्तु देवा इति परिप्लवयाऽऽघार माघारयति०—०आश्राव्यप्रत्याश्राविते सम्प्रेष्यति वायव इन्द्रवायुभ्यां प्रेष्येति वषट्कृते जुहोति। एव मुत्तराभ्यां ग्रहाभ्यां प्रचरत:"-इति (श्रौ० १२.२०.१८-२४. *)॥

अथ होतुर्ग्रहशेषभक्षप्रतिग्रहमन्त्रं विधत्ते— "येनैवाध्वर्युर्यजुषा प्रयच्छति, तेन होता प्रतिगृह्णाति"-इति। अध्वर्यो: प्रदानमन्त्र: आपस्तम्बेन दर्शित:—"ग्रह मध्वर्युरादाय क्षिप्रꣳ होतार मभिद्रुत्य मयि वसु: पुरूवसुरिति ग्रहꣳ होत्रे प्रयच्छति। एतेनैव होता प्रतिगृह्य दक्षिण ऊरावासाद्य हस्ताभ्यां निगृह्यास्ते"-इति (श्रौ०१२.२१.५,६.)॥ अथ होतु: समन्त्रकं भक्षणं विधत्ते— "एष वसु: पुरूवसुरिह वसु: पुरूवसुर्मयि वसु: पुरूवसुर्वाक्पा वाचं मे पाहीत्यैन्द्रवायवं भक्षयति"-इति। 'एष:' ऐन्द्रवायवग्रहो 'वसु:' निवासहेतु: 'पुरूवसु:' प्रभूतनिवासहेतु:। कस्मिन् लोके निवास-

---

* "जुहोति। पुनर्वषट्कृते जुहुत:"—इत्ययं पाठो मौलिक:।

वसतीत्याकाङ्क्षानिवृत्त्यर्थम् 'इह वसुः'-इत्यादिकं श्रूयते, — यद्ययं मनुष्यलोके निवासं करोति, तथापि प्रभूतनिवासं करोति । कस्मिन् पुरुषे यज्ञस्य निवास इत्याकाङ्क्षानिवृत्त्यर्थम् 'मयि वसुः'-इत्यादिकं श्रूयते । मयि होतरि निवसति, तदापि प्रभूतनिवासं करोति । स तादृशो यज्ञो 'वाक्पाः' वाचं पालयति । हे यज्ञ ! मे वाचं पालय । 'इति' अनेन मन्त्रेणेन्द्रवायवशेषं भक्षयेत् । तस्य मन्त्रस्यावशिष्टभागं पठति— "उपहूता वाक् सह प्राणेनोप मां वाक् सह प्राणेन ह्वयता मुपहूता ऋषयो दैव्यासस्तनूपावानस्तन्वस्तपोजा उप मा ऋषयो दैव्यासो ह्वयन्तां, तनूपावानस्तन्वस्तपोजा इति"-इति । प्राणेन सह वाग् देवता मया 'उपहूता' अनुज्ञाता, तस्मात् प्राणसहिता सा वाग्देवता माम् 'उपह्वयताम्' अनुजानातु । तथा ऋषयः 'उपहूताः' मयानुज्ञाताः । कीदृशा ऋषयः ? 'दैव्यासः' देवेषु भवाः । 'तनूपावानः' अस्मच्छरीरपालकाः ; 'तन्वः' शरीरस्यास्मदीयस्य सम्बन्धिन इति शेषः । 'तपोजाः' पूर्वजन्मानुष्ठितात् तपसो जाताः । यस्मादीदृशा ऋषयो मयानुज्ञाताः, तस्मात् तेऽपि यथोक्तविशेषणाः माम् 'उपह्वयन्ताम्' अनुजानन्तु । 'इति' एष मन्त्रशेषः । अस्य शेषस्य तात्पर्यं दर्शयति— "प्राणा वा ऋषयो दैव्यासस्तनूपावानस्तन्वस्तपोजास्तानेव तदुपह्वयते"-इति । यथोक्तविशेषणविशिष्टा ऋषयः प्राणस्वरूपा एव, तस्मात् तेन मन्त्रशेषपाठेन 'तानेव' प्राणाननुजानाति ॥

मैत्रावरुणग्रहस्य समन्त्रकं शेषभक्षणं मन्त्रशेषव्याख्यानं च दर्शयति — "एष वसुर्विदद्वसुरिह वसुर्विदद्वसुर्मयि वसुर्विदद्वसुश्चक्षुष्पाश्चक्षुर्मे पाहीति मैत्रावरुणं भक्षयत्युपहूतं चक्षुः सह मन-

सोप मां चक्षुः सह मनसा ह्वयता मुपहूता ऋषयो दैव्यासस्तनूपावानस्तन्वस्तपोजा उप मा ऋषयो दैव्यासो ह्वयन्तां तनूपावानस्तन्वस्तपोजा इति ; प्राणा वा ऋषयो दैव्यासस्तनूपावानस्तन्वस्तपोजास्तानेव तदुपह्वयते"--इति । 'एषः' मैत्रावरुणग्रहः, 'विदद्वसुः' ज्ञानपूर्वकनिवासहेतुः । अन्यत् सर्वं पूर्ववत् ॥

आश्विनग्रहशेषस्य समन्त्रकं भक्षणं मन्त्रशेषव्याख्यानं च दर्शयति— "एष वसुः संयद्वसुरिह वसुः संयद्वसुर्मयि वसुः संयद्वसुः श्रोत्रपाः श्रोत्रं मे पाहीत्याश्विनं भक्षयत्युपहूतं श्रोत्रं सहात्मनोप मां श्रोत्रं सहात्मना ह्वयता मुपहूता ऋषयो दैव्यासस्तनूपावानस्तन्वस्तपोजा उप मा ऋषयो दैव्यासो ह्वयन्तां तनूपावानस्तन्वस्तपोजा इति ; प्राणा वा ऋषयो दैव्यासस्तनूपावानस्तन्वस्तपोजास्तानेव तदुपह्वयते"--इति । 'एषः' आश्विनग्रहः, 'संयद्वसुः' नियतनिवासः । अथवा वसुशब्दः सर्वत्र धनपरत्वेन व्याख्येयः । मन्त्रशेषस्य पृथक् पाठो व्याख्येयत्वप्रदर्शनार्थः ॥

भक्षणे कञ्चिद्विशेषं विधत्ते— "पुरस्तात्प्रत्यञ्चमैन्द्रवायवं भक्षयति, तस्मात् पुरस्तात् प्राणापानौ; पुरस्तात् प्रत्यञ्चं मैत्रावरुणं भक्षयति, तस्मात् पुरस्ताच्चक्षुषी ; सर्वतः परिहारमाश्विनं भक्षयति, तस्मान्मनुष्याश्च पशवश्च सर्वतो वाचं वदन्तीं शृण्वन्ति"--इति प्राङ्मुखो होता स्वस्य पुरस्तात्सन्तमैन्द्रवायवं 'प्रत्यञ्चं' तथै
स्ववक्त्रसमीपवर्त्तिनं कृत्वा भक्षयेत् । अत एव पुरुषस्य प्राणा
पानवायू पुरोभागे सम्बद्धौ । मैत्रावरुणेऽपि समानन्यायः । आश्वि
तु 'सर्वतः परिहारं' सर्वासु दिक्षु परितो हरणं कृत्वा, शिरः प्र
क्षिणीकृत्येत्यर्थः । यस्माच्छ्रोत्ररूपस्याश्विनस्य परितो हरणं, तस्म
च्छ्रोत्रेण 'सर्वतः शृण्वन्ति' पुरतः पृष्ठतः पार्श्वयोः 'वाचं वदन्

स्वार्थं अभिदधानां वाचं शृण्वन्ति। यथा होतुरीदृशं भक्षणं, तथाध्वर्योरपि शाखान्तरे श्रुतम् — "वाग्वा ऐन्द्रवायवश्चक्षुर्मैत्रावरुणः श्रोत्र माश्विनः; पुरस्तादैन्द्रवायवं भक्षयति, तस्मात् पुरस्ताद्वाचा वदति; पुरस्तान् मैत्रावरुणं, तस्मात् पुरस्ताच्चक्षुषा पश्यति; सर्वतः परिहार माश्विनं, तस्मात् सर्वतः श्रोत्रेण शृणोति (तै० सं० ६. ४. ९. ४.)"-इति ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां चतुर्थाध्याये
तृतीयः खण्डः ॥ ३ (२७) ॥

॥ अथ चतुर्थः खण्डः ॥

प्राणा वै द्विदेवत्या' अनवानं द्विदेवत्यान्यजेत्' प्राणानां सन्तत्यै' प्राणाना मव्यवच्छेदाय' प्राणा वै द्विदेवत्या' न द्विदेवत्याना मनुवषट् कुर्याद्' यद् द्विदेवत्याना मनुवषट् कुर्यादसंस्थितान् प्राणान्त्संस्थापयेत्' संस्था वा एषा यदनुवषट्कारो' य एनं तत्र ब्रूयादसंस्थितान् प्राणान्त्समतिष्ठिपत्' प्राण एनं हास्यतीति शश्वत्तथा स्यात्' तस्मान्न द्विदेवत्याना मनुवषट् कुर्यात्' तदाहुर्द्विरागूर्य मैत्रावरुणो द्विः प्रेष्यति'

सकृदागूर्य होता द्विर्वषट्करोति का होतुरागूरिति प्राणा वै द्विदेवत्या आगूर्वज्रस्तद्यद्ध होतान्तरेणागुरेतागुरा वज्रेण यजमानस्य प्राणान् वीयाद्य एनं तत्र ब्रूयादागुरा वज्रेण यजमानस्य प्राणान् व्यगात्प्राणा एनं हास्यतीति शश्वत्तथा स्यात् तस्मात्तत्र होतान्तरेण नागुरेताथो मनो वै यज्ञस्य मैत्रावरुणो वाग्यज्ञस्य होता मनसा वा इषिता वाग्वदति यां ह्यन्यमना वाचं वदत्यसुर्या वै सा वागदेवजुष्टा तद्यदेवात्र मैत्रावरुणो द्विरागुरते सैव होतुरागूः ॥ ४ (२८) ॥

अथ द्विदेवत्यग्रहेषु होत्रा प्रयोक्तव्यानां मन्त्राणां मध्ये उच्छ्वासं विधत्ते—"प्राणा वै द्विदेवत्याः; अनवानं द्विदेवत्यान्यजेत्, प्राणानां सन्तत्यै,—प्राणाना मव्यवच्छेदाय" इति। द्विदेवत्यग्रहेषु याज्यां पठन् होता 'अनवानं यजेत्' मन्त्रमध्ये उच्छ्वास मकृत्वा यजेत्। द्विदेवत्यानां प्राणरूपत्वादयं नैरन्तर्यपाठः प्राणानां सन्ततावस्थापनाय भवति। ततस्तेषां व्यवच्छेदो न भवति। सन्ततिरव्यवच्छेदश्चेत्येक एवार्थोऽन्वयव्यतिरेकाभ्या मुच्यते। इतरेषु ग्रहेषु याज्यान्ते वषट्कारेण सकृद्धुत्वा सोमस्य "अग्ने वीहि"—इत्यनुवषट्कारेण (१५८पृ०) पुनर्यजति। अतः प्रसक्त मनुवषट्कारमन्त्रं निषेधति—"प्राणा वै द्विदेवत्याः; न द्विदेवत्याना मनुवषट्कुर्यात्"—इति। विपक्षे बाधपुरःसरं स्वपक्षं निगमयति—"यद् द्विदेवत्याना मनुवषट्कुर्यादसंस्थितान् प्राणान्संस्थापयेत्; संस्था वा एषा यदनु-

वषट्कारो,—य एनं तत्र ब्रूयादसंस्थितान् प्राणान्समतिष्ठिपत्, प्राण एनं हास्यतीति, शश्वत्तथा स्यात्; तस्मान्न द्विदेवत्याना मनुवषट् कुर्यात्"–इति। यदि होता द्विदेवत्येष्वनुवषट्कारमन्त्रं पठेत्, तदानीं असंस्थितानसमाप्ताननुपरतान् प्राणान् 'संस्थापयेत्' उपरतान् कुर्यात्। योऽय मनुवषट्कारः, एषैव 'संस्था' यज्ञस्य समाप्तिः। अतो यज्ञरूपाणां प्राणाना मप्युपरतिः स्यात्। 'तत्र' अनुवषट्कारकाले यः कोऽपि 'एनं' होतारं 'ब्रूयात्' शपेत्। कथमिति तदुच्यते,— अनुपरतान् प्राणानुपरतानकरोत्। तस्मात् 'एनं' होतारं प्राणः परित्यजतीति। ततोऽपराधिनो होतुरवश्यं तथा भवेत्। तस्मादेतेष्वनवषट्कारमन्त्रं न पठेत्॥

अथैन्द्रवायवे कञ्चिद्विशेषं वक्तुं प्रश्न मुत्थापयति— "तदाहुर्द्विरागूर्य मैत्रावरुणो द्विः प्रेष्यति; सकृदागूर्य होता द्विर्वषट् करोति, का होतुरागूरिति"--इति। 'आगूः'-शब्देन प्रतिज्ञा अभिधीयते। मैत्रावरुणो 'द्विरागूर्य' द्विः प्रतिज्ञाय 'द्विः प्रेष्यति'; द्वावस्य प्रैषमन्त्रौ—"होता यक्षद्वायु मग्रेगाम्"--इत्येकः, "होता यक्षदिन्द्रवायू अर्हन्त"-इति द्वितीयः *। तयोरुभयोरप्यादौ अयं † "होता यक्षत्"-इति द्विः प्रतिजानाति। द्वयोर्मन्त्रयोरन्ते 'होतर्यज', 'होतर्यज' इति द्विः प्रेष्यति। होता तु "अग्रं पिबा मधूनाम्"--इत्यादिके (सं० ४.४६.१,२.) द्वे याज्ये पठितु मादौ "ये यजामहे"--इति (वा० सं० १९.२४.) सकृदेव प्रतिजानीते; द्वयोर्याज्ययोरन्ते वौषड्वौषडिति द्विर्वषट्करोति। तत्र न्यायेन द्वितीयमन्त्रादावपि "ये यजामहे"--इत्यागूःकरण मपेक्षितम्;

---

* "होता यक्षद्वायु मग्रेगाम्, होता यक्षदिन्द्रवायू अर्हन्तेति प्रैषाम्नानम्"—इति आश्व० श्रौ० ५. ५. १।

† मैत्रावरुणः।

तच्च न क्रियते । तस्माद्धोतुर्द्वितीययाज्यादावागूः का नाम स्यात् ? इति प्रश्नः । द्वितीययाज्यादौ मा भूदेवागुरित्येतदुत्तरम् ॥

विपक्षबाधपूर्वकं सिद्धान्तं दर्शयति—"प्राणा वै द्विदेवत्या आगूर्वज्रस्तद्यदत्र होतान्तरेणागुरेतागुरा वज्रेण यजमानस्य प्राणान्वीयाद् ; य एनं तत्र ब्रूयादागुरा वज्रेण यजमानस्य प्राणान् व्यगात्, प्राणा एनं हास्यतीति ; शश्वत्तथा स्यात् ; तस्मात्तत्र होतान्तरेण नागुरेत"—इति । द्विदेवत्यग्रहाः प्राणरूपाः । येयमागूः "ये यजामहे"—इति प्रतिज्ञा, सा वज्ररूपा । तथा सति 'अत्र' कर्म्मणि 'अन्तरेण' याज्ययोर्म्मध्ये यदि होता 'आगुरेत' प्रतिजानीयात् । तदानीमागूः-स्वरूपेण वज्रेण यजमानस्य प्राणान् 'वीयात्' विगतान् कुर्यात् । 'तत्र' तस्यामागुरि क्रियमाणायां यः कोऽपि 'एनं' होतारं शपेत् । कथमिति तदुच्यते,— आगुरा वज्रेण होता यजमानस्य प्राणान् 'व्यगात्' विगतान् अकरोत् । तस्मात् प्राणाः 'एनं' यजमानं होतारं वा परित्यजतीति तेन कृतः शापोऽवश्यं तथैव स्यात् । तस्मात् 'तत्र' तयोः याज्ययोः 'अन्तरेण' मध्ये होता नागुरेत ॥

तत्रैव युक्त्यन्तरमाह — "अथो मनो वै यज्ञस्य मैत्रावरुणो, वाग्यज्ञस्य होता, मनसा वा इषिता वाग्वदति ; यां ह्यन्यमना वाचं वदत्यसुर्या वै सा वागदेवजुष्टा ; तद्यदेवात्र मैत्रावरुणो द्विरागुरते, सैव होतुरागूः"—इति । अपि च मैत्रावरुणो यज्ञस्य मनःस्थानीयः, होता तु वाक्स्थानीयः ; लोके हि मनसा प्रेरिता 'वाक्' वक्तव्यं ब्रूते । यस्त्वन्यमनस्को यां वाचं वदति, तत्र सा वागसुरेभ्यस्तामसेभ्यो हिता ; तेषामसम्बन्धप्रलापप्रियत्वात् । न त्वसौ वाक् सात्विकानां देवानां प्रिया । तस्मात् मनःपूर्विकैव

...ख्या । तथा सत्यत्र अनीकपो मैत्रावरुणो 'द्विरागुरेत' इति यदस्ति, सैव तत्प्रेषितस्य वायूपस्य 'होतुरागूः' द्वितीया भविष्यति । तस्मादाज्ययोर्मध्ये होता नागुरेत ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां चतुर्थाध्याये
चतुर्थः खण्डः ॥ ४ (२८) ॥

॥ अथ पञ्चमः खण्डः ॥

प्राणा वा ऋतुयाजास्तद्यदृतुयाजैश्चरन्ति प्राणानेव तद्यजमाने दधति षळृतुनेति यजन्ति प्राण मेव तद्यजमाने दधति चत्वार ऋतुभिरिति यजन्त्यपान मेव तद्यजमाने दधति द्विर्ऋतुनेत्युपरिष्टाद् व्यान मेव तद्यजमाने दधति स वा अयं प्राणस्त्रेधा विहितः प्राणोऽपानो व्यान इति, तद्यदृतुन ऋतुभिर्ऋतुनेति यजन्ति प्राणानां सन्तत्यै प्राणाना मव्यवच्छेदाय प्राणा वा ऋतुयाजा नर्तुयाजाना मनुवषट् कुर्यादसंस्थिता वा ऋतव एकैक एवं यदृतुयाजाना मनुवषट् कुर्यादसंस्थितानृतून्त्संस्थापयेत्संस्था वा एषा यदनुवषट्कारो य एनं तत्र ब्रूया-

संस्थितानृतूनतिक्रामेद् दुष्षमं भविष्यतीति यस्तथा स्यात्तस्मान्नर्तुयाजाना मनुवषट् कुर्यात् ॥ ५ (२९)

ऋतुयज्ञयागमभिधत्ते — "प्राणा वा ऋतुयाजास्तद्यदृतुयाजैश्चरन्ति, प्राणानेव तद्यजमाने दधति"-इति । मधुमाधवादय ऋतुदेवा यत्रेज्यन्ते, त एते 'ऋतुयाजाः' * । ते च प्राणस्वरूपाः प्राणशब्देन प्राणापानव्यानास्त्रयोऽपि विवक्षिताः । तैः ऋतुयाजैरनुतिष्ठेयुः, तेन प्राणानेव यजमाने स्थापयन्ति ॥

ऋतुग्रहाश्च द्वादशसङ्ख्याकाः; तत्राद्येषु षट्सु कञ्चिद्विशेषं विधत्ते — "षळृतुनेति यजन्ति, प्राण मेव तद्यजमाने दधति" -इति । अध्वर्युणा प्रेषितो मैत्रावरुणः प्रेषसूक्तगतैर्मन्त्रैः क्रमेण होत्रादीन् प्रेष्यति; तेन प्रेषिता होत्रादयः "ऋतुना सोमम्"-इत्येवं यजेयुः । एतेषां षण्णा मृतुयाजानां प्राणस्वरूपत्वात् होत्रादयः षडपि यजमाने प्राणं स्थापयन्ति । सप्तम मारभ्य दशमान्ते विशेषं विधत्ते — "चत्वार ऋतुभिरिति यजन्ति, अपान मेव तद्यजमाने दधति"-इति । अध्वर्युणा प्रेषितो मैत्रावरुणः प्रेषसूक्तगतैः सप्तमादिभिश्चतुर्भिः मन्त्रैः होत्रादीन् क्रमेण चतुरः प्रेष्यति । ते "ऋतुभिः सोमम्"-इति बहुवचनान्तप्रयोगेण चत्वारोऽपि यजेयुः । तेषां चतुर्णां मृतुयाजाना मपानवायुस्वरूपत्वात्तद्यागेनापान मेव यजमाने स्थापयन्ति । एकादश-

---

* 'ऋतुयाजैश्चरन्ति'-इत्यादीनि आश्व० श्रौ० ५. ८. १—७ । शत० ब्रा० ४. ३. १—२० । कात्या० श्रौ० ९. १३. १—१९ । तै० सं० १. ४. १४; ६. ५. ३ । आप० २६. ८—१७ । मिश्र० ८. १. २ ।

[illegible]योर्विशेषं विधत्ते— "द्विर्ऋतुभिरुपरिष्टाद् व्यान एव तद्यजमाने दधाति"-इति। अध्वर्युप्रेषितो मैत्रावरुणः प्रैषसूक्तगताभ्यामेकादश-द्वादशाभ्यां मन्त्राभ्यां प्रेष्यति। तेन प्रेषितौ चाध्वर्युयजमानौ "ऋतुना सोमम्"-इत्येवमेकवचनान्तप्रयोगेण यजेताम्। अन्त्ययोर्द्वयोर्यागयोर्व्यानस्वरूपत्वात् तद्यागेन व्यानमेव यजमाने सर्वेऽपि ऋत्विजः स्थापयन्ति। अनेनैव क्रमेण मैत्रावरुणं प्रति अध्वर्योः प्रैष आपस्तम्बेन दर्शितः— "ऋतुना प्रेष्येति त्रिष्वाद्येष्वध्वर्युः सम्प्रेष्यत्येवं प्रतिप्रस्थाता; पात्रयोर्मुखे पर्यावृत्यर्तुभिः प्रेष्येति द्वयोरध्वर्युरेवं प्रतिप्रस्थाता; पुनः पर्यावृत्यर्तुना प्रेष्येति सकृदध्वर्युरेवं प्रतिप्रस्थाता"-इति (श्रौ० १२.२६.१७—१९.)। तदेकवचनान्तबहुवचनान्तैकवचनान्तैः ऋतुशब्दैरुदाहृतः प्रैषः तैत्तिरीयब्राह्मणे * समाम्नातः— "ऋतुना प्रेष्येति षट्कृत्व आह षड्वा ऋतव ऋतूनेव प्रीणात्यृतुभिरिति चतुश्चतुष्पद एव पशून् प्रीणाति द्विः पुनरृतुनाह द्विपद एव प्रीणाति"-इति (तै०सं०६.५.३.२.)। तानेतानृतुयाजान् प्रशंसति— "स वा अयं प्राणस्त्रेधा विहितः,—प्राणोऽपानो व्यान इति; तद्यदृतुनर्तुभिर्ऋतुनेति यजन्ति, प्राणानां सन्तत्यै,— प्राणानामव्यवच्छेदाय"-इति। शरीरमध्ये स्थितस्य प्राणवायोः प्राणापानव्यानाख्याभिर्वृत्तिभिस्त्रिविधत्वात् ऋतुशब्दप्रयोगेण त्रिविधेन यजमानस्य प्राणाः सन्तता भवन्ति, न तु व्यवच्छिद्यन्ते॥

तेषु ऋतुयाजेष्वनुवषट्कारं निषेधति— "प्राणा वा ऋतुयाजा नर्तुयाजानामनुवषट् कुर्यादसंस्थिता वा ऋतव एकैक

---

* मन्त्रभागोऽयं इति ज्ञेयम्; तैत्तिरीयशाखाया ब्राह्मणभागेऽपि मन्त्रा आम्नाताः, तथा मन्त्रभागेऽपि ब्राह्मणवचनानीति।

स्व”-इति। सोऽपि वसन्तादय ऋतवः ‘असंस्थिताः’ असमाप्ताः, अनुपरताः; एकैकस्यानन्तर मेव द्वितीय इत्येव मेकैकक्रमेण वसन्तग्रीष्मवर्षाशरद्धेमन्तशिशिराख्याः प्रत्येकं मासद्वयेन द्वादशमासात्मकाः, घटीयन्त्रवत् * पुनःपुनरावर्त्तन्ते। अतो न कदाचिदपि ऋतूना मुपरतिरस्ति ॥

विपक्षबाधपूर्वकं स्वपक्ष मुपसंहरति— “यदृतुयाजाना मनुवषट् कुर्यादसंस्थितानृतून्त्संस्थापयेत् संस्था वा एषा यदनुवषट्कारो य एनं तत्र ब्रूयादसंस्थितानृतून्त्समतिष्ठिपद् दुष्षमं भविष्यतीति शश्वत्तथा स्यात्, तस्मान्नर्त्तुयाजाना मनुवषट् कुर्यात्”-इति। ‘दुष्षमं’ रोगदारिद्र्यादिरूपं विषमं किञ्चिदस्वास्थ्यम्। अन्यत् पूर्ववद् व्याख्येयम् ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां चतुर्थाध्याये
पञ्चमः खण्डः ॥ ५ (२८) ॥

॥ अथ षष्ठः खण्डः ॥

प्राणा वै द्विदेवत्याः पशव इळा द्विदेवत्यान् भक्षयित्वेळा मुपह्वयते पशवो वा इळा पशूनेव, तदुपह्वयते पशून् यजमाने दधाति तदाहुरवा-

---

* ‘उद्घाटनं घटीयन्त्रं सलिलोद्वाहनं प्रहिः’-इति अम० को० २. १०. २७।

न्तरेळां पूर्वां प्राश्नीया३त् होतृचमसं भक्षये३त् इति अवान्तरेळा मेव पूर्वां प्राश्नीयादथ होतृचमसं भक्षयेद्यद्वाव द्विदेवत्यान् पूर्वान् भक्षयति तेनास्य सोमपीथः पूर्वो भक्षितो भवति तस्मादवान्तरेळा मेव पूर्वां प्राश्नीयादथ होतृचमसं भक्षयेत् तदुभयतो ऽन्नाद्यं परिगृह्णाति सोमपीथाभ्या मन्नाद्यस्य परिगृहीत्यै प्राणा वै द्विदेवत्या आत्मा होतृचमसो द्विदेवत्यानां संस्रवान् होतृचमसे समवनयत्यात्मन्येव तद्धोता प्राणान्त्समवनयते सर्वायुः सर्वायुत्वाय सर्व मायुरेति य एवं वेद ॥ ६ (३०) ॥

सवनीयपशुपुरोडाशप्रचारादूर्ध्वं तदङ्ग मिळोपह्वान मवस्थाप्य द्विदेवत्यग्रहप्रचारः कृतः। तत ऊर्ध्वं तद्ग्रहशेषभक्षण मपि प्राप्तम्। तत्र इळोपह्वानग्रहशेषभक्षणयोः किं पूर्वं कि मपर मिति क्रमस्य ज्ञातु मशक्यत्वात् तं क्रमं विधत्ते— "प्राणा वै द्विदेवत्याः पशव इळा, द्विदेवत्यान् भक्षयित्वेळा मुपह्वयते; पशवो वा इळा पशूनेव तदुपह्वयते,— पशून् यजमाने दधाति" -इति। द्विदेवत्यानां वागादिप्राणरूपत्वं पूर्व मेवोक्तम्; इळा देवता च "गौर्वा अस्यै शरीरम्"-इतिश्रुतेः पशुरूपा। तत्रैवं स्थिते प्रथमतो द्विदेवत्यग्रहशेषान् भक्षयित्वा पश्चादिळोपह्वानं कुर्यात्। तथा सतीळायाः पशुरूपत्वेन पशूनेव उपह्वतवान् भवति। तांश्च पशून् स्वकीयैः प्राणैः सुस्थिते यजमाने स्थापयति। अय मेवार्थो व्यतिरेकमुखेन श्रुत्यन्तरे प्रतिष्ठापितः— "प्राणा वा एते यद्

[illegible], यदिडां पूर्वां द्विदेवत्येभ्य उपह्वयेत, पशुभिः प्राणानन्तर्दधीत, प्रमायुकः स्यात्; द्विदेवत्यान् भक्षयित्वेडामुपह्वयते, प्राणानेवात्मन् धित्वा पशूनुपह्वयते”–इति (तै० सं० ६. ४. ९. २.)। इत्थं द्विदेवत्यभक्षणस्य पूर्वभावित्व मिळोपह्वानस्य पश्चाद्भावित्वं च व्यवस्थापितम्। तदेतदिळापात्रभाग मवदाय क्रियमाण मुपह्वानम्।

या तु होतुर्हस्तसम्पादितावान्तरेळा †, तत्प्राशनस्य होतृचमसभक्षणस्य च पौर्वापर्यं विचार्य निश्चिनोति— “तदाहुरवान्तरेळाम्पूर्वां प्राश्नीया३त् होतृचमसम्भक्षये३त् इति अवान्तरेळा मेव पूर्वां प्राश्नीयादथ होतृचमसम्भक्षयेत्”-इति। विचारार्थं प्लुतिद्वयम् ‡। अवान्तरेळाप्राशनं पूर्वभावि, चमसभक्षणं पश्चाद्भावीति निर्णयः। तदेतदुपपादयति— “यद्वाव द्विदेवत्यान् पूर्वान् भक्षयति, तेनास्य सोमपीथः पूर्वो भक्षितो भवति; तस्मादवान्तरेळा मेव पूर्वां प्राश्नीयादथ होतृचमसं भक्षयेत्; तदुभयतो ऽन्नाद्यं परिगृह्णाति, सोमपीथाभ्या मन्नाद्यस्य परिगृहीत्यै”–इति। द्विदेवत्यानां भक्षणं पूर्वभावीति यदस्ति, तेन सोमपानरूपस्य भक्षस्येळाप्राशनात् पूर्वत्वं सिध्यति। तत इळां प्राश्य होतृचमसभक्षणे सति उपरिष्टादपि सोमभक्षणसिद्धेरिळायाः ‘उभयतः’ पार्श्वद्वयेऽपि सोमपानाभ्या मयं होता अन्नाद्यं परिगृह्णाति, तच्च यजमानस्यान्नाद्यपरिग्रहाय भवति॥

---

*,† इह भाष्यपुस्तकेषु क्वचित् ‘इळा’ इति, क्वचित् ‘इडा’ इति पाठः; वस्तुतः ऋक्प्रातिशाख्ये उभयस्वरमध्यगतस्य डकारस्य ळकारो विहित इति (१५ पृ०) तद्भाष्यादावपि सर्वत्रैव ळएव उचितः, तैत्तिरीयीमूलपाठादौ तु डएवेत्यवधेयम्।

‡ “विचार्यमाणानाम्”–इति पा० सू० ८. २. ९७।

द्विदेवत्यानामेवात्र विप्रुषो होतृचमसे प्रक्षेपं विधत्ते— "आत्मा वै द्विदेवत्याः प्राणा होतृचमसो द्विदेवत्यानां संस्रवान् होतृचमसे समवनयत्यात्मन्येव तद्धोता प्राणान्त्समवनयति सर्वायुः सर्वायुत्वाय"-इति । संस्रवा बिन्दवः; तत्प्रक्षेपेण द्विदेवत्यरूपान् प्राणान् 'आत्मन्येव' शरीरे होतृचमसरूपे होता प्रक्षिपति । प्राणानामवस्थापनात् स्वयं 'सर्वायुः' अपमृत्युरहितो भवति । तद्यजमानस्य सर्वायुत्वाय सम्पद्यते ॥

वेदनं प्रशंसति— "सर्व मायुरेति य एवं वेद"-इति ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां चतुर्थाध्याये
षष्ठः खण्डः ॥ ६ (३०) ॥

॥ अथ सप्तमः खण्डः ॥

देवा वै यदेव यज्ञेऽकुर्वंस्तदसुरा अकुर्वंस्ते समावद्वीर्या एवासन्न व्यावर्तन्त ततो वै देवा एतं तूष्णींशंस मपश्यंस्त मेषा मसुरा नान्ववायंस्तूष्णीं सारो वा एष यत्तूष्णींशंसो देवा वै यं य मेव वज्र मसुरेभ्य उदयच्छंस्तं त मेषा * मसुराः प्रत्यबुध्यन्त ततो वै देवा एतं तूष्णींशंसं वज्र मपश्यंस्त मेभ्य उद्य-

---

* 'ऽत्र मेषा' ख, ग।

यत्तूष्णींशंस मेषा मसुरा न प्रत्यबुध्यन्त त मेभ्यः आहरंस्तेनैनानप्रतिबुद्धेनाभ्यंस्ततो वै देवा अभवन् परासुरा भवत्यात्मना परास्य द्विषन् पाप्मा भ्रातृव्यो भवति य एवं वेद ते वै देवा विजितिनो मन्यमाना यज्ञमतन्वत त मेषा मसुरा अभ्यायन् यज्ञवेशस मेषां करिष्याम इति तान्त्समन्त मेवोदारान् परियत्तानुदपश्यंस्ते ऽब्रुवन्त्संस्थापयामेमं यज्ञं यज्ञं नो ऽसुरा मा वधिषुरिति तथेति तं तूष्णींशंसे संस्थापयन् भूरग्निर्ज्योतिर्ज्योतिरग्निरित्याज्यप्रउगे संस्थापयन्निन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्र इति निष्केवल्यमरुत्वतीये संस्थापयन्त्सूर्यो ज्योतिर्ज्योतिः स्वः सूर्य इति वैश्वदेवाग्निमारुते संस्थापयंस्त मेवं तूष्णींशंसे संस्थापयन्स्त मेवं तूष्णींशंसे संस्थाप्य तेनारिष्टेनोदृच माश्नुवत स तदा वाव यज्ञः सन्तिष्ठते यदा होता तूष्णींशंसं शंसति स य एनं शस्ते तूष्णींशंस उप वा वदेदनु वा व्याहरेत्तं ब्रूयादेष एवैता मार्तिं मारिष्यति प्रातर्वाव वय मद्येमं शस्ते तूष्णींशंसे संस्थापयामस्तं यथा गृहानितं कर्मणानुसमियादेव मेवैन मिद मनुसमिम इति स ह वाव ता मार्तिं मृच्छति य एवं विद्वांस्तं शस्ते तूष्णींशंस

यं वा वदन्तमनु वा व्याहरति तस्मादेवं विद्वान्होता तूष्णींशंसे नोपवदेन्नानुव्याहरेत् ॥ ७ (३१) ॥

अथ तूष्णींशंसविधानार्थ मितिहास माह—"देवा वै यदेव यज्ञेऽकुर्वंस्तदसुरा अकुर्वंस्ते समावद्वीर्या एवासन्न व्यावर्तन्त ; ततो वै देवा एतं तूष्णींशंस मपश्यंस्त मेषा मसुरा नान्ववायंस्तूष्णींसारो वा एष यत्तूष्णींशंसः"-इति। देवाः पुरा स्वकीये यज्ञे यदङ्ग मन्वतिष्ठन्, असुरा अप्यवेत्य तदेवान्वतिष्ठन्, तदा ते देवासुराश्च परस्परं 'समावद्वीर्याः' तुल्यसामर्थ्या एवाभवन्,— एकस्य वर्गस्य सामर्थ्याधिक्य मितरस्य न्यून मित्येवं व्यावृत्तिं न प्राप्ताः। ततो देवाः सामर्थ्याधिक्यलक्षणव्यावृत्तिहेतुं वेदेष्वन्विष्यन्तः। एवं वक्ष्यमाणं तूष्णींशंसं तदुपायत्वेन दृष्टवन्तः। सर्वेष्वपि शस्त्रेष्वृचः पठ्यन्ते, अस्मिंस्तु शस्त्रे न पठ्यन्ते इति तूष्णींशंसस्य मूकपाठरूपत्वेन गूढम्। 'एषां' देवानां तूष्णींशंस मसुराः 'नान्ववायन्' नानुगतवन्तः, एतदनुष्ठान मविज्ञाय न कृतवन्त इत्यर्थः। योऽयं तूष्णींशंस एषः 'तूष्णींसारो वै' मूकपाठरूपत्वलक्षणः तूष्णींभाव एवास्मिन् शस्त्रे शस्तः; असुराणां तु निष्फलं तूष्णीं[illegible]स्थान मिति निश्चयः ॥

अथ तूष्णींशंसस्यासुरविनाशहेतुत्वं दर्शयति—"देवा वै यं य मेव वज्र मसुरेभ्य उदयच्छंस्तं त मेषा मसुराः प्रत्यबुध्यन्त; ततो वै देवा एतं तूष्णींशंसं वज्र मपश्यंस्त मेभ्य उदयच्छंस्त मेषा मसुरा न प्रत्यबुध्यन्त; त मेभ्यः प्राहरंस्तेनैनानप्रतिबुद्धेनाघ्नंस्ततो वै देवा अभवन् परासुराः"-इति। देवाः असुरविनाशार्थ मायुधरूपं मन्त्ररूपम् अभिचाररूपं वा यं यं वज्रं प्रयुक्तवन्तः,

[illegible] आप्नुवन्ति तदा तस्य प्रतिकारं ([illegible] अभिचारादिकं वा *) कुर्वन्ति। ततो देवा एतं तूष्णींशंसनम् [illegible] दृष्ट्वा तदसुरविनाशार्थं प्रयुक्तवन्तः। असुरास्तु देवानां तं तूष्णींशंसम् अज्ञात्वा प्रतिकारं न ज्ञातवन्तः। ततो निर्विघ्नेन देवास्तं तूष्णींशंसं वज्रम् असुराणाम् उपरि 'प्राहरन्' तद्विनाशार्थं प्रयुक्तवन्तः। असुरैरविज्ञातेन तेनैवासुरान् हतवन्तः। ततो देवा विजयिनोऽभवन्। मुख्येष्वसुरेषु हतेष्ववशिष्टा असुराः पराभूताः॥ एतद्वेदनं प्रशंसति— "भवत्यात्मना परास्य द्विषन् पाप्मा भ्रातृव्यो भवति य एवं वेद"-इति॥

अथोपाख्यानमुखेनैव तूष्णींशंसस्य स्वरूपं दर्शयति,— "ते वै देवा विजितिनो मन्यमाना यज्ञ मतन्वत ; त मेषा मसुरा अभ्यादवन्,—यज्ञवेशस मेषां करिष्याम इति ; तान्समन्त मेवोदारान् परियत्तानुदपश्यंस्ते ऽब्रुवन्संस्थापयामेमं यज्ञं यज्ञं नो ऽसुरा मा वधिषु रिति ; तथेति ; तं तूष्णींशंसे संस्थापयन् ; भूरग्निर्ज्योतिरग्निरित्याज्यप्रउगे संस्थापयन्निन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्र इति निष्केवल्यमरुत्वतीये संस्थापयन्त्सूर्यो ज्योतिर्ज्योतिः स्वः सूर्य इति वैश्वदेवाग्निमारुते संस्थापयंस्त मेवं तूष्णींशंसे संस्थापयंस्त मेवं तूष्णींशंसे संस्थाप्य तेनारिष्टेनोदृच माश्नुवत"-इति। मुख्याना मसुराणां हतत्वात् ते देवाः 'विजितिनः' विजयवन्तो वय मिति मन्यमाना यज्ञं विस्तारितवन्तः। 'एषां' देवानां यज्ञ मभिलक्ष्यासुरास्तत्र गताः। केनाभिप्रायेणेति, तदुच्यते— 'एषां' देवानां 'यज्ञवेशसं' यज्ञविघातं करिष्याम इति तदभिप्रायः। ततो देवाः 'समन्त मेव' पुरतः पृष्ठतः पार्श्वयोश्च समागतान्, 'उदारान्'

---

* कुण्डलीचिह्नाक्रान्तः पाठो ख-घ-पुस्तकयोर्नास्ति।

[illegible] 'पर्यैतान्' * [illegible] 'उदपतन्' [illegible] इत्यर्थः। दृष्ट्वा च परस्पर मिद मब्रुवन्,—इमं ग्रहं 'संस्थापयाम:' शीघ्रं समापयामः। तथा सति 'नः' अस्मदीयं यज्ञ असुराः 'मा वधिषुः' मा विनाशयन्तु; विलम्बे सति विनाशयिष्यन्ति, तन्माभूदिति। तद्वचनं परस्पर मङ्गीकृत्य [illegible] ते देवाः तूष्णींशंसे 'संस्थापयन्' शीघ्रं समापितवन्तः। यद्वा तूष्णींशंसस्य वज्ररूपेण रक्षकत्वाद्रक्षार्थं तस्मिन् स्थापितवन्तः। कोऽयं तूष्णींशंस इति, स उच्यते— "भूरग्निर्ज्योतिर्ज्योतिरग्निः"–'इति' एष नवाक्षरात्मको मन्त्र एकस्तूष्णींशंसभागः। आज्यं प्रउगं चेति उभे प्रातःसवनकालीने शस्त्रे; तदुभय मप्युक्ते तूष्णींशंसभागे स्थापितवन्तः। "इन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्रः"–'इति' एष दशाक्षरात्मको मन्त्रो द्वितीयस्तूष्णींशंसभागः। निष्केवल्यं मरुत्वतीयं चेत्युभे माध्यन्दिनसवनकालीने शस्त्रे; तदुभय मिन्द्रोज्योतिरित्यस्मिंस्तूष्णींशंसभागे स्थापितवन्तः। "सूर्यो ज्योतिर्ज्योतिः स्वः सूर्यः"–'इति' एव नवाक्षरात्मको मन्त्रस्तृतीयस्तूष्णींशंसभागः। वैश्वदेव माग्निमारुतं चेत्युभे तृतीयसवनकालीने शस्त्रे; तदुभयं सूर्योज्योतिरित्यादिके तूष्णींशंसभागे स्थापितवन्तः †। 'तं' सवनत्रयगतैः षड्भिः शस्त्रैरुपेतं यज्ञम् 'एवम्' उक्तप्रकारेण तूष्णींशंसे स्थापितवन्त इत्येव मुक्तार्थस्योपसंहारः। पुनस्तमेव [illegible] उक्तार्थानुवादः। षड्विधशस्त्रसंस्थापनात्पूर्वम् 'परिष्टेन' [illegible]

---

* मद्दृष्टेषु सर्वेष्वेव, मूलपुस्तकेषु 'परियत्ताम्'–इति तथा टीकापुस्तकेषु 'पर्यैताम्'–इति विभिन्नौ पाठौ। किन्तु टीकाग्रन्थेषूद्धृतमूलग्रन्थपाठोऽपि 'परियत्ताम्'–इत्येव।

† "भूरग्निर्ज्योतिर्ज्योतिरग्नीम्, इन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्रीम्, सूर्यो ज्योतिर्ज्योतिः स्वः सूर्यमिति त्रिपदस्तूष्णींशंसः"—इति आश्व० श्रौ० ५.९.११।

'तेन' यज्ञेन 'उदृचम्' उत्तमा मृचं यज्ञसमाप्तिम् 'आप्नुवन्' प्राप्तवन्तः ॥

इत्थ माख्यायिकामुखेन तूष्णींशंसस्वरूप मभिधाय तदनुष्ठानं विधत्ते—"स तदा वाव यज्ञः संतिष्ठते, यदा होता तूष्णींशंसं शंसति"-इति। यस्मिन् काले होता त मिमं मन्त्रं शंसेत्, तदैव स यज्ञो निर्विघ्नः समाप्यते ; तस्मात् होत्रा तत्स्वरूपं शंसनीयम्। तत्प्रकार आश्वलायनेन दर्शितः—"सुमत्पद्गदे पिता मातरिश्वा छिद्रापधादच्छिद्रोक्था कवयः शंसन् सोमो विश्वविन्नीथानि नेषद् बृहस्पतिरुक्थामदानि शंसिषद् वागायुर्विश्वायुर्विश्व मायुः, क इदं शंसिष्यति, स इदं शंसिष्यतीति जपित्वाऽनभिहिङ्कृत्य शोंसावो मित्युच्चैराहूय तूष्णींशंसं शंसेदुपांशु सप्रणव मसन्तन्वन्नेष आहावः प्रातःसवने शस्त्रादिषु"-इति (आश्व० ५,९,१,२.)। अस्याय मर्थः—ऋतुपात्रभक्षणानन्तरं होतुर्मुखतः आसीनोऽध्वर्युः पराङ्मुखः समावर्त्तते, तदानीं होता सुमदित्यादि स इदं शंसिष्यतीत्यन्तं मन्त्रं जपित्वा, अभिहिङ्कार मकृत्वा, शोंसावो मित्यनेन मन्त्रेणाध्वर्यु मुच्चैराहूय, भूरग्निरित्यादिकं प्रणवसहित मुपांशु पठेत्। प्रणवेन सह असन्तत मविच्छेदनं कुर्यात्। एष शोंसावो मिति मन्त्रोऽध्वर्योराह्वानरूपत्वादाहाव इत्युच्यते। स च प्रातःसवने शस्त्रादिषु प्रवर्त्तते इति ॥

उक्तं तूष्णींशंसनं प्रशंसति—"स य एनं शस्ते तूष्णींशंस उप वा वदेदनु वा व्याहरेत्, तं ब्रूयादेष एवैता मार्त्तिं मारिष्यति प्रातर्वाव वय मद्येमं शस्ते तूष्णींशंसे ऽस्थापयामस्तं यथा गृहानितं कर्मणानुसमियादेव मेवैन मिद मनुसमिम इति स ह वाव ता मार्त्तिं मृच्छति य एवं विद्वान्संशस्ते तूष्णींशंसे उप वा वदत्यनु

आ व्याहरति ; तस्मादेवं विद्वान्त्संशस्ते तूष्णींशंसे नोपवदेन्नानुव्याहरेत्"—इति । होता तूष्णींशंसे शस्ते सति 'एनं' होतारं सः 'उपवदेद्वा अनुव्याहरेद्वा' यः कोऽप्यन्यः पुरुषो निन्देत् शपेत् वा ;—उपवादो निन्दा, अनुव्याहारः शापः ; तदानीमयं होता निन्दितारं शप्तारं वा ब्रूयात् । कथं ब्रूयादिति, तदुच्यते— यो निन्दिता शप्ता वास्ति, एष एव निन्दारूपां शापरूपां वा 'आर्त्तिं' विनाशम् 'आरिष्यति' प्राप्स्यति, न त्वहं प्राप्स्यामि । तत्र हेतुरुच्यते— 'प्रातर्वाव' प्रातःसवने एव 'वयं' होतारः 'अद्य' अस्मिन्दिवसे अस्माभिः शस्ते तूष्णींशंसे तं मित्रं यज्ञं 'संस्थापयामः' समापयामः । यथा लोके 'महान्तं' स्वकीयान् गृहान् प्राप्तमतिथिं 'कर्मणा' आतिथ्यसत्काररूपेण 'समभियात्' आनुकूल्येन सम्यक् प्राप्नुयात्, उपचरेदित्यर्थः । 'एवम्' एव वयमपि 'इदं' तूष्णींशंसानुष्ठानं कृत्वा 'एनं' यज्ञं 'अनुसमिमः' आनुकूल्येन सम्यक् प्राप्नुमः, उपचरेम इत्यर्थः । एष एवेत्यादिकोऽनुसमिम इत्यन्तः, निन्दाशापपरिहारार्थो मन्त्रः ; तं होता ब्रूयात् । तस्मिन्मन्त्रे सति यः पुमान् स्वयं विद्वानेव सन् तूष्णींशंसस्य शंसनादूर्ध्वं निन्दति शपति वा, स एव तामार्त्तिम् आप्नोति । तस्मात् कारणात् 'एवम्' उक्तार्थं विद्वान् पुरुषः तूष्णींशंसपाठादूर्ध्वं होतारं न निन्देत् नापि शपेत् ॥ ७ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां चतुर्थाध्याये
सप्तमः खण्डः ॥ ७ (२१) ॥

॥ अथ अष्टमः खण्डः ॥

चक्षूंषि वा एतानि सवनानां यत्तूष्णींशंसो। भूरग्निर्ज्योतिर्ज्योतिरग्निरिति। प्रातःसवनस्य चक्षुषी। इन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्र इति। माध्यन्दिनस्य सवनस्य चक्षुषी। सूर्यो ज्योतिर्ज्योतिः स्वः सूर्य इति। तृतीयसवनस्य चक्षुषी। चक्षुष्मद्भिः सवनै राध्नोति। चक्षुष्मद्भिः सवनैः। स्वर्गं लोक मेति य एवं वेद। चक्षुर्वा एतद्यज्ञस्य यत्तूष्णींशंस। एका सती व्याहृतिर्द्वेधोच्यते। तस्मादेकं सच्चक्षुर्द्वेधा। मूलं वा एतद्यज्ञस्य। यत्तूष्णींशंसो। यं कामयेतानायतवान्स्यादिति। नास्य यज्ञे तूष्णींशंसं शंसेदुन्मूल मेव तद्यज्ञं पराभवन्त मनु पराभवति। तदु वा आहुः। शंसेदेवापि वै। तदृत्विजे हितं। यद्धोता तूष्णींशंसं न शंसत्यृत्विजि हि सर्वो यज्ञः प्रतिष्ठितो। यज्ञे यजमानस्तस्माच्छंस्तव्यः शंस्तव्यः। ॥ ८ (३२) ॥

॥ इत्यैतरेयब्राह्मणे द्वितीयपञ्चिकायां चतुर्थोऽध्यायः॥४॥

अथ प्रकारान्तरेण तूष्णींशंसं प्रशंसति—"चक्षूंषि वा एतानि सवनानां यत्तूष्णींशंसो; भूरग्निर्ज्योतिर्ज्योतिरग्निरिति प्रातःसवनस्य चक्षुषी, इन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्र इति माध्यन्दिनस्य सवनस्य चक्षुषी, सूर्यो ज्योतिर्ज्योतिः स्वः

सूर्य इति तृतीयसवनस्य चक्षुषी"-इति। यस्तूष्णींशंसोऽस्ति, 'एतानि' एव तद्गतानि पदानि त्रयाणां सवनानां चक्षुःस्थानीयानि। कथमेतदिति तदेव, स्पष्टीक्रियते---'भूरग्निर्ज्योतिः'-इति प्रथमस्य तूष्णींशंसपादस्य पूर्वो भागः, स च प्रातःसवनस्य दक्षिणचक्षुःस्थानीयः; 'ज्योतिरग्निः'-इत्यय मुत्तरो भागो वामचक्षुःस्थानीयः; भूलोकवर्त्ती योऽग्निः, स एवैको गोलकद्वये प्रकाशक इत्यर्थः। 'इन्द्रो ज्योतिः'-इति अयं द्वितीयस्य पूर्वो भागो माध्यन्दिनसवनस्य दक्षिणं चक्षुः; 'भुवो ज्योतिः'-इत्यय मुत्तरो भागो वामचक्षुः; अन्तरीक्षलोकवर्त्ती परमैश्वर्ययुक्तो वायुर्गोलकद्वये भासक इत्यर्थः। 'सूर्यो ज्योतिः' इत्येष तृतीयस्य पूर्वभागस्तृतीयसवनस्य दक्षिणं चक्षुः; 'ज्योतिः स्वः सूर्यः'-इत्यय मुत्तरो भागो वामचक्षुः; स्वर्लोकवर्त्ती सूर्यः गोलकद्वये भासक इत्यर्थः * ॥

वेदनं प्रशंसति---"चक्षुष्मद्भिः सवनै राध्नोति चक्षुष्मद्भिः सवनैः स्वर्गं लोकमेति य एवं वेद"-इति। राधिरिह लोके समृद्धिः † ॥

तूष्णींशंसस्य चक्षुःस्वरूपत्व मुपपादयति---"चक्षुर्वा एतद्यज्ञस्य यत्तूष्णींशंस एका सती व्याहृतिर्द्वेधोच्यते, तस्मादेकं सच्चक्षुर्द्वेधा"-इति। यद्यपि भूरित्येकैव व्याहृतिः, तथापि तद्योगादग्निर्ज्योति-

---

* "यद्वै षट्पदः, पूर्वैर्ज्योतिरन्तैर्यज्ञस्य [illegible] आश्व० श्रौ० ५.४ ११। 'त्रिपदः षट्पदो वायं शंसव्यः। त्रिपदपक्षे यथापाठमेव ([illegible] पृ० ८ प०, [illegible] पृ० 'ग') षट्पदपक्षे त्रीणि त्रीणि वाक्यानि [illegible] कृत्वा शंसेत्' [illegible] ऽवसानस्थाने पूर्वैर्ज्योतिःशब्दैर्वयं ऽवस्येत्'---इति सत्यव्रतः।

† "राद्धः समृद्धो भवति"---इति [illegible] १४ [illegible] १ [illegible]।

रिति अपि पदद्वयं व्याहृतित्वेनोच्यते । सेयं व्याहृतिरेकैव सती आरोहावरोहाभ्यां द्वेधोच्यते * । यस्मादेवं तस्माच्चक्षुरिन्द्रिय मप्येक मेव सद्गोलकद्वये द्विधा वर्त्तते । तस्माच्चक्षुष्ट्वं युक्तम् ॥

पुनरपि प्रकारान्तरेण प्रशंसति— "मूलं वा एतद्यज्ञस्य यत् तूष्णींशंसो ; यं कामयेतानायतनवान्स्यादिति, नास्य यज्ञे तूष्णींशंसं शंसेदुन्मूल मेव तद्यज्ञं पराभवन्त मनु पराभवति"— इति । 'यं' यजमान मुद्दिश्य होता द्वेषादेवं कामयेत,— 'अनायतनवान्' स्वर्गसाधनरूपेणायतनेनाश्रयेण रहितोऽयं यजमानः स्यादिति, तदानीम् 'अस्य' द्वेष्यस्य यजमानस्य यज्ञे तूष्णींशंसं होता न शंसेत् । तथा सति वृक्षमूलवत् यज्ञमूलत्वेनावस्थितस्य तूष्णींशंसस्य पाठाभावादयं यज्ञो मूलरहितः 'पराभवति' विनश्यति ;— त मनु यजमानोऽपि विनश्यति । तदेवं द्वेष्यस्य विनाशहेतुत्वेन प्रशंसा कृता ॥

पुनरप्यृत्विजो होतुरनुकूलत्वेन प्रशंसति— "तदु वा आहुः" —शंसेदेवापि वैतदृत्विजे हितं यद्धोता तूष्णींशंसं न शंसत्यृत्विजि हि सर्वो यज्ञः प्रतिष्ठितो, यज्ञे यजमानस्तस्माच्छंस्तव्यः शंस्तव्यः"-इति । 'तदु वै' तत्रैव तूष्णींशंसविषयं ब्रह्मवादिन आहुः । कि मिति, तदुच्यते— यद्यपि यजमाने प्रीतिरहितो होता, तथापि शंसेदेव— 'अपि वा'-इति पूर्वोक्तापेक्षया पक्षान्तरोपन्यासार्थम् । होता न शंसतीति यदस्ति, तदेत-

---

* "व्याहृतीर्मनसानुद्रवेत् भूर्भुवःस्वरिति"—इति षड्विं० ब्रा० १.६ । "सोऽताम्यत् । स भूरिति व्याहरत् । + + + । स भुव इति व्याहरत् । + + + । स सुवरिति व्याहरत् । + + + । एता वै व्याहृतय इमे लोकाः"—इति तै० ब्रा० २.२.४.२ । आरोहावरोहौ चात्र क्रमव्युत्क्रमाभ्यां पाठौ ;—'अग्निः ज्योतिः', 'ज्योतिः अग्निः'—इत्येव मिति ।

ऋत्विजे होत्रे ऽवस्थितम्; भ्रष्टे यज्ञे दक्षिणाया अलाभात्। यस्मात् ऋत्विजि सर्वो यज्ञः प्रतिष्ठितः, तस्माद्यज्ञयजमानयोः प्रतिष्ठाद्वारा होतुर्हितत्वेनायं तूष्णींशंसः शस्तव्यः ॥

अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ८ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां चतुर्थाध्याये
अष्टमः खण्डः ॥ ८ (३२) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादिशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायाः चतुर्थोऽध्यायः ॥

॥ अथ पञ्चमाध्यायः ॥

(१५)

॥ अथ प्रथमः खण्डः ॥

ब्रह्म वा आहावः॑ क्षत्रं निविद्विट् सूक्त माह्वयते॑ ऽथ निविदँ दधाति॑ ब्रह्मण्येव तत्क्षत्र मनुनियुनक्ति॑ निविदँ शस्त्वा सूक्तं शंसति॑ क्षत्रं वै निविद्विट् सूक्तं॑ क्षत्र एव तद् विश मनुनियुनक्ति॑ यं कामयेत॑ क्षत्रेणैनं व्यर्द्धयानीति॑ मध्य एतस्यै निविदः सूक्तं शंसे॑त्क्षत्रं वै निविद्विट् सूक्तं॑ क्षत्रेणैवैनं तद् व्यर्द्धयति॑ यं कामयेत॑ विशैनं व्यर्द्धयानीति॑ मध्य एतस्य सूक्तस्य निविदँ शंसे॑त्क्षत्रं वै निविद्विट् सूक्तं॑ विशैवैनं तद् व्यर्द्धयति॑ य मु कामयेत॑ सर्वँ मेवास्य यथापूर्वँ मृजुक्लृप्तँ स्यादित्याह्वयेता॑थ निविदँ दध्या॑दथ सूक्तं शंसे॑त्सो सर्वस्य क्लृप्तिः॑ प्रजापतिर्वा इद मेक एवाग्र आस॑ सो ऽकामयत॑ प्रजायेय भूयान्त्स्यामिति॑ स तपो ऽतप्यत॑ स वाच मयच्छत्स॑ संवत्सरस्य परस्ताद् व्याहरद्॑ द्वादशकृत्वो॑ द्वादशपदा वा एषा निविदे॑तां वाव तां निविदं व्याह-

एतां सर्वाणि भूतान्यन्वसृज्यन्त तदेतदृषिः पश्यन्नभ्यनूवाच स पूर्वया निविदा कव्यतायोरिमाः प्रजा अजनयन्मनूनामिति तद् यदेतां पुरस्तात्सूक्तस्य निविदं दधाति प्रजात्यै प्रजायते प्रजया पशुभिर्य एवं वेद ॥ १ (३३) ॥

ऋतुयाजा द्विदेवत्यास्तद्विशेषफला स्तुतिः ।
तूष्णींशंसप्रशंसा च नवमाध्यायचोदना ॥

अथाहावादयो वक्तव्याः ; आहावं निविदं सूक्तं च विधत्ते— "ब्रह्म वा आहावः, क्षत्रं निवित्, विट् सूक्त माह्वयते ; ऽथ निविदं दधाति, ब्रह्मण्येव तत् क्षत्र मनुनियुनक्ति; निविदं शस्त्वा सूक्तं शंसति,—क्षत्रं वै निवित्, विट् सूक्तं, क्षत्र एव तद्विश मनुनियुनक्ति"-इति। "शोंसावोम्"- इत्यनेन मन्त्रेण शंसनकाले होताध्वर्यु माह्वयति, सोऽयम् 'आहावः'*; "अग्निर्देवेद्धः" इत्यादिभिर्वक्ष्यमाणैः पदैः† युक्ता क्षत्ररूपा 'निवित्' ; "प्र वो देवायाग्नये"-इत्यादिकं समस्तं सूक्तम् (मं० ३.१३.१—७.)। तदेतत् त्रयं क्रमेण ब्राह्मणक्षत्रियवैश्यरूपम्। तत्र ब्राह्मणरूपत्वेन प्रथमम् 'आह्वयते' मन्त्रेणाध्वर्योराह्वानं कुर्यात्। 'अथ' अनन्तरं क्षत्रियरूपत्वेन 'निविदं दधाति' अग्निर्देवेद्ध इत्यादि पदसमूहं

---

* सांख्या० श्रौ० १३.६। आश्व० श्रौ० ५.९.१।

† तद्यथा निविद्भागे— "अग्निर्देवेद्धः। अग्निर्मन्विद्धः। अग्निः सुषमित्। होता देववृतः। होता मनुवृतः। प्रणीर्यज्ञानाम्। रथीरध्वराणाम्। अतूर्तो होता। तूर्णिर्हव्यवाट्। आ देवो देवान् वक्षत्। यक्षदग्निर्देवो देवान्। सो अध्वरा करति जातवेदाः"—इति (१.१—१२.)। उत्तरस्मिन् खण्डे एतानि पदानि विधास्यन्ते।

(निवि० १, १—१२) वदेत्। तथा सति 'ब्रह्मण्येव' ब्राह्मणजातावेव 'क्षत्रं' क्षत्रियजातिम् 'अनुनियुनक्ति'। प्रथमतो ब्राह्मणजातिः, पश्चात् क्षत्रियजातिरित्येवं नियोगः क्लृप्तो भवेत्। तां निविदं शस्त्वा पश्चात् "प्र वो देवाय"-इति सूक्तं शंसेत्। तथा सति क्षत्रियजातिरूपायां निविदि वैश्यजातिरूपं सूक्तम् 'अनुनियुनक्ति' आनुकूल्येन पश्चादवस्थापयति। यः पूर्व मुक्तस्तूष्णींशंसः, ये च निवित्सूक्ते, तदेतत् त्रय माज्यनामकशस्त्रस्य रूपम्। तदुक्तं सम्प्रदायविद्भिः— 'तूष्णींशंसनिवित्सूक्तैराज्यशस्त्रं त्रिपूर्वकम्'-इति * ॥

अथ कश्चिदभिचारप्रयोगं विधत्ते— "यं कामयेत क्षत्रेणैनं व्यर्धयानीति, मध्य एतस्यै निविदः सूक्तं शंसेत्; क्षत्रं वै निविद्, विट् सूक्तं, क्षत्रेणैवैनं तद् व्यर्धयति"-इति। येयं द्वादशपदात्मिका निविदस्ति, तस्या मध्ये सूक्तशंसने सति क्षत्रियजातिरूपायाः निविदः खण्डितत्वात् 'एनं' यजमानं क्षत्रियजात्या 'व्यर्धं' वियुक्तं विरोधिनं करोति। अतो यजमान मुद्दिश्य होता यत्कामितं तत्सिध्यतीत्युक्तं भवति। अभिचारान्तरं विधत्ते— "यं कामयेत विशैनं व्यर्धयानीति, मध्य एतस्य सूक्तस्य निविदं शंसेत्; क्षत्रं वै निविद्, विट् सूक्तं, विशैवैनं तद् व्यर्धयति"-इति। "प्र वो देवाय"-इत्यस्य सूक्तस्य वैश्यस्थानीयस्य मध्ये निविदः शंसने सति वैश्यजातेः खण्डितत्वात् तद्विरोधी यजमानस्य भवति ॥

प्रतिकूलं प्रयोगद्वयं विधायानुकूलं प्रयोगं विधत्ते— "य मु कामयेत सर्व मेवास्य यथापूर्वं मृजुक्लृप्तं स्यादित्याह्वयेताथ निविदं दध्यादथ सूक्तं शंसेत्सो सर्वस्य क्लृप्तिः"-इति। 'यमु' यन्तु यजमानं

---

* "प्र वो देवायेत्याज्य मुपसन्तनुयात्"-इति आश्व० श्रौ० ५.९.१५।

भवति । पूर्वोक्तस्य द्वेष्यस्य यजमानस्य व्यावृत्त्यर्थः 'उ'-शब्दः । 'अस्य' यजमानस्य 'सर्व मेव' ब्राह्मणक्षत्रियवैश्यजातिरूपं 'यथापूर्वम्' उत्तमजातेः पूर्वता मनतिक्रम्य 'ऋजुक्लृप्तं' सम्यक् सम्पादितं स्यादिति कामनायां "शोंसावोम्"-इत्याह्वावः प्रथमः, ततः "अग्निर्देवेद्धः"-इति निवित्, ततः "प्र वो देवाय"-इति सूक्तं शंसेत् । 'सो' मेव उक्तानुष्ठितिरेव 'सर्वस्य' जातित्रयस्य 'क्लृप्तिः' समीचीनकल्पना भवति ॥

अथ निविदः प्रशंसितु माख्यायिका माह— "प्रजापतिर्वा इद मेक एवाग्र आस ; सो ऽकामयत प्रजायेय भूयान्त्स्या मिति ; स तपो ऽतप्यत, स वाच मयच्छत्, स संवत्सरस्य परस्ताद् व्याहरद् द्वादशकृत्वो ; द्वादशपदा वा एषा निविदेतां वाव तां निविदं व्याहरत्, तां सर्वाणि भूतान्यन्वसृज्यन्त"-इति । 'इदम्' इदानीं दृश्यमानं जगत् 'अग्रे' स्वोत्पत्तेः पूर्वं 'प्रजापतिः' ईश्वर एक एव आस वै । स च अकामयत,—अहं मेव प्रजायेय' प्रजारूपेणोत्पद्येय । तथा सति पूर्वस्मादेकत्वावस्थारूपाद् 'भूयान्' अतिप्रभूतः स्या मिति । कामयित्वा 'सः' प्रजापतिः सृष्टिसाधनं तपः कृतवान् । तस्मिंस्तपसि 'वाचम् अयच्छत्' मौनव्रतं कृतवान् । तथा कृत्वा संवत्सरादूर्ध्वं द्वादशकृत्वो वाच मुच्चारितवान् । सेय मुच्चारिता वागेषा द्वादशपदोपेता निवित् सम्पन्ना । ता मेता मेव निविदं प्रजापतिर्व्याहृतवान् ; 'तां' निविदम् 'अनु' तत्सामर्थ्यात् सर्वाणि भूतानि असृज्यन्त ॥

उक्तार्थं दृढयितुं कञ्चिन्मन्त्र मुदाहरति— "तदेतदृषिः पश्यन्नभ्यनूवाच,—स पूर्वया निविदा कव्यतायोरिमाः प्रजा अजनयन्मनूना मिति"-इति । 'तदेतत्' प्रजापतेः सर्जनं दिव्यदृष्ट्या

पश्यन् कुत्सनामको महर्षिः मन्त्रेणाऽन्वनूवाच । "स पूर्वया"-इत्यादिर्मन्त्रः (सं०१.९६.२.)। 'सः' प्रजापतिः 'पूर्वया' प्रथमं प्रादुर्भूतया 'निविदा' द्वादशपदरूपया 'कव्यता' कवित्वं शब्दस्तुत्वम् 'आयोः' आगतवान् प्राप्तवानित्यर्थः। तत ऊर्ध्वं 'मनूनां' वैवस्वतादीनां सम्बन्धिनीः 'इमाः' ब्राह्मणक्षत्रियादिरूपाः 'प्रजाः' 'अजनयत्'। 'इति' अयं मन्त्रः पूर्वोक्त मेवार्थं ब्रूते ॥

निविदं प्रशस्य तदनुष्ठानं प्रशंसति— "तद्यदेतां पुरस्तात् सूक्तस्य निविदं दधाति प्रजात्यै"-इति। यस्मात् प्रजापतिनैवं कृतम्, तस्माद्यदि होता सूक्तस्य पुरस्तात् 'एतां' निविदं दध्यात्, तदा सा निविद्यजमानस्य 'प्रजात्यै' प्रजोत्पादनाय सम्पद्यते ॥

वेदनं प्रशंसति — "प्रजायते प्रजया पशुभिर्य एवं वेद"-इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां पञ्चमाध्याये
प्रथमः खण्डः ॥ १ (३३) ॥

॥ अथ द्वितीयः खण्डः ॥

अग्निर्देवेद्ध इति शंसत्यसौ वा अग्निर्देवेद्ध एतं ह्हि देवा इन्धत एत मेवं तदेतस्मिँल्लोके* आयातयत्यग्निर्मन्विद्ध इति शंसत्ययं वा अग्निर्मन्विद्ध इमं हि मनुष्या इन्धते ऽग्नि मेवं तदस्मिँल्लोके

---

* 'तदेतस्मिल्लोके' ख ; 'तदेतस्मिंल्लोके' ग, घ, टी० ख, ग, घ ; 'तदस्मिंल्लोके' ङ ।

आयातयत्यग्निः सुषमिदिति शंसति वायुर्वा अग्निः सुषमिद्वायुर्हि स्वय मात्मानं समिन्धे स्वय मिदं सर्वं यदिदं किञ्च वायु मेव तदन्तरिक्षलोक आयातयति होता देववृत इति शंसत्यसौ वै होता देववृत एष हि सर्वतो देवैर्वृत एत मेव तदेतस्मिँल्लोक आयातयति होता मनुवृत इति शंसत्ययं वा अग्निर्होता मनुवृतोऽयं हि सर्वतो मनुष्यैर्वृतोऽग्नि मेव तदस्मिँल्लोक आयातयति प्रणीर्यज्ञाना मिति शंसति वायुर्वै प्रणीर्यज्ञानां यदा हि प्राणित्यथ यज्ञोऽथाग्निहोत्रं वायु मेव तदन्तरिक्षलोक आयातयति रथीरध्वराणा मिति शंसत्यसौ वै रथीरध्वराणा मेष हि यथैतच्चरति रथीरिवैत मेव तदेतस्मिँल्लोक आयातयत्यतूर्तो होतेति शंसत्ययं वा अग्निरतूर्तो होतेमं ह न कश्चन तिर्यञ्चं तरत्यग्नि मेव तदस्मिँल्लोक आयातयति तूर्णिर्हव्यवाडिति शंसति वायुर्वै तूर्णिर्हव्यवाड् वायुर्हीदं सर्वं सद्यस्तरति यदिदं किञ्च वायुर्देवेभ्यो हव्यं वहति वायु मेव तदन्तरिक्षलोक आयातयत्या देवो देवान्वक्षदिति शंसत्यसौ वै देवो देवानावहत्येत मेव तदेतस्मिँल्लोक आयातयति यक्षदग्निर्देवो देवानिति शंसत्ययं

वा अग्निर्देवो देवान् यजत्य॑ग्नि मेव तद॑स्मिँल्लोक आयातयति॑ सो अध्वरा करति जातवेदा इति शंसति॑ वायुर्वै जातवेदा॑ वायुर्हीदं सर्वं करोति यदिदं किञ्च॑ वायु मेव तदन्तरिक्षलोक आयातयति॑ ॥ २ (३४) ॥

द्वादशपदोपेतायाः निविदः प्रथमं पदं विधत्ते— “अग्निर्देवेद्ध इति शंसत्यसौ वा अग्निर्देवेद्धः ; एतं हि देवा इन्धते,—एत मेव तदेतस्मिँल्लोक आयातयति”-इति । देवैरिद्धः प्रज्वालितोऽग्निरित्येष निविदि प्रथमभागस्यार्थः । तं भागं होता शंसेत् । ‘असौ वै’ आदित्यमण्डलेऽवस्थित एव प्रकाशो देवैरिद्धोऽग्निः । यस्मात् ‘एतं’ द्युलोकवर्त्तिनं प्रकाशं देवाः ‘इन्धते’ इद्धं दीपितं समृद्धं कुर्वन्ति, ‘तत्’ तेन प्रथमभागपाठेन एतदेवादित्यरूपं प्रकाशम् ‘एतस्मिन्’ द्युलोके ‘आयातयति’ प्रसारयति ॥

द्वितीयं पदं विधत्ते— “अग्निर्मन्विद्ध इति शंसत्ययं वा अग्निर्मन्विद्धः ; इमं हि मनुष्या इन्धते,—ऽग्नि मेव तदस्मिँल्लोक आयातयति”-इति । अङ्गाररूपोऽग्निर्भूलोकवर्त्तिमनुष्यैः प्रज्वाल्यते । अन्यत् पूर्ववत् ॥

तृतीयं पदं विधत्ते— “अग्निः सुषमिदिति शंसति, वायुर्वा अग्निः सुषमिद् ; वायुर्हि स्वय मात्मानं समिन्धे,—स्वय मिदं सर्वं यदिदं किञ्च, वायु मेव तदन्तरिक्षलोक आयातयति”-इति । शोभना समित् प्रकाशनं सञ्चरणरूपं यस्य वायोः, सोऽयं ‘सुषमित्’ । तस्याग्नित्वं गतिहेतुत्वाद्यौगिकम् । ‘अगि गतौ’-

इत्यत्राम्नातोऽन्यत्रोऽयं मन्त्रः * । प्रथमपर्यायेऽप्यादित्यपरत्व मेवं योजनीयम् । वायुर्हि स्वात्मानं सर्वं जगच्च 'समिन्धे' सम्यक् प्रकाशयति, व्यापारक्षमं करोतीत्यर्थः ॥

चतुर्थं पदं विधत्ते — "होता देववृत इति शंसत्यसौ वै होता देववृतः ; एष हि सर्वतो देवैर्वृतः, — एत मेव तदेतस्मिँल्लोक आयातयति"—इति । 'असौ' आदित्यः स्वोदयास्तमयाभ्यां सायं प्रातर्होमनिष्पादकत्वेन 'होता' । स वै द्युलोके वर्त्तमानत्वात् 'देवैर्वृतः' ॥

पञ्चमं पदं विधत्ते "होता मनुर्वृत इति शंसत्ययं वा अग्निर्होता मनुर्वृतो ; ऽयं हि सर्वतो मनुष्यैर्वृतो,—ऽग्नि मेव तदस्मिँल्लोक आयातयति"—इति । भूलोकेऽवस्थितोऽग्निः होमाधिकरणत्वात् 'होता', यजमानर्त्विग्भिर्वेष्टितत्वात् 'मनुर्वृतः' ॥

षष्ठं पदं विधत्ते — "प्रणीर्यज्ञाना मिति शंसति ; वायुर्वै प्रणीर्यज्ञानां ; यदा हि प्राणित्यथ यज्ञो ऽथाग्निहोत्रं ; वायु मेव तदन्तरिक्षलोक आयातयति" इति । यस्मात् प्रकर्षेण नयति वायुस्तस्मादेव 'यज्ञानां प्रणीः' ; यस्मिन् काले पुरुषः 'प्राणिति' प्राणवायुना चेष्टते, तदा यज्ञो भवति । तस्यैव व्याख्यान मुदाहरणरूप मथाग्निहोत्र मिति ; प्राणवायुचेष्टया अग्निहोत्रगताधिकरणादिव्यापारा निष्पद्यन्ते ॥

सप्तमं पदं विधत्ते — "रथीरध्वराणा मिति शंसत्यसौ वै रथीरध्वराणा मेष हि यज्ञैरसर्ति रथीरिवैत मेव तदेतस्मिँल्लोक आयातयति" इति । 'असौ' आदित्योऽध्वराणां प्रकाशनाय 'रथीः' भवति । रथवान् भूत्वा सञ्चरति । तमेवार्थं एषः हीत्यादिनोच्यते । यथा लोके 'रथीरिव' कश्चन रथयानेन 'एतत्'

---

* ऋ० प०, षा० पा० ५. ३८, अना० ४ ५१. १ ।

गन्तव्यस्थानं प्रति चरति, तथैव आदित्योऽपि रथयुक्त एव चरति। शाखान्तरे तु तदीयरथप्रदर्शनपूर्वक मेव मन्त्रो व्याख्यातः—"रथी रध्वराणा मित्याह एष हि देवरथः"-इति (तै० सं० २. ५. ९. २.) ॥

अष्टमं पदं विधत्ते — "अतूर्तो होतेति शंसत्ययं वा अग्निरतूर्तो होतेमं ह न कश्चन तिर्यञ्चं तरत्यग्नि मेव तदस्मिँल्लोक आयातयति" इति। भूलोकवर्ती वह्निः 'अतूर्तः' केनाप्यतीर्णः; मार्गमध्ये 'तिर्यञ्चं' मार्गस्यावरोधकत्वेनावस्थितं प्रौढं दावाग्निं कश्चिदपि तरितुं न समर्थः ॥

नवमं पदं विधत्ते — "तूर्णिर्हव्यवाडिति शंसति; वायुर्वै तूर्णिर्हव्यवाड्; वायुर्हीदं सर्वं सद्यस्तरति यदिदं किञ्च, वायुर्देवेभ्यो हव्यं वहति,—वायु मेव तदन्तरिक्षलोक आयातयति"-इति। तरतीति 'तूर्णिः'; वायोः सर्वतरणसामर्थ्यं प्रसिद्धम्। हव्यं वहतीति 'हव्यवाट्' हविर्वहनस्य क्रियारूपस्य वायुनिष्पाद्यत्वादसौ हव्यं वहति ॥

दशमं पदं विधत्ते— "आ देवो देवान्वक्षदिति शंसत्यसौ वै देवानावहत्येत मेव तदेतस्मिँल्लोक आयातयति" इति। 'असौ' आदित्यो देवः, स्वोदयास्तमयाभ्यां होमकालसूचनेन देवानाम् 'आ वक्षत्' आवहति ॥

एकादशं पदं विधत्ते— "यक्षदग्निर्देवो देवानिति शंसत्ययं वा अग्निर्देवो देवान् यजत्यग्नि मेव तदस्मिँल्लोक आयातयति"-इति। 'अयम्' भूमौ दृश्यमानोऽग्निः देवो देवान् यजतीति प्रसिद्धम् ॥

द्वादशं पदं विधत्ते— " सो अध्वरा करति जातवेदा इति

शंसति ; वायुर्वै जातवेदा, वायुर्हीदं सर्वं करोति यदिदं किंच,—वायु मेव तदन्तरिक्षलोक आयातयति''—इति । उच्छ्वासनिश्वासप्रदानेन जातं प्राणिनं वेदयति जीवनयुक्तत्वेन ज्ञापयतीति वायुः 'जातवेदाः' । स च 'अध्वरा' सर्वयज्ञान् 'करोति' निष्पादयति ; व्यापाररूपस्यानुष्ठानस्य वायुधीनत्वात् ॥

एषु द्वादशसु पदेषु सूर्याग्निवायवश्चतुरावृत्ताः ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां पञ्चमाध्याये
द्वितीयः खण्डः ॥ २ (२४) ॥

॥ अथ तृतीयः खण्डः ॥

प्र वो देवायाग्नय इत्यनुष्टुभः प्रथमे पदे विहरति॑ तस्मात् स्त्र्यूरू विहरति॑ समस्यत्युत्तरे पदे॑ तस्मात्पुमानूरू समस्यति॑ तन्मिथुनं मिथुन मेव तदुक्थमुखे करोति प्रजात्यै॑ प्रजायते प्रजया पशुभिर्य एवं वेद॑ प्र वो देवायाग्नय इत्येवानुष्टुभः॑ प्रथमे पदे विहरति॑ वज्र मेव तत्परोवरीयांसं करोति॑ समस्यत्येवोत्तरे पदे॑ आरम्भणतो वै वज्रस्याणिमाथो दण्डस्याथो परशोर्वज्र मेव तत्प-

हरति॑ द्विषते भ्रातृव्याय वधं॑ योऽस्य स्तृत्यस्तस्मै स्तर्तवै॑ ॥ ३ (३५) ॥

निविदो यानि द्वादश पदानि भागरूपाणि, तान्युक्तानि ; अथ तदनन्तरभावि सूक्तं विधत्ते — "प्र वो देवायाग्नय इत्यनुष्टुभः" - इति । प्र व इत्यादि सूक्तस्य (सं० ३. १३) प्रतीकम् । तस्मिन् सूक्ते याः सप्तसंख्याका अनुष्टुप्छन्दस्का ऋचः सन्ति, ताः शंसेदिति शेषः । प्रथमायामृचि यौ प्रथमद्वितीयपादौ, तयोः विहरणं विधत्ते — "प्रथमे पदे विहरति, तस्मात् स्त्र्यूरू विहरति" इति । विहरणम् पृथक्करणम् । द्वयोः पादयोर्मध्ये विहारं विच्छेदं कृत्वा पठेत् । तस्मादेव पादयोः पार्थक्यनियोगः, तस्माल्लोकेऽपि स्त्रीसंभोगकाले स्वकीये ऊरू 'विहरति' वियोजयति । तस्यामृचि तृतीयचतुर्थपादयोरविच्छेदं विधत्ते— 'समस्यत्युत्तरे पदे तस्मात् पुमानूरू समस्यति ; तन्मिथुनं, --मिथुनमेव तदुक्थमुखे करोति प्रजात्यै' इति । यस्मात् तृतीयचतुर्थयोरूरुस्थानीययोः संयोजनं, तस्माल्लोकेऽपि उपरिवर्ती पुमान् भोगकाले स्वकीये ऊरू 'समस्यति' संयोजयति । तदुभयं मिलित्वा मिथुनं भवति । तस्मात् 'उक्थमुखे' शस्त्रस्योपक्रमे मिथुनमेव करोति ; तच्च यजमानस्य प्रजननाय सम्पद्यते । वेदनं प्रशंसति "प्रजायते प्रजया पशुभिर्य एवं वेद" इति ॥

पुनरप्युक्तमेवानूद्य प्रकारान्तरेण प्रशंसति— "प्र वो देवायाग्नय इत्यनुष्टुभः प्रथमे पदे विहरति ; वज्रमेव तत्परोवरीयांसं करोति,—समस्यत्येवोत्तरपदे ; आरम्भणतो वै वज्रस्याणिमा, दण्डस्याधो परशोर्वज्रमेव तत्प्रहरति,— द्विषते भ्रातृव्याय वधं

योऽस्य स्तुत्यस्तस्मै स्तुतये' इति । 'इत्येवानुष्टुभः' इति योऽयं [illegible]कारः, स पूर्वस्यानुवादः ; न तु नूतनविधिरिति ज्ञापनार्थः । 'परोवरीयांसं' परस्तादुत्तरभागे अतिशयेन स्थूलम्, ईदृशं वज्रं सूक्तपठनेन सम्पादयति । प्रथमायाः ऋचः उत्तरार्द्धे पदे, तत्पादयोः समसनम्, तदपि वज्रसादृश्यार्थम् । [illegible] [illegible] 'अणिमा' मूले सौक्ष्म्यं विवक्षितं । वज्रशब्देन [illegible] [illegible] अभिधीयते ; तस्य हि 'मूले' [illegible] सूक्ष्मता भवति, उपरि तु विस्तारः । दण्डशब्देन [illegible] [illegible] । [illegible] हस्तग्रहणस्थाने मूले सूक्ष्मा, प्रहारस्थाने अग्रे स्थूला, [illegible] तथाविधः । यथायं त्रिविधो वज्रः, [illegible] [illegible] [illegible] [illegible] [illegible]पाद-विहरणेन सूक्ष्मम्, [illegible] स्थूलम् । [illegible] ईदृशं सूक्तद्वयं वज्रं [illegible] [illegible] [illegible] [illegible] प्रदर्शयति ;—— यः शत्रुस्य 'भ्रातृव्यः' [illegible], [illegible] [illegible] तस्य छिन्नमेव भवति ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणभाष्ये द्वितीयपञ्चिकायाः पञ्चमाध्याये
तृतीयः खण्डः [illegible] [illegible]

* * *

॥ अथ चतुर्थः खण्डः ॥

देवासुरा वा एषु लोकेषु समयतन्त ते वै देवाः सद एवायतनमकुर्वत तान्सदसोऽजयंस्त आग्नीध्रं

सम्प्रापद्यन्त ते ततो न पराजयन्त तस्मादाग्नीध्र उपवसन्ति न सदस्याग्नीध्रे ह्यधारयन्त यदाग्नीध्रेऽधारयन्त तदाग्नीध्रस्याग्नीध्रत्वं तेषां वै देवाना मसुराः सदस्यानग्नीन्निर्वापयाञ्चक्रुस्ते देवा आग्नीध्रादेव सदस्यानग्नीन्विहरन्त तैरसुररक्षांस्यपाघ्नत तथैवैतद्यजमाना आग्नीध्रादेव सदस्यानग्नीन्विहरन्त्यसुररक्षांस्येव तदपघ्नते ते वै प्रातराज्यैरेवाजयन्त आयन् यदाज्यैरेवाजयन्त आयंस्तदाज्याना माज्यत्वं तासां वै होत्राणा मायतीना माजयन्तीना मच्छावाकीया हीयत तस्या मिन्द्राग्नी अध्यास्ता मिन्द्राग्नी वै देवाना मोजिष्ठौ बलिष्ठौ सहिष्ठौ सत्तमौ पारयिष्णुतमौ तस्मादैन्द्राग्न मच्छावाकः प्रातःसवने शंसतीन्द्राग्नी हि तस्या अध्यास्तां तस्मात् पुरस्तादन्ये होत्रकाः सदः प्रसर्पन्ति पश्चाच्छावाकः पश्चेव हि हीनो ऽनुसञ्जिगमिषति तस्माद्यो ब्राह्मणो बह्वृचो वीर्यवान्स्यात्सो ऽस्याच्छावाकीयां कुर्यात्तेनैव सा ऽहीना भवति ॥
॥ ४ (३६) ॥

अथाग्नीध्रीयवासादिविध्यर्थ माख्यायिका माह—‘‘देवासुरा वा एषु लोकेषु समयतन्त ; ते वै देवाः सद एवायतन मकुर्वत ;

तान्सदसो ऽजयंस्त आग्नीध्रं समापद्यन्त; ते ततो न पराजयन्त; तस्मादाग्नीध्र उपवसन्ति, न सदस्याग्नीध्रे ह्यधारयन्त; यदाग्नीध्रे ऽधारयन्त, तदाग्नीध्रस्याग्नीध्रत्वम्”--इति । पुरा कदाचिद् देवाश्चासुराश्च लोकविषये ‘समयतन्त’ सङ्ग्रामं कृतवन्तः । वय मेवैषु लोकेषु निवसामो न तु यूय मिति एवं परस्परस्पर्द्धा । तदानीं देवाः सौमिकवेद्यां प्राग्वंशस्य पूर्वस्यां दिशि येयं सदोऽभिधाना शाला, ता मेव स्वस्य निवासस्थानं कृतवन्तः । तत्रावस्थितान् तान् देवान्, असुराः सदसः ‘अजयन्’ जित्वा सदसो निःसारितवन्त इत्यर्थः । ततो देवा निर्गताः सन्तः आग्नीध्राभिधां शालां प्राप्तवन्तः । ते देवाः प्राप्य तत्र आग्नीध्रीयं ‘न पराजयन्त’ तत्रासुराणा मेव पराजयो न तु देवानाम् । यस्मादेवं तस्मादाग्नीध्रशालाया मुपवसथे दिने यजमानाः ‘उपवसन्ति’ अग्नीत्समीपे निवसेयुः ; न तु सदसि निवासः कर्त्तव्यः । आग्नीध्रे हि देवाः पलायनं परित्यज्य स्वात्मानं धारितवन्तः, तस्मात् तत्र निवासो युक्तः । यस्मादाग्नीध्रे धारितवन्तः, तस्मादाग्नीध्रत्वं नाम सम्पन्नम् ; अग्निसमीपे स्वात्मधारणस्य प्रवृत्तिनिमित्तत्वात् ॥

अथ सदस्यवस्थितेषु धिष्ण्येष्वाग्नीध्रादग्निविहरणं विधत्ते--“तेषां वै देवाना मसुराः सदस्यानग्नीन्निर्वापयाञ्चक्रुस्ते देवा आग्नीध्रादेव सदस्यानग्नीन्विहरन्त ; तैरसुररक्षांस्यपाघ्नत ;—तथैवैतद्यजमाना आग्नीध्रादेव सदस्यानग्नीन्विहरन्त्यसुररक्षांस्येव तदपघ्नते”--इति । पुरा देवानां सम्बन्धिनो येऽग्नयः सदस्यवस्थितेषु धिष्ण्येष्वासन्, तान् सर्वान् देवपलायनेन सदःप्रविष्टा असुराः ‘निर्वापयाञ्चक्रुः’ जलप्रक्षेपेणाग्नीन् शान्तान् अकुर्वत । तदानीं ते देवा आग्नीध्रे स्थित्वा तत्रत्यान् सदस्यान् अग्नीन् ‘विहरन्त’

सदस्यवस्थितेषु धिष्ण्येषु पृथक् पृथक् अग्नीन् 'विहृतवन्तः' स्थापितवन्तः। तैः प्रबलैरग्निभिः असुरान् रक्षांसि च सदसि हतवन्तः। यथा देवैर्विहरणं कृतम्, तथैवैतस्मिन्नपि काले यजमाना आग्नीध्रादेव वह्नेः सदस्यानग्नीन्विहरेयुः। तेन विहरणेन असुरान् रक्षांसि च 'तदपघ्नते' तत्तदानीं नाशयन्ति। सोऽयमर्थः सर्वोऽपि शाखान्तरे सङ्क्षिप्याम्नातः— "देवा वै यज्ञं पराजयन्त, तमाग्नीध्रात् पुनरपाजयन्नेतद्वै यज्ञस्यापराजितं यदाग्नीध्रं यदाग्नीध्राद्धिष्णियान् विहरति यदेव यज्ञस्यापराजितं तत एवैनं पुनस्तनुते" इति (तै० सं० ६. ३.१.१.)॥

इत्थं शंसनस्थानगतेषु धिष्ण्येषु अग्निविहरणं विधाय तत्र शंसनीयानां शस्त्राणां यदेतदाज्यनामकत्वं तदेतच्छब्दनिर्वचनेन विस्पष्टयति— "ते वै प्रातराज्यैरेवाजयन्त आयन्; तदाज्यैरेवाजयन्त आयंस्तदाज्यानामाज्यत्वम्" इति। त एव देवाः प्रातःसवने यान्याज्यनामकानि शस्त्राणि, तैरासमन्ताज्जयं प्राप्नुवन्तः आगच्छन्; यस्मादेवं तस्मादा समन्ताज्जयन्त्येभिरिति व्युत्पत्त्या शस्त्राणामाज्यनाम सम्पन्नम्। अनेनैव न्यायेन सामवेदे "पञ्चदशान्याज्यानि" इतिवाक्येन (ता० ब्रा० २०. ३. १.) विहितानां पञ्चदशस्तोमयुक्तानां स्तोत्राणामाज्यनामत्वं द्रष्टव्यम् *॥

अथाच्छावाकस्य शस्त्रं विधत्ते— "तासां वै होत्राणामायतीनामाजयन्तीनामच्छावाकीया नोदयत; तस्यामिन्द्राग्नी अध्यास्तामिन्द्राग्नी वै देवानामोजिष्ठौ बलिष्ठौ सहिष्ठौ सत्तमौ

---

* "प्रजापतिर्देवेभ्य आत्मानं यज्ञं कृत्वा प्रायच्छत् तेऽन्योऽन्यस्मा अग्राय नातिष्ठन्त तानब्रवीदाजिमस्मिन्नितेति त आजिमायन्यदाजिमायंस्तदाज्यानामाज्यत्वम्"—इत्याद्याख्यानसमाप्ति द्रष्टव्यम् (ता० ब्रा० ७. २.)।

पारयिष्णुतमौ ; तस्मादैन्द्राग्न मच्छावाकः प्रातःसवने शंसतीन्द्राग्नी हि तस्या मध्यास्ताम्"-इति । प्रशास्ता, ब्राह्मणाच्छंसी, अच्छावाक इति एते शस्त्रिणो होत्रका यद्यपि पुरुषाः, तथापि तदीयतनुविवक्षया 'तासाम्'-इत्यादिः स्त्रीलिङ्गनिर्देशः । यास्तनवः पूर्वं मसुरान् अपाघ्नत, तासा मेव 'होत्राणां' होत्रकतनूनाम् 'आयतीनां' सदः प्रवेष्टु मागच्छन्तीनाम्, 'आजयन्तीनां' सर्वतो जयं प्राप्नुवन्तीनां मध्ये 'अच्छावाकीया' अच्छावाकसम्बन्धिनी तनुः 'अहीयत' हीना अभूत् ; सदः समागन्तुं नाशक्नोदित्यर्थः । तदनुग्रहार्थं 'तस्यां' तन्वा मिन्द्राग्नी 'अध्यास्ताम्' अधिष्ठाय निवासं कृतवन्तौ । युज्यते हि इन्द्राग्न्योरनुग्राहकत्वम् ; यस्माद् देवानां मध्ये इन्द्राग्नी 'ओजिष्ठौ' ओजसा बलहेतुना अष्टमधातुना अत्यन्त मुपेतौ । अतएव 'बलिष्ठौ' अतिशयेन शरीरशक्तियुक्तौ । तत एव 'सहिष्ठौ' अतिशयेन शत्रूनभिभवितारौ । स्वभक्तविषये तु 'सत्तमौ' अतिशयेन सन्तौ, सन्मार्गवर्त्तिना मनुग्रहीतारावित्यर्थः । अतएव 'पारयिष्णुतमौ' स्वभक्तैरनुष्ठीयमानं कर्मातिशयेन पारं नेतुं सदोद्युक्तौ । तस्मादयम् अच्छावाक इन्द्राग्निदेवताकं शस्त्रं प्रातःसवने शंसेत् । "इन्द्राग्नी आगतम्" इत्यादिकं (सं० ३, १२.) तच्छस्त्रम् * । यस्मादिन्द्राग्नी तस्या मच्छावाकतन्वा मध्यास्ताम्, तस्मादैन्द्राग्नशस्त्रं तस्य युक्तम् ॥

इदानी मच्छावाकस्य सदःप्रवेशे विशेषं विधत्ते — "तस्मादु पुरस्तादन्ये होत्रकाः सदः प्रसर्पन्ति, पश्चाच्छावाकः ; पश्चेव हि हीनोऽनुसञ्जिगमिषति"-इति । यस्मादच्छावाकव्यतिरिक्ताः प्रशा-

---

* "इन्द्राग्नी आगतं सुतम्"-इति आश्व० श्रौ० ५. १०. २८ ।

स्त्वादयो होत्रकाः सहसा गन्तुं शक्नुवन्ति, न त्वच्छावाकः; तस्मात्प्रशास्त्रादयः पुरस्तात्सदः प्रसर्पेयुः, अच्छावाकस्तु पश्चात्प्रसर्पत्। लोकेऽपि हि 'हीनः' अशक्तः 'पश्चेव हि' पश्चादेव जिगमिषतीति प्रसिद्धम्। अत्र पुरस्तात्-पश्चा-शब्दौ देशतः कालतश्चेति वेदितव्यौ ॥

अच्छावाकीयशस्त्रं प्रशंसति— "तस्माद्यो ब्राह्मणो बह्वृचो वीर्यवान्त्स्यात्सो ऽस्याच्छावाकीयां कुर्यात्तेनैव सा ऽहीना भवति" -इति। यस्मादिन्द्राग्नी तस्यां तन्वा मधिष्ठाय निवमतः, तस्माल्लोके यः कोऽपि ब्राह्मणो 'बह्वृचः' ऋग्वेदाध्यायी, 'वीर्यवान्' वेदपाठसामर्थ्यातिशयोपेतः स्यात्, सः 'अस्य' यजमानस्य 'अच्छावाकीयां कुर्यात्' अच्छावाकसम्बन्धं मैन्द्राग्नशस्त्रं पठेत्। 'तेनैव' पाठेन 'सा' तदीयतनुः 'अहीना व्यवहर्तुं' समर्था भवति ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां पञ्चमाध्याये
चतुर्थः खण्डः ॥ ४ (२६) ॥

॥ अथ पञ्चमः खण्डः ॥

देवरथो वा एष यद्यज्ञस्त॑स्यैतावन्तरौ रश्मी॑ यदाज्यप्रउगे॑ तद्यदाज्येन पवमान मनु शंसति॑ प्रउगेणाज्यं देवरथस्यैव॑ तदन्तरौ रश्मी विहरत्यलोभाय॑ ता मनु कृतिं मनुष्यरथस्यै॑वान्तरौ रश्मी॑ विहरन्त्यलोभाय॑ नास्य देवरथो लुभ्यति॑ न मनुष्यरथो य

एवं वेद तदाहुर्यथा वाव स्तोत्र मेवं शस्त्रं पावमानीषु सामगाः स्तुवत आग्नेयं होताज्यं शंसति कथ मस्य पावमान्यो ऽनुशस्ता भवन्तीति यो वा अग्निः स पवमानस्तदप्येतदृषिणोक्त मग्निरृषिः पवमान इत्येवं ह्यस्याग्नेयीभिरेव प्रतिपद्यमानस्य पावमान्यो ऽनुशस्ता भवन्ति तदाहुर्यथा वाव स्तोत्र मेवं शस्त्रं गायत्रीषु सामगाः स्तुवत आनुष्टुभं होताज्यं शंसति कथ मस्य गायत्र्यो ऽनुशस्ता भवन्तीति सम्पदेति ब्रूयात् सप्तैता अनुष्टुभस्तास्त्रिः प्रथमया त्रिरुत्तमयैकादश भवन्ति विराड् [illegible] द्वात्रिंशी न वा एकेनाक्षरेण छन्दांसि वियन्ति न द्वाभ्यां ताः षोडश गायत्र्यो भवन्त्येवं ह्यस्यानुष्टुब्भिरेव प्रतिपद्यमानस्य गायत्र्यो ऽनुशस्ता भवन्त्यग्न इन्द्रश्च दाशुषो दुरोण इत्याग्नेन्द्र्या शंसति न वा एताविन्द्राग्नी सन्तौ व्यजयेता माग्नेन्द्रौ वा एतौ सन्तौ व्यजयेतां तस्मादाग्नेन्द्र्या शंसति विजित्या एव सा विराट् त्रयस्त्रिंशदक्षरा भवति त्रयस्त्रिंशद्वै देवा अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च तत्प्रथम उक्थमुखे देवता अक्षरभाजः करोत्यक्षर मक्षर मेव तद् देवता अनुप्रपिबन्ति

देवपात्रेणैव तद्देवतास्तृप्यन्ति तदाहुर्यथा वाव शस्त्रमेवं याज्याग्नेयं होताज्यं शंसत्यथ कस्मादाग्नेन्द्र्या[१] यजतीति या वा आग्नेन्द्रैन्द्राग्नी वै सा सैन्द्राग्नमेतदुक्थं ग्रहेण च तूष्णींशंसेन चेन्द्राग्नी आगतं सुतं गीर्भिर्नभो वरेण्यम् अस्य पातं धियेषितेत्यैन्द्राग्नमध्वर्युर्ग्रहं गृह्णाति भूरग्निर्ज्योतिर्ज्योतिरग्निरिन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्रः सूर्यो ज्योतिर्ज्योतिः स्वः सूर्य इति होता तूष्णींशंसं शंसति तद्यथैव शस्त्रमेवं याज्या ॥ ५ (३७) ॥

अथाज्यशस्त्रस्य बहिष्पवमानस्तोत्रोत्तरत्वम्, प्रउगशस्त्रस्याज्यस्तोत्रोत्तरत्वं विधत्ते—"देवरथो वा एष यद्यज्ञस्तस्यैतावन्तरौ रश्मी,—यदाज्यप्रउगे; तद्यदाज्येन पवमानमनुशंसति, प्रउगेणाज्यं, देवरथस्यैव तदन्तरौ रश्मी विहरत्यलोभाय" इति; यो यज्ञोऽस्ति, एष देवानां रथ एव। 'तस्य' रथरूपस्य यज्ञस्य आज्यं प्रउगं च यच्छस्त्रद्वयं, तत् 'अन्तरौ रश्मी' मध्यवर्तिरज्जू; रथस्य पर्यवस्थितेन सारथिना ध्रियमाणत्वात् मध्यवर्तित्वम्; यस्मादेवं तस्माद्यदाज्यशस्त्रेण बहिष्पवमानम् 'अनु' पश्चात् शंसेत्, प्रउगशस्त्रेण च आज्यस्तोत्रमनु शंसेत्, तदानीं देवरथस्यैव अन्तर्वर्तिनावभ्यन्तरौ 'रश्मी' प्रग्रहौ 'विहरति' विहरणं सम्पादयति; तच्च 'अलोभाय' व्यामोहराहित्याय सम्पद्यते। रश्मिराहित्ये दुष्टाश्वा

---

[१] "०ग्नैन्द्र्या" ख।

[illegible] यत्र क्वापि दुर्गमे देशे रथनयने सति रथभङ्गरूपो व्यामोहः स्यात्, तन्माभूदिति शस्त्रद्वयं क्रमेण प्रयोक्तव्यम् ॥

लौकिकफलप्रदर्शनेन रश्मिस्थानीयं शस्त्रद्वयं प्रशंसति—“तां वा अनु कृतिं मनुष्यरथस्यैवान्तरौ रश्मी विहरन्त्यलोभाय” इति। तां ‘कृतिं’ देवरथे शस्त्रद्वयरूपरश्मिकारणाम् ‘अनु’ पश्चान्मनुष्यरथस्यैवान्तरौ सारथिनः [illegible] ‘रश्मी’ [illegible] ‘विहरन्ति’ सम्पादयन्ति; तत्र मनुष्यरथस्यालोभाय सम्पद्यते; अथासौ मनुष्यरथो यजमानस्य सम्भवतीत्यर्थः। तद्वेदनं प्रशंसति—“नास्य देवरथो लुभ्यति न मनुष्यरथो य एवं वेद” इति ॥

इदानीं स्तोत्रशस्त्रयोः वैयधिकरण्यरूपकं चोद्यमुद्भावयति—“तदाहुर्यथा वाव स्तोत्रमेवं शस्त्रं पवमानीषु सामगाः स्तुवते;—आग्नेयं होताज्यं शंसति; कथमस्य पावमान्योऽनुशस्ता भवन्तीति? यो वा अग्निः स पवमानः; तदप्येतदृषिणोक्तमग्निर्ऋषिः पवमान इति” इति। तत् तस्मिन्नाज्यशस्त्रे ब्रह्मवादिनः ‘आहुः’ चोदयन्ति। यथैव स्तोत्रं सामगैः, तथैव बह्वृचैः शस्त्रं शंसनीयम्। “स्तुतमनुशंसति” इतिविधानात्। अत्र तु सामगाः “उपास्मै गायता नरः पवमानाय” इत्यादिषु ‘पावमानीषु’ [illegible] उ० आ० १.१.१ २.२ [illegible]) बहिष्पवमानाख्येन [illegible] [illegible] अनुरूपम् होता “प्र वो

---

* “[illegible]” इति निरु० १४ [illegible] । “स्तुत-मनुशंसति” इति [illegible] “[illegible] शस्त्रम्” इति च आश्व० श्रौ० ५.१० १।

† द्रष्टव्य पृ० “[illegible]” [illegible] -इत्येव-मादिविषयः “[illegible]” इति (६.८), “इमे वै लोका [illegible] पवमानाः” ([illegible]) ।

देवायाग्नये (सं० ३.१३.१-७.)” इत्यादिक माज्यशस्त्रं शंसति । तथा सति कथ मस्य होतुः ‘पावमान्यः’ ऋचोऽनुशस्ता भवेयुः ? न हि पवमानः शस्त्रस्य देवता किन्त्वग्निरिति चोद्यम् ॥ तस्य परिहार माह—‘यो वा अग्निः, स पवमानः’ इति । अग्निपवमानदेवतयोः परस्परप्रीत्या अभेदादाग्नेय मपि सूक्तं पावमान मिति वक्तुं शक्यते। तेन पावमान्यो ऽनुशस्ताः सम्पद्यन्ते । अग्निपवमानयोरेकत्वे कञ्चिन्मन्त्र मुदाजहार—‘तदप्येतदिति (सं० ९.६६.२०.) । ‘ऋषिः’ अतीन्द्रियद्रष्टा । योऽय मग्निः, स एव पवमानो वायुः ; प्रीत्यतिशयेन एकत्वप्रतिभासात् । यद्वा, शोधकत्वादग्निरेव पवमान इति मन्त्रार्थः * ॥ परिहार मुपपाद्य निगमयति—“एवमु हास्याग्नेयीभिरेव प्रतिपद्यमानस्य पावमान्यो ऽनुशस्ता भवन्ति” इति । अग्निदेवताकाभिः सूक्तगताभि ऋग्भिः शस्त्रं प्रारभमाणस्य होतुर्बहिष्पवमानस्तोत्रगताः पवमानदेवताकाः ऋचो ऽनुशस्ता भवन्ति ॥

देवताप्रयुक्तं वैयधिकरण्यं परिहृत्य छन्दःप्रयुक्तं वैयधिकरण्यरूपं चोद्यं पूर्ववदुद्भावयति—“तदाहुर्यथा वाव स्तोत्र मेव शस्त्रं.—गायत्रीषु सामगाः स्तुवते, आनुष्टुभं होताज्यं शंसति ; कथ मस्य गायत्र्यो ऽनुशस्ता भवन्तीति ?” इति । बहिष्पवमानस्तोत्रगताः. “उपास्मै गायता” इत्याद्या ऋचो गायत्रीच्छन्दस्काः (उ० आ० १.१.१-३.१ ९.), “प्र वो देवाय”–इत्यादिक माज्यशस्त्रम् (सं० ३. १३.१-७.) अनुष्टुप्छन्दस्क मिति वैयधिकरण्यं चोद्यम् ॥

तस्य परिहार माह—“सम्पदेति ब्रूयात्” इति । अनुष्टुप्सु गायत्रीत्वे सम्पादिते सति, तया ‘सम्पदा’ वैयधिकरण्य-

---

* “अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम्”–इति सं० ९.६६.२०।

परिहारादनुकूलशंसनं भवतीति परिहारं ब्रूयात् ॥ सम्पादन-प्रकारं दर्शयति—“समेता अनुष्टुभस्तास्त्रिः प्रथमया त्रिरुत्त-मयैकादश भवन्ति ; विराड्याज्या द्वादशी ; न वा एकेनाक्षरेण च्छन्दांसि वियन्ति, न द्वाभ्यां ; ताः षोळश गायत्र्यो भवन्ति”-इति । आद्यन्तयोश्चोस्त्रिरावृत्त्या सत्यां स्वभावतः सप्ताना मनुष्टुभा मेकादशत्वं सम्पद्यते । “अग्न इन्द्रश्च” इति (सं०३.२५.४.) याज्या * विराट्छन्दस्का ; सा द्वादश्यनुष्टुबिति गणनीया । यद्यपि तस्य विराजस्त्रयस्त्रिंशदक्षरत्वादेक मक्षर मनुष्टुप्त्वादतिरिच्यते, तथाप्यल्पेन वैकल्येन छन्दो न नश्यतीति न्यायः पूर्वे मप्युदाहृतः (५३पृ०.१२पं०) । तत्र सति द्वादशस्वनुष्टुप्सु द्वादश पादान् अपनीय अवशिष्टैः पादैस्त्रिपदा गायत्र्यो द्वादश सम्पादनीयाः ; अपनीतैश्च पादैश्चतस्रो गायत्र्य इत्यनेन प्रकारेण षोड़शसङ्ख्याका गायत्र्य एव सम्पद्यन्ते, एतदेवाभिप्रेत्याह— “एव मु खल्वानु-ष्टुब्भिरेव प्रतिपद्यमानस्य सर्वा गायत्र्यो भवन्ति” इति ॥

इदानीं मैत्रावरुणस्य याज्यां विधत्ते - “अग्न इन्द्रश्च दाशुषो दुरोण इत्याग्नेन्द्र्या यजति” इति । नन्वैन्द्राग्नयत्वे पूर्वभावित्व मिन्द्रस्य प्राथम्येन श्रवणं युक्तम् ; याज्यायां तु तद्विपर्ययः कस्मात् [illegible] “न वा एतावैन्द्राग्नी सन्तौ अजयतामाग्नेन्द्रौ वा एतौ सन्तावजयताम् ; तद्यदाग्नेन्द्र्या यजति, विजित्या एव सा विराड्” इति । असुरैः सह देवानां विजय-युद्धे सति विजयार्थ मिन्द्रस्य पुरोगमनं मग्नेः पश्चाद्गमन मित्येवं न सम्पन्नम्, किन्त्वग्निः पुरोगतः इन्द्रस्तु पश्चाद्गतः । अतो विजय-

---

* “अग्न इन्द्रश्च दाशुषो दुरोण [illegible]” इति आश्व० श्रौ० ५.५.१६ ।

आनुलोमक्रमेणैवाग्निपूर्वकत्वप्रतिपादिकया यजने सति यजमानस्य विजयाय सम्पद्यते ॥

एवं याज्यागतान्यक्षराणि प्रशंसति— "त्रयस्त्रिंशदक्षरा भवति ; त्रयस्त्रिंशद्वै देवाः,—अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च ; तत्प्रथम उक्थमुखे देवता अक्षरभाजः करोति,—अक्षर मक्षर मेव तद् देवता अनुप्रपिबन्ति ; देवपात्रेणैव तद् देवतास्तृप्यन्ति" इति । अक्षराणां देवतानां च सङ्ख्यासाम्यम् 'उक्थमुखे' शस्त्राणां मध्ये मुख्ये 'प्रथमे' आज्यशस्त्रे देवताः प्रत्येव मक्षरभाजः करोति,—तास्तत्तदक्षर मेवानुसृत्य ता देवताः सोमं प्रकर्षेण पिबन्ति । तथा सति स्वयोग्येनाक्षररूपेण देवपात्रेणैव देवतास्तृप्ता भवन्तीति ॥

शस्त्रयाज्ययोर्देवताप्रयुक्तं वैयधिकरण्यरूपं चोद्यं मुद्भावयति— "तदाहुर्यथा वाव शस्त्र मेवं याज्या ऽऽग्नेयं होताज्यं शंसत्यथ कस्मादाग्नेन्द्र्या यजतीति ?" इति । शस्त्रस्याग्निरेक एव देवता, याज्यायास्त्वग्निरिन्द्रश्चेति द्वयोर्मिलितयोर्देवतात्व मिति वैयधिकरण्यम् ॥

अस्य चोद्यस्य परिहार माह—"या वा आग्नेन्द्र्यैन्द्राग्नी वै सा सैन्द्राग्न मेतदुक्थं ग्रहेण च तूष्णींशंसेन च" इति । येयम् 'आग्नेन्द्री' याज्या, सेयम् 'ऐन्द्राग्नी' अपि भवति ; द्वयोः पौर्वापर्य मविसंवादेऽपि तस्या ऋचो द्विदेवत्यत्वसद्भावाद् देवतयोः क्रमविपर्यासमात्रे ऽङ्गीकृते सति याज्याया ऐन्द्राग्नत्व मुपचरितं यथा सम्पद्यते तथैवैतद् 'उक्थम्' आज्यशस्त्र मपि ग्रहद्वारा तूष्णींशंसद्वारा चेन्द्राग्नीदेवतासहितं सम्पद्यते । तथा सत्यैन्द्राग्नत्वस्योपचरितस्य याज्याशस्त्रयोः सद्भावात् नास्ति वैयधिकरण्यम् ॥

आज्यशस्त्रस्य ग्रहद्वारकं तूष्णींशंसद्वारकं चैन्द्राग्नत्वं दर्शयति— "इन्द्राग्नी आ गतं सुतं गीर्भिर्नभो वरेण्यम्, अस्य पातं धियेषितेत्यैन्द्राग्नमध्वर्युर्ग्रहं गृह्णाति ; भूरग्निर्ज्योतिर्ज्योतिरग्निरिन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्रः सूर्यो ज्योतिर्ज्योतिः स्वः सूर्य इति होता तूष्णींशंसं शंसति ; तद्यथैव शस्त्रमेवं याज्या" इति। हे इन्द्राग्नी! 'सुतम्' अभिषुतं सोमं प्रति 'आ गतम्' आगच्छतम्। कीदृशं सुतम्? 'गीर्भिः' स्तुतिभिः, युक्तमिति शेषः। 'नभः' आकाशस्वरूपम्, आकाशवत् स्वच्छमित्यर्थः। 'वरेण्यं' वरणीयम्। आगत्य च युवां 'धिया इषिता' स्वबुद्ध्या प्रेषितौ सन्तौ 'अस्य' सोमस्य सारं 'पातं' पिबतम् (सं ३. १२. १.)। 'इति' अनेनैन्द्राग्नदेवताकमन्त्रेण अध्वर्युरैन्द्राग्नं ग्रहं गृह्णाति। तूष्णींशंसे "भूरग्निः" इत्यग्निराम्नातः, "इन्द्रो ज्योतिः" इतीन्द्रोऽप्याम्नातः (४२४ पृ०)। अत उभयसद्भावात् तूष्णींशंसोऽप्यैन्द्राग्नः। ईदृशस्य ग्रहस्य, तूष्णींशंसस्य च सम्बन्धादाज्यशस्त्रमप्यैन्द्राग्नं भवति। तस्मादाज्ययाज्ययोरैन्द्राग्नत्वसम्पादनात् नास्ति वैयधिकरण्यम् ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां पञ्चमाध्याये
पञ्चमः खण्डः ॥ ५ (३७) ॥

॥ अथ षष्ठः खण्डः ॥

होतृजपं जपति रेतस्तत्सिञ्चत्युपांशु जपत्युपांश्विव वै रेतसः सिक्तिः पुराहावाज्जपति यद्वै किञ्चो-

इमावावाञ्चस्तस्यैव तत्पराञ्चं चतुष्पद्यासीन मभ्याश्रयति तस्मात् पराञ्चो भूत्वा चतुष्पादो रेतः सिञ्चन्ति सम्यङ् द्विपाद् भवति तस्मात्सम्यञ्चो भूत्वा द्विपादो रेतः सिञ्चन्ति पिता मातरिश्वेत्याह प्राणो वै पिता प्राणो मातरिश्वा प्राणो रेतो रेतस्तत्सिञ्चत्यच्छिद्रा पद्माधा इति रेतो वा अच्छिद्र मतो ह्यच्छिद्रः सम्भवत्यच्छिद्रोक्था कवयः शंसन्निति ये वा अनूचानास्ते कवयस्त इद मच्छिद्रं रेतः प्रजनयन्नित्येव तदाह सोमो विश्वविन्नीथा निनेषद् बृहस्पतिरुक्थामदानि शंसिषदिति ब्रह्म वै बृहस्पतिः क्षत्रं सोमः स्तुतशस्त्राणि नीथानि चोक्थामदानि च दैवेन चैवैतद् ब्रह्मणा प्रसूतो दैवेन च क्षत्रेणोक्थानि शंसत्येतौ ह वा अस्य सर्वस्य प्रसवस्येशाते यदिदं किञ्च तद्यदेताभ्या मप्रसूतः करोत्यकृतं तदकृत मकरिति वै निन्दन्ति कृत मस्य कृतं भवति नास्याकृतं कृतं भवति य एवं वेद वागायुर्विश्वायुर्विश्व मायुरित्याह प्राणो वा आयुः प्राणो रेतो वाग्योनिर्योनिं तदुपसन्धाय रेतः सिञ्चति क इदं शंसिष्यति स इदं शंसिष्यतीत्याह प्रजापतिर्वै कः प्रजापतिः प्रजनयिष्यतीत्येव तदाह ॥ ६ (३८) ॥

पूर्वत्र "पराङ्ङध्वर्यो"-इत्याश्वलायनसूत्रोदाहरणेन होतुर्जपो दर्शितः (४२८पृ० *), तमिमं जपं विधत्ते— "होतृजपं जपति, रेतस्तत्सिञ्चति" इति । होतुः कर्त्तव्यो यो जपः, तं समनुतिष्ठेत् । तेन प्रजोत्पादनार्थं मादौ रेतः सिक्तं भवति ॥

तस्योच्चारणप्रकारविशेषं विधत्ते— "उपांशु जपत्युपांश्विव वै रेतसः सिक्तिः" इति । ओष्ठस्पन्दनमेव परैर्दृश्यते, न तु शब्दः श्रूयते, तादृशमुपांशुत्वम् । लौकिके रेतःसेचनेऽपि ध्वनेरश्रवणात् युक्तं तथाविधत्वम् ॥

तस्य जपस्य "शोंसावोम्" इत्येतस्मादाह्वानात् पूर्वभावित्वं विधत्ते— "पुराऽऽहावाज्जपति ; यद्वै किञ्चोर्ध्वमाहावाच्छस्त्रस्यैव तत्" इति । अध्वर्युराह्वयते येन शोंसावो मितिमन्त्रेण, तस्मात् पूर्वभावी होतृजपः । तथा चाश्वलायनेनोदाहृतम्— "जपित्वाऽनभिहिङ्कृत्य शोंसावो मित्युच्चैराहूय" इति (आ० ५. ९. १.) । आहावादूर्ध्वं यत्किञ्चिज्जप्यते, तत्सर्वं शस्त्रस्यैव सम्बन्धि भवेत् ; आहावमन्त्रेण शस्त्रानुष्ठानस्य प्रारब्धत्वात् । अतो होतृजपस्य शस्त्रान्तर्भावं निवारयितुं पूर्वकालीनत्वम् ॥

अथाह्वाने प्रकारविशेषं विधत्ते— "पराङ् तं चतुष्पद्यासीन मभ्याह्वयते ; तस्मात्पराञ्चो भूत्वा चतुष्पादो रेतः सिञ्चन्ति" इति । अस्मिन् काले अध्वर्युः 'पराङ् भवति' होतुर्विमुखो भवति । तथा 'चतुष्पदी' गौरिव हस्तौ भूमाववस्थाप्य आसीनो भवति ; तादृशमध्वर्युं [illegible] अभिमुखो यथा भवति तथा होता शोंसावो मितिमन्त्रेण आह्वयते । यस्मादाह्वानकाले ईदृशो

---

* १९४ पृ० [illegible] द्रष्टव्यम् ।

ऽध्वर्युस्तस्माल्लोकेऽपि 'चतुष्पादः' गवादयः 'पराञ्चः' सम्भोगावस्थायां परस्पराभिमुख्यरहिता भूत्वा रेतः सिञ्चन्ति ॥

आह्वावादूर्ध्वमध्वर्योश्चतुष्पात्त्वं परित्यज्य सम्यगुत्थानं विधत्ते — "सम्यङ् द्विपाद् भवति; तस्मात्सम्यञ्चो भूत्वा द्विपादो रेतः सिञ्चन्ति"-इति। ऊर्ध्वत्वेनोत्थानं सम्यक्त्वम्; तथाविधो भूत्वा रेतः सिञ्चति। जपितव्यो यो मन्त्रस्तस्यादौ "सु-मद्-पद्-वग्-दे"-इति पञ्चाक्षराणि पठितव्यानि। तानि च पूर्वमेवाक्षरपङ्क्तिप्रशंसायां (३९२ पृ०) विहितानि ॥

तेभ्य ऊर्ध्वं यो जपितव्यो मन्त्रः, तस्य प्रथमभागमनूद्य व्याचष्टे — "पिता मातरिश्वेत्याह ;— प्राणो वै पिता, प्राणो मातरिश्वा, प्राणो रेतो, रेतस्तत्सिञ्चति"-इति। तस्मिन् मन्त्रे यजमानस्य नूतनं जन्म सम्पाद्यते, अतोऽत्र मातरिश्वा वायुः पितृत्वेन वर्ण्यते। तमिमं पित्रेत्यादिकं मन्त्रं* होता ब्रूयात्। प्राण एव लोके 'पिता'; मृतात्पितृदेहात् जन्मासम्भवात्। वायुश्च प्राणः; प्राणस्य वायुकार्यत्वात्। रेतश्च प्राणः; प्राणयुक्तस्यैव रेतसो जननहेतुत्वात्। अतएवारण्यके समाम्नायते† — "यद्वा ऋते प्राणाद्रेतः सिच्येत, पूयेन्न सम्भवेत्"-इति‡। 'तत्' तेन प्रथमभागपाठेन यजमानस्य पुनर्जन्मार्थं रेतः सिक्तं भवति ॥

द्वितीयभागमनूद्य व्याचष्टे — "अच्छिद्रा पदाऽधा इति;— रेतो वा अच्छिद्रमतो ह्यच्छिद्रः सम्भवति"-इति। स वायुरूपः

---

* एष मन्त्रोऽन्यशाखीय इति आश्वलायनेन प्रपञ्च्य विहितः— "पिता मातरिश्वाच्छिद्रा पदाधादच्छिद्रोक्था कवयः शंसन्। सोमो विश्वविन्नीथा निनेषद् बृहस्पतिरुक्थामदानि शंसिषद् वागायुर्विश्वायुर्विश्वमायुः क इदं शंसिष्यति स इदं शंसिष्यतीति"-इति श्रौ० ५.९.१। 'पदाधाः'-'पदाधात्'—इति ब्राह्मणसूत्रयोः पाठौ।

† "समाम्नायते" च। ‡ ऐ० आ० १.२.१.५।

पिता छिद्ररहितं पदं प्रापणीयं रेतः 'अधाः' गर्भाशये स्थापितवान्। अत्रोक्तमच्छिद्रं वस्तु रेत एव। अतो हि रेतसः पुमान् अच्छिद्र उत्पद्यते ॥

तृतीयभागमनूद्य व्याचष्टे— "अच्छिद्रोक्था कवयः शंसन्निति ;— ये वा अनूचानास्ते कवयस्त इदमच्छिद्रं रेतः प्रजनयन्नित्येव तदाह" इति। 'कवयः' पुरुषाः 'अच्छिद्रोक्था शंसन्' छिद्ररहितमुक्थं शस्त्रं शंसन्ति। अत्र कविशब्देनानूचानाः षडङ्गसहितवेदाध्यायिन उच्यन्ते। ते इदमच्छिद्रं रेतः प्रजनयन् उत्पादयन्तीति। अनेनैव प्रकारेण तदच्छिद्रोक्थेति वाक्यम 'आह' ब्रूते ॥

चतुर्थभागमनूद्य व्याचष्टे— "सोमो विश्वविन्नीथा निनेषद् बृहस्पतिरुक्थामदानि शंसिषदिति ;— ब्रह्म वै बृहस्पतिः, क्षत्रं सोमः ; स्तुतशस्त्राणि नीथानि चोक्थामदानि च, दैवेन चैवैतद् ब्रह्मणा प्रसूतो दैवेन च क्षत्रेणोक्थानि शंसति" इति। 'विश्ववित्' सर्वज्ञः सोमो 'नीथानि' नेतव्यानि अनुष्ठेयानि स्तोत्रशस्त्राणि 'निनेषत्' नेतुमिच्छां कृतवान्, प्रयुक्तवानित्यर्थः। तथा बृहस्पतिः 'उक्थामदानि' शस्त्ररूपाणि मन्त्रोच्चारणानि 'शंसिषत्' शंसितुमिच्छति, शस्तवानित्यर्थः। अस्मिन् भागे बृहस्पतिसोमशब्दाभ्यां ब्राह्मणक्षत्रियजातिद्वयं विवक्षितम्, नीथशब्देन उक्थामदशब्देन च स्तोत्रशस्त्राणि विवक्षितानि। अत एवैतद्भागपाठे सति दैवसम्बन्धिना ब्राह्मणेन क्षत्रियेण च प्रेरितः शस्त्राणि शंसति। सोमबृहस्पत्योः सर्वकर्मप्रेरकत्वप्रसिद्धिं दर्शयति— "एतौ ह वा अस्य सर्वस्य प्रसवस्येशाते यदिदं किञ्च" इति। यदिदमनुष्ठितं यत्किञ्चिदस्ति, अस्य सर्वस्य प्रसवो यत्

प्रेरणं, तस्य सोमबृहस्पती एव स्वामिनौ। व्यतिरेकमुखेनैतदेव द्रढयति— "तद्यदेताभ्या मप्रसूतः करोत्यकृतं तदकृत मकरिति वै निन्दन्ति"-इति। 'तत्' तथा द्वयोः प्रेरकस्वामित्वे सति 'यत्' अङ्ग मेताभ्या मप्रेरितः करोति, 'तत्' अङ्ग मकृतं मेव भवति। लोकेऽपि स्वाम्यनुज्ञा मन्तरेण यत् क्रियते, तत्र 'अकृतम् अकः' अकर्त्तव्यं कृतवानिति जना निन्दन्ति॥ वेदनं प्रशंसति— "कृत मस्य कृतं भवति, नास्याकृतं कृतं भवति, य एवं वेद"-इति। 'अस्य' वेदितुः 'कृतं' कर्त्तव्य मेव 'कृतं भवति', न तु 'अकृतम्' अकर्त्तव्यं कृतं भवति॥

पञ्चमभाग मनूद्य व्याचष्टे— "वागायुर्विश्वायुर्विश्व मायुरित्याह;— प्राणो वा आयुः, प्राणो रेतो, वाग्योनिर्योनिन्तदुपसन्धाय रेतः सिञ्चति" इति। येयं 'वाक्' इन्द्रियरूपा, यदपि 'आयुः' जीवनम्, तदुभयम्, अस्त्विति शेषः। न चास्यायुरल्पं विवक्षितं किन्तु 'विश्वायुः' विश्वं समस्तं शतसंवत्सरपरिमित मायुर्विवक्षितम्; तस्माद्विश्व मायुः यजमानः प्राप्नोत्वित्यध्याहारः। त मिमं भागं पठेत् अत्रायुःशब्देन प्राण एव विवक्षितः; "यावद्ध्यस्मिञ्छरीरे प्राणो वसति तावदायुः"-इति श्रुतेः। रेतसः प्राणत्वं पूर्व मेवोदाहृतं (४६० पृ०) वाक्शब्देन योनिरुपलक्ष्यते। तथा सति तद्भागपाठेन योनि मुपसन्धाय गर्भस्थान मभिलक्ष्य रेतः सिञ्चति॥

षष्ठं भाग मनूद्य व्याचष्टे— "क इदं शंसिष्यति, स इदं शंसिष्यतीत्याह;— प्रजापतिर्वै कः प्रजापतिः प्रजनयिष्यतीत्येव तदाह"-इति। 'कः' प्रजापतिः 'इदं' शस्त्रं 'शंसिष्यति' शंसितु मिच्छति। अतः स एवेदं शंसिष्यति। त मिम मन्तिमभागं

ब्रूयात् । अत्र क-शब्देन प्रजापतेरुक्तत्वात् स एव यजमानमुत्पादयिष्यति 'इति' अनेनैव प्रकारेण तन्मन्त्रवाक्यं ब्रूते ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां पञ्चमाध्याये
षष्ठः खण्डः ॥ ६ (३८) ॥

॥ अथ सप्तमः खण्डः ॥

आहूय तूष्णींशंसं शंसति रेतस्तत् सिक्तं विकरोति सिक्तिर्वा अग्रे ऽथ विकृतिरुपांशु तूष्णींशंसं शंसत्युपांश्विव वै रेतसः सिक्तिस्तिर इव तूष्णींशंसं शंसति तिर इव वै रेतांसि विक्रियन्ते षट्पदं तूष्णींशंसं शंसति षड्विधो वै पुरुषः षळङ्ग आत्मान मेव तत् षड्विधं षळङ्गं विकरोति तूष्णींशंसं शस्त्वा पुरोरुचं शंसति रेतस्तद्विकृतं प्रजनयति विकृतिर्वा अग्रे ऽथ जातिरुच्चैः पुरोरुचं शंसत्युच्चैरेवैनं तत् प्रजनयति द्वादशपदां पुरोरुचं शंसति द्वादश वै मासाः संवत्सरः संवत्सरः प्रजापतिः सो ऽस्य सर्वस्य प्रजनयिता स यो ऽस्य सर्वस्य प्रजनयिता स एवैनं तत्प्रजया पशुभिः प्रजनयति प्रजात्यै प्रजा-

यते प्रजया पशुभिर्य एवं वेद जातवेदस्यां पुरोरुचं शंसति जातवेदोन्यङ्गां तदाहुर्यत्तृतीयसवन मेव जातवेदस आयतन मथ कस्मात् प्रातःसवने जातवेदस्यां पुरोरुचं शंसतीति प्राणो वै जातवेदाः स हि जातानां वेद यावतां वै स जातानां वेद ते भवन्ति येषा मु न वेद किमु ते स्युर्यो वा आज्य आत्मसंस्कृतिं वेद तत्सुविदितम् ॥७ (३९)॥

आहावात् पूर्वकालीनं जप मुक्त्वोत्तरकालीनं तूष्णींशंसं विधत्ते—"आहूय तूष्णींशंसं शंसति। रेतस्तत्सिक्तं विकरोति;—सिक्तिर्वा अग्रे ऽथ विकृतिः"-इति। शोंसावो मितिमन्त्रेण अध्वर्यु मुपहूय पश्चात् तूष्णींशंसं पठेत्। तथा सति होतृजपेन सिक्तं रेतो ऽनेन 'विकरोति' पिण्डाद्याकारं रेतसि जनयति। सेकः पूर्वभावी, विकारः पश्चाद्भावीति युक्तोऽयं क्रमः ॥

शंसनकाले ध्वनिराहित्यं विधत्ते—"उपांशु तूष्णींशंसं शंसत्युपांश्विव वै रेतसः सिक्तिः" इति। परैर्ध्वनिरश्रव्यत्वादपठितसदृशं भवतीत्यस्य तूष्णींशंस इति नामधेयम्। तस्मात्तदनुसारेणोपांशूच्चारयेत्; रेतःसेकोऽप्युपांशुसदृशः, रहसि क्रियमाणत्वात् ॥
उपांशुत्वेन होतृजपसाम्यप्रसक्तौ वैषम्यं विधत्ते—"तिर इव तूष्णींशंसं शंसति, तिर इव वै रेतांसि विक्रियन्ते"-इति। यथा कुड्यकटादिव्यवहितं मन्त्रैरधीयमानं वाक्य मीषत् प्रतीयते, न तु स्पष्टम्, तद्वत् तूष्णींशंसोऽपि अस्पष्टो यथा भवति तथा शंसेत्; तदिदं 'तिर इव'-इत्युच्यते; होतृजपादीषदुच्चैरित्यर्थः ॥

तूष्णींशंसस्येयत्तां विधत्ते— "षट्पदं तूष्णींशंसं शंसति; षड्विधो वै पुरुषः, षडङ्ग आत्मान मेव तत् षड्विधं षडङ्गं विकरोति" -इति । 'षट्पद' षड्भागम्;— भूरग्निर्ज्योतिरित्येको भागः, ज्योतिरग्निरिति द्वितीयो भागः; एव मुत्तरत्रापि द्रष्टव्यम् * । तथाविधशंसने पुरुषसाम्यं भवति । पुरुषस्य षड्विधत्व मेव 'षडङ्गः' इत्यनेन स्पष्टीक्रियते । पुरुषावयवषट्कं शाखान्तरे दर्शितम् — "षोढा विहितो वै पुरुष आत्मा च शिरश्चत्वार्यङ्गानि"-इति (तै० सं० ५.६.८.१.)। द्वौ हस्तौ द्वौ पादावित्यङ्गचतुष्टयम् । आत्मशब्दो मध्यदेहवाची । भागत्रयोपेते तूष्णींशंसे तत्तद्भागस्याभ्यासे षड्भागत्वं भवति । आश्वलायन आह— "भूरग्निर्ज्योतिर्ज्योतिरग्निरिन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्रः सूर्यो ज्योतिर्ज्योतिः स्वः सूर्य इति त्रिपदस्तूष्णींशंसो यद्यु वै षट्पदः पूर्वान्पूर्वानभ्यस्येत्" इति (५. ९. ११.)। अतः षट्पदं तूष्णींशंसेन यजमानस्य शरीर मेव षडङ्गोपेतं कृत्वा विकरोति ॥

एतदानन्तर्यं निविदो विधत्ते-- "तूष्णींशंसं शस्त्वा पुरोरुचं शंसति, रेतस्तद्विकृतं प्रजनयति; विकृतिर्वा अग्रेऽथ जातिः" -इति । "प्र वो देवाय" इत्यादिः सूक्तात् पुरतो दीप्यते रोचते इति पुरोरुक्शब्देन निर्दिश्यते; तां तूष्णींशंसादूर्ध्वं पठेत् । तेनोर्ध्वपातेन षडङ्गतया विकृतं रेतः शरीररूपेणोत्पादितं भवति । विकारः पूर्वभावी जन्म पश्चाद्भावि; तस्मात् तदानन्तर्यं निविदो युक्तम् ॥

षोढजपगतं यदुपांशुत्वं, तूष्णींशंसगतं च यदीषदुच्चस्वरत्वं,

---

* ४३१पृ० "ख" टीकायां द्रष्टव्या।

तस्मादुभयत आहैतलक्षणं निविदो विधत्ते— "उच्चैः पुरोरुचं शंसत्युच्चैरेवैनं तत्प्रजनयति"-इति । उत्पादनकाले प्रसवे वेदनया तज्जातोच्चैर्ध्वनिं करोति, तदिदम् 'उच्चैः प्रजनयति'-इत्युच्यते ॥

निविदां न्यूनाधिकभागशङ्काव्युदासाय सङ्ख्यां विधत्ते— "द्वादशपदां पुरोरुचं शंसति, द्वादश वै मासाः संवत्सरः, संवत्सरः प्रजापतिः, सा ऽस्य सर्वस्य प्रजनयिता ; स एवैनं तत्प्रजया पशुभिः प्रजनयति प्रजात्यै"-इति । निविदो द्वादशभागाः पूर्वमेव तद्व्याख्याने विवेचिताः (४३८—४४३ पृ०) ; अतो माससङ्ख्यासाम्यान्माससंवत्सरद्वारा सर्वस्य जगत उत्पादकत्वेन प्रसिद्धः प्रजापतिरेवेयं पुरोरुक् भवति । तादृश्याः पाठे सति प्रसिद्धिः । सर्वस्योत्पादको यः प्रजापतिरस्ति, स एव 'एनं' यजमानं प्रजापशुसहितं प्रजनयति । तस्मादेतच्छंसनं प्रजात्यै सम्पद्यते ॥

वेदनं प्रशंसति— "प्रजायते प्रजया पशुभिर्य एवं वेद"-इति ॥

देवताद्वारा पुरोरुचं प्रशंसति— "जातवेदस्यां पुरोरुचं शंसति जातवेदोन्यङ्गाम्"-इति । जातवेदा देवता यस्याः पुरोरुचः, सा 'जातवेदस्या' । जातवेदःशब्दरूपं 'न्यङ्ग' नितरामङ्ग' चिह्नं यस्याः पुरोरुचः सा 'जातवेदोन्यङ्गा' ; तस्याः पुरोरुचो ऽन्तिमे भागे,— "सो अध्वरा करति जातवेदाः" इति (४४०पृ० २पं०) जातवेदः-शब्दः पठ्यते ॥

उक्त मर्थ माक्षिपति— "तदाहुर्यत् तृतीयसवन मेव जातवेदस आयतन मथ कस्मात्प्रातःसवने जातवेदस्यां पुरोरुचं शंसतीति"-इति । तृतीयसवनस्य जातवेदसं प्रत्यायतनत्व माग्निमारुतशस्त्रे देवत्वादवगन्तव्यम् । तथा च सम्प्रदायविद आहुः— "जातवेदास्तु देवोऽयं वर्त्तत आग्निमारुते"-इति । यस्मादेवं तस्मात्

प्रातःसवने जातवेदस्यायाः शंसने कारणं नास्तीति चोद्यं तद्वादिन आहुः ॥

तस्य परिहारं दर्शयति — "प्राणो वै जातवेदाः, स हि जातानां वेद, यावतां वै स जातानां वेद, ते भवन्ति ; येषामु न वेद, किमु ते स्युर्यो वा अस्य आत्मसंस्कृतिं वेद, तत् सुविदितम्" —इति । अत्र जातवेदः-शब्देन प्राण एवाभिधीयते, न त्वग्निः ; अत एवान्तिमभागव्याख्याने "आयुर्वै जातवेदाः"-इत्याम्नातं (४४०पृ० ३ पं०)। यस्मात् स प्राणो 'जातानाम्' उत्पन्नानां शरीराणां स्वरूपं 'वेद' जानाति, लभत इत्यर्थः, तस्मात् प्राणस्य जातवेदा इति नामधेयम् । एवं सति प्राणो यावतामुत्पन्नानां शरीराणां स्वरूपं 'वेद' लभते, 'ते' देहा भवन्ति, स तान् भजते ; येषां तु देहानां स्वरूपं प्राणो 'न वेद' न लभते, 'ते' देहाः 'किमु स्युः' किमु विद्यमानतां भजेयुः ? न भजेयुरित्यर्थः । एवं सति जातवेदोनामकस्य प्राणस्य प्रतिपादिकायाः पूर्वोक्तर्चः पाठे यजमानो लब्धप्राणः सन् विद्यमानो भवति । अन्यथा अयं मृतकल्पः स्यात् । 'एवम्' उक्तप्रकारेण 'यः' यजमान आत्मगतां पुनर्जन्मस्वरूपां संस्कृतिं वेद, तत् तस्य यजमानस्य 'सुविदितं' सम्यक् ज्ञानमुत्पन्नम् । अनेन [illegible] [illegible] प्रोक्ता प्रशंसा [illegible]-स्यार्थवादस्य सर्वस्याप्युपसंहारो जातः ॥ ३९ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां पञ्चमाध्याये
सप्तमः खण्डः ॥ ७ (३९) ॥

॥ अथ अष्टमः खण्डः ॥

प्र वो देवायाग्नय इति शंसति प्राणो वै प्र प्राणं हीमानि सर्वाणि भूतान्यनु प्रयन्ति प्राण मेव तत्सम्भावयति प्राणं संस्कुरुते दीदिवांस मपूर्व्य मिति शंसति मनो वै दीदाय मनसो हि न किञ्चन पूर्व मस्ति मन एव तत्सम्भावयति मनः संस्कुरुते स नः शर्माणि वीतय इति शंसति वाग्वै शर्म तस्माद्वाचानुवदन्त माह शर्मवद्वा अस्या अयांसीति * वाच मेव तत्सम्भावयति वाचं संस्कुरुत उत नो ब्रह्मन्नविष इति शंसति श्रोत्रं वै ब्रह्म श्रोत्रेण हि ब्रह्म शृणोति श्रोत्रे ब्रह्म प्रतिष्ठितं श्रोत्र मेव तत्सम्भावयति श्रोत्रं संस्कुरुते स यन्ता विप्र एषा मिति शंसत्यपानो वै यन्तापानेन ह्ययं यतः प्राणो न पराङ् भवत्यपान मेव तत्सम्भावयत्यपानं † संस्कुरुत ऋतावा यस्य रोदसी इति शंसति चक्षुर्वा ऋतं तस्माद्यतरो विवदमानयोराहाह मनुष्ठ्या चक्षुषादर्श मिति तस्य श्रद्दधति चक्षुरेव तत्सम्भावयति चक्षुः संस्कुरुते नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वस्वित्युत्तमया परिदधात्यात्मा वै समस्तः सहस्रवांस्तोकवान् पुष्टिमाना-

---

* "अयांसि" 'क'-चिह्नितपुस्तकानाम्; "आयासि" अपरपुस्तकानाम्।

† "०त्यपान मेव" क।

त्मानमेव तत्समस्तं सम्भावयत्यात्मानं समस्तं संस्कुरुते याज्यया यजति प्रत्तिर्वै याज्या पुण्यैव लक्ष्मीः पुण्यामेव तल्लक्ष्मीं* सम्भावयति पुण्यां लक्ष्मीं संस्कुरुते स एवं विद्वाञ्छन्दोमयो देवतामयो ब्रह्ममयो ऽमृतमयः सम्भूय देवता अप्येति य एवं वेद यो वै तद्वेद यथा छन्दोमयो देवतामयो ब्रह्ममयो ऽमृतमयः सम्भूय देवता अप्येति तद्विदित मित्यध्यात्म मथाधिदैवतम् ॥ ८ (४०) ॥

अथ सूक्तगतां प्रथमामृचं विधत्ते — "प्र वो देवायाग्नय इति शंसति ; प्राणो वै प्र ; प्राणं हीमानि सर्वाणि भूतान्यनु प्रयन्ति ; प्राणमेव तत्सम्भावयति, प्राणं संस्कुरुते" इति । अस्याः प्रथमाया ऋच आदौ प्रशब्दः श्रूयते, स प्राणरूपः, [illegible] साम्यात् । 'हि' यस्मात् कारणात् 'सर्वाणि' इमानि 'भूतानि' जीवजातानि 'प्राणमनु प्रयन्ति' प्राणः प्रथमतो गच्छति, तमनु पश्चादिन्द्रियाः प्रयन्ति ; प्राणप्रयाणादूर्ध्वं [illegible] गमनात् । तत् तथा सति 'प्र'-शब्दयुक्तया ऋचा, शंसनेन प्राणं 'सम्भावयति' सम्भावितं पूजितं करोति । अनया पूजितो प्राणः संस्कृतः सन् स्वव्यापार-समर्थो भवति । तस्मादियमृक् (सं. ३.१३.१.) शंसनीया ॥

द्वितीयामृचं विधत्ते — 'दीदिवांसमपूर्व्य'मिति शंसति ; मनो वै दीदाय ; मनसो हि न किञ्चन पूर्वमस्ति ; मन एव

---

* "तं लक्ष्मीं" क, ग, घ, [illegible]

तत्सम्भावयति, मनः संस्कुरुते"-इति । यद्यप्यध्ययनक्रमेणेयं ऋक् पञ्चमी (सं० ३. १३. ५.), तथापि द्वितीयात्वेन प्रयोक्तव्या ; ब्राह्मणक्रमस्यानुष्ठानार्थत्वात् । 'दीदिवांसं' दीप्तियुक्तम्, 'अपूर्व्यम्' अस्मादन्येन पूर्वेण रहितम् ;—इत्येताभ्यां मन्त्रपदाभ्यां मनोऽभिधीयते ; तच्च मनः सर्वार्थप्रकाशकत्वात् 'दीदाय' दीप्तियुक्तं भवति । तथा अमनसोऽपि न किञ्चिदपीन्द्रियव्यापारवत्तास्ति ; मनसा सङ्कल्पितेष्वर्थेषु पश्चाद्वागादीन्द्रियाणां व्याप्रियमाणत्वात् । अत एवारण्यककाण्डे वक्ष्यति— "मनसा वा अग्रे सङ्कल्पयत्यथ वाचा व्याहरति"-इति * । अतो दीदिवांसमपूर्व्यमितिपदद्वयस्यार्थस्य मनसि विद्यमानत्वात् तच्छंसनेन मनसः सम्भावनासंस्कारौ सम्पद्येते । एताध्ययनक्रमादन्यमनुष्ठानक्रममभिप्रेत्याश्वलायन आह — "अनुब्राह्मणं वानुपूर्व्यम्"-इति (आ० ५. ९. १३.) ॥

अध्ययनक्रमेण चतुर्थीम् (सं० ३.१३.४.) अनुष्ठानाय तृतीयात्वेन विवक्ते— "स नः शर्माणि वीतय इति शंसति ; वाग्वै शर्म ; तस्माद्वाचानुवदन्तमाह शर्मवदास्मा अयांसीति ; वाचमेव तत्सम्भावयति, वाचं संस्कुरुते"-इति । 'सः' अग्निः 'नः' अस्मभ्यं 'वीतये' कामाय 'शर्माणि' सुखानि 'यच्छतु' इति मन्त्रपादस्यार्थः ।

---

* "यद्धि मनसा ध्यायति, तद् वाचा वदति"-इति, "यत् पुरुषो मनसाभिगच्छति, तद् वाचा वदति"-इति, "यद्धि मनसा जपते, तद् वाचा वदति ० - ० यद्धि मनसा चेतयते, तद् वाचा वदति ० — ० यद्धि मनसाभिगच्छति, तत् करोति"-इति च तै० सं० २.२. ११. ५ ; ५. १. ३. ३ ; ६. १. ७. ३ । "महदाख्यमाद्यं कार्यं तन्मनः"-इति कपि० सू० १. ७१ । "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्"-इति गौत० सू० १. १६ । "मनो नाम सङ्कल्पविकल्पात्मिकान्तःकरणवृत्तिः"-इति वेदा० सा० । "सुखदुःखाद्युपलब्धिसाधनमिन्द्रियं मनः"-इति त० सं० ।

अत्र शर्मशब्देन वागेव विवक्षिता । यस्मादेवं तस्माल्लोके स्वगुरूक्तमर्थं स्ववाचा सम्यगनुवदन्तं पुरुषमितरः प्रामाणिक एव आह— 'अस्मै' गुरूक्तार्थस्य सम्यगनुवादिने शिष्याय 'शर्मवत्' सुखयुक्तं जीवनं सम्पन्नं यस्मात्, तस्मात् हे शिष्य ! 'आयंसि' समन्ततः नियतोऽसि ; आङ्पूर्वस्य 'यमु उपरमे' इत्यस्य धातोश्छान्दसं रूपम् । 'आस्मै' इत्याकारश्छान्दसः । इत्येवं वाङ्नियमितस्य पुरुषस्य लौकिकैर्नोच्यमानत्वात् मन्त्रोक्त-'शर्म'-शब्देन वाग्विवक्षोपपन्ना । तन्मन्त्रपाठेन वाचः सम्भावनासंस्कारौ भवतः ॥

अध्ययनक्रमेण षष्ठीं ऋचम् (मं० ३. १२. ६.) अनुष्ठानाय चतुर्थीत्वेन विधत्ते — 'उत नो ब्रह्मन्नविष उक्थेषु' इति शंसति ; श्रोत्रं वै ब्रह्म ; श्रोत्रेण हि ब्रह्म शृणोति, श्रोत्रे ब्रह्म प्रतिष्ठितं ; श्रोत्रमेव तत् सम्भावयति, श्रोत्रं संस्कुरुते'' इति । 'उत' अपि च हे 'ब्रह्मन्' देवेषु ब्राह्मणरूपाग्ने ! 'नः' अस्मान् 'अविषः' रक्षसि । अस्मिन् मन्त्रे ब्रह्मशब्देन श्रोत्रं लक्ष्यम् ; श्रोत्रेण हि 'ब्रह्म' वेदपुरुषः शृणोति, 'श्रोत्रे' श्रवणे 'ब्रह्म' वेदवाक्यं 'प्रतिष्ठितं' कदाचिदप्यविस्मृतं भवति । तस्मात्तन्मन्त्रपाठेन श्रोत्रस्य सम्भावनासंस्कारौ भवतः ॥

अध्ययनक्रमेण तृतीयां ऋचम् (मं० ३. १२. ४.) अनुष्ठानाय पञ्चमीत्वेन विधत्ते — "स यन्ता विप्र एषामिति शंसति ; अपानो वै यन्ता ; अपानेन ह्ययं यतः प्राणो न पराङ् भवति : अपानमेव तत्सम्भावयत्यपानमेव संस्कुरुते'' इति । 'सः' अग्निः 'विप्रः' देवेषु ब्राह्मणः सन् 'एषां' मनुष्यादिप्राणिनां 'यन्ता' नियमनकर्ता । अस्मिन् मन्त्रे यन्तृशब्देनापानवायुरुपलक्ष्यते ; नियामकरूपेण अपानेन 'यतः' नियमितः प्राणवायुः 'पराङ् भवति' 'पर' बाह्यं दूरदेशम् अञ्चति

गच्छतीति पराङ् । यद्ययं बहिर्मुख उच्छ्वासरूपः प्राणवायुरपानवायुना न नियम्येत, तदा बहिरेव गच्छेत्, न पुनर्निवर्त्तेत, ततः पुरुषो म्रियेत, अतोऽपानस्य नियन्तृत्वं युक्तम् । एतन्मन्त्रपाठेनापानवायोः सम्भावनासंस्कारौ भवतः ॥

अध्ययनक्रमेण द्वितीया मृचं (सं० ३. १३. २.) षष्ठीत्वेनानुष्ठानाय विधत्ते — "ऋतावा यस्य रोदसी इति शंसति; चक्षुर्वा ऋतं, तस्माद्यतरो विवदमानयोराहाहमनुष्ठ्या चक्षुषादर्शमिति, तस्य श्रद्दधति, चक्षुरेव तत् सम्भावयति, चक्षुः संस्कुरुते" —इति । 'रोदसी' द्यावापृथिव्यौ 'यस्य' अग्नेः 'ऋतावा' सत्यवत्यौ । अस्मिन् मन्त्रगत ऋतशब्देन चक्षुरुपलक्ष्यते; यस्मादेवं तस्माल्लोके विवदमानयोः पुरुषयोः मध्ये यतरः पुमान् एव माह । कथमिति ? तदुच्यते — "अहं 'अनुष्ठ्या' अनुष्ठित्या प्रयत्नेन चक्षुषा 'अदर्शं' दृष्टवानस्मि" इति, 'तस्य श्रद्दधति' तदीयवचनं सर्वे विश्वसन्ति । दूरस्थे चूतवृक्षे फलमस्ति न वेति निर्णेतुं राजा द्वौ पुरुषौ प्रेषयति, तयोरन्यतमः कश्चिदापाततो दृष्ट्वा नास्तीति ब्रूते, अपरस्तु तत्र प्रयत्नेन दृष्ट्वा; यत्र क्वापि पर्णाच्छन्नं फलं सम्यक् दृष्टवानस्मि इति ब्रूते, तस्य वचने सर्वेषां विश्वासो जायते । तस्मात् सम्यग्दर्शिनश्चक्षुष ऋतत्वं युक्तम् । एतन्मन्त्रपाठेन चक्षुषः सम्भावनासंस्कारौ भवतः ॥

अध्ययनक्रमेणानुष्ठानक्रमेण च सप्तम्या (सं० ३.१३.७.) शस्त्रसमाप्तिं विधत्ते — "नू नो रास्व सहस्रवत्तोकवत् पुष्टिमद्वस्वित्युत्तमया परिदधाति; आत्मा वै समस्तः सहस्रवांस्तोकवान् पुष्टिमानात्मानमेव तत्समस्तं सम्भावयत्यात्मानं समस्तं संस्कुरुते" —इति । यद् 'वसु' धनं 'सहस्रवत्' सहस्रसंख्योपेतं 'तोकवत्'

सङ्ख्योपेतं 'पुष्टिमत्' समृद्धियुक्तमस्ति, तादृशं धनं 'नः' अस्मभ्यं 'तु' क्षिप्रमेव 'रास्व' अग्ने ! देहि । अनया अग्निमया आज्यग्रहं समापयेत् । अथ 'समस्तः' पूर्वोक्तप्राणमनोवागादिभिः सर्वैरिन्द्रियैः सम्पूर्णः 'आत्मा वै पुरुषः एव, सहस्रसङ्ख्योपेतधनयुक्तः, बन्धुभिरपत्यैरुपेतः, समृद्धियुक्तश्च विवक्षितः ; अतस्तत्पाठेन तादृशस्य पुरुषस्यैव सम्भावनासंस्कारौ भवतः ॥

शस्त्रस्यान्ते याज्यां विधत्ते— "याज्यया यजति ;—प्रत्तिर्वै याज्या, पुण्यैव लक्ष्मीः, पुण्यामेव तल्लक्ष्मीं सम्भावयति, पुण्यां लक्ष्मीं संस्कुरुते" इति । "अग्न इन्द्रश्च" इति येयं याज्या पूर्वमुक्ता *, तया 'यजति' यागार्थं याज्यां पठेत् । याज्या तु 'प्रत्तिर्' प्रदानरूपैव । तथा च हविष आदाने प्रदाने चानयोः पुरोनुवाक्यायाज्याख्याने सूत्रकारः सूत्रितं— "पुरोनुवाक्यया ऽऽदत्ते, प्रयच्छति याज्यया"—इति † । अतः प्रदानरूपत्वादियं पुण्यैव लक्ष्मीः ; शास्त्रीयत्वात् पुण्यत्वम्, फलस्य तत्सिद्धिहेतुत्वात्तत्कारणस्य दर्शनहेतुत्वाद्वा लक्ष्मीत्वम् । अतो याज्यापाठेन पुण्याया एव लक्ष्म्याः सम्भावनासंस्कारौ भवतः ॥

उक्तक्रमेणाग्नेयादिवेदनस्य फलं दर्शयति— "स एवं विद्वांश्छन्दोमयो देवतामयो ब्रह्ममयोऽमृतमयः सम्भूय देवता अप्येति य एवं वेद" इति । 'एवं विद्वान् इत्यस्य अनुतिष्ठन्' इत्याद्यर्थम् ।

---

* ४५५ पृ० २. ६. १५ पं. [illegible]

† "हविः [illegible] सा या [illegible] पुरोनुवाक्या स्यात् ० — — ० अथ [illegible] सा याज्या स्यात्"-इति च श्रौ० आ० १. ७. २. १७-१९ । 'पुरोनुवाक्या [illegible], याज्या च हविःप्रदानार्था'-इति कात्या० श्रौ० १. ८. ४०

वेदनपूर्वको ऽनुष्ठाता गायत्र्यादिच्छन्दःस्वरूपो वह्न्यादिदेवतास्वरूप ऋगादिवेदस्वरूपो मरणरहितो मोक्षस्वरूपः सन् 'सम्भूय' सर्वं जगदेकीकृत्य सर्वा देवताः प्राप्नोति। तदेतदनुष्ठातुः फलं य एवं वेदेत्यत्रापि विदुषः फलत्वेन छन्दोमयत्वादिक मावर्त्तनीयम्। अथवा य एवं वेदेत्युक्तस्यैव स एवं विद्वानित्यनूद्यमानत्वादिदं वाक्य मावर्त्तनीयम्। वेदनमात्रस्य कथ मीदृशं फल मित्याशङ्का सुवेदनत्वाद् युक्तं फल मित्येतद् दर्शयति— "यो वै तद्वेद यथा छन्दोमयो देवतामयो ब्रह्ममयो ऽमृतमयः सम्भूय देवता अप्येति तत् सुविदितम्" इति। येन प्रकारेण छन्दःप्राप्त्यादिपूर्वकं सर्वदेवताप्राप्तिर्भवति, 'तत्' तादृशं प्रकारं यो वेद, 'तत्' वेदनं 'सुविदितं' शोभनं ज्ञानम्, तस्माद् युक्तं फल मित्यर्थः॥

उक्तवक्ष्यमाणयोः प्रकारयोर्विभागं दर्शयति— "इत्यध्यात्म मथाधिदैवतम्" इति। आत्मानं शरीरं अधिकृत्य वर्तत इति 'अध्यात्मम्'। अस्मिन् खण्डे शरीररूपत्वेन प्रशंसन माज्यशस्त्रस्योक्तम उत्तरखण्डे तु 'अधिदैवतम्' देवताविषय माज्यशस्त्रप्रशंसनं सूच्यते॥ ८ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां पञ्चमाध्याये
अष्टमः खण्डः॥ ८ (४०)॥

॥ अथ नवमः खण्डः ॥

षट्पदं तूष्णींशंसं शंसति षड् वा ऋतव ऋतूनेव तत्कल्पयन्नृतूनप्येति द्वादशपदां पुरोरुचं शंसति द्वादश वै मासा मासानेव तत्कल्पयति मासानप्येति प्र वो देवायाग्नय इति शंसत्यन्तरिक्षं वै प्रान्तरिक्षं हीमानि सर्वाणि भूतान्यनु प्रयन्त्यन्तरिक्षमेव तत्कल्पयन्नन्तरिक्षमप्येति दीदिवांसमपूर्व्यमिति शंसत्यसौ वै दीदाय योऽसौ तपत्यसौ ह्यपूर्व्योऽसौ हि न किंचन पूर्वमस्त्यमुमेव तत्कल्पयन्नमुमप्येति स नः शर्मणि वीतय इति शंसत्यग्निर्वै शर्माण्यन्नाद्यानि यच्छत्यग्निमेव तत्कल्पयन्नग्निमप्येत्युत नो ब्रह्मन्नविष इति शंसति चन्द्रमा वै ब्रह्म चन्द्रमसमेव तत्कल्पयंश्चन्द्रमसमप्येति स यन्ता विप्र एषामिति शंसति वायुर्वै यन्ता [illegible] अन्तरिक्षं न [illegible] वायुमेव तत्कल्पयन्वायुमप्येत्यृतावा यस्य रोदसी इति शंसति द्यावापृथिवी वै रोदसी द्यावापृथिवी एव तत्कल्पयन्द्यावापृथिवी अप्येति नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वस्वित्युत्तमया परिदधाति [illegible] संवत्सरः सहस्रवांस्तोकवान् पुष्टिमान्संवत्सरमेव तत्कल्पयन्

कल्पयति संवत्सरं समस्त मप्येति याज्यया यजति वृष्टिर्वै याज्या विद्युदेव विद्युद्धीदं वृष्टि मन्नाद्यं सम्प्रयच्छति विद्युत मेव तत्कल्पयति विद्युत मप्येति स एवं विद्वानेतन्मयो देवतामयो भवति भवति ॥ ८ (४१) ॥

॥इत्यैतरेयब्राह्मणे द्वितीयपञ्चिकायां पञ्चमोध्यायः ॥५॥

पूर्वोक्तक्रमेणैव देवताविषयशस्त्रप्रशंसनं विवक्षित्वा प्रथमं भूरग्निरित्यस्य प्रशंसां दर्शयति---"षट्पदं तूष्णींशंसं शंसति; षड् वा ऋतव ऋतूनेव तत् कल्पयत्यृतूनप्येति"-इति। भूरग्निरित्यादीनां भागानां षट्संख्यासाम्याद् ऋतुत्वे सति तत्पाठेन ऋतून् स्वभोगप्रदानसमर्थान् करोति, तान् ऋतून् देवान् प्राप्नोति॥

निविदः प्रशंसां दर्शयति---"द्वादशपदां पुरोरुचं शंसति; द्वादश वै मासा मासानेव तत्कल्पयति, मासानप्येति" इति। निविदां पाठेन मधुमाधवादीन् मासान् स्वात्मभोगाय सम्पादयति, प्राप्नोति च॥

सूक्तप्रथमां ऋचं प्रशंसति---"प्र वो देवायाग्नय इति (सं० ३. १३. १.) शंसत्यन्तरिक्षं वै प्रान्तरिक्षं हीमानि सर्वाणि भूतान्यनुप्रयन्त्यन्तरिक्ष मेव तत्कल्पयत्यन्तरिक्ष मप्येति" इति। सर्वं

---

* "मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च, सहश्च सहस्यश्च तपश्च तपस्यश्च"-इति तै० सं० १. ४. १४।

ाणिनो ऽन्तरिक्ष मनुसृत्य तिष्ठन्ति । तस्मिन्नवकाशे प्रकृष्टगमनादन्तरिक्षस्य 'प्र'-शब्दवाच्यत्वम् ॥

अनुष्ठानक्रमेण द्वितीया मृचं प्रशंसति— "दीदिवांस मपूर्व्य मिति (सं० २. १२. ५.) शंसत्यसौ वै दीदाय यो ऽसौ तपत्येष ह्यस्माद्धि न किञ्चन पूर्व मस्त्येत मेव तत्कल्पयत्येत मप्येति" इति । यो ऽसौ आदित्यः 'तपति' जगति सन्तापं करोति, असौ वै दीदाय' दीप्यते; तस्मादुदयात् पूर्वम् अन्धकारे किमपि प्राणिजातं व्यापारकर्तृ नास्ति; तस्मादादित्यस्य दीदिवांस मपूर्व्य मिति-दृचयाभिधेयत्वम् ॥

तृतीया मृचं दर्शयति— "स नः शर्माणि वीतय इति (सं० . १२. ४.) शंसत्यग्निर्वै शर्माण्यन्नाद्यानि यच्छत्यग्निमेव तत् कल्पयत्यग्नि मप्येति" इति । सुखकराणि अत्तुं योग्यानि अन्नानि पाकेन प्रयच्छतीति अतः शर्मशब्दवाच्यत्वम् ॥

चतुर्थीमृचं दर्शयति— "उत नो ब्रह्मन्नविष इति (सं० २. १२. ६.) शंसति; चन्द्रमा वै ब्रह्म; चन्द्रमस मेव तत् कल्पयति, चन्द्रमस मप्येति" इति । नक्षत्रादिप्रकाशेषु मुख्यत्वाच्चन्द्रमसो ब्रह्मत्वम् ॥

पञ्चमीमृचं दर्शयति— "स यन्ता विप्र एषा मिति (सं० २. १२. ३.) शंसति; वायुर्वै यन्ता; वायुना हीदं यत मन्तरिक्षं न समृच्छति; वायु मेव तत् कल्पयति, वायु मप्येति" इति । 'इदं' दृश्यमानं सूर्यचन्द्रनक्षत्रादिमण्डलं सर्वं वायुना 'यतं' नियमितं सत् अन्तरिक्षे 'न समृच्छति' सम्यक् न प्राप्नोति, वायुनियमाभावे सम्यक् प्राप्नुयात्,—अन्तरिक्षस्य निरवधिकत्वेन तस्मिन् यत्र क्वापि च्छेदित्यर्थः । तस्माद्वायुर्यन्ता ॥

षष्ठी मृचं दर्शयति— "ऋतावा यस्य रोदसी इति (सं० ३. १३. २.) शंसति ; द्यावापृथिवी वै रोदसी ; द्यावापृथिवी एव तत् कल्पयति, द्यावापृथिवी अप्येति"-इति । रोदः-शब्दवाच्यत्वं द्यावापृथिव्योर्लोकेऽपि प्रसिद्धम् ॥

सप्तमी मृचं दर्शयति— "नू नो रास्व सहस्रवत्तोकवत् पुष्टिमद्वस्वित्युत्तमया (सं० ३.१३.७.) परिदधाति; संवत्सरो वै समस्तः, सहस्रवांस्तोकवान् पुष्टिमान्संवत्सर मेव तत् समस्तं कल्पयति, संवत्सरं समस्त मप्येति" इति । चैत्रादिफाल्गुनान्तः 'समस्तः' संवत्सरः, सहस्रादिविशेषणयुक्तः ; संवत्सरेण हि धनिकानां वृद्धिः सहस्रसङ्ख्याका सम्पद्यते, 'तोकानि' अपत्यानि गर्भधारणमारभ्य संवत्सरमध्ये एवोत्पद्यन्ते, वीर्यैः कृतानां शरीराणां मांसेन सति संवत्सरमध्ये पुष्टिर्भवति ॥

शस्त्रयाज्यां दर्शयति— "याज्यया यजति ; वृष्टिर्वै याज्या विद्युदेव, विद्युद्धीदं वृष्टिं सन्नाद्यं सम्प्रयच्छति, विद्युत मेव तत् कल्पयति, विद्युत मप्येति" इति । याज्यया प्रक्षिप्तं हविर्वृष्टिपर्यवसितं भवति । तथा च स्मर्यते (म० सं० ३.७६.)—

"अग्नौ प्रास्ताहुतिः सम्यगादित्य मुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥" इति । वृष्टिश्च विद्युत् पुरःसरत्वाद् 'विद्युदेव', यस्मात् मेघेषु उत्पन्ना विद्युत् वृष्टिं सम्पाद्य तद्द्वारेणान्नं प्रयच्छति, तस्माद्वृष्टिर्विद्युदेव ॥

वेदनं प्रशंसति— "स एव विद्वानेतन्मयो देवतामयो भवति भवति" इति । 'एतन्मयः' वसन्तग्रीष्मादिविद्युदन्तवस्तुमयो भूत्वा तदभिमानिदेवतानां भोगं प्राप्नोति ॥

अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ८ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां पञ्चमाध्याये
नवमः खण्डः ॥ ९ (४१) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायाः पञ्चमोऽध्यायः ॥

यज्ञेन वै दश(१) । देवा वै यज्ञ मष्टौ(२) । ऋषयो वै षट्(३) । देवा वै सोमस्याष्टौ(४) । ब्रह्म वै नव(५) ॥२ * ॥

यज्ञेन वै, देवा वै, शिरो वा एतद्, देवा वै यद्देवैकादश ॥ २ † ॥

॥ इति द्वितीयपञ्चिका समाप्ता ॥

---

*, † १९६ पृ० टीप्पणीद्वयं द्रष्टव्यम् ।